శ్రీ ర స్తు.

భూమికా

భో భో ఆస్తికవర్యాః,

కేచిత్ రజోఽనంతర వివాహం సముద్రయానం చ న శాస్త్రనిషిద్ధమితి కేచి
చ్చ తదుభయం నిషిద్ధమితి చ వర్తయంతః ధర్మతత్త్వవిషయే వ్యామోహయన్తి
సమానస్మాదృశానితి ధర్మతత్త్వజిజ్ఞాసయాఽస్మాభి రస్మదీయాఽద్వై
తసభాయాం ప్రార్థితాః పండితవర్యాః శ్రీమత్పరమహంస పరివ్రాజకా
చార్యా స్వరూపానందేంద్ర సరస్వత్యః పండితవర్యాః బ్రహ్మశ్రీ చిదం
బరం హరిహరశాస్త్రిణః [illegible] సభాపండితాః బ్ర
హ్మశ్రీ కృష్ణశాస్త్రిణః, [illegible] సభాపండితాః బ్రహ్మశ్రీ వేంకటసు
బ్రహ్మణ్యశాస్త్రిణః [illegible] విచార్య ఉభయోశ్శాస్త్రీయతా
యామేవ శాస్త్రసిద్ధాం [illegible] గ్రంథరూపేణ
ప్రకటనీయ [illegible] తిరుపతి శ్రీవేంకటేశ్వరవిద్యా
శాలా ప్రధానసహాయోపాధ్యాయాః బ్రహ్మశ్రీ అనంతకృష్ణశాస్త్రిణః
ద్రావిడ్యేవ సముపాపురన్నితి సంతుష్టాంతరంగా వయం సతతమేవ తే
షాం కృతజ్ఞతా మావిష్కుర్మహే. ॥ అస్మిన్ఖలు గ్రంథవిచారితాః సము
వేశనాంగత్వ త్రిరాత్రబ్రహ్మచర్యస్సృత్యర్థ మస్త్రిలింగప్రాబల్యా ఉ
దయోఽనుల్లంఘిత శాస్త్రసిద్ధాన్తాస్సుతరామేవ స్వరూపానందేంద్ర స
రస్వతీప్రభృతిభిః పండితవర్యైః బహుభిరామోదితాశ్చ మహాజనలోకో
పకారాయ కల్పేరన్నితి గ్రంథమిమం ప్రకాశయామః॥

శూద్రాదయోఽపి — యేషాం రజోనంతరమపి వివాహోనదో షాయతే ఽపి రజోదర్శనతః పూర్వమేవ వివాహో యుక్త ఇతితమి దానీమాచరన్తీతి స్థితే బ్రాహ్మణానాం తాదృశ సమయపరికల్పనార్థయత్నః కలివిజృంభిత ఏవేతి నిశ్చిన్మః — [illegible] ఏవం సముద్రయానవిషయేఽపి వర్ణసాంకర్యాపత్తేరితి భ్రంశోఽపత్త్యా న శూద్రాదీనామపి తదధర్మాచరిత్రతే బ్రాహ్మణానాం — యేషాం కృతే ప్రాయశ్చిత్తానామపి సంప్రదాయశాస్త్రసిద్ధిః — తేషాం తదనుజ్ఞాన సమయకల్పనార్థా ప్రవృత్తిరపి కలిజృంభితైవేతి మన్యామహే॥

ఏవంచ యథార్థ సాంక్రామికం శాస్త్రస్యాస్పష్టత్వాత్ తథా శాస్త్రపరం [illegible] యాయాము [illegible] మేవ సర్వేషా ముద్యోగం [illegible] [illegible].

ఇతి

[illegible] సభాకార్యదర్శి

కుపివాడ — రాఘవార్యః;

ప్రస్తావన.



శ్రీనివాసోవిజయతే.

మాతా మహామహాశైలం మహాస్తదపి తామహం।
కారణంజగతాంవన్దే కణ్ఠామపరివారణం॥

ఆర్యాః—విదితచరమె వేదం తత్రభవతాంభవతాం, యద్ధర్మార్థకామమోక్షా ఇతి చత్వారః పురుషార్థాః; ధర్మాశ్చ వర్ణాశ్రమభేదేన బహుధా విభక్తాః. బ్రాహ్మణ్యాదివర్ణభేదశ్చ జాతిబ్రాహ్మణ్యాదినా కర్మబ్రాహ్మణ్యాదినాచ ద్వివిధః. తత్రచకర్మబ్రాహ్మణ్యాద్యేవ పరమోత్కృష్టమితి.

తత్ర—యథాపుంసాం జాతిబ్రాహ్మణానాముపనయనంవినా న కర్మబ్రాహ్మణ్యసిద్ధిరేవం స్త్రీణామపి తాదృశీనాం వివాహం వినానతాదృశబ్రాహ్మణ్య సిద్ధిరిత్యవశ్యకర్తవ్యేషు కృత్యేషు వివాహమపి ముఖ్యం మన్వానాస్సర్వేఽపి కన్యాపితరస్తన్నిర్వర్తనేఽమాన్తమేవ క్లేశమనుభవన్తి. తత్రచకారణం బహుశతపరిమిత వరదక్షిణానిమిత్త నిర్బంధఏవ. తత్ప్రసక్తిశ్చ స్త్రీమాత్రవిషయేఽదృష్టరజః కాలనియమెనైవ సంపన్నతే.

తత్ర యదిపుంసామివస్త్రీణామపి విషయె వివాహకాలనియమోనాస్తీతి సమయోభవిష్యతి తర్హి వరదక్షిణానిమిత్త నిర్బన్ధస్యాపినా

వసరః స్యాత్. యత్ర తు శూద్రస్త్రీవిషయే వైతాదృశకాలనియమో నైతాదృశనిర్బంధస్తత్ర దృశ్యత ఇత్యాశయః ఏవం సముదాయార్థపరికల్పనం ఉక్తనిర్బంధపరిహారః. తత్రాపి సర్వథాపి కాలనియమాభావే పంచాశద్వర్షః షోడశవర్షాం వివాహయేత్ వివాహానాం వివాహస్థానం స్యాదితి శాస్త్రాగ్రకాలత్వేన ... నయా ఏవ పరమార్థ ఇతి కల్పనే సదోషత్వమవ్యాహతం.

ఇదానీన్తనస్య రజోదర్శనాత్ ప్రాగేవ వివాహ ఇతి సమయాచారపరంపరా న్యాయమూలా న కేవలాచారమూలకో న ప్రమాణమితి వక్ష్యామః. కేచిదింతేవ్యేవ సమయౌ రజోదర్శనానంతరమపి వస్త్రయంసహోమ ఇత్యేనసమాచః సాక్షిణః.

నను బాల్యవైధవ్యాది దుఃఖాన్యపరిహార్యాణి భవన్తి. మహర్షయోఽపి సమయే ... అపి తత్కన్యాపునర్వివాహమపి సమాయనన్తర రజోదర్శనానన్తర వివాహసమయకల్పన మప్యాపత్తికమిత్యభిప్రయన్తి.

ఏవం ... పునర్వివాహ నిషేధపరాణాం ... వచనానాం యుగాన్తరవిషయత్వేనోపపత్తిః ...

యుగాన్తరే హ్యుచిత కన్యాపునర్వివాహోఽపి ధర్మ్యత్వేనాంమత ఇతి న బాల్యవైధవ్యదోషః సమాపతతి ఇతి యుక్త్యాన్తరవివాహనిషేధవచనాని యథార్థాన్యేవేతి యుక్తం.

అథవా—ఏవమన్యామహే — సర్వేషామపి నిషేధవచనానామృతుసమనన్తరవర్షత్రయసమనన్తరదాన గోచరత్వేనోపపత్తిరితి.

"అపి నాగహోమాద్యా సోమాన్యస్య ప్రవర్తితాం॥"

ఇతి నారదోక్తేరాయం సాధారణో మన్వన్తరాశ్రయ ఇతి కల్పయామః.

యతోహి స్వస్య స్మృతేర్వాక్యార్థే ప్రామాణ్యార్థస్యాయుక్తమితి

"శ్రుతిస్మృత్యనుమతి నాంగీకృత్య శాసనం॥"

ఇతి మనువచనాదిక ... బోధాయనస్మృతేరపి నామ ప్రత్యాసదర్శనీయ ... యా మనుస్మృతేరేవ కాలదోషాత్ ప్రామాణ్యం. ... ఉపస్థలాదాన నిషేధ పరిత్యాగం ... శ్రుతిస్మృతి ... కల్పితయా తద ర్థ్యస్య ... యుక్తమితి, మన్వర్థవిపరీతా తు యా స్మృతి రప్రశస్యతే. ఇతి వచనానుసారేణ బోధాయనాది వచనాపేక్షయాపి మనుస్మృతేరేవ ప్రాబల్యమితి స్థితే తద్విరోధేన వచనాన్తరస్య మన్వయ యుక్తత్వాత్. ఏవంచ దౌహిత్రవివాహోఽపి ధర్మశాస్త్రైకకల్పనీ యః సమయః. తథాపి హి కన్యాప్యభిమతమేవ వరం వృణుయాదితి పరస్పరకలహాదయః తన్నిబన్ధనాత్మహత్యాదికం వాఽపి సముప తిష్ఠేత్. అభిమతాదివరోపస్థాపనాదివిశేషనిబంధనః ఇదానీన్తనసమ యేఽపి ముక్తిపరత్వాదిదౌహిత్రవివాహసమయకల్పనం లోకహితైషిణాం ధర్మజ్ఞానామావశ్యకమపి ... కేవలముపాశ్రయం మన్యతే.

అస్మిన్ తు ఉక్తవిధసమయ కల్పనాయామపి పరపక్షిణాం నిర్బంధ పరిహారో న భవిష్యతి। నాపి వాదభూమ్యన్తరయోః కలహాత్మహత్యాపాత కాదిపరిహారః। నహి సకృత్సకృద్వా దర్శనసంభాషణాదిమాత్రేణ పు

రుషవ్యాదయమిదమేవేతి నిశ్చితం రజోదర్శనమాత్రేణ కన్యాప్రభవతి॥ ప్రభవతిచేదపి సవర్షత్రయపర్యన్తం స్వతన్త్రయా స్వాభిమతపురుష వరణం పిత్రాద్యస్మిన్ నిశ్చితే గుణవతివరే పితృవశంవదా యాస్సంభవ దుస్త్రికం. వర్షత్రయానంతరమేవ ఖలుస్వయం వరకాలః. తదర్థమే వతత్సమయః కల్ప్యతేచ సర్వేషాం కన్యాపిత్రాదీనాం పాతిత్యం సంపాది తమితి, నలోకోపకారోననసమయేనేతి, భక్తిచేత్ అఖిలమనుసరోగశాస్త్రి రితి సంపద్యతే. శాస్త్రం యద్యపి స్త్రీణాం విషయే పోషణాదిసమో కాలకాల ఇతిబోధయతి, వివాహంబోధయనం స్త్రీణావరాహపితామ హః. వైవాహికోవిధిః స్త్రీణామౌపనాయనికః స్మృతః. ఇత్యాదిరూ పం: తథాపి నతోదర్శనాభావవిశిష్ట నయనకాలపవవివాహకాలః ఇత్యేకామేనాప్యస్యావగమవియం, ప్రదానం ప్రాగృతోః. కాలేదాతా పితావాచ్యః అవివాహగుణహీనాయ నోపరుంధ్యాద్రజస్వలామిత్యాదివ చనావిరోధశ్చైకవాక్యతాప్రాప్తేః వక్ష్యమాణత్వాత్. ఉత్తరత్రచై తద్విస్తరేణోవ పాదయిష్యామః. త్రింశద్వర్షోద్వహేదిత్యాదివచనానామపి య థావత్క-ల్పతయారజోనన్తర వివాహోభ్యనుజ్ఞాన ఏవతాత్పర్యం తథా త్రైవత్ర స్ఫుటీకరిష్యామ ఇత్యనోస్మానుపపత్తిరవకాశః.

ఏవంకలివర్జ్యప్రకరణే అక్షతకన్యాపునర్వివాహ సమామ్నాన మపి నరజోదర్శనానంతర వివాహసమయకల్పనేలిఙ్గం. యేననిషేధవచ నాని యుగాన్తరం గోచరీకుర్యుః. అక్షతకన్యా పునర్వివాహోహి నసంస్కారార్థః సంస్కారస్య ప్రథమవివాహేనైవ నిష్పన్నత్వాదితి కామార్థత్వేన - కలివర్జ్యప్రకరణే తదామ్నానం కామార్థవివాహని షేధాభిప్రాయేణైవ కల్పనాసాంఖ్యమపి. శూద్రస్త్రీణామపిన ధర్మా

ర్థో౽వివాహః. కింతు కామార్థ ఏవేతి యదా కామ స్తదా వివాహ ఇతి రజోదర్శనానన్తరమపి వివాహ ఇతియుక్తం. నైవం బ్రాహ్మణకన్యానామపి తద్వ్రతప్రాప్తేన రజోనన్తరవివాహ సమయకల్పనం సాధీయః. బ్రాహ్మణకన్యానాన్తు ధర్మార్థ ఏవ వివాహః కలౌయుగే; ధర్మార్థశ్చ వివాహః అష్టవర్షాదిబాలికామేవ సంస్కుర్యాదిత్యుత్తరత్ర విస్తరేణోపపాదయిష్యామః. ఏవంచ సమయాన్తర కల్పనాయాసో నిష్ప్రయోజన ఇతిపశ్యామః.

యదపియువతివివాహపక్షే తావాన్నశ్రహత్యా దిర్యావాన్నాల్యవివాహ ఇతిలోకోపకారార్థం సమయాన్తరకల్పనం యుక్తమేవ. పూర్వతనాశ్చాపిలోకోపకారార్థం శాస్త్రీయవ్యవస్థయా సమయవిశేషా సచీక్లృపన్నితిహి స్మృతిపురాణేతిహాసాది భ్యోవగమ్యతే. ఏవమిదానీన్తనైరపి ధర్మజ్ఞైః సమయవిశేషపరికల్పన నదోషఇతిశఙ్క్యంతే — తత్రప్రతిబ్రూమః—ఏవంచేత్సర్వథాత్మహత్యాది దోషోయథానప్రసరేత్తాదృశ సమయకల్పనార్థమేవ యతితవ్యం. నచాంగ్లస్త్రీణామివబహుకాలం యథేష్టసహాసన సహశయనాదిభిః పురుషాశయవినిశ్చయానంతరమేవ వివాహః సమాచరణీయఇతి. —నను పూర్వస్మిన్ సమయే— యస్యాంమనశ్చక్షుషోర్నిబన్ధః. త్రిరాత్రం బ్రహ్మచర్యమితి సూత్రస్వారస్యం సుప్రజాస్త్వమిత్యాది మన్త్రలిఙ్గస్వారస్యంచ విద్యతఇతిచేత్ — విపరీతమేతత్— ప్రథమంహిసూత్రం ద్వితీయస్మిన్నేవ సమయేవిశేషతః స్వారసం. తత్రహిసూత్రే మనశ్చక్షుషోర్యస్యాం నితరాంబన్ధః సాకన్యావివాహ్యేతిబోధ్యతే. తత్రచక్షుర్నిబన్ధః సుతరాంయద్యపిరూపాది దర్శనమాత్రేణ సంభవేత్. మనోనిబంధస్తు తరాంనసహాసన సహశ

యః [illegible] భవతి [illegible] భవతీత్యభిప్రాయః. తత్రైవ [illegible] [illegible] స్తు బాహ్యార్థే హి [illegible] [illegible] సూత్రమపి [illegible] భవతి. వివాహసమయమీమాంసాయాం [illegible] [illegible] ప్రాగ్ [illegible] ద్వితీయసమయః [illegible] [illegible] సుతరాం దిష్ట్యా [illegible] [illegible] ద్వితీయసమయ [illegible] ఏవంచ యదుక్తం [illegible] [illegible] భావ [illegible] (ప్రవృ) [illegible] [illegible] [illegible] వివాహ [illegible] [illegible] [illegible] యః భవతీత్యర్థః [illegible] మిత్ర [illegible] భవతీతి [illegible] తద్యుక్తమితి వ్యా యః.

తత్రైతద్వక్తవ్యం యుక్తమితి [illegible] [illegible]

ప్రవదంతి శాస్త్రిభిరేతద్విషయమధికృత్య కేష్వపి గ్రంథేషు యో నిర్ణయా [illegible]విరచితాయి. యద్యపిచ తాత్పర్యైః [illegible] శాస్త్రిభిః తదుపరి కశ్చన గ్రంథో వివాహకాలవిమర్శా[illegible]. ప్రథమగ్రంథకృతాం తు రజోదర్శనాత్ పూర్వమేవ బ్రాహ్మణస్త్రీణాం వివాహ ఇత్యాశయః. ఉత్తరగ్రంథకృతాం తు రజోదర్శనానంతరమపి నాసాం వివాహోఽయుక్తః తత్రైవ ధర్మశాస్త్రిభ్య ఉపగచ్ఛంతీత్యాశయః. తథాఽపి గ్రంథద్వయోరపి చ విషమే కోఽపి విషయః [illegible] ఇతి విచారణీయ మితి కేషాంచిదాస్తే వాసినామభ్యర్థనామనుసృత్య అస్మాభిః [illegible] అపరినిష్ఠితాశ్చ వయమపి కమపి గ్రంథం నిర్మాతుం ప్రవర్తామహే.

తత్ర తావద్వివాహస్వరూపం నిరూపయామః. వివాహో నామ [illegible] జాతి[illegible]సంస్కార[illegible] తాస్పదీభూత[illegible] [illegible] సాంకేతిక పాణిగ్రహణ[illegible]ప్రభృతి[illegible]విధి[illegible]సంప్రదాయసమ్మతమంత్రైః [illegible] తథాచ[illegible] సంస్కారప్రయోజకప్రతిగ్రహజన్యస్వత్వాత్ స్వ[illegible]భూతస్త్రీయా జ్ఞానమేవ వివాహపదార్థః. ఏతాదృశవివాహే సమావేశనం నామాంగం న వేతి [illegible]శాస్త్రైర్నిర్ణీతం. [illegible]సమావేశనే [illegible]త్యాపస్తంబసూత్రం తు-'ఋతుసమావేశనే [illegible] మితి మన్త్రం విదధాతి. ఏవం చ చతుర్థదినే సమావేశన[illegible]నుపపత్త్యా [illegible] వివాహో ధర్మతో నిర్ధిరితి కేచిన్మన్యంతే. ఇమమేవపక్షం వయోనిర్ణయకారా అప్యనువర్తంతే.

అన్యే తు పాణిగ్రహణమన్త్రావధి సమావేశనమన్త్రాన్తమన్త్రైస

ముపాయకరణక్రియాకలాపజన్యాదృష్టవిశేష ఏవవివాహపదార్థః. ఋతుసమావేశనాదర్వాక్తనం వివాహపదార్థః కిన్త్వనుష్ఠేయసమావేశనాన్తరమపి విద్యతే. తదన్యథానుపపత్త్యా రజోదర్శనానన్తరవివాహోఽపి శాస్త్రీయఇతి సిధ్యతీతి మన్యన్తే. ఇమమేవ పక్షం వివాహకాలవిమర్శకారా అప్యనువర్తన్తే.

పరేతు—యద్యపి సమావేశనమన్త్రోక్తమన్త్రసముదాయకరణక్రియాకలాప జన్యాదృష్టవిశేష ఏవవివాహః. యద్యపిచ ఋతుసమావేశనాతిరిక్తం వధూవరయోః పరస్పరమిథునీభావలక్షణం శాస్త్రీయం చోద్యతే; తథాఽపి తాదృశ సమావేశనాన్యథానుపపత్త్యా రజోనన్తరవివాహః పరం న సిధ్యతి. తత్రచయుక్తీరుపరిష్టాదుపపాదయిష్యామ ఇతి ప్రతిపాదయన్తి.

తత్రనిష్కృష్టం నామతావదయుక్తమతివిచారణాయాం న తావత్ ప్రథమం సమావేశనం సూచితం. తయోః కర్మ యథాహ్యేవం వదన్తి. నహిశ్రౌతే గృహ్యే చతుర్థీదినే ఽపి సమావేశనమనుష్ఠేయతయా విధీయతే. ఆపస్తమ్బాచార్యైస్తు యద్యపి శేషం సమావేశనే జపేదితిసూత్రేణ చతుర్థీదిన ఏవ సమావేశనమిత్యుక్తమివ; తథాపి తాదృశసూత్రస్య క్రమవిశిష్టమన్త్రపదవిధాన ఏవ తాత్పర్యమస్యావగమనీయం నతు సమావేశనవిధానే. తస్య నిమిత్తత్వేనానిర్దేశాత్. నహి నిమిత్తానామపి చన్ద్రోపరాగాదీనాం ఉపరాగాన్తరకాలిక ఏవ విషయత్వం కస్యాపి సమ్మతం. సమావేశ్యేతి మన్త్రాంశమేవ బీజాపిత్వేనానుసృత్య తస్య సమావేశనజపవిధిత్వేన యథాఽఽహేన సూత్రయతామాచార్యాణాముక్త తాత్పర్యకల్పనస్య వన్యాయ్యత్వాత్. దృశ్యతే హి ప్రాయేణ సప్తమ్యన్తపదోపాత్తానాం నిమి

త్త్వేనాన్వయః ఉపరాగస్నాయాదిత్యాదిష్వతె. తత్సామాన్యాదత్రాపి
సమావేశనఇతి సప్తమ్యన్తపదోపాత్తస్య నిమిత్తత్వేనాన్వయస్వీకరణ
మేవయుక్తం. నిమిత్తత్వేనోపాత్తస్యచ సమావేశనస్య స్వరూపంకిము
తి చేత్. సమావేశనపదస్య బహుజనసంమేళనఏవ శక్తత్వాద్బహుజన
సంమేళనమేవనిమిత్తత్వేన ప్రతీయతే. తథాపిసుదర్శనాచార్యభాష్యపర్యా
లోచనయా ఋతుసమావేశనమేవతదితి బ్రూమః. ఇత్థంహితదీయాభి
ప్రాయః. అత్రసమావేశన పదేన వధూవరయోః పరస్పరమిథునభావ
నిమిత్త సహశయనమేవవివక్ష్యతే "రజఃప్రాదుర్భావాత్సఏతావృతు
సమావేశనే ఉత్తరాభిరభిమన్త్రయతే,, ఇత్యనంతరతృతీయసూత్రే ఋ
తుశబ్దేనసాకం సమావేశనపదంప్రయుఞ్జానానా మాచార్యాణాం సూ
త్రద్వయగతసమావేశన పదయోరుభయోరప్యేకార్థతా కల్పనస్యైవ
యుక్తత్వాత్. ఏవఞ్చపూర్వత్ర కేవలసమావేశన ఏవప్రయోగేఽపి
తస్యార్థాంతరపరత్వాభావాత్ ఉత్తరవిగాథేప్యేతస్య దిత్యుత్తరసూత్రే
ఋతుసమావేశనే ఇతిఋతుశబ్దోఽపి ప్రయుజ్యతే. అయఞ్చసమావేశనం
నామవధ్వాసహమైథునార్థం శయనం ఉత్తరత్ర ఋతుసమావేశన ఇతి
ఋతులిఙ్గాత్ ఇతివాక్యబలేనలభ్యతే. [illegible] సమావేశనపదా
[illegible] తత్సహశయనరూపనిమిత్తార్థమేవ ప్రవృత్తం. యదిసమా
వేశనపదస్య వ్యవాయార్థకత్వంలోకతః సిద్ధంతర్హ్యనంతర తృతీయసూ
త్రేపి కేవలసమావేశనపదమేవాచార్యాః ప్రయుఞ్జీరన్॥ నైతదస్తి॥ ఏవ
ఞ్చతాదృశం సమావేశనంనిమిత్తీకృత్య శేషంసమావేశనే జపేదితిసూ
త్రేమంత్రజపోవిధీయత ఇత్యేవాపస్తంబాచార్యాణామాశయః. ఏవఞ్చ
చతుర్థదిన సమావేశనవిధానంపుత్రాపి నోపలభ్యత ఇతి తదన్యథానుప
పత్త్యా ఋతుమతివివాహసాధనం నయుక్తమితి॥

అన్యేతు శేషం సమావేశనేజపేదితి సూత్రయతామాపస్తంబా చార్యాణాం సమావేశనవిధానేఽపి తాత్పర్యమభ్యుపగమనీయమేవ. సమావేశనస్యహి వైశస్య నిమిత్తత్వేనోపాదానం నయుక్తం. నహివిధివిషయాణాం కుత్రాపి నిమిత్తత్వేనాదరణం దృశ్యతే. అనిష్టానామేవ తూపరాగాదీనాం నిమిత్తత్వేనాన్వయః. నత్విష్టానామపీతి సమావేశనస్యేప్సితస్య నిమిత్తత్వేనాన్వయవర్ణనం నసంభవతి. ఏతేనరాగప్రాప్తస్యతస్త్రీసమావేశనస్యాపి ననిమిత్తత్వేనాన్వయ ఇతి సూచితం. యదిహిశబ్దక్రమాదర్థక్రమోబలీయానితిన్యాయేన రజఃప్రాదుర్భావాత్ప్రాగేవ మృతుసమావేశనే ఉత్తరాభిరభిమంత్రయతీతి సమనంతరతృతీయసూత్రార్థ ఏవ ప్రథమతోవక్తవ్య ఇతి తత్సూత్రవిహితం సమావేశనమనూద్యైవానేన క్రమమంత్రజపయోః విధానమిత్యుపపాద్యేత తదాపిప్రాప్తకర్మోద్దేశేనానేక విధానవాక్యభేదఇతి యదాగ్నేయోష్టాకపాలో మావాస్యాయాం పౌర్ణమాస్యాఞ్చాచ్యుతో భవతీత్యాదివ్యైవ ఉత్పత్తివిధిపరత్వమేవాంగీకరణీయమితిక్రమ మంత్రజపసమావేశనానాం సర్వేషాంవిధిరిత్యైవభవతి. ఏవఞ్చసమావేశనవిధానేఽపి శేషం సమావేశనేజపేదితి సూత్రతాత్పర్యం సిద్ధంభవతి.

యదపిచోక్తం—సమావేశనపదస్య బహుజనసంమేళనమాత్రశక్తికస్యోక్తసూత్రేవ్యవాయపరత్వవ్యవస్థాపక సుదర్శనాచార్యాశయవిరోధప్రసఙ్గః॥ తద్వ్యాఖ్యానాధరణంచ సమావేశన పదయోరుభయోరపి రతోనంతర గర్భధారణోపయోగి పరస్పర మిథున భావ నిమిత్త సహశయన పరత్వమేవాంగీకరణీయం॥ తాదృశంచసమావేశనం వివాహాఙ్గం నభవత్యేవేతి; తదప్యాపాతరమణీయం॥ కేవలసమావేశనాదిపదా

నామపివ్యవాయ పరత్వేనతత్రతత్రతనిర్దేశాత్॥ తథాచగౌతమః॥—షోడ
శప్రభృతిరాత్రీణాం తస్మిన్న్యగ్మాసుసంవిశేత్ ॥ ఇతి ॥ తత్రయది కే
వల సంవేశనాది పదానాం వ్యవాయార్థకత్వం నలోకసిద్ధమితిస్యాత్తదో
క్తస్మృతిషుప్రయుక్తానాం సంవేశనాదిపదానాం కథమర్థ నిర్ణయః సం
భవిష్యతీతి భవంతఏవ వివేచయన్తు॥ ఏవంచసుదర్శనాచార్యా అపిన స
మావేశన పదార్థ నిర్ణయార్థం ప్రవృత్తాః కిన్తుఋతు సమావేశనాద్వి
వాహాఙ్గం సమావేశనం భిన్నమితి ప్రకటయితుం॥ ఇదంహితస్య
వాక్యం ॥ మూ ॥ సమావేశనంనామవధ్వా సహమైథునార్థం నవాశ
యనమితి ॥ వ్యా ॥ యద్యపిమైథునార్థశయనం భార్యయాసాకమేవర్తు
కాల ఏవయుక్తం ॥ నతుఅన్యయాన్యకాలే ॥ స్వదారనిరతస్సదాఇ
త్యాదివచనైః పరిసంఖ్యావిధయా స్వదారేతరోపగమనాదినిషేధాత్॥
తథాపి కిమిదవచనం నకుర్యాన్నాస్తి వచనస్యాతిభారః ఇతిన్యాయేన వ
ధ్వాసహాపిచతుర్థీనే సమావేశనస్య విహితత్వాత్తద్దినమాత్రే తదను
ష్ఠానమపి యుక్తమేవ ॥ ఏవఞ్చాత్ర భార్యయాసాకం సమావేశ నమృ
తుకాలికం నభవతీతమేవ ॥ ఉత్తరత్రతస్య విధాస్యమానత్వాత్॥ ఇతి॥
అయమాశయః—చతుర్థీకర్మసమాప్త్యనంతరమేవ భార్యాత్వసంపత్తి
రితి పారస్కర హరిహరభాష్యే ఉక్తత్వాత్తతః పూర్వం భార్యాత్వ
మేవనాస్తి ॥ ఏవమృతుకాల ఏవ సమావేశనస్య విహితత్వా దృతుకా
లికత్వ మపినాస్తీతికథం వ్యవాయార్థశయనం కన్యయాసాకం వివాహ
చతుర్థీనేప్రయుక్త మిత్యాశంకాయాం వివాహాంగ సమావేశనమా
త్రవిషయే వచనాద్భార్యాత్వసిద్ధితః పూర్వమపితత్సిద్ధ్యర్థం వ్యవాయా
ర్థ సహశయనం యుక్తమేవేతి కేచిద్వర్ణయన్తి ॥

ఏతేషాంచ మతేయద్యపి ఋతుసమావేశనాదతిరిక్త మేవ వివాహాంగం సమావేశనమితి సిద్ధ్యతి; తథాపి రాగప్రాప్తం సమావేశన మాత్రత్వేన సుదర్శనాచార్య భాష్యవిరోధః పరంప్రతీయతే॥ నైవసమావేశనస్య రాగప్రాప్తస్య వాదినో భవతిశబ్దః॥ సావైవంపరిహరణీయా॥ రాగప్రాప్తంసమావేశనమితిహివదన్తః సుదర్శనాచార్యాః నాస్య సమావేశనస్య వైశిష్ట్యమభిప్రయన్తి॥ లోకతః పూర్వప్రవృత్తస్యాపి విషయస్యాపి సమావేశనస్యరాగతః ప్రాప్తియోగ్యత్వ మపివిద్యత ఏవేతి బోధనఏవ॥ రాగతఃప్రాప్తానామస్య వహననాదీనాం విధివిషయత్వ దర్శనాత్॥ ఏవఞ్చ అవహననాది విషయే విధిప్రవృత్తేః ప్రయోజనం యథానియమః ఏవమత్రాపి సమావేశనం కర్తవ్యమేవేతి నియమ ఏవ విధిప్రవృత్తేః ప్రయోజనం॥ సమావేశనం చతుర్థాపరరాత్రే నియమేనైవభవతి। అనాకులావచనస్యాప్యేవం సద్యుపపత్తిరితి॥

తస్మాదయుక్తం రాగలోకేతు సమావేశనం లభ్యతఏవేతియద్యప్యత్ర నచాన్యంహి విధిప్రవృత్తిప్రయోజనం నియమంప్రతిపద్యతే. అనాకులాయామపినియమోనైవఘటతేత్యేవ మాహుస్తత్ర. ఇతిరాగప్రాప్తస మావేశనమాత్రత్వేన సుదర్శనాచార్యాశయాశయ విరుద్ధ మేవతేషాంవచనమపి. సుదర్శనాచార్యమోహిత్వం రాగప్రాప్తమేవ సమావేశనమాత్రత్వేనాభిప్రేతం. తస్మాన్మతేవివాహాంగం ఋతుసమావేశనాతిరిక్తంచేతి॥ కన్యాయామపిరాగప్రాప్తసమావేశనం సంభవతీతితున భ్రమితవ్యం. అనిషిద్ధం సమావేశనమేవ ఖలుశాస్త్రీనాశ్రయత్వేనానూద్యతే. నతునిషిద్ధమపి. నాజాతలోమ్న్యాసహ సంవిశేతేత్యాదివచనై

హార్యన్వృతుమతీ సంగమోఽవిశేష్యవిషిద్ధః. ఏవఞ్చ ఋతుమతీసంగమ ఏవా త్రగృహీతవ్యః. పతిత్వాంస్తస్మేపదే. ఇతిహాసస్త్రపదీసూత్రేణ పతిత్వ పత్నీత్వయోః సిద్ధిప్రతిపాదనేనా భార్యోపగమననిషేధస్య ఋతుప్రసంగా దితి రజోనంతర వివాహాలిఙ్గమేవ తదితి. యావతాచ రాగప్రాప్తమేవా త్రసమావేశనం వివక్షితం తావతా ఋతుసమావేశనా ద్భిన్నరూపమితి చాప్యుక్తప్రాయమేవ । రజోనన్తర సమావేశనస్య నిత్యత్వేన విధిచోది తత్వేన రాగతః ప్రాప్తత్వాభావాదితి. శబ్దైక్యమాత్ర నిబంధనప్రత్యభి జ్ఞానేనతు కస్యాప్యాహానైక్యంనఘటతే. అగ్నిహోత్రంజుహోతీతివాక్యే ఉపసద్భిశ్చరిత్వామాస మగ్నిహోత్రం జుహోతీతివాక్యేచైకస్యై వాగ్నిహోత్రశబ్దస్యశ్రవణేపి కర్మస్వాహానభేదఏవేతి ప్రకరణాన్తరా ధికరణే పూర్వతన్త్రేనిరూపితత్వాత్. ఏవఞ్చాత్ర యథాఽనుపాదేయ గుణవిశిష్టానుపస్థితి యూపప్రకరణాన్తరా త్కర్మభేదః ఏవమత్రాపికర్మ భేదస్యైవప్రాప్తేః—వస్తుతస్తు ఏకత్ర కేవల సమావేశనపదం అన్యత్రఋ తు శబ్దసహిత సమావేశన పదమితి నామభేద ఏవవిద్యత ఇతి శబ్దైక్యనిబ న్ధనప్రత్యభిజ్ఞానమపినాస్త్యేవ ॥ నామైకదేశేనామగ్రహణం ఇతితున్యా యః ॥ ఏకప్రకరణకత్వాదితాత్పర్యగ్రాహక ప్రమాణసత్వఏవ ॥ య థాజ్యోతిష్టోమప్రకరణగతే వసంతే వసంతే జ్యోతిషా యజేతేతివాక్యే జ్యోతిశ్శబ్దేన జ్యోతిష్టోమస్యగ్రహణం ॥ అత్రసమానప్రకరణకత్వాద్య భావాన్నతాదృశన్యాయప్రసర ఇతి శబ్దాంతరాధికరణేనాపికర్మభేదః॥ యుక్తం చైతత్ । యథాహితప్తేపయసి దధ్యానయతి సావైశ్వదేవ్యా మిక్షేతి వాక్యవిహితామిక్షాయాగ ఏవతదనంతరం శ్రూయమాణేనవా జిభ్యోవాజినమితి వాక్యేనవాజినంవిధీయతాం॥ వాజమన్నమేషామితివ్యు

త్పత్త్యాదేశ్చ దేవ పరత్వస్య యథాకథంచిదుపపాదన సంభవాత్. ఇత్యాశ
ఙ్క్యోక్తిర్దృష్టగుణావరోధ గుణాంతరవిధానాసంభవాద్వాజభ్యో వాజి
నమితివాక్యం కర్మాంతరపరమేవేతి పూర్వత్రైవ నిరూపితం. ఏవం విష్ణు
ర్యోనింకల్పయతు. ఇత్యాద్యుక్త్యుక్తిర్దృష్టగుణావరోధ ఆరోహతూరు
ముతిమన్త్రేష్వపి విధానాసంభవాత్తత్కర్మాంతర పరత్వోపపాదనమేవయు
క్తం. యథాచమన్త్రాణా ముత్పత్త్యన్వయాయోగ్యత్వే [illegible]
ప్రసక్తస్థానాన్తరవిస్తరః. అతఏవమంత్రప్రశ్నభాష్యే ఆరోహతూరుమి
తిమన్త్రవ్యాఖ్యానావసరే సమావేశనే జప్యమంత్రమాహ. ఇతి. విష్ణు
ర్యోనింకల్పయతు ఇతిమంత్రవ్యాఖ్యానావసరేచ ఋతుసమావేశనేజప్య
మంత్రమాహ. ఇతిచాపస్తంబసూత్రవ్యాఖ్యాకారా ఇతిచతుర్థీకర్మ
సమావేశనమపిశాస్త్రసమ్మతమేవ. యావతాచవివాహాంగం సమావేశ
నాంతరమపి శాస్త్రసమ్మతమేవ తావతాతదన్యథానుపపత్తి ప్రమాణేన
గర్భోత్పత్తిపి వివాహాదావపి సంభవతి. యద్యప్యేతద్విధసమావేశనమప్రౌ
ఢాంగం కన్యానామపిభవతి కేశలాఘవప్రేపణవత్తథాపి సమావేశనస్య
గర్భగ్రహప్రాప్తేశ్చ దర్శనాద్రాగేవ ప్రౌఢాయామేవ సంభవాత్ప్రౌఢా
వివాహసిద్ధిప్రత్యూహైవ. యేషాంతు ప్రసవయో నిర్ణయకారాణాంవి
వాహాంగసమావేశనాంతరాసంభవః॥ తేషాంమతే ఆరోహతూరుమితి
మంత్రో వివాహాంగమితి నసిధ్యేత్ ॥ఇష్టాపత్తౌ చాధికారాఖ్య ప్రకరణ
విరోధః॥-యదప్యుక్తం వచోనిర్ణయకారైః-ఋతుసమావేశనాశ్రితమ
న్త్రస్య వివాహాంగత్వం నాపపన్నం॥ ప్రాయత్యార్థం క్రియమాణమేవాచ
మనమాత్రేత్యాదీయమానప్రాణోపాసనాంగతయా ప్రాణానాసన్త్వేతిబు

ద్విధానానుసారేణకర్మాఙ్గోక్తిభాగ్రయేణస్వతంత్రతయాబహువిధోపాసనా విధ్యనుసారేణ చాత్రాపిస మావేశనాశ్రయేణ వివాహాంగమంత్రజపవిధానేనదోషాత్ ॥ కాలాంతర భావిన్యపి సమావేశనే కరిష్యమాణస్య మంత్రజపస్యే దానీన్తన వివాహాంగత్వ మప్యేవమేవనానుపపన్నం కాలాంతరేఽనుష్ఠేయ మాప్య బృహస్పతిసవస్య కాలాన్తరానుష్ఠేయ వాజపేయాంగత్వమివ. ...వాజపేయేనేష్ట్వాబృహస్పతిసవేన యజేతేతి వాక్యబలేనలభ్యతే ॥ సుదర్శనాచార్యా అపి వివాహకర్మార్థం క్రమజపయోర్విధానమితి బ్రువాణాః కరిష్యమాణ సమావేశనాశ్రయేకైవమంత్ర జపవిధాన మభిప్రయంతి ॥ అన్యథామంత్రజపసమావేశనానాం విధిరిత్యేవ బ్రూయుః ఇతి॥ ఏవఞ్చ సమావేశనాంతరానం గేకారేపి వివాహాంగత్వం నానుపపన్నమేవేతి ॥

నచైతద్యుక్తమివ—ప్రాణోపాసనాంగతయాఽపిసామాస్యచ ...నాచమనస్య ప్రాప్తస్యానువాదేన విశిష్య తదీయాస్వప్సు ప్రాణవాసస్త్వ బుద్ధి విధాన వద్వృత్తు సమావేశనానువాదేనమంత్ర జపవిధానాసంభవస్య పూర్వ్వముపపాదితత్వా కార్యాఖ్యానాదపూర్వమితి న్యాయేన ప్రసరతి ॥ ఏవం కర్మాఙ్గోక్తి భాగ్రయణేనస్వతంత్రతయా విధీయమానోపాస నానామివ సమావేశనాశ్రిత మంత్రజపస్య స్వతంత్రఫలార్థత్వా భావాత్తాదృశన్యాయోఽపినావసరం లభతే॥—కిఞ్చ—తత్రైవాశ్రయశబ్దప్రయోగః ॥ యత్రశ్రుతి బోధిత స్వస్వరూప సంపత్తిః తత్సంబంధే నైవభవతి ॥ —యథాదధికరణత్వం హోమసంబంధనైవ ॥ యథాబధికరణక ప్రాణవాసస్త్వ బుద్ధిరప్సంబంధానైవ ॥ అత్రచమంత్రజపస్వరూపసిద్ధిః నసమావేశన సంబంధినైవేతి నైవమన్యా

త్ సమావేశనమాత్రేత్యేతి వచనస్య సమావేశన కాలికత్వబోధన ప
రత్వాత్ ॥ ఏవఞ్చ సమావేశన కాలికమంత్ర జప ఇవసన్దంశన్యాయేన
సమావేశనమపి వివాహాంగ మిత్యవశ్యం స్వీకరణీయమితి వివాహప్రయోగ
మధ్యపాతిత్వేన [illegible] ప్రాప్తం సమావేశన మా
త్రస్య వివాహకర్మత్వం [illegible] విధానమితి సుదర్శనాచార్య భా
ష్యమప్య[illegible] ॥ ప్రజాపతే తన్వం ॥ ఇత్యాదిమంత్రత్ర
యానంతరం [illegible] మన్త్రేష్వపి శేషమితి శేష
త్వేన [illegible] మంత్రమాత్రస్య గ్రహణమపి తన్మంత్రజపో వి
వాహప్రయోగాన్తః పాతిత్వ [illegible] సమావేశనాచరణ
మప్యావశ్యక మిత్యేవ మంతవ్యం ॥ [illegible] సమావేశనాప్రయోగం
వివాహాంగత్వే [illegible] వివాహాంతర్గతత్వ
ని[illegible] ॥ ఏవంచావస్తుభావా
ర్యాణాం [illegible] సమావేశనాంగ విధాన ఏవతాత్ప
ర్యమితి [illegible] ప్రయోగనిర్ణయకారా
ణాంతు [illegible] సమావేశనానుష్ఠాన [illegible] తత్ప్రతిహారాది శ
బ్దార్థా ఏవ ॥ [illegible] నామేవతత్రాభి ప్రాయం
వ్యాహవదామి ॥ [illegible] ॥ — వివాహస్యసమావర్త్య బా
లికాత్వేన [illegible] సంభవ
ఇతి తదపిన రమణీయం ॥ వివాహస్య బాలికాత్వమేవేత్యేతావతాస్య
నిర్ణయాత్ ॥ ఉక్త సమావేశనాస్య [illegible] రజోనంతర వివా
హస్యాపి సాధనాత్ ॥ బాలికావివాహేతు సమావేశనాంగ లోపేపి
నవైగుణ్యం ॥ వివాహస్యనిత్యకర్మత్వేన నిత్యకర్మత్వాంగ విశేషలోపేపి
వైగుణ్యసంభవస్య పూర్వమీమాంసాయాముపపాదితత్వేనదోషాత్

నహ్యస్మాదృశా ఇవ మహర్షయోపి సర్వజ్ఞా అనర్థకాన్య సంగతానిచ వాక్యాని ప్రయుంజీరన్ ॥ ఏవఞ్చార్థాపత్తి ప్రమాణమప్యత్ర సుస్థితమత్ర ప్రవర్తతే ॥ ఋతుమతీవివాహోనశాస్త్రీయ ఇతితు వచనమసంగతమేవ॥ సమావేశన శబ్దార్థ విచారణాయామప్యయమర్థః స్ఫుటీభవతి ॥ నచసమావేశనపదస్య బహుజన సంమేళనమాత్రశక్తికత్వాత్కథం తదనుసారేణ రజోనన్తర వివాహ సిద్ధిరితి శంకనీయం ॥ పూర్వోక్త యుక్త్యా గౌతమాదిస్మృతి పర్యాలోచన యాసంవిశేది త్యాదిపదానాం పరిస్ఫురన్మిథున భావలక్షణ వ్యవాయపరత్వనిర్ణయేన తస్యైవ ప్రౌఢాయా మేవసంభవాత్ప్రౌఢా వివాహసిద్ధేర ప్రత్యూహత్వాత్ ॥ సమావేశనమన్త్ర పర్యాలోచనాయామపి స్ఫుటం ప్రతీయతే । తేనహిమన్త్రేణ [illegible] హదా [illegible] ప్రకాశ్యన్తే ॥ [illegible] ప్రయోగ [illegible] ప్రామాణ్యమితి మన్త్రా [illegible] పూర్వ [illegible] మన్త్రప్రతిపాదితార్థస్య ప్రయోగస్యచ సంబంధోనస్యాత్ ॥ తదాతాదృశమన్త్రాణా [illegible] ర్థపవస్యాత్ ॥ పూషాదీనా [illegible] మన్త్రా [illegible] మేవ పూషదేవతా [illegible] సచమన్త్రో [illegible] గతః తత్ప్రయోగసమవేతార్థాదిదేవతా ప్రకాశనార్థ [illegible] దేవతా క్రియా [illegible] ఇతి పూర్వతన్త్రే నిరూపితం ॥ ఏవఞ్చ సమావేశనమన్త్రస్యాప్యత్ర [illegible] పవస్యాత్॥ ఏవఞ్చ వ్యవాయ ప్రకాశకత్వమవశ్యమంగీకరణీయమేవ॥ ఉన్మథ్యస్వాగ్నే ఇత్యాదిమన్త్రాణామపి బుద్ధోపానాహాపినియుక్తానాం లక్షణయా బుద్ధదేవతాప్రకాశకత్వమంగీకృతమేవేతినకుత్రాపి మన్త్రాణామనుష్ఠీయ మాన పదార్థేనసాకమసంబన్ధ ఇతి మన్త్రార్థపర్యాలోచనానుసారేణ సమావేశనపదార్థోవ్యవాయ ఏవేతినిశ్చినుమః॥ ఏవఞ్చ తదన్యథానుపపత్త్యా

రజోనన్తరవివాహోఽపి శాస్త్రీయ ఏవేతి సిద్ధ్యతీతి తదశాస్త్రీయతావా దో౽సంగతత్వమేవేతి వర్ణయన్తి ॥ వివాహకాలనిర్ణయకారాణామపి పర్య వసితార్థో౽యమేవేతి మన్యామహే.

పరేతు యద్యపి సమావేశనాన్తరం వివాహాఙ్గహోమ ఆపస్తంబాచా ర్యాణాం సూత్రకారాచార్యాణాం సమ్మతం తథాపి తదన్యథానుపపత్త్యా రజోనన్తరవివాహ సాధనం పరం నయుక్తమహం ॥ తథాహి— సమావే శనస్య వివాహాఙ్గత్వం [illegible] ఆపస్తంబాచార్యాణాం నియతమేవ [illegible] వాభిప్రాయో [illegible] సర్వాంగానను ష్ఠా [illegible] లలాభః సంభవతి [illegible] రాంగానామస్య ననుష్ఠానప్రసం [illegible] ఏవం చేదపి [illegible] సమావేశనమి [illegible] తదభావయోరుభయోర [illegible] ఏవ [illegible] యథా [illegible] [illegible] [illegible] ర్యాణామపి [illegible] పయోర్విధాన [illegible] నియమో [illegible] వచన నానువ్యయమ [illegible] — [illegible] పక్ష [illegible] మృగ్యం [illegible] సమావేశనమేవ [illegible] రజోనన్తరమేవ [illegible] వ్యాఖ్యాన [illegible] యాం రజోదర్శనతః పూర్వ [illegible] సమావేశనం [illegible] వివక్షితమితి స్పష్టమేవప్ర తీతేః [illegible] స్పష్టమభివ్యక్తి [illegible] అవైధమనిషిద్ధంచ సమా

వేశనమేవాత్ర వివక్షితమితి ప్రకారాన్తరానుసరణమపి సాధు. యద్యప్య స్మిన్పక్షే భోజనపర్యా[illegible]స్య స్త్రా[illegible]విశేషతః స్వారస్యం తథాపి అన్వైధానిషిద్ధరూపస్య సమావేశనస్య వివాహాఙ్గత్వేన తస్య వివాహా ఙ్గత్వసిద్ధాన్తాసాంగత్య ప్రసఙ్గాదాన్త్ర గ్రహణమితి విజ్ఞేయం. నహి భోజన పర్యాయవ్రతం రాగతః ప్రా[illegible]ప్నోతీతి కస్యాపి సంమతం. సహా ఙ్గత్వమేవాస్తామితి శఙ్కా[illegible]యాం [illegible]శబ్దాయేన తదఙ్గత్వస్యాసాధిత త్వాత్. ఏవఞ్చ వైధ[illegible] సమా[illegible]మిత్యేవాఙ్గీకరణీయం. వైధానా మఙ్గానాం ప్రకా[illegible]రాకాఙ్క్షాయాం స్వతస్త్రిఫలాపేక్ష త్వితి రాగాప్రాప్త సమా[illegible]స్త్రీ[illegible]ప్రకారకమిత్యేవాఙ్గీకరణీయం సదసంస్కారోద్బో[illegible]వి[illegible]వివాహాదిభిరభ్యుపగతమేవ. ఏ వఞ్చ సతి సమావే[illegible]తాదృశసంస్కారః కిందృష్టద్వారైవ భవతి ఉ తా[illegible]యాం దృష్టఫలద్వారైవ తాదృశఫలసి ద్ధి[illegible] సాధయతీతి తద్గ్రన్థపర్యాలోచ నేన[illegible]సమావేశనపదార్థాన్యథానుపపత్తి మేవాధి[illegible]. సమావేశనం దష్టఫలాకోక్తకిల్యా వ్యవాయసన్నేత్రవభోగ[illegible]. [illegible]యథా యూపమస్త్రాశ్రీకరాతీతివా క్యవిహితాష్టా ప్రకరణాదీనాం యూద్భృతో మంబరాదిఖండన సంపాదనే నైవసిద్ధిః తాదృశౌమంబరాది ఖండనసంపాదనమేవావశ్యకమితి పూర్వ త[illegible]ప్రతిపాదితం. ఏవం సూత్ర[illegible]సంపాదనేన సమావేశనస్యాపూ పసిద్ధిః తాదృశసమావేశన[illegible]సంపాదనమేవావశ్యకమితి సమావేశనవిధిపరాణామాచార్యాణాం ర[illegible]వివాహపవ తాత్పర్య మితిగమ్యతే. సాక్షాదేవసంస్కారఫలకత్వమస్య పునః కేవలం సమావేశ నార్థ ఏవ పరిత్యక్తో భవతి. అపితు స్మృ[illegible]స్వారస్య సంభవే దృష్టఫలద్వారై

వాదృష్ట[illegible]మితి [illegible]హిసవహ స్తీతివాక్యవిచారావసరేపూర్వతంత్రే ఉపపాదితత్వా[illegible] [illegible]ప్యపి సమావృత్తోభవతి ॥ ఏవఞ్చసమా వేశవాక్య[illegible]త్వాద్ జోనంతర వివాహసాధనం యు క్తమేవేతివ్య [illegible]ంతి ॥ వయంతు[illegible]వ్యామః సాక్షాదేవసమావేశ[illegible]మదృష్టముపజన [illegible] ॥ [illegible]హిదృష్ట ద్వారా [illegible]దృష్టఫలం, యత్రదృష్టఫలమపి [illegible] [illegible]యోగోపయోగిభవేత్ ॥ యథాఽవహననజన్య[illegible]తుష్యంవినా [illegible] తుష్యపి ప్రయోగోపయోగిభవతి ॥ అస్య [illegible] [illegible]పి [illegible]వత్వా[illegible]వ సంస్కార[illegible]ప్రయోజకత్వాప [illegible] ॥ [illegible]దృష్టఫల[illegible] ప్రయోగోపయోగిత్వా [illegible] [illegible]భవతి ॥ ఏవంచాదృష్టార్థమేవేదం సమావే [illegible]యం ॥ సదసమావేశన పదస్యతృ ప్తివిశేషోత్పాదక వ్యాపా[illegible]బోధక[illegible]యోగానుపయోగ్యపి తృప్తివిశేష స్తన [illegible]భవత్యే[illegible] ॥ తత్రాదృష్టార్థో వాభవతు అదృష్టార్థో వాభవతు సర్వథా[illegible] తృప్తిసంపాదనేన సమావేశనస్వరూపసిద్ధిః [illegible] [illegible]వాహ[illegible] [illegible] తివివాహసిద్ధిర ప్రత్యూ[illegible]వేల[illegible] ॥ [illegible]హి [illegible]లం [illegible]యన్యత్రత్రశబ్దా తో? విశిష్ట[illegible]వ్యాపారే శ క్తిస్యాపి విశి[illegible] [illegible]ధాదదృష్టార్థాశ్ర యణాది వ్యాపార[illegible]షమాత్రబోధ[illegible]మితి పూర్వతంత్రేనిరూపితం ॥ తిష్ఠతత్రాపి సమా[illegible]దేవా [illegible]వ్యాపార విశేషమాత్రబోధనే [illegible]పాత్ ॥ యుక్తం చైతత్ — యథాహ్యాపసన్నిక్షుకిత్వా మాసమ [illegible]త్రం [illegible]తి వాక్యవిహితో[illegible]గ్ని[illegible] [illegible] [illegible] [illegible]త్రం[illegible]తి వాక్యవిహితాదగ్నిహోత్రహోమా న్మాఫ్ఛిన్నమాపాద[illegible]తృప్తియోగేనై వానుష్ఠీయతే ॥ నామాతిదేశేన

తద్ధర్మాణాం ప్రాప్తేః ॥ [illegible] సరంభవ ఏవ ॥ ఫలాతిదేశా సంభవాత్ ॥ ఏవం వా న్యైక్యేన బుద్ధిసమావేశన ధర్మమాత్రాతి దేశేన తద్ధర్మాణామేవ ప్రాప్తేః ॥ [illegible] సంభవ ఏవేత్యంగీకరణీయం ॥ ఏవన్తు [illegible] ష్టవపాకాది వాలికా వివాహేపి సంభావ్యమానః [illegible] వివాహసిద్ధిర్భవిష్యతి ॥ తదయంనిర్గళితార్థః ॥ యథాహి— [illegible] తత్తన్నిశరణ పతితానాం సర్వేషామవిశాజపేయ [illegible] ఫలసంబన్ధో బోధ్యతే ॥ ఏవంపాణిగ్రహణస [illegible] బహూనామేవ క్రియాకలాపానాం సంస్కారరూప [illegible] ॥ తత్రపాణిగ్రహణఫలం యథా స్త్రీసంస్కారః ఏవంసమా [illegible] సంస్కారేపన ॥ సచకన్యాయామపిసంభవతీతి [illegible] ॥ యదితుపాణిగ్రహణమేవవివాహః తదంగం [illegible] సప్తపదీగమనాదికం తదాపి ద్రవ్యసంస్కారకకర్మసుఫలశ్రుతిరర్థవాదః స్యాదితి న్యాయేనప్రయాజాద్యర్థ వాద ఇవఫలసమర్పకేన [illegible] ప్రయాజాదీనామివ దృష్టార్థత్వమేవ॥ నచ [illegible] సమావేశనా వివాహాదృష్టజనక [illegible] ఇతివాచ్యం ॥ తస్యదృష్టార్థత్వసిద్ధైర్యుక్త్యం ॥ అదృష్టార్థత్వేన ప్రౌఢావివాహసిద్ధిరితి-ఘట్టకుట్ట్యామేవప్రభాతం ॥ యత్తుకామసూత్రే సమావేశనపదం ఆభ్యం తరస్యవాయు పరత్వేన వ్యాఖ్యాతం తదపిబుద్ధిసమావేశనాభిప్రాయే ణైవ ॥ [illegible] సమావేశనాభిప్రాయేణాపి!

కిఞ్చచతుర్థీహోమస్య [illegible] సమావేశనాన్యథానుపపత్త్యాకథం ప్రౌఢావివాహసిద్ధిరితి వివేచనీయం॥ తత్ర [illegible] తావత్ యథాస్రువేణావద్యతి స్వధితినావద్యతి ఇత్యాదిష్వతే స్రువకరణకావదానయోగ్యత్వం ఆజ్యస్యై

స్త్వేవం స్వత్వోత్పాదకానాం ద్రవ్యాసనయోగ్యత్వం మాంసాదేరేవేతి అర్థసామ ర్థ్యాన్నిర్ణయః కృతః తథాపి తథ్యాపహవ్యవాయార్థం శయనాత్మ కం సమావేశనమపి పత్న్యా సమేవ కామ్యేన ప్రియమాణపతీతి ప్రకా రేణ తదుపపాదనం సంభవతి । అన్యప్రయోజనాశయమాంసాదీనామివ వాత్ర కన్యాయుతత్వే సంభవేఽపి వివాహసంస్కారస్య స్వస్వత్వావతాప్య సిద్ధేర్వ్యర్థత్వాపత్తేః ప్రకృత్తిన్యాయాదప్రవర్తనాత్ ॥ ప్రమాణాంతర వివాహకాలాభావే కన్యావివాహ ఏవసాక్షిణామివేత్యపథవిష్యతీతి న తద నుపానేనయుక్తం వివాహాద్యాపి సంభవతీత్యుపదిష్టాద్వస్తుకేణోప పాదయిష్యామః । ఏవఞ్చ ప్రకృతే గృహీతం సమావేశనమితి తాదృశఫల స్య కన్యాయామేవ సంభవాద్ధి భావే తత్సమావేశనాద్యాపి న భవిష్యతి॥ ఏతేన కన్యావివాహే సమావేశనాభావేఽపి నైమిత్తికసంస్కారసిద్ధిర్భ విష్యతీత్యపాస్తం తదభావాత్ । తథాహి—కన్యాసమావేశనస్య బాధా వివాహమాత్రోద్దేశ్యత్వాభావాత్ । కన్యావివాహ సామాన్యాజ్ఞమితి ॥ నాన్యః ప్రమాణాభావాత్ ॥ సమావేశనప్రమాణానుపపత్తిరేవతు ప్రమా ణాసద్భావేఽపి నిత్యత్వాత్ ॥ నన్వేవం కన్యావివాహాంగత్వస్య భవ తైవోపపాదితత్వేన పూర్వాపరవిరోధాత్ ॥ తచ్చ నిత్యకర్మసు ప్రధాన కర్మవైగుణ్యేఽపి ఫలసిద్ధిరితి నవ్యానుమతం ॥ సమావేశనంచ ప్రధా నకర్మైతద్విపరీతం పూర్వమేవ నిరూపితం ॥ ఏవఞ్చ సమా వేశనస్యాంగత్వేఽపి సంస్కారాస్త్యభావః స్యాదితి కన్యావివాహ ఏవము పపత్తిరిత్యుక్తాచారాధారాదయోఽపి సమావేశనమనుప్ర వృత్తం । కదాచిత్ తాదృశసమావేశనస్య అదృష్టదాచార్యాది సం మతిత్వమప్యుపపద్యేత । ఇతరేతరాశ్రయదోషావశ్యకత్వాత్ తాదృ శీయుక్తిరేవాప్రామాణికా । యావతా సమావేశనముభయ

సాధారణమేవయుష్మాభిరుపపాద్యతేతావతా కథమన్యథాఽనుపపత్తి ప్రమాణావసర ఇతి భవన్త ఏవవిచారఙ్కుర్వన్తు ॥ యదితుఋతుసమావేశనాదతిరిక్తమేవ సమావేశనం శేషంసమావేశనేజపేదిత్యత్ర వివక్ష్యతేచేదపిసమావేశనం నవివాహాంగం ॥ యతోహిఋతుసమావేశనాదతిరిక్తం నిషేకాపరపర్యాయమపి సమావేశనం ఋతుసమావేశనతః పూర్వమన్యస్మైయతయా స్మృతిభిర్జ్ఞాపితమ్ [illegible] పర్యాలోచనాయామవగమ్యతే ॥ తదేవసమావేశనమత్ర [illegible] తమితి ॥ అయమాశయః ॥ నిషేకోహి [illegible] ఉచ్యతే ॥ చతుర్థరాత్రసమావేశనమపి [illegible] చతుర్థరాత్రౌ [illegible] ఇతిపాదితం॥ ఏవఞ్చపుష్పాదివానన్తర [illegible] చతుర్థరాత్రసమావేశనమపి నిషేకపదేన నిర్దిశ్యతే ॥ చతుర్థరాత్రే [illegible] సర్వేషామపి [illegible] [illegible] ॥ [illegible] ॥ [illegible] ॥

[illegible] ॥
[illegible] క్రియానిర్వృత్తిరేవచ ॥
ఏతత్ [illegible] మష్టాంగం ప్రవదంతిమనీషిణః ॥

ఇతివచనప్రతిపాదితేషు బహూనామంగానాం కన్యాయామపి సంభవాన్నకథంచిదపి సమావేశనాన్యథానుపపత్త్యాయువతి వివాహసిద్ధిః యహాతు "బ్రహ్మవ్రతానామనుప్రవృత్తి" (?)యావికారః ఇతిమోగసూత్రానుసారేణ గుప్తి(?)యావికారస్య బ్రహ్మచర్యపదార్థతయా కన్య

కాది [illegible] వర్షవయా [illegible] విద్యకాముకపర్యస్య గుప్తేంద్రి యవికారస్య [illegible] శయవాదీనామపి కలాపానాం విద్యమానత్వేపి [illegible] ముఖ్యసమావేశనము పికన్యాయామపి [illegible] పుష్పహీనాం కన్యకాం మోద్వీజాక్షమః [illegible] ఇతివద తాం [illegible] త్రానుకూలత్వాదితివిభావ్యతే. తదాపృష్టార్థ [illegible] నయుగతి వివాహస్థితి మంత వ్యం ॥ వ్యవ [illegible] వివాదాస్పదం ॥

ఎతేన [illegible] ఫలస్య [illegible] క్రియాక [illegible] వాసా [illegible] ఎతేన [illegible] స్త్రీణాం॥

అత్రప్రసంగా [illegible] రజోనంతర వివాహ [illegible] మః । తత్రవయోనిర్ణయకాలః ॥ [illegible] ప్రపువాం

పర్షట్కాకీం నర్జయేదితి, రాత్రామపి స్త్రియం వర్జనీయకోటౌ పరిగ
ణయతామాపస్తంబాచార్యాణాం ఋతుమతీ వివాహనిషేధ ఏవతా
త్పర్య మభ్యుపగమనీయం ॥ రాత్రామితిహిపదం సుదర్శనాచార్యా రమ
[illegible] లా [illegible] స్నాతాపేతి వివృణ్వతె ॥ యదిహి ఋతుమతి వివాహ
[illegible]వాపస్తంబాచార్యాణాం [illegible]పూవేశనావిలిఙ్గేన తాత్పర్యంఇతెస్యాత్తదో
[illegible]సూత్రవిరోధోపిస్పరిహారః నహ్యత్రతస్తు [illegible]మావేశనరూపాంగవిధానేపి
తేషాంతాత్పర్యం [illegible]తి [illegible]ముపపాదితమితి నోభయవిధవివాహ
తాత్పర్యే [illegible] అపి [illegible]వకాశ ఇతిమంతవ్యం ॥ [illegible]—యదాను
[illegible]రాం ప్రాప్నుయాత్ప్రతిష్ఠానికర్మాణి సంశాస్తి॥ఇతి
సూత్[illegible] కాలతః ప్రాప్తమేవ వి[illegible]ధర్మ ఇతి జ్ఞాపయ
[illegible] అన [illegible]యదారజస్వలాభవతి తదాతస్యైపత్తరీయ శ్రుతౌసంహి
తాయాం—2—5—1—ప్రశ్నే ఉక్తాన్ధర్మాన్సర్వానుపదేష్టవ్యత
యాచా[illegible]తి [illegible]వివాహాద్యాఖ్యానేసిద్ధ్యతి. వివాహానన్త
రకాలిక[illegible]కాలావచ్ఛేదేన [illegible]సంశాసనమేవాచార్యోభిప్రైతితి తుభవ
[illegible]—వివాహప్రాక్కాలికరజఃకా
లరజస్వలాధర్మానుష్ఠానాపేక్షత్వకతాది కల్పనె ప్రమాణాభావాత్.
[illegible]దినా తద్ధర్మోపదేశవిధాన పరవిధ్యన్తరకల్పనాయాస్తు నిర్మూలా
[illegible]ముక్తవిధానం నిర[illegible]పద్యతె. [illegible]దేవహిధర్మోపదేశోవిధియ
తె న[illegible] కాల[illegible] యేనవివాహానంతరకాలిక ధర్మోపదేశవిషయ
[illegible]నోక్తవిధి సార్థక్యంభవేత్. [illegible]బోధాయనాది గృహ్యాదిగత రజ
స్వలాధర్మోపదేశ విధానమపిరజోనంతర వివాహ[illegible]నోపపద్యతె.
తతశ్చపూర్వోక్త[illegible] పర్యాలోచనాయా మపిగృహ్యసూత్రాణిఋతోః
ప్రాగేవ స్త్రీణాంవివాహంకర్తవ్యం బోధయన్తీతి నిశ్చితమాపస్తంబా

భిప్రాయమహావేదయ త్త్రిస్థం. అస్మిన్నే క్రమె యదిప్రైవా ప్రుతుః హా వేశనమపి : మాపతతి తదా ఆ... ...నుమితిమం త్రి ఇతి ...వాచా ర్యభాష్య మహ్యాపత్తి ల్పత... ...భ్యనుజ్ఞాతద్వాదశాది ...యస్తి వివా... ...నాస్త్రే... తత్కా... ...రజసా ...వివాహం... ...మః తదభిప్రాయే... ...నంతరవివాహా... ...నా... ...మాసంత్రి...మేవ ... ...సమా వేశనా... ...మాదివసమ్బ్రయను... ...కాలికమేవ ...పద్యతి ఇ... ...మేవ. ...త్తం.

...భ్రాస ... ని... ...కుమా...య ...నా ...నా।
... ...॥
త్రి... ...వి... ...న... ...య... ...
...ప్రాప్తే... ...తే... ... ...
... ...ని ... ...యు...।
వి... ...మ... ... ... త్రి... ...॥

ఇ... ... ...మారా... ... ... యూనిద్వా...కవివాహ... ... ...మా... ... ...త్తం వివాహోనుష్ఠానే ...త్వా... ...నియత ప్ర... ...సమావ వేనమితి ... ...వా... ...ని... ... ...ద్వ్యాశ యోః ...నంతో వివా... ...ధర్మ... వేద్యేవ స్పష్టం ప్ర... యతే ఇతి... యతే.

...నాహకాల వి... ...కా... ...ప్తాం ...వ్యాఖ్యావి...రాః... ...వయాని ర్ణయస్తాత్ ...కాలాచిత్యా ...తవస్య గుణదోషయోశ్చ ప్రవేశ

స్య వణ—వెవాత్ర పరంతస్య దోషత్వేన వర్ణనె పూర్వాపరవిరోధోభ
[illegible] తస్మాత్ [illegible] వర్జయేదిత్యస్య గృహాగతపరయిత్రబ్రాహ్మణో
[illegible] కాలాన చ్ఛిన్న స్త్రీగమన నిషేధపర తాత్పర్యం ఋ
తుస్నాతాశబ్దస్య తత్రైవ ప్రయోగాత్। ఋతుస్నాతావివాహనిషేధ
[illegible] వివాహనిషేధవచనా సంభవాత్. యద్యప్యత్రపక్షే
వివాహానంతరభావి ఋతుసమావేశస్య నియతస్యాపి ప్రసంగోనాస్తి.
[illegible] ఋతుసమావేశమపి [illegible] సుదర్శనాచార్యభాష్య
[illegible] వివాహానుష్ఠానస్యైవా[illegible] వివాహాంర
[illegible] చతుర్థదినపర్యన్త సమావేశమపి ప్రసక్తమేవేతినదోషః.
యదా[illegible] స్యా[illegible]నాం బ్రాహ్మణ ప్రతిషిద్ధానికర్మాణిసం
[illegible] కాలికానాం బ్రహ్మచార్యసీ
త్యాదిబ్రతాను [illegible] వివాహానంతర[illegible]తాను శాసనానా
[illegible] విషయకత్వమేవ యుక్తం. ఏవ[illegible]వివాహపూర్వకాలి
కార[illegible] కాలా[illegible] క్రియతే. [illegible]సమావేశనాస్య
[illegible] వివాహస్యాపి శాస్త్రీయత్వమేవేతి తదవిరో
[illegible] యుక్తత్వాత్. [illegible] పునః వివాహపూ
[illegible] మావశ్యకమేవేత్యాగ్రహః తదాపి
[illegible] సంభవ ఇతి సర్వోపివిరోధః.
త[illegible]మప్యాచారాత్. [illegible]నిషేధస్య సంస్కా
రార్థంనియమార్థంచ పునరనుశాసనం వక్ష్యతిస్యాపి [illegible]స్య సం
స్కారార్థం నియమార్థశ్చ పునరనుశాసన మితి నోక్తసూత్రవైయ
ర్థ్యం. కి[illegible]కాల ఏవ వ్రతానుష్ఠానమావశ్యకమితి ఆపస్తంబా
శయఇతి కల్పనమపిసంభవతి. [illegible]ద్వితీయాద్యృతుకాల

ఏవం బ్రాహ్మణప్రతిషిద్ధ కర్మానుష్ఠానం న ప్రథమర్తుకాలేఽపీతి స్పష్టం ప్రతిపాదనాత్. అన్యథా తద్విరోధాపత్తేః. ఉక్తం హి నిర్ణయసిన్ధౌ— ప్రథమర్తౌ విశేషః స్మృతిచన్ద్రికాయాం.

ప్రథమర్తుమతీం పుష్పాః పతిపుత్రవతీ స్త్రియః.
ఆశీర్భిరాసనం కృత్వా తస్మింస్తాముపవేశయేత్.
హరిద్రాగంధపుష్పాద్యైర్ద్రవ్యైస్తాం బాలాం స్వయం॥
నీరాజనసంకీర్ణ్యాస్స ... వాసయేద్గృహే॥
వసాథగాపముద్గాదీన్ ద్రవ్యాణ్యాస్యై నిత్యశః॥ ఇతి.

తథా ద్వితీయర్తౌ తన్నియమానాహ. మానసోల్లాసే దక్షః.

అక్షారాభ్యఞ్జనం స్నానం ప్రవాసం దన్తధావనం॥
న కుర్యాత్ సార్తవా నారీ గ్రహాణాం వీక్షణం తథా॥
... —స్త్రియోస్త్రీణాం ... ఖర్వే చ భోజనం॥
గంధమాల్యం దివాస్వాపం తాంబూలం చాస్యశోధనం॥

ఇతి ఏతదనుగుణమేవ లోకాచారోఽపి దృశ్యత ఇతి నిరూపయంతి॥

పరేతు— పూర్వోపపాదితేన వయోనిర్ణయం నిరూపయంతో

భవంత ఏవం కథం తదన్యథానుపపత్త్యా రాత్రాం వర్జయేదితి ద్వితీయవ్యాఖ్యానస్య గృహాగతవరాయిత్యాది బ్రాహ్మణసంబంధి వరణవిషయకత్వే నోపపత్తిం బ్రూయుః॥ యది పునః కేవలముచ్యేత నవయంతేఽన్యథానుపపత్తి ప్రమాణమేవ సంకోచనిమిత్తమన్యామహే। కింతు ప్రమాణాంతరమేవేత్యపి తాదృశప్రమాణమిదమితి నిరూపణం వినా భవదీయ ప్రతిజ్ఞామాత్రస్యార్థసాధనత్వం న సంభవతి। ఋతుస్నాతాశబ్దోఽపి న షోడశ దినాభ్యంతరస్త్రీపరః। కింతు ఋతుమతీపర ఏవ॥ ఏవమస్త్వదపి।

ఋతుస్నాతాం తు యో భార్యాం సన్నిధౌ నోపగచ్ఛతి ।

ఇత్యాదావషోడశదినావచ్ఛిన్నాయా ఏవ గ్రహణం శాస్త్రాంతరపర్యాలోచనయైవేతి నకోఽపి దోషః ॥ రమణశీలా ఇతి ప్రథమవ్యాఖ్యానమప్యస్మాకమేవానుకూలం ॥ యథా చరమణశీలాత్వం ఋతుమతీత్వం ఋతుస్నాతాత్వమితి నార్థాంతరం తథాన్యత్ర విస్తరః ॥ ఏవఞ్చ వాదకథయా విచారణాయాం రాతాం పర్వమేదితి సూత్రయతా మాచార్యేణాపి ఋతుమతీ వివాహనిషేధ ఏవ తాత్పర్యమిత్యంగీకరణీయం ॥ ఏతైరేవాచార్యైః యదా మల వద్వాసాః స్యాదస్యైనాం బ్రాహ్మణప్రతిషిద్ధానికర్మాణి సంశాస్త్రీతి సూత్రేణ ప్రథమర్తుకాలానుష్ఠేయ ధర్మానుశాసనస్య ప్రతిపాదకస్య సూత్రకరణాత్ తస్య యువతి వివాహపక్షేఽనుపపన్నత్వాత్ ॥ న చోక్తవ్రతానుశాసనం ద్వితీయాద్యృతుకాలానుష్ఠేయ వ్రతమాత్రవిషయకం ॥ నిర్ణయసింధుకారైర్ద్వితీయాద్యృతుకాలావచ్ఛేదనైవ వ్రతానుష్ఠానావశ్యకతాయా ప్రథమర్తౌ తదనావశ్యకత్వబోధనపూర్వకం దక్షాదిస్మృత్యనుసారేణ సిద్ధాంతితత్వాదితి శంకనీయం॥ నిర్ణయసింధుకారోక్తభిన్నధర్మానుశాసనం ప్రథమద్వితీయాదిరజః కాలభేదేన స్మృత్యనుసారేణ సత్యం ప్రతిపాదయతి॥ నహి తావతా ప్రాథమికరజః కాలోక్తధర్మవిహీనత్వమితి వర్ణ్ణయితుం శక్యతే న చ ప్రతిషిద్ధధర్మమాత్రోపదేశ స్యైవాపస్తంబాచార్యైః సూత్రణాత్ప్రతిషిద్ధానాఞ్చ ద్వితీయాదిరజః కాలికత్వాత్తన్మతానుసారేణ ప్రథమరజః కాలో ధర్మవిహీన ఏవేతి వాచ్యం॥ ఏషాం తు సర్వస్మృత్యైకవాక్యతానావశ్యకేత్యాశయః॥ తేషాం మతే ఆపస్తంబసూత్రాణామపి స్మృత్యంతరావిరోధేనోపపత్తి వర్ణ్ణనస్యావశ్యకత్వాదాపస్తంబసూత్రం ద్వితీయరజః కాలికత్వేన నేతుం న శక్యం॥ యేషాఞ్చ సావశ్యకా తేషామపి బ్రాహ్మణప్రతిషిద్ధాని ఇతి సూత్రే ప్రతిషిద్ధ ప

Krishnaswami Sastri.

విహితత్వా[illegible]త్రిఫలకత్వ[illegible]మేవే[illegible]కాలే[illegible]పి హితతా[illegible]యథా[illegible] పూర్వం[illegible] [illegible]నః ॥

[illegible]మేవ [illegible] ॥ [illegible] [illegible]నాభి[illegible] [illegible]శాస్త్రీ[illegible] [illegible] ॥ [illegible]విధా[illegible]శాస్త్రీ[illegible] వివాహ[illegible]కాలిక[illegible]ప్రా[illegible]త్ ॥ ఇ[illegible]ంతేనా[illegible]శాస్త్రీయ[illegible]రాన్యాయప్రాప్త ప్రమాణ మితి[illegible] ॥ ఏవ[illegible]నుశాసన విధా[illegible]పరాస్తం[illegible] సూ[illegible]ర్యాలోచనయా[illegible]రజోఽనంతరవివాహోఽ శాస్త్రీయ ఇతి సి[illegible]యు[illegible]—ఏత[illegible] సమా వేశనమపి క[illegible] సుకర[illegible]నాచార్యభాష్య[illegible] వి[illegible]శేషము పపన్నస్యా[illegible] [illegible] వ్యవ[illegible]పి పరాస్తం. యథా చ—అనోర్వై నామ[illegible]యతె [illegible] సుమ[illegible]సహరః త్రాదిభా ష్యా[illegible]వృత్య [illegible]పూర్వమేవ సూచితం. [illegible]ష్వపవ వ్యవాయోదృశ్య[illegible]తత్వాచారవిశేషస్య దేశవిశేషే ప్రతిపాదనపరమిత్యే వవాక్యశేషాదినా స్పష్టం ప్రతీయత ఇతి న కథమపి భవతామనుకూలమితి.

అత్ర కేచిత్ — రజోఽనంతరవివాహాభ్యుపగమేఽపి కదాచిదేవవి

వాహచతుర్థదినే యుగ్మమావేశనస్య [illegible] నసంసర్గేణ. [illegible] న్యాదైవపసిన్నా [illegible] ర్వ్యాస్సిద్ధ్యవాదితి విశేషణము [illegible] మేవేతి వక్తవ్యమ్—తత్ర వయోవస్థయా కాలాః కార్య్యసామాన్యం ప్రతిసిద్ధస్య [illegible] వకాలత్వాత్ స్యాత్ [illegible] నువాదో నిరర్థకః [illegible] వస్యన్తృష్టకాలత్వ మ స్యసంభవమాత్రమేవేతి [illegible] భఙ్గ [illegible] స్థ [illegible] యుక్తిః. విశేషాత్తు [illegible] యః [illegible] మెవ [illegible] ఇత్యాది వచనైః కాలస్య [illegible] మేవ [illegible] ప్రాగ్వశమేవముక్త్వా వివాహం [illegible] ప్రతిపాదనాత్. [illegible] ద్రానపి వివాహో [illegible] యుఞ్జన్ [illegible] త్వనన్ [illegible] విరాహం [illegible] యాః [illegible] విధానా [illegible] ప్రాగ్వ [illegible] త్యాః ప్రా [illegible] స్థితి [illegible] వక్తవ్యమ్ [illegible] పుష్పవతీవివాహస్య [illegible] యుక్తిః [illegible] నాచార్య భాష్యతాత్పర్య [illegible] యుక్తం. [illegible]

వివాహకాల విఘ్న కాలాస్తు.

వివాహే వితతే యజ్ఞే హోమకాల ఉపస్థితే.
కన్యామృతుమతీం దృష్ట్వా కథం కుర్వన్తి యాజ్ఞికాః॥
స్నాపయిత్వా తు తాం కన్యా మర్చయిత్వా హుతాశనం॥
యుఞ్జానాహుతిం కుర్వీత తతః కర్మ ప్రయోజయేత్॥
ప్రధానహోమమనిర్వృత్తే కుమారీ యది సార్తవా॥
త్రిరాత్రేఽపగతే వశిష్టం కర్మ సమాపయేత్
స్మృతిభాస్కరే—వివాహహోమే ప్రక్రాన్తే యది కన్యా రజస్వలా॥

త్రిరాత్రందంపతీస్యాతాం పృథక్ఛయ్యాసనాశనౌ॥
చతుర్థేహానిసంప్రాప్తే తస్మిన్నగ్నౌయథావిధి॥
వివాహహోమంకుర్యాతా మిత్యాదిస్మృతిసంగ్రహః.

ఇత్యాదివచనైః ఋతుదర్శనస్య దోషత్వమాత్రంవర్ణితం వర్ణాశ్రమకాండే. నతుప్రథమరజోదర్శనస్యదోషత్వం. తన్నిబన్ధనప్రాయశ్చిత్తాదికంవా. హేమాద్రౌతు—గౌతమః.

వివాహశేషహోమాత్ప్రాక్ భార్యాప్రథమార్తవా॥
తత్పతిస్నానభార్యే చ ప్రాయశ్చిత్తమిహార్హతః।
హవిష్మతీరిమా అద్భిః పవమానాస్తాం స్నాపయేన్మృదా॥
కృత్వాతదాచరేత్కృచ్ఛ్రం పానంకాయసంహితం॥
ఏవంస్నైప్రత్యహంకుర్యాత్పంచమేహానిపూర్వవత్॥
స్నాపయిత్వోపవీధాయ పూర్వవచ్ఛుద్ధవాససా॥
పూర్వవచ్ఛేషహోమాన్ స్వాహా తతశ్చాన్ద్రాయణంపృథక్॥
కృత్వాఽనుపాపశుద్ధ్యస్తా మన్యథాదోషసంభవా॥
తదాసాంసపరిత్యాజ్యా పూర్వంపుష్పవతీనచేత్॥
నియోగ్యాహవ్యకవ్యే షుసానారీవృషలీభవేత్.

ఇత్యాదివచనైర్విధీయమానం బలవత్తరప్రాయశ్చిత్తాదికం ప్రథమార్తవవిషయమేవేతి స్పష్టంప్రతీయతే ఏవఞ్చవైద్యనాథ దీక్షితీయవచనానాం నిమిత్తగతవిశేషాశ్రవణాత్ ప్రథమద్వితీయాది రజోవిషయకత్వమేవ కల్ప్యత ఇతి నిమిత్తగతప్రాథమ్య తదభావాభ్యాం కల్ప్యయోరపితదీయయోః పరస్పరభిన్నత్వాన్నోపసంహారఇతి నిబన్ధనకృతోరుభయోరపి సమానార్థ తాత్పర్యవర్ణనమసంగతమేవ.

యదప్యుక్తం—వివాహాతఃపూర్వంపుష్పవత్యాః ప్రాయశ్చిత్తకాలే నాపి నశుద్ధిరితిచాపి హేమాద్రావుపపాదితమితి—తదపినసఙ్గతం ।

తదానీన్నపరిత్యాజ్యాపూర్వా పుష్పవతీయదిచేత్ । ఇతి వచనంహి నతావత్పూర్వముత్పన్నపుష్పవతీ మధ్యేవివాహాత్సఞ్జాతపుష్పాయాః కన్యాయాః కాదృశ్యాస్త్రియాః ప్రాయశ్చిత్తాసంశుద్ధిబోధనద్వారా పూర్వంపుష్పవత్యా ప్రాయశ్చిత్తకాలేనాప్యశుద్ధిం బోధయతీతి వర్ణయితుంశక్యతే। నయోగ్యా హ్యవ్యక్తస్యైషు సాకన్యావృషలీస్మృతా ॥ ఇతివాక్యశేషేణాసన్వయాపత్తేః । ఆకాంక్షాయామేవఖలు పరస్పరాన్వయోనానాకాంక్షాయాం। యదావపూర్వం పుష్పవతీనచేదపరిత్యాజ్యేతిసమన్వయస్తదాఽపరిత్యాజ్యాయా వృషలీత్వాదివర్ణనమసఙ్గతమేవ భవతి ॥ పుష్పవతీంచేదిత్యత్రఘటకపుష్పవత్యాస్తనయోగ్యేతివాక్యే పరామర్శోనసంభవతి । సర్వనామ్నాం ప్రధానపరామర్శిత్వస్యైవౌత్సర్గికత్వాత్ ।

యుక్తంచైతత్—నిర్ణయసింధుకారైరపి

కన్యామృతుమతీంశుద్ధాం కృత్వానిష్కృతిమాత్మనః ।
శుద్ధించకారయిత్వాతాం ఉద్వహేదన్యశంసకః ।

ఇత్యాశ్వలాయనస్మృత్యనుసారేణవివాహాతః పూర్వంపుష్పవత్యా అపి ప్రాయశ్చిత్తాదినశుద్ధిప్రతిపాదనాత్ । యద్యపి పితామహాదీనామపి ప్రాయశ్చిత్తంవిధాతౄణాం నిర్ణయసింధుకారాణామృతుమతీ వివాహాభావయుక్తఇత్యేవాభిప్రాయః ప్రతీయతే; తథాఽపియఃకశ్చిత్కాలేనదదాతి తద్విషయమితి మాధవాచార్యాభిప్రాయానుసారేణ తేషామపి తదభిప్రాయ కల్పనాన్నదోష ఇతి వర్ణయంతి ।

పరేతు వర్ణాశ్రమకాండే నిమిత్తగతప్రాథమ్యాశ్రవణమాత్రేణ ద్వితీయమాత్తవ విషయీకరణం నయుక్తం॥ అశ్రుతస్యాఽపితస్య వాక్యాంతరైక వాక్యతామాత్రేణ ప్రతీతిసంభవాత్ ॥ అన్యథాద్వితీయత్వాదీనామప్యశ్రుతత్వేన భవనీయసిద్ధాన్తోఽపి కథంసిద్ధి ముపేయాత్ ॥ ఏవంచోభయోఽపి నిబంధనకృతోరేకార్థ తాత్పర్య కల్పనమేవయుక్తం॥ యజ్ఞానాది హోమమానసమాన నైమిత్తికాది ప్రత్యభిజ్ఞానాదైకత్వమిత్యన్యత్ర విస్తరః ॥ యదపిపూర్వం పుష్పవతీనచేదిత్యస్యాన్యధైవాభిప్రాయోవర్ణనీయ ఇత్యుక్తం తత్రప్రతిబ్రూమః ॥ యద్యపినిర్ణయసింధుకారైః వివాహతః పూర్వమపి పుష్పవత్యాః ప్రాయశ్చిత్తాదికంప్రతిపాదితం; యద్యపిచ నయోగ్యాహవ్యకవ్యేషుసాకన్యా వృషలీస్మృతా ఇతివాక్యశేషేతచ్ఛబ్దేన పూర్వం పుష్పవత్యాః పరామర్శోన సంభవతీతి పూర్వంపుష్పవతీ-ప్రథమార్తవా ప్రాయశ్చిత్తేకృతే అపరిత్యాజ్యా ॥ నచేత్-అకృతేతు ప్రాయశ్చిత్తేనయోగ్యా హవ్యకవ్యేషు ఇతివ్యాఖ్యానమేవ యుక్తమితిభవతాం ప్రతీతిర్విద్యతే; తథాఽపి కృత్వాను పాపశుద్ధావస్తు మన్యథాదోషసంభవా ॥ ఇతిపూర్వవాక్యార్థస్యాపి అనేన వర్ణనేన నయుక్త్యదోషోభవేత్ ॥ ఏవముక్రమేవమధ్యేవివాహంప్రథమార్తవాయా విశేష్యాగ్రహణేన పూర్వంపుష్పవతీనచేదిత్యనేనపునరనువాదోఽపినిరర్థకస్సంపద్యతే ॥ తథాపూర్వశబ్దేనసావధికార్థబోధకేనప్రాథమ్యవివక్షాసంభవముక్తికా ॥ నచేవితిచెచ్ఛబ్దఘటితవాక్యార్థపూరణం ప్రతిప్రథమార్తపదస్యైవసామర్థ్యమితి అశాబ్ద ప్రాయశ్చిత్తాకరణస్య వివక్షాచాసంభవముక్తికేత్యాది బహుదోషకలుషితత్వాద్భవదీయ వ్యాఖ్యానంనయుక్త మితి వయోనిర్ణయకారీయ వ్యాఖ్యానమేవ సముచితమితిపశ్యామః. యావత్తావివాహమధ్యకాలిక ప్రథమార్తవవి

షయ ఏవైతాదృశప్రాయశ్చిత్తవిధానం తావతా వివాహాత్ పూర్వం రజోదర్శనేఽపి గురుతరప్రాయశ్చిత్తానుష్ఠానమేవావశ్యమితి నిర్ణయసింధుకారైరపి కన్యావరపిత్రాదీనాం సర్వేషామపి ప్రాయశ్చిత్తం విహితమితి కేవలకన్యాశుద్ధిమాత్రేణ న వృషలీత్వనివృత్తిరిత్యభిప్రాయేణైవ న యోగ్యా హవ్యకవ్యేషు సా కన్యా వృషలీ స్మృతా ఇతి వచనం ప్రవృత్తం.

కించేదం గౌతమీయం వచనమితి హేమాద్రితోఽవగమ్యతే॥ గౌతమస్మృతౌ వచనం ప్రాగృతోరితి ఋతుకాలతః పూర్వమేవ వివాహమభిప్రైతీతి తాదృశతాత్పర్యకల్పనం యుక్తతరమేవ. యతశ్శక్తోఽపి ఋతుకాలతః పూర్వం కన్యాం న ప్రయచ్ఛతి తాదృశపిత్రాదీనామేవ దోషప్రతిపాదనం తు నయుక్తమేవేత్యుపరిష్టాదుపపాదయిష్యామః. అస్తు వా భవదీయ వ్యాఖ్యానమేవ సముచితమితి తావతాఽపి రజోఽనంతరవివాహధర్మతావాదః కథం బాధవతాం నేష్యతీతి వివాహకాల విమర్శకారోక్తం చిన్త్యమేవ. సుదర్శనాచార్య భాష్యగతం దైవాదితి పదమప్యదానీమేవ సమాసం సంపద్యతే. దాతాం అర్దయేదిత్యత్ర ఋతుస్నాతాం రక్షయేదితి వ్యాఖ్యానమపి అస్మాకమేవానుకూలమితి ముక్తప్రాయం. ఏతేన బోధాయనాశ్వలాయన జైమినిగోభిల పారస్కరాద్యభిమత వివాహాఙ్గవధూపేక్షణం న రజోఽనంతరవివాహలిఙ్గమితి సూచితమితి తద్ధర్మతావాదోఽసంగత ఏవేతి వర్ణయన్తి.

అత్రేదం విచారణీయం—వివాహకాల విమర్శకారైః సమావేశనాద్యన్యథానుపపత్త్యైకం రజోఽనంతరవివాహాః శాస్త్రీయా ఇతి ప్రతిపాద్యతే ఉతాహో అశాస్త్రీయస్యాపితస్య వృషలీత్వనివర్తక ప్రా

యశ్చిత్తానుష్ఠానానంతరమప్యనుష్ఠానే సదోషః ఇత్యాపత్కల్పతయాఽభ్యనుజ్ఞానమాత్రమితి.

అద్యైరాతాం నగ్నామిత్యాది నిషేధజాగ్రత్ సమావేశనాన్యథానుపపత్తి ప్రమాణసహకృతః శాస్త్రీయస్య సమర్థనాసంభవః. సంభవేత్తు ప్రాయశ్చిత్తానుష్ఠాన వ్యవస్థాపనం భవతామసంగతమేవ సంపద్యతే. నహి శాస్త్రీయకర్మానుష్ఠానే ప్రాయశ్చిత్తాపేక్షా. అశుద్ధినివర్తనార్థంఖలు ప్రాయశ్చిత్తానుష్ఠానం తత్రయఃఋతుష్వనంతర వర్షత్రయపర్యన్తం వివాహకాల ఇతిస్మృతే తావత్పర్యన్తం వివాహానుష్ఠానేపినాశుద్ధిస్స్యాదితి, ప్రాయశ్చిత్తానుష్ఠానంవితథమేవ. నోపయంధ్యాత్ప్రజస్వలామిత్యాదివచనాన్యపి దత్తజలాంజలీని ప్రసజ్యేరన్.

సమూక్తవచనేన యాచమానాయాఽపివరాయయః కన్యాంనప్రయచ్ఛతి అయాచమానేపివరేయః స్త్రీయుక్తాకారే కన్యాంనప్రయచ్ఛతి తస్యైవవిషయీకరణంయుక్తం. యతోహి

అప్రయచ్ఛన్సమాప్నోతి భ్రూణహత్యామృతావృతౌ ।
నయాచతేచేదేవం స్యాద్యాచతేచేత్పృథక్పృథక్ ॥

ఇతిమనుస్మరవచనస్యైవవాక్యశేషసత్త్వేన సంభవతి । తేనహివచనేన సామాన్యతో రజస్వలాదాననిమిత్తం భ్రూణహత్యాదోషంప్రతిపాద్య విశేష్య తస్యయాచమానాయవరాయసదానేరజఃసంఖ్యాకత్వం అయాచమానేకస్మిన్నపిసదానే యావత్స్నానకాల మేకభ్రూణహత్యేతి ప్రతిపాద్యతే । తత్రయద్యయాచమానే కస్మింశ్చన యానదదాతితస్యైకా భ్రూణహత్యా ప్రతిపాదితా; తథాపి

త్రీణివర్షాణ్యుదీక్షేతకుమార్యృతుమతీసతీ ।

ఇతివర్షత్రయపర్యన్తం దానగౌణకాలస్యప్రతిపాదనాత్తృతీయేపివత్స రేయఃకన్యాంనప్రయచ్ఛతి తద్విషయకత్వమేవోచితమితి తావత్పర్యన్తం కన్యాయాఅదానేనదోషలేశోస్తి॥ ఋతుసంఖ్యాకగోదానేన ప్రాయశ్చిత్త విధానమపియాచమానాయాపివరాయయఃకన్యాం నప్రయచ్ఛతి తద్విష యకమేవేతి రజోనన్తర వివాహసామాన్యస్యప్రాయశ్చిత్తానుష్ఠాన పూర్వకానుష్ఠానస్య వ్యవస్థాపనం నాస్మాభిః కృతమితిచేత్ - సత్యంతథాపి నతత్సంగతంభవతి ॥ త్రీణివర్షాణీతి వచనస్య గౌణకాలసమర్పకత్వే ప్రమాణాభావాత్॥ ప్రాయశ్చిత్తానుష్ఠానపూర్వకదానాధికారకాల బోధకత్వేనైవోపపత్తేర్వర్ణనీయత్వాత్ ॥ యతోగౌతమేనప్రదానంప్రాగృతోః అప్రయచ్ఛన్ దోషీభవతి ఇతిఋతుకాలతః పూర్వమదానేన భ్రూణహత్యాదిదోషఃప్రతిపాదితఃఅత్రిచవిషయేకాలే౽దాతాపితా వాచ్య ఇత్యాదివచనాన్యప్రమాణీ కర్తవ్యాని ॥ ఏవంచయోహిమనుః ప్రథమతఋతుకాలతః పూర్వమేవదానంప్రతిజానీతే సకథంఋత్వనన్తర వర్షత్రయమపి దానకాలఇతిబోధయేత్ ॥

కామమామరణాత్తిష్ఠేద్గృహేకన్యర్తుమత్యపి॥

ఇతివిరోధార్థకమపి శబ్దం ప్రయుఞ్జానస్యాయం ప్రదానంప్రాగృతోరితి వచనైక వాక్యతాపేవాభిప్రేతేతి ఏకభ్రూణహత్యాదోషస్య విద్యమానత్వాత్తన్నివర్తనార్థం ప్రాయశ్చిత్తానుష్ఠానమావశ్యకమేవేతితచ్ఛాస్త్రీయతావాదో౽నంగతఏవ॥ఉత్తరత్రచైతద్విస్తరేణోప పాదయిష్యామః॥

యదపికేచిత్—ముఖ్యకాలాతిక్రమణనిమిత్తమేవేదంప్రాయ

శ్చిత్తం ॥ నతునిషేధశాస్త్రాణ్యంశునిమిత్తమితి వర్ణయంతి ॥ తదపినసంగతం ॥ ముఖ్యకాలాతిక్రమణమేవ నిమిత్తమితివచనం వినాభవదీయప్రతిజ్ఞామాత్రస్య నిర్మూలస్యానిష్ఫలత్వాత్ ॥ నిషేధశాస్త్రాణాంచ బహూనాం విద్యమానత్వేన తదుల్లంఘననిమిత్తకత్వ వర్ణనస్యైవ యుక్తత్వాచ్చ ॥ ఏతేన గౌణకన్యాయాం వివాహ ఇత్యాదయః పరాస్తాః ॥

ద్వితీయేతు వయోనిర్ణయసిద్ధాంతే ఏతత్సర్వ్యగతానామితి మహాత్మా సంవత్సరేణ నగ్నికాపివా ఉడపి ఋతుమతీ వివాహ ఏవ సాక్షీయానిత్యాది నిరూపణమసంగతంభవతీతి ॥

అత్ర కేచిదాపత్కల్పతయా ప్రాయశ్చిత్తానుష్ఠానపూర్వకంనాపి రజోనంతర వివాహమపి శాస్త్రీయమత ఏవేతి తదనుష్ఠానే నదోషఇతి వదన్తి.

అస్త్వేతత్సత్యం నదోషః । తథాపిస వివాహః కామార్థ ఏవస్యాన్న ధర్మార్థః. ప్రాయశ్చిత్తానుష్ఠానే నకేవలమవివాహ్యత్వ యోగ్యతాయా ఏవ నివృత్తిః నతుధర్మానధికారస్యాపీతి వృషలీత్వనివృత్తిర్నాస్త్యేవేతి.

పరేతుప్రాయశ్చిత్తానుష్ఠానే సత్యపి వృషలీత్వస్యాపి నివృత్తిరస్తీతి. పక్షేప్యేవమపి కన్యాపిత్రాదీనాం భ్రూణహత్యాదోషస్య సన్నిహితత్వాత్తస్యచ ప్రాయశ్చిత్తాచరణేపి సర్వథానివృత్త్యసంభవాత్సం వ్యవహార్యత్వయోగ్యతాసిద్ధావపి నరకసంబంధో దుర్నివారఇతివర్ణయన్తి.

సర్వథాపితు.

ప్రక్షాళనాద్ధి పఙ్కస్య దూరాదస్పర్శనం వరం.

ఇతిన్యాయేన యథావృషలీత్వాదికం కన్యాయాః తత్పతిత్వాచ్చ

నాస్య భ్రూణహంతృత్వఞ్చ తత్పిత్రాదీనాం నష్టార్తవదర్శనేఽపి సమయోఽవాది పరంపరాగతః సంరక్షణీయ ఇతి రజోనంతరవివాహశాస్త్రీయ తాత్పర్యసమర్థనమసంగతమేవేతి అలమనేన ప్రసక్తానుప్రసక్తవిచారేణేతి ప్రకృతమేవానుసరామః,

అథ వాసిష్ఠాదిశాస్త్రబ్రహ్మచర్యవిధానపర్యాలోచనయాఽపి రజోనంతరవివాహసిద్ధిరిత్యుపపాదయామః. సర్వేషు హి గృహ్యసూత్రేషు ఏకరూపేణ వధూవరయోః బ్రహ్మచర్యవిధానం దరీదృశ్యతే. బ్రహ్మచర్యఞ్చాన్యవాయాభావ ఇతి చ సుధీభిరుద్భిః ప్రతిపాదితం. తత్రయది కన్యావివాహ ఏవ శాస్త్రీయస్స్యాత్తదా కన్యాయాం వ్యవాయప్రసక్తేరేవాభావాత్తన్నిషేధో వ్యర్థ ఏవ సంపద్యేతేతి తదన్యథానుపపత్త్యా తత్సార్థక్యాయ ఋతుమతీవివాహోఽభ్యుపగమనీయ ఇతి కేచిద్వర్ణయన్తి.

వయోనిర్ణయకారాస్తు — కాముకపర్యస్య కన్యాయామపి రాగప్రసక్తిస్సంభవత్యేవ ఇతి నిషేధోపపత్తే తదనుసారేణ ఋతుమతీ వివాహసాధనం న యుక్తిసహం. యది హి కన్యాయాం రాగ ఏవ న స్యాదితి స్యాత్తర్హి.

అసంస్కృతాం పుష్పహీనాం కన్యకాం యో ద్విజాధమః॥
రంతుమిచ్ఛతి పాపాత్మా నరకం యాతి దారుణం॥

ఇతి వచనమసంగతార్థకం స్యాత్. యది తు రాగసంభవేఽపి ప్రవృత్త్యసంభవాన్నిషేధవైయర్థ్యమిత్యుచ్యతే. తదాఽపి ప్రవృత్తిపదేన ప్రవృత్తిసామాన్యస్య సంగ్రహణం. ఉతాహో సఫలప్రవృత్తేరేవేతి వివేచనీయం॥ నాన్త్యః. ప్రవృత్తిసామాన్యస్యైవ నరకప్రయోజకత్వాత్। ప్రథమే॥

అప్రౌఢాంకన్యకాం విప్రోయత్యక్త్వామాతుగోన్వహం।
తస్యైవనరకేవాసః కాలేనస్యాత్తమద్భవః॥

ఇతివచనే నవ్యవాయప్రవృత్తి నిషేధస్యాకృతత్వాన్నతాఘ్న్యాపత్తిః యదితు సఫలప్రవృత్తిరేవ నరకోత్పాదికేత్యాగ్రహః - తదాపిమైథునస్యస్మరణాద్యష్టాంగ విశిష్టస్యైవ తత్రతత్రప్రతిపాదనాత్. యోగరత్నాకరే, విపరీతం బ్రహ్మచర్యం ఏతదేవాష్టలక్షణం॥ ఇతివచనానుసారేణైకాఙ్గానుష్ఠానేపిబ్రహ్మచర్యవ్రతభంగోభవేదితి కన్యాయామపి వ్రతభఙ్గప్రసక్తేః అన్యథోపపత్తిరితి నర్ణయన్తి। తదేతద్వివాహకాలవిమర్శకారాణాముపస్తై। యద్యప్యపుష్పవత్యా అపిరాగతఃసంభవాదేవ ఉక్తమార్కణ్డేయవచనానుసారాత్; తథాపిప్రవృత్తిమాత్రస్యాసంభవాదేవ॥ నచోక్తకేవలవచన విరోధః శఙ్కనీయః। తత్రాప్రౌఢామిత్యస్య యోగరూఢ్యాఉపరితేతాయాం ప్రసిద్ధ్యాపుష్పవతీపరత్వోపపాదనాసంభవాత్। యదితు - యోగరూఢ్యమానాభావేనప్రౌఢాశబ్దస్య పుష్పవత్త్వామేవలోకే ప్రయోగవశ్యనేనచ పుష్పవతీపరత్వమేవాఙ్గీకరణీయమిత్యాగ్రహః; తదాఽస్తునామాన్యత్ర తాదృశార్థగ్రహణం॥ అత్రతువాక్యే తాదృశార్థగ్రహణం నసంభవత్యేవ॥ కాలేనస్యాత్తమద్భువ ఇతివాక్యశేషవిరోధాత్। అపుష్పవత్యాం పుత్రోత్పత్తిసంభావనాయా అప్యసంభవాత్।తదనన్తరమేవవదనేనస్పష్టముపగమ్యతే పుష్పవత్యాస్యపివాహితాకన్యాశబ్దవ్యవహార్యేతి॥ ఏవఞ్చ

అప్రౌఢాంకన్యకాం విప్రోయత్యక్త్వామాతురోన్వహం ॥ ఇత్యత్రాప్రౌఢాపదేనా వివాహితాయా ఏవగ్రహణమితి అపుష్పవత్యాం వ్యవాయప్రవృత్తిర్న సంభవత్యేవేతిత్రిరాత్రబ్రహ్మచర్య విధానాన్య

థానుపపత్త్యగ్నమతీ వివాహోఽపి శాస్త్రీయ ఇత్యేవాఙ్గీకరణీయమితి ॥ మాధవాచార్యా అపి కన్యాశబ్దోఽవివాహితాపరః నాష్టవర్షాదిబాలికాపరః వృద్ధాదిష్వపి భారతాదౌ కన్యాశబ్దప్రయోగదర్శనాత్ ఇతివదన్తోఽస్మాకమనుకూలాః ॥ కన్యాయాః; కనీనచేతి సూత్రస్థం పాతఞ్జలభాష్యమపి అస్మదనుకూలం ॥ తత్రహి భాష్యే కన్యాశబ్దః పుంసాఽభిసంబన్ధపూర్వకే సంప్రయోగే నివర్తతే॥ యాతుప్రాగభిసంబన్ధాత్పుంసా సహాయునక్తి కన్యైవ సాఽభిమతా ఇత్యుక్తం ఏవఞ్చావివాహిత స్త్రీపరత్వమేవోక్త భాష్యాత్ప్రతీయతే ॥ ఏవఞ్చ ఋతుమత్యామపి అవివాహితాయాం కన్యాశబ్దప్రవృత్తిర్వ్యక్తైవ ॥

ఋతుస్నాతాతు యాశుద్ధాసాకన్యేత్యభిధీయతే ॥

ఇతివచనమపీదానీమనుకూలమితి

అప్రౌఢాంకన్యకాంవిప్రోయభక్త్యా-మాతురోన్వహం ॥

ఇతివచనస్మృత్యుమతే వివాహవిషయమేవేత్యేవ వర్ణనీయమితి రజస్వలావివాహోఽపి శాస్త్రీయ ఏవేతి ॥

పరేతు - అప్రౌఢాంకన్యకాం విప్రఇత్యత్ర కన్యకాశబ్దేనైవావివాహితార్థలాభే పునఃప్రయుక్తస్యాప్రౌఢాపదస్యతదర్థకల్పనా సంభవాద్యోగరూఢి కల్పనేచప్రమాణాభావాత్ అపుష్పవతీయభవనే మత్త్వవర్ణనమేవోక్త దేవలవచన తాత్పర్యమభ్యుపగమనీయం ॥ నచ - కానీనః స్యాత్తదుద్భవ ఇతి వాక్యశేషవిరోధో భవతీతిశఙ్కనీయం॥ యథాప్రాగ్వివాహాదృతుమత్యాయభవనంనిషిద్ధంతథావివాహాతః పరమపిరజోదర్శనతః పూర్వంతద్యభనంశాస్త్రనిషిద్ధమితి ప్రథమాయాం సముచితకాలే స

ముత్పన్నస్యైవద్వితీయస్యాంసముచితేకాలే సముత్పన్నస్యాపి కానీనత్వబోధనద్వారా వివాహితాయాఏవపుష్పవత్యాఏవయభిసంబోధయతాంచైవలాచార్యాణాంబాలికాయామపియభిననిషేధఏవతాత్పర్యేణతద్వత్త్రిరాత్రబ్రహ్మచర్యవిధానస్యాప్యుపపత్త్యాతదన్యథాఽనుపపత్తిప్రమాణస్య నావసరః ॥

నన్వేవంసత్యృతుమతీ యోనిత్వాత్కథం అపత్యసంయోగ ఇతి కన్యాయాః కనీనచేతిసూత్రభాష్యప్రదీపయోః కథముపపత్తిరితి చేదేవం; యదాతుకన్యాత్వం తదాపత్యయోగోన । యదాఽపత్యయోగస్తదా కన్యాత్వం నేతిఖలుపూర్వపక్షభాష్యం ॥ తదస్మన్మతేఽపినవిరుద్ధం ॥ అస్మాభిరపి సముచితకాలే సముత్పన్నస్యైవకానీనత్వస్వర్ణనాత్ ॥ అథోచ్యేతైవంగతిభాష్యకారైరపి ప్రాగభిసంబంధాత్పిత్రగృహేదర్శనాచ్చేతి ఖలువక్తవ్యంస్యాత్. తేతువివాహపూర్వకాలికం ఋతుసంయోగమాత్రంకన్యాశబ్దార్థతావచ్ఛేదకతయావివక్షన్తి. తత్రయదిభాష్యకారాణామపి భవదీయంమతం సంమతంస్యాత్తదా కిమితిరజోదర్శనతః పూర్వం వేతినవర్ణయేయుః ఇతి సిద్ధాన్తభాష్యవిరోధః సంభవత్యేవేతి.

తత్రేదంసమాధానం భాష్యకారాశ్చాపి ఋతుదర్శనతః పూర్వమేవ వివాహమభిప్రయన్తి. సతుశాస్త్రవిరుద్ధమృతుమతీవివాహం. అభిసంబంధపూర్వకే సంయోగేఽపిచ స్తేత ఇతిభాష్యేహి సంయోగపదేన శాస్త్రీయఋతుసమాగమనమేవవివక్ష్యతే. వివాహంవినాచ సంయోగేవిశేషాభావాత్కన్యాశబ్దః ప్రవర్తతే. వివాహపూర్వక నిషిద్ధసంయోగేచ విశేషాభావాత్కన్యాశబ్దః ప్రవర్తత ఇతిరజోదర్శనతః పూర్వంవేత్యస్య త్వపి శాస్త్రశేషఏవ పర్యవసానమితి నకోఽపిదోషః.

అయమాశయః — కిం భాష్యకారాణామపి ఋతుమతీవివాహ ఏవ తాత్పర్యం కల్ప్యతేన; ఋతుమతీవివాహేఽపి తాత్పర్యస్యైవ కల్పనాదితి చేత్ తర్హీదం ప్రష్టవ్యం. కిం బాలికానామవివాహితానాం పుంసంయోగేఽపి న దోష ఇతి భాష్యకారాశయః ఉత తాసామపి తత్సంయోగో దోషాయైవేతి, నాజాతలోమ్న్యోపహాసం సంవిశేత్ ఇతి వచనానుసారేణ దోష ఏవేతి కల్పనే చ నిషిద్ధస్యాపి సంగమస్య నిషేధోల్లంఘనేనాచరణాత్ కో వా దోష ఇతి చేత్ తత్పుత్రస్య కానీనత్వాపత్తిరితి వక్తవ్యం. తత్ర చ ప్రమాణం అప్రౌఢాం కన్యకాం విప్రో యస్త్వేతాం మాతుర్గోత్రవహాం ఇతి వచనమేవ. తత్ర యది పుష్పవత్యా అవివాహితాయాః పుంసంయోగేన సముచితకాలే సముత్పన్నస్యైవ కానీనత్వం ప్రతిపాద్యేత తదాఽప్రౌఢాపదవైయర్థ్యం. అప్రౌఢాపదే నావివాహితార్థవివక్షాయాం కన్యకాశబ్దవైయర్థ్యమితి భవన్మతే దోషః. కన్యకాశబ్దేనాఽపుష్పవతీ గ్రహణేఽప్యస్మన్మతే నైవ సమాయాతం. అస్మన్మతే తు వివాహితాయామపుష్పవత్యాం పుంసంయోగేన సముచితకాలే సముత్పన్నస్యైవ కానీనత్వం ప్రతిపాద్యత ఇతి న వైయర్థ్యం. అభిసంబంధే కన్యాశబ్దో నివర్తత ఇతి వక్తవ్యం తత్పూర్వకే సంయోగ ఇతి గుణతరమార్గాదరణస్యాపీదానీమేవ ప్రయోజనమితి న కథంచిదపి భాష్యకారాః అశాస్త్రీయమార్గానుసారిణ ఇతి కల్పయితుం శక్యతే. అయమభిప్రాయః. అవివాహితావస్థాయాం పుష్పవత్యాం పుంసంయోగే ప్రాయశ్చిత్తే చాఽకృతే వివాహానంతరముత్పన్నః పుత్రః కానీనో వా నవేతి విచారణాయాం కానీన ఏవేతి వర్ణనీయమితి యథా తథా వివాహితాయామపి రజోదర్శనతః పూర్వం పుంసంయోగే అకృతే చ ప్రాయశ్చిత్తే సముచితకాలే సముత్పన్నః కానీన ఇత్యేవాంగీకరణీయం. ఏవఞ్చోక్తవచన సిద్ధాన్తానువాదకే భాష్యే విప్రాగభిసంబన్ధాదిత్యస్య ప్రాగ్రజో

దర్శనాచ్చేత్యే తదుపలక్షణత్వేన వాక్యోపపత్తిర్వర్ణనీయేతి నకోపివిరోధః ॥ ఏవం ॥

అసంస్కృతాం పుష్పహీనాం కన్యకాం యోద్విజాధమః।
రన్తుమిచ్ఛతి పాపాత్మా నరకం యాతిదారుణం॥

ఇతివచనస్య ప్రవృత్తిపర్యంత పరత్వాంగీకారఏవ సముచితఇతిక్షత్యయూనాగ్రకద్వయానుసారేణ త్రిరాత్రబ్రహ్మచర్య విధానోపపత్తి వర్ణనం యుక్తమితినకథంచిదపి ఋతుమతీ వివాహశాస్త్రీయతావాదః సిద్ధ్యేత్. యదపిచోక్తం - కన్యాశబ్దోఽవివాహితా పరఇతితదప్యేతేన పరాస్తం। ఉక్తపూర్వార్ధండేయవచనే అసంస్కృతామితి పదవైయర్థ్యాపత్తేః.

కిఞ్చాత్రభవాన్పృష్టో వ్యాచష్టాంకిం కన్యాశబ్ద ప్రవృత్తినిమిత్తమవివాహితత్వ మితిభవదాశయః ఉతాహో ప్రవృత్తి నిమిత్తాంతరేసత్యపి అవివాహితత్వధర్మ పురస్కారేణ కన్యాశబ్దస్యగౌర్యాదినా వృద్ధాదిసాధారణ్యేనాపి ప్రయోగోఽయుజ్యతఇతి । తత్రనతావత్ప్రథమః కల్పః సంభవతి—కన్యాకుమారీశబ్దయోః పర్యాయత్వానుసారేణోభయోరపిసమాన ప్రవృత్తినిమిత్తకత్వస్యావశ్యంవర్ణనీయత్వేన కుమారీశబ్దస్యేవ కన్యాశబ్దస్యాపి కౌమారవయః ప్రవృత్తినిమిత్తకత్వమేవ యుక్తమితి అవివాహితత్వమేవప్రవృత్తినిమిత్తమితి వర్ణనాసంభవాత్, తత్రైవంసతికన్యాకుమారీశబ్దయోః పర్యాయత్వేసత్యపి అష్టవర్షాభవేత్కన్యేత్యాదివచనం కిమర్థమితిచేత్కన్యాం దదద్బ్రహ్మలోకమితి విహితఫలవిశేషసంబంధబోధనార్థం పరిభాషీకరణమితిబ్రూమః. యథాశ్యావాది

శబ్దానాం లోకశాస్త్రాంతరప్రత్యాయకత్వే సత్యపి యోగవిశేషపరత్వేన
పరిభాషణం ఫలవిశేషసంబంధబోధనార్థం ఉపపాదితం చైతన్మాధవాచా
ర్యైః పరాశరస్మృతివ్యాఖ్యానే॥ ఏవఞ్చ మాధవాచార్యా అప్యస్మాకమను
కూలాః. భవస్మృతేతు ఫలకథనాదాసోపయుక్తేతి వచనస్వారస్యభఙ్గోద
ప్పరిహార ఏవేతి భవన్త ఏవ విదాఙ్కుర్వన్తు. ఏవఞ్చ కన్యాశబ్దస్య అష్టవ
ర్షాదిబాలికాపరస్యాపి అవివాహితత్వ సామాన్యాద్దైవాద్దృష్టరజసి సా
హసేన పిత్రాభిరదత్తాయాం స్త్రియామపి గౌణ్యా వృత్త్యా ప్రయోగోప
పాదనేఽపి మాధవాచార్యాణాం భాష్యకారాణాఞ్చ ఆశయక్షతిర్నాపి వి
రోధః. పాతంజలభాష్యం హి నతావత్కన్యాశబ్దాభిధేయమేవేతి సిద్ధా
న్తయితుం ప్రవృత్తం. కింతు కన్యాశబ్దేన గౌణ్యా లక్షణయా వా అపత్యసం
బంధయోగ్యస్త్రీవ్యక్తిరపి గృహీతుం శక్యత ఇతి బోధయితుం. అన్యథా
ప్రాగభిసంబద్ధతః పుంసంయుక్తాయా ఏవ కన్యాపదార్థత్వే పత్యా పుం
సంయోగానంతరమపి వివాహ ఇత్యపి కల్పనాపత్తేః. ఏవఞ్చ దైవవ
శాద్యాపుష్పవతీ సంవృత్తాపి పిత్రాదిభిరదత్తా తస్యాః స్వయంవరణతః
పూర్వం పుంసంయోగేఽపత్యసంబంధాభావాదత్ర వివాహితత్వ సామా
న్యాత్తస్యా అపి కన్యాశబ్దేన గౌణ్యా వృత్త్యోపస్థితిర్భవత్యేవేతి సదోషాయా
దిత్యవృథుమత్యామపి తపోవిశేషాది మత్పురుషసంయోగేన కన్యాయా
మపత్య సంబన్ధోభవేత్తదా గౌణ్యాశ్రయణం నావశ్యకమితి పక్షాన్త
రానుసరణమప్యస్తీతి. స్పష్టతరశ్చైవం కుమారీశబ్దస్య గౌణ్యా వృత్త్యా
యువతిపరత్వం వ్యవస్థాపితం వయసి ప్రథమ ఇతి సూత్రే. యదిహి కన్యాకు
మారీశబ్దయోర్యువతి సాధారణీ కాపివృత్తిః స్యాత్తర్హి భాష్యకారైః
కిమితి గౌణ్యాశ్రయణం కృతం.

యత్తూక్తం వివాహకాల విమర్శకారైః—కుమారీత్యత్రప్రకృతే తత్ప్రాప్తయౌవన పుంసక్తత్వేన ప్రత్యయవిశిష్టస్య యువతీపరత్వం గౌణమేవేతియుక్తం. కన్యాశబ్దేతుతథాభావాన్నగౌణతేతిఅకృతవివాహ యువత్యాయువతి సాధారణపదకన్యాశబ్ద ఇతితత్రైవంచిన్త్యం. కుమారీశబ్దప్రకృతిభూతస్య కుమారశబ్దస్యాప్రాప్తయౌవన పుంసిశక్తిరితి; పుంస్త్వాదిలింగస్య కన్యావిప్రాతి పదికశక్యతావచ్ఛేదక కోటావప్రవేశాద ప్రాప్తయౌవనమేవశక్యతావచ్ఛేదకం॥ లిఙ్గంత్వన్యతో లభ్యమితి నప్రవృత్తినిమిత్తకోటింప్రవిశతి. "అనన్యలభ్యః శబ్దార్థః" ఇతిన్యాయాత్. అన్యథా సర్వేషాంత్రిలిఙ్గానామపి స్త్రీత్వాది బోధనవిషయే గౌణత్వాపత్తిరిత్యన్యత్ర విస్తరః. ఏవఞ్చ కన్యాశబ్దస్యాపి అప్రాప్తయౌవనమేవ ప్రవృత్తినిమిత్తమితి గౌణ్యాదినైవ యువతిపరత్వముపపాదనీయం. విశేషాభావాత్. కన్యాకుమారీగౌరీతు. ఇతికోశస్యచేదానీ ముపపత్తిర్భవతి ప్రవృత్తినిమిత్తభేదే పర్యాయత్వాభావేన తథానిర్దేశస్యానాంగత్యాపత్తేః. తుశబ్దస్తుగౌరీనగ్నికాశబ్దయోః భిన్నప్రవృత్తినిమిత్తకయోః కన్యాశబ్దపర్యాయత్వవారణార్థమిత్యేవ స్వరసతఃప్రతీయతే. వయసిప్రథమఇతిసూత్రే కుమారీశబ్దంప్రకృత్య ప్రవృత్తం సంబన్ధాదేవవయోగమ్యతే. ఇతివాచ్యవాచకభావలక్షణ సంబన్ధేన వయోగమ్యత ఇత్యర్థకం భాష్యముపపన్నం భవతి యద్యపితత్రైవభాష్యే కోఽసౌసంబన్ధః పుంసాసహాభిసంయోగః ఇతిపుంసంయోగరహితైవ కుమారీశబ్దార్థ ఇత్యప్యుక్తం. తథాపితస్యభాష్యస్య పూర్వపక్షభాష్యత్వాత్. గోనర్దీయస్త్వేవేతి సిద్ధాన్తభాష్యానుసారేణైవా ఏవత్రివర్ణసంయుక్తమితినదోషః యథాచపుంస్త్వాదిశిష్టాప్రాప్తయౌవనశక్తికత్వాదికం నోపపాదయితుం శక్యతే తథాపూ

ర్వమేవనిరూపితం. సర్వథాచాగంబాధకే కన్యాశబ్దాన్నగ్నికాయాం నైవ గ్రహణంయుక్తమతపన.

అకన్యేతియః కన్యాంబ్రూయాద్ద్వేషేణమానవః ।
సశతంప్రాప్నుయాద్దండంతస్యాదోషమదర్శయన్ ।

ఇతిమనుస్మృతివ్యాఖ్యానావసరేఽయంకన్యాశబ్దోనిరితిమూబ్రూతే ఇతికుల్లూకభట్ట వ్యాఖ్యానమపిసంగతం భవతి । సర్వథాకన్యాశబ్దార్థోన యువతిరితిసిద్ధం ।

నైవకన్యాయువతిర్యాల్పవిద్యోనశాసితః ॥

ఇతికన్యాయువత్యోః పృథక్పృథగ్గ్రహణాదిత్యన్యత్ర విస్తరః ॥ ఏవఞ్చ అప్రాప్తాంకన్యకాం విప్రఙ్గతివచనానుసారేణ పుష్పవత్యా మపిస్యా యప్రవృత్తిర్భవేదితిసిద్ధత్వాత్త్రిరాత్రంబ్రహ్మచర్యమితిసూత్రే యుక్తాంసర్వేషామేవాచార్యాణాం రజోనన్తర వివాహతాత్పర్యకల్పనమితి వృథైవ వివాహకాల విమర్శకానామిహ హాన్లేశః॥అస్తునాథవటీయవ్యాఖ్యానమేవ సముచితమితి ॥ తావతాపికన్యాయా మపిరాగతో వ్యవాయ ప్రవృత్తిరుపపాదయితుం శక్యతఏవయతో నాజాతలోమ్నాం ఉపహాసం విశేత అజాతవ్యంజనాయాంతు నతయాసహాసంవిశేత్ ఇత్యాదివచన పర్యాలోచనాయాంతాదృశార్థః సిధ్యతీతివక్తోపివిరోధః సచవ్యవాయ స్సఫలోవాఽథవత్వఫలోవా ॥ వ్యవాయత్వేనైవ ఖలువ్యవాయస్యనిషేధః ॥ నతుసఫలవ్య వాయత్వేన ఏతేనగృహ్యసూత్రా న్తరాణ్యపివ్యాఖ్యాతానిభవన్తి ॥ లోకజ్ఞశ్చోభయత్రాపి ప్రమాణమేవ ॥ కేషాఞ్చ నజనానాంకన్యాయామపిరాగతః ప్రవృత్తిర్దృశ్యతే ॥ కేషాంచన విరక్తా

నాప్యభ్యుపగత్యాపి నవ్యవాయార్థప్రవృత్తిర్దృశ్యతే । నతు సర్వేషామపి
వేతి న కథంచిదపి క్షతయోని వివాహసిద్ధిః॥ యే తు పునరత్యన్తం పండితాః త
త్త్వజ్ఞానసంపన్నాశ్చ తేషామపి శాస్త్రీయాన్యథానయనే బహువిధాధర్మా
చరణే చ ప్రవృత్తిదర్శనేన యుక్తాయుక్తవివేకసంపన్నానాం శ్రుతాధ్య
యనసంపన్నానామపి రహస్యవ్యవాయప్రవృత్తేః సంభావ్యమానతయాని
షేధ ఆవశ్యక ఏవ॥ శ్రుతాధ్యయనసంపన్నానామేవ ధర్మాచరణాదావధికా
రాత్తద్ధర్మాచరణేనైవ లిఙ్గేన శ్రుతాధ్యయనసంపత్తినిశ్చయ ఇతి అధ
ర్మాచరణే శ్రుతాధ్యయనసంపన్నత్వమపి న స్యాదేవేత్యుచ్యతే తర్హి
ఇదానీన్తనశాస్త్రవిచారాదికం సర్వమపి నిష్ప్రయోజనం॥ నహి కోఽపి శ్రు
తాధ్యయనసంపన్నో ధర్మా[illegible] పాతక్యపండితేషు
[illegible] వాచ్యతే ॥ [illegible] సద్వృత్త
[illegible] । [illegible] హి వివా
హ[illegible] నాభిప్రాయః॥
కిన్తు పుత్రసంపాదనస్య [illegible] వాయస్య చ స్వదారేష్వే
వ శాస్త్రీ[illegible] పుత్రసంపాదనార్థం వివాహస్య శాస్త్రే ప్రతి
పత్త్యాత్ । ఉపపాదితం [illegible] వివాహకాలాదితత్త్వ ఏవ ద్రష్టవ్యం॥
ఏతేన బ్రహ్మచర్యవిధానాన్యథానుపపత్త్యా యువతివివాహసాధనం యు
క్తమేవేతి వివాహకాల [illegible] పరాస్తం ॥ అత్ర చ విషయే
బోధాయనాదివచనాని వివాహకాలవిమర్శ ఏవ ద్రష్టవ్యానీతి గ్రన్థవిస్త
రభయాన్నోపన్యస్తాని॥ నన్వేవమపి త్రిరాత్రముభయోరధశ్శయ్యాస్య
త్రోభశబ్దగ్రహణం వితథం భవతి । యావతా కన్యావిషయో నిషేధో ని
రర్థకః తస్యా వ్యవాయప్రవృత్తేః కథంచిదప్యుపపాదనాసంభవాత్ తద్గ్ర
హణసార్థక్యాయ వధూవిషయేఽపి ప్రవృత్తిసంభావనాఙ్గీకరణే తత్తస్యా

యువతిభావ ఏవ తదుపపత్త్యా యువతివివాహః శాస్త్రీయత్వసిద్ధత్వాదే
తి చేత్ ; అత్ర నయోనిర్ణ్ణయశాస్త్రాః అపత్యోత్పత్తయాద్యా దశాదివయ
స్క విహాహస్యాపి శాస్త్రీయత్వాభ్యుపగమాత్ తయోరుభయోరపి బ్ర
హ్మచర్యాభావాపత్తిరేవ. సంకోచే ప్రమాణాభావ ఇతి చేదుభయోః
[illegible] వర్ణనాత్ [illegible] అస్వయ ఇతి వచనాత్ [illegible]
బ్రహ్మచర్యవిధానమితి [illegible]

వివాహకాల [illegible] —ఉభయోరప్యస్య [illegible]
[illegible] ప్రమాణస
త్వేపి రజోనంతరవివాహ [illegible] సమావేశనాన్యథా
నుపపత్త్యాఽస్య బాధితత్వాత్.

[illegible] —ఉభయోరప్యస్య బ్రహ్మచర్య పదార్థనానాత్మ
[illegible] బ్రహ్మ [illegible] వివాహమధ్య
[illegible]. ఏవమపి;
బ్రహ్మ [illegible] యథాప్రోక్తవిధిన బ్రహ్మచర్యవ్రత
[illegible] కర్తవ్యమేవ॥ఉపసాదితంచైతత్,
[illegible] తస్మిన్ [illegible] సుసంవిశేత్ .ఇతిశ్లోకవ్యాఖ్యా
నావసరే [illegible] ఉభయోశ్చాపి తద్విధానెఋతుకాలత్వేపి
నాభిగమనం కర్తవ్యమిత్యుభ శబ్దగ్రహణసార్థక్య సంభవః.ఏవఞ్చరజోనం
తరవివాహశాస్త్రీయతాయామేవ ప్రోక్తసూత్రతాత్పర్య మఙ్గీకరణీయం.

యథాకామీభవేద్వాపి స్త్రీణాంవరమనుస్మరన్।
స్వదారనిరతశ్చైవ స్త్రియోరక్ష్యాయతఃస్మృతాః॥

ఇత్యాదివచనానుసారేణ 'యోషాభ్యర్థనాయా మృతుకాలభిన్నకాలేపి

సమావేశనస్య వైధత్వావగమాత్తదనుసారేణానుష్ఠిత సమావేశనేనా పి వ్రతభంగోపస్యాదిత్యుభయోరపి బ్రహ్మచర్యవిధాన మావశ్యకమితి ఉభయగ్రహణసార్థక్యా ఋతుమతీ వివాహవ్యవసిద్ధ్యతీతి రజోనంతరవివాహః శాస్త్రీయ ఇత్యేవాభ్యుపగన్తవ్య మితినిర్ణయంతి.

పరేతుచతుర్థీకర్మతః పూర్వంభార్యాత్వమేవ నసిధ్యతి ఇతిపారస్కరహరిహరభాష్యే ప్రతిపాదితత్వేనతత్కాలత్వేపి త్రిరాత్రం వైధోపగమనస్య ప్రసక్త్యభావాత్సమావేశ నానుష్ఠానేపి వ్రతభంగాభావవన్నానసంభవాద్వధూమాత్రస్య బ్రహ్మచర్యవిధానేపి స్వేష్టసిద్ధ్యా ఉభగ్రహణ వైయర్థ్యం తదవస్థమేవేతి వివాహకాలనిరూపకానామపి క్షారలవణవర్జనపదార్థేన సాకమేవాన్వయోఙ్గీకరణీయ ఇతి సకథంచిదపి తదన్యథానుపపత్తిప్రమాణస్యానవకాశః. యద్యపి—పతిత్వంసప్తమేపదే ఇతిసప్తపదీగమన మాత్రేణ భార్యాత్వాదిసిద్ధిః,—తథాపియథా,

చిత్రకర్మ యథానేకైరంగైః సమ్యక్ప్రపూర్యతే॥
బ్రాహ్మణ్యమపి తద్వత్స్యాత్ సంస్కారైర్విధిపూర్వకైః॥

ఇతివచనేన జ్యోతిష్టోమాద్యనుష్ఠానే నైవపూర్ణబ్రాహ్మణ్య సిద్ధిరితిస్థితేపి తతః పూర్వమపికించిన్న్యూనం బ్రాహ్మణత్వంవిద్యతే. తతఏవచతస్య మంత్రాధికారః ఏవమస్మిన్నస్థానార్థ మపేక్షితభార్యాత్వం సప్తపదీగమనమాత్రేణ సిద్ధమపి వైధోపగమనోపయుక్తం భార్యాత్వంసాఙ్గవివాహేనైవజన్యత ఇతినవిరోధః. అయంభావః సర్వదేశకాలావచ్ఛేదేన దారేతర సమావేశన నిషేధశాస్త్రేణైవ వివాహసంబంధి త్రిరాత్రావచ్ఛేదేనాపి వధూసంగమనిషేధ సిద్ధిసంభవాత్కిమర్థం బ్రహ్మచర్య విధానమితిచేత్— ఋతుమతీవివాహవాదిభిరేవం పరిహర్తవ్యం. య

ధానాస్పృశానదేవితి సామాన్యనిషేధేనత్యపి శ్రూయమాణస్య తస్మా దాహితాగ్ని ర్నాస్పృశంవదేదితి వచనస్యాస్పృత వదనాభావదర్శపూర్ణ మాసయో రఙ్గాఙ్గిభావబోధకత్వేన చాదితాత్పర్యం. ఏవంవధూసంగమా భావవివాహకర్మణో రఙ్గాఙ్గిభావబోధకత్వే నోక్తసూత్రసార్థక్యమితి॥ త త్రైవంసతి కన్యావివాహావాదిభిరపి. నాజాతలోమ్న్యోపహా సంవిశేదితి వచనసిద్ధస్యాపి తదుపగమనాభావస్య వివాహాఙ్గత్వసిద్ధ్యర్థం త్రిరాత్రబ్ర హ్మచర్యవిధానమితి సంభవాన్నాన్యథానుపపత్తి ప్రమాణస్యావకాశః. యథానసమావేశనాన్యథాన్యుపపత్త్యాపి నప్రౌఢావివాహసిద్ధిః తథా పూర్వమేవనిరూపితం. ఏవంతస్యాసిద్ధ్యాతద్విషయకత్వేనాపిక్షారలవణ వర్జనమోజనమప్య సంగతమేవ, యథాచసమావేశనోపయుక్త భా ర్యాత్వ్వాసప్తపదీగమనమాత్రేణ నోత్పద్యతే. తథాపూర్వమేవనిరూ పితం. సమావేశనంనామవధ్వా సహమైథునార్థంశయనమితి వధూపదం ప్రయుఞ్జానః సుదర్శనాచార్యోత్రానుకూలః. యథాపారస్కరహరి హరాచార్యాః॥ అత్రచవిషయే బహూపపాదనీయంసమస్తి॥ తచ్చసత్యవ సరేఽవసరాంతరే సమ్యగుపపాదయిష్యామః. ఏవఞ్చత్రిరాత్ర బ్రహ్మ చర్యవిధానానుసారేణాపి నగృహ్యకారాణాం ఋతుమతీవివాహ తా త్పర్యకల్పనం సంభవతి.

అత్రేదంప్రసజ్గాద్విచార్యతే-కోనామాక్షత యోనిపదార్థఇతి॥ కిమృతుమతీ॥ ఉత్పన్నమత్యపి యాస్పృష్టమైథునేతి॥ యద్వాస్పృతు మతీప రత్వం తదా॥

పాణిగ్రహణికామన్త్రాన్నియతందారలక్షణం॥ ఇతివచనేనానృ తుమతీ వివాహసిద్ధిః॥ తస్యామేవపురుష సంయోగే సముచితకాలే స

ముత్పన్నస్య శాస్త్రీయత్వాన్న సిద్ధ్యేత్ । యస్యాస్సంస్పృష్టమైథునీతదా ఋతుమత్యామపి వివాహాత్ పూర్వం సంయోగేన—సముత్పన్నస్య శాస్త్రీయత్వేన వ్యవహార ఇతి, ఋతుమతీవివాహోఽపి శాస్త్రీయ ఇతి సిద్ధ్యేదితి॥ తత్రైవమోర్నిర్ణయకారాః—అక్షతయోని పదేనాస్పృష్టమైథున్యేవ సంగ్రహః "అసపిండా చ యా మాతుః అసగోత్రా చ యా పితుః। సా ప్రశస్తా ద్విజాతీనాం దారకర్మణ్యమైథునీ"॥

ఇతివచనేనాక్షతయోన్యాః వివాహేఽయోగ్యత్వప్రదర్శనాత్. అతఏవహి॥

సవర్ణేషు తుల్యాసు పత్నీష్వక్షతయోనిషు।
అనులోమ్యేన సంభూతాః జాత్యా జ్ఞేయాస్త ఏవ తే—

ఇతివచనేన అక్షతయోనిత్వావస్థాయాం వివాహితపత్నీషు సముత్పన్నస్య బ్రాహ్మణ్యముక్తం తత్రాక్షతయోనిపదేన అన్యపూర్వకత్వాది వివక్షితత్వేనైవమేవ వక్తవ్యమ్ । ఋతుమతీత్వావిశేషేఽపి - ఋతుమతీనామప్యవతారికవివాహాత్ ప్రాక్ పురుషసంగమేన పత్నీత్వాసిద్ధ్యా ప్రతీత్యక్షతయోనిత్వస్యైవ ఋతుమతీగ్రహణేఽపి యుక్తమితి ప్రతీయతే ఇతి స్పష్టమేతి । వివాహకాలేఽస్పృష్టమైథునీ అక్షతయోని పదేన ఋతుమత్యా గ్రహణాపత్తేస్తాస్వప్యుత్పన్నస్య అబ్రాహ్మణ్యప్రసంగం న సంభవతి - సహ్యాపత్యోత్పత్తయోరితి నియమం వివాహమపి శాస్త్రీయం మన్వానాం వివాహితాం తద్వివాహసంస్కృతాయాం సముత్పన్నో బ్రాహ్మణ ఇతిసమ్మతం - ప్రాయశ్చిత్తేన వా వృషలీత్వదోషాణాం నివృత్తత్వాత్ - అస్యైతస్మిన్నర్థే · అస్పృష్టమైథునప్రవృత్తిం విముక్తకస్య ఋతుమతీ ఇతి విలక్షణాయాం ప్రమాణాభావాచ్చ । ఏవంచ సాంప్రదాయికాశయపర్యాలోచనాయాం అక్షతయోనిశబ్దేన-అసంస్పృ

ష్ట మైథునాయా ఏవ గ్రహణం యుక్తం ॥ సర్వజ్ఞ[illegible]శ్లోకవ్యాఖ్యానావసరే-మేధాతిథిప్రభృతిభిః తథైవవ్యాఖ్యానాత్ ॥—తథాహి—మేధాతిథిః—అక్షతయోనిగ్రహణం - పునర్వివాహేన పత్నీత్వమాశంకమానం నివర్తయతి—సర్వజ్ఞనారాయణః—అక్షతయోనిషు = పరిణేతురన్యేనాసంస్పృష్టాసు ఏతేన పౌనర్భవస్యాపి । బ్రాహ్మణ్యముక్తమితి—రాఘవానందః—అక్షతయోనిష్వితి విశేషణాత్ కానీనాదేర్ద్విజత్వం గౌణమితి—నందనః—అక్షతయోనిషు = అనన్యపూర్వికాసు—రామచంద్రః-సంభోగాక్షతయోనయో యాసాం తాస్వితి-కుల్లూకభట్టోపి "పాణిగ్రహణికా మంత్రాః" శ్లోకవ్యాఖ్యావసరే ఏవమేవార్థం ప్రతిపాదయామాస—బోధాయనధర్మశాస్త్రేపి గోవిందస్వామినా—"సా చేదక్షతయోనిస్స్యాత్ గతప్రత్యాగతా సతీ" ఇతివచనవ్యాఖ్యానసరే అక్షతయోనిస్స్యాత్ = అస్పృష్టమైథునాస్యాదితి వ్యాఖ్యాతం। మితాక్షరాయామపి "అక్షతా చ క్షతా చైవ పునర్భూస్సంస్కృతా పునః । స్వైరిణీ యా పతిం హిత్వా సవర్ణం కామతో వ్రజేత్", ఇతివచనవ్యాఖ్యావసరే అన్యపూర్వా ద్వివిధా; పునర్భూః స్వైరిణీ చేతి । పునర్భూరపి ద్వివిధా; క్షతా చాక్షతా చేతి । తత్ర క్షతా సంస్కారాత్ప్రాగేవ పురుషసంస్కారదూషితా; అక్షతా - పునస్సంస్కార దూషితా - ఇతివ్యాఖ్యాతం ॥ అపరార్కవ్యాఖ్యాయామప్యయమేవార్థస్స్ఫుటీకృతః ఇతి అస్పృష్టమైథునైవాక్షతయోనిశబ్దే నాత్రగ్రహణమర్హతీతి వర్ణయంతి—పరేతు—యోనిక్షయప్రవృత్తినిమిత్తకస్యాక్షత యోనిశబ్దస్య ఋతుమతీ పరత్వమేవయుక్తం। యాచ ఋతుమతీ స్పృష్టమైథునైవ సాభవేత్ । "ఋతౌ భార్యా

ముపేయాత్,, ఇతి నియమేనర్తుమత్యాం నియతమేవాస్పృష్టమైథునభావప్రా
పిసంపద్యేతేతి - సర్వత్ర [illegible] - అస్పృష్టమైథునశబ్దేన అక్షత
యోనిశబ్దోపి ప్రియ [illegible] మైథున భావప్రవృత్తి నిమిత్తాభిప్రాయే
ణ। "అథప్రాగ్జ్యోతికం [illegible] సుభ్రూ [illegible] గ్రదన్నిభః। కౌమారే ప్రాయ
శస్సాను చం [illegible] దృశ్యతే, ఇతిచ [illegible] ఏకదేశస్యాపి
నిశ్చేన గ్రహణాసంభవాదక్షతయోనిశబ్దేన [illegible] ఏకదేశ [illegible]
పరిస్ఫూర్త్యా సంభవాత్। నచ—ఋతుమతీవివాహపక్షే నియతమేవప్ర
థమార్తవాదిషు [illegible] నామపికాసాం
చిత్ [illegible] తాసామప్యక్షతయోని
శబ్దేన గ్రహణార్థమేవ నిబంధనకారైః అస్పృష్టమైథునాక్షతయోనిశబ్దా
థో విప్రనియత ఇతి వాచ్యం; తాదృశవ్యాఖ్యానస్య శాస్త్ర [illegible]
వివాహాభిప్రాయం వినాప్యుక్తప్రకారేణైవ సామంజస్యోప
పత్తౌ శాస్త్రవిరుద్ధ [illegible] మతీ వివాహ కల్పనాద్వారా సామంజస్య
కల్పనాయోగాత్ [illegible] అపి అస్పృష్టమై
థునార్థక తయా ప్రతీయమానస్య అక్షతయోనిశబ్దేన విప్రకర్షణ ఋతు
మతీవివాహమశాస్త్రీయమపి ప్రయుక్తి - కన్యాశబ్దసమభివ్యాహారస్థలే
అక్షతయోనిశబ్దేనతద్వివక్షితానాం అపి - నిబంధనకారా అత్రానుకులాః
కన్యాశబ్దశ్చఅప్రాప్తయౌవనప్రవృత్తినిమిత్తక ఇతిపూర్వమేవనిరూపితం
ఏవంచ "పాణిగ్రహణికామంత్రాః,, ఇత్యత్రవా "అప్రౌఢాంకన్యకాంవి
ప్రః ఇత్యత్రవాకన్యకాది శబ్దేనాక్షతయోని వివక్షాయామపి నరజస్వ
లావివాహ సిద్ధిరితి। కన్యాయామపిరాగతో వ్యవాయప్రవృత్తేరప్రౌఢా

మితివచనానుసారేణాభ్యుపగంతవ్యతయా - తన్నిషేధనత్రిరాత్రబ్ర
హ్మచర్య విధానోపపత్తిసంభవాత్ - తదన్యథానుపపత్త్యాశ్రుతమతే వి
వాహసాధనం వివాహకాలవిమర్శకారాణాం నసంగతమితివర్ణయంతి॥

యుక్తంచైతత్ అతఏవహిగృహ్యసంగ్రహకారోపి - తాంప్ర
యచ్ఛేన్నగ్నికామితిస్మృకావాసమేవహిదర్శనాత్॥ గౌతమాచార్యశ్చప్రదా
నం ప్రాగృతోరితి॥ నగ్నికాశబ్దార్థశ్చ నగ్నికానాగతర్తువేతీకోశాను సా
రేణావృషల్యేవ - అతకేచి త్ప్రత్యవతిష్ఠంతే-యది నగ్నికాశబ్దేన అనాగ
తార్తవాయాః గ్రహణం, తర్హ్యనగ్నికాశబ్దేన ప్రాప్తర్తుమత్యా ఏవగ్రహణం
యుక్తమితి "విందేతానగ్నికాంకన్యాం" ఇతి జైమినిగృహ్య సూత్రస్య
ప్రాప్తర్తువివాహ ప్రమాణత్వం స్యాదితి— అత్రసమాదధతేవయోనిర్ణయ
కారాః— నగ్నికాశబ్దార్థస్య నిష్కర్షః నగ్నికాశబ్దస్య అనుపపన్నః గృహ్యాం
గానపేక్షయాప్రజానంత్యాయా స్సర్వశ్చనియుక్తా.

యావన్నలజ్జతేకన్యా యావత్ క్రీడతి పాంసుభిః।
యోనిర్నాస్తిపరస్యావహిత తావద్భవతి నగ్నికా।
యావచ్చేలంనగృహ్ణాతి యావత్క్రీడతి పాంసుభిః।
యావద్దోషంనజానాతి, తావద్భవతి నగ్నికా॥

ఇతిపదపదార్థతత్త్వవిదాం మహాత్మనాం వచనానిచాము మేవార్థ ముప
పాదయంతి। తాదృశనగ్నికాశబ్దస్య భాషాసాకంసమానపూర్వోక్తలక్షణ
విపరీతోప జాతలజ్జాత్వతో ప్రవృత్తిధారిణీచయా తదభిదాన ఏవసామర్థ్యం
నగ్నికాపదార్థేంజోదర్శనస్యాపి నంతత్స్వభావాన్న రజస్వలాబోధనేఽ। యు
ద్యప్యమరసింహేన నగ్నికానాగతర్తువేత్య ప్రాప్తరజస ఏవనగ్నికాపదా
ర్థత్వమభిప్రేయతే; తథాపిపూర్వాపరవిరుద్ధత్వాత్ ఋషివచన విరుద్ధ

త్వాచ్ఛాప్రమాణమేవగన్తవ్యమ్ ॥ యథా పుండరీకం సితాంభోజమితి కోశవచనస్య "పుండరీకశబ్దేన రక్తాంబుజస్యైవ గ్రహణ" మితి శబ్దస్తోమవచనవిరోధే అప్రామాణ్యమ్: యథా వా తిలతండులప్రయాణికకోశవచనస్య "తితఉపరిపవనం భవతీతి,, భాష్యవిరోధే ఏవమప్రామాణ్యమపి ! శ్రుత్యర్థసందేహే శ్రూయమాణ రేణనస్మృత్యర్థసందేహే స్మృత్యన్తర నైరాకాంక్ష్యార్థకరణస్య యుక్తత్వాత్, నవైరాగావశ్యకత్వప్రతిపాదకవినా బాలాపి కార్యా ఇత్యస్యాల్ ;"నగ్నికాం ప్రయచ్ఛేదితి బహ్వృచగృహ్య పరిశిష్టే" ఇత్యనేనైవ వాక్యస్య విరోధాదితి శంకనీయమ్ । ఇష్టాపత్తేః ॥ అతఏవహి

ద్వివర్షాత్ప్రభృతి వివాహాత్ప్రాక్ కన్యాయా మరణం యది ।
ఋతునా వై పరిత్యక్తా పుత్రికాసంస్కార మాచరేత్ ॥
ఉత్కృష్టాయాభిరూపాయ వరాయసదృశాయ వా ।
అప్రాప్తామపి తాం తస్మై కన్యాం దద్యాద్యథావిధి ॥

ఇతి వచనమప్యుపపద్యతే ॥ ఏవం చ ప్రమాణోపపత్తిభ్యాం నగ్నికాదిశబ్దానాం ప్రసిద్ధార్థత్వాత్ బాలాదిశబ్దార్థైవ వివక్షణీయమితి సిద్ధం ॥ వైదికనిఘంటౌ వాక్యానాం ప్రమాణం నాస్త్యపి. "యస్మిన్వయసి యస్మిన్కాలే ఉద్వాహ ఇదం భవతామితి,, అనగ్నికాం ప్రయచ్ఛేత్ ప్రావ్యాసో గృహీతామితి వైదికనిఘంటుప్రమాణరూపా వచనప్రయోగాభావే వివాహసిద్ధ్యసిద్ధిరితి ॥

వివాహకాలవిషయకశాస్త్రోపన్యాసమంతె

యత్ర లౌకికవైదికప్రసిద్ధ్యోః పరస్పరం విరోధః తత్ర వైదికప్రసిద్ధ్యనుసారేణైవార్థనిర్ణయః యత్ర తు వైదికప్రసిద్ధిర్నైవాస్తి లౌకికప్రసిద్ధ్యనుసారేణార్థనిర్ణయః ॥ యత్ర పునః వైదికప్రసిద్ధిద్వయం పరస్పరవిరుద్ధం తత్ర లౌకికప్రసిద్ధ్యైవార్థనిర్ణయః ఇతి పూర్వమీమాంసకా

శయానునరేణా త్రామరకోశవచనస్యాదరణీయత్వేనలనగ్నికాపదేనతుకా
మతీగ్రహణమేవయుక్తం ॥ "అనగ్నికాత్వృతుమతీతి,, గృహ్యసంగ్రహా
కారవచన మప్యత ఏవసంగతంభవతి ॥

నగ్నికాపదార్థవిషయేహి భిన్నభిన్నాభిప్రాయో మునివర్యా
ణాందృశ్యతే॥ తథాహి—కేచిత్తు నవవర్షాంనగ్నికామభిప్రయంతి;
యథావైద్యనాథదీక్షితీయే మాధవీయేచయమః.

అష్టవర్షాభవేద్గౌరీ నవమే నగ్నికాభవేత్॥ ఇతి॥ బోధాయనవ
సిష్ఠౌతు అప్రాప్తరజోదర్శనకాలామేవ నగ్నికాపదేనవ్యపదిశతః॥యథా

ప్రయచ్ఛేన్నగ్నికాం కన్యాంమృతుకాలభయాత్పితా।
దద్యాద్గుణవతే కన్యాం నగ్నికాంబ్రహ్మచారిణే।
అపివాగుణహీనాయ నోపరుంధ్యాద్రజస్వలాం॥ ఇతి।
అవ్యంజనాథవై కన్యా కుచహీనాతునగ్నికా॥

ఇతిచాన్యోమహర్షిః కుచహీనామేవ నగ్నికామభిప్రైతి॥ "యావన్నల
జ్జతేకన్యా,, ఇతివదంతస్తుభవదభిమతాంజాతలజ్జాదిరూపాంనగ్నికాపదా
ర్థతయాభిప్రయంతి తత్రచ పరస్పరవిరుద్ధస్తైదిక ప్రసిద్ధాబోధాయనాది
వైదిక ప్రసిద్ధ్యనుగుణం కోశవచనమేవప్రమాణం। ద్వివర్షాదిబాలికా
నామపి నగ్నికాపదార్థత్వే నగ్నికాంబ్రహ్మచారిణె ఇత్యాదిస్థలె నర్వ
త్రాపితా సామపిగ్రహణాపత్త్యా తాదృశవివాహాణాపి ముఖ్యఇత్యేవసం
పద్యతే। ఇష్టాపత్తౌచనగ్నికా వివాహంవిదధానైర్యమాదిభిర్విశిష్య
బాలికాదివివాహాభ్యనుజ్ఞానం వ్యర్థమేవసంపద్యేత॥ తథాచయమః.

బాలికాయాభవేత్కన్యాగుణాఢ్యాయదిలభ్యతే।

దద్యాదప్రాప్తకాలేఽపి దేశకాలభయాన్నరః।

మరీచిశ్చ,

జన్మతో గర్భాధానాద్వా పంచమాబ్దాత్పరం శుభం।
కుమారీవరణం దానం మేఖలాబంధనం తథా॥ ఇతి।

భారతేచ ఆనుశాసనికపర్వణి,

జాతమాత్రాం తు దాతవ్యా కన్యకా సదృశే వరే।
కాలే దత్తాసు కన్యాసు పితా ధర్మేణ యుజ్యతే ॥ ఇతి ॥

ఏవంచానగ్నికావివాహం విదధతాం జైమిన్యాచార్యాణాం, ఋతుమతీవివాహ ఏవ తాత్పర్య మభ్యుపగమనీయమితి కేషాంచిదేవ పక్షస్సమీచీన ఇతి।

పరేతు సత్యం నగ్నికాశబ్దేన ప్రాప్తరజోదర్శనాయా ఏవ ప్రాయేణ గ్రహణం యుక్తం అమరకోశవచనస్యాపి ఏతాదృశార్థప్రాశస్త్యార్థ నిర్ణయే ఉపయోగో విద్యతే తథాపి జైమిన్యాచార్యాభిమతోఽనగ్నికాపదార్థోఽన్యస్తుమతః; యావచ్చేలం నస్పృశతీత్యాది వచనస్యాపి ప్రమాణత్వే నక్వచిత్సలేతదర్థనిర్ణయస్యాపి యుక్తత్వాదత్ర నిర్ణయస్యాంగీకారేణ చానగ్నికాపదేన అనృతుమత్యా ఏవ గ్రహణాత్, అన్యథాహి, బహువచనవిరోధస్సంపద్యేత। అత ఏవ హి గోభిల గృహ్యే నగ్నికాతు శ్రేష్ఠేతి నగ్నికావివాహ ఏవ ప్రశంసితః సమశాఖినాం వైకార్థతాత్పర్యకత్వమేవ యుక్తమితి జైమిన్యాచార్యాణామిష్య ఋతుమతీవివాహతాత్పర్యకల్పనస్యైవ యుక్తత్వాత్ నచ అనగ్నికాత్వృతుమతీతి వాక్యశేషవిరోధోఽపి ఏవం దేతానగ్నికామిత్యత్ర అనగ్నికాపదేనా ఋతుమతీగ్రహణ ఇతి శంకనీయం। వాక్యశేషస్యాపి ప్రయచ్ఛేత్తు నగ్నికామితి నగ్నికాప్రదానపరతా

త్పర్యాత్ తథాహి, విందేతానగ్నికాం కన్యామితివచనంనానగ్నికావివాహప్రతిపాదనపరం విధథాతో శ్లాఘార్థకస్యాపి జ్ఞానార్థకత్వేనాపి తత్రతత్రప్రయోగాత్ అత్రాపితదర్థస్వీకారేణ కన్యామనగ్నికాంజానీయాత్ (ఇదానీమప్రాప్తయౌవనాయా అపిద్రాగిత్యేవరజోదర్శనాదికం భవిష్యతి॥ తతః ఝడిత్యేవ కన్యాదానంనిర్వర్తనీయం) ఇత్యేతదర్థతాత్పర్యకత్వమేవయుక్తం ప్రయచ్ఛేత్త్వనగ్నికా మితివాక్యశేషస్యాన్యథా విరోధాత్, అత్రిహినవచనే అనగ్నికామిత్యస్య "అనగ్నికా త్వృతుమతీ తాం" ఇత్యంశేనార్థం ప్రతిపాద్య విశిష్టవాక్యతాత్పర్య విషయీభూతార్థః ప్రయచ్ఛేత్తు నగ్నికామిత్యనేనాంశేనప్రతిపాద్యత ఇత్యేవ వర్ణనీయమితి ఏవంచ లానగ్నికామిత్యత్ర ప్రతీతితోరజస్వలా యాభోధేపి పర్యవసానతో ఽప్రాప్తరజస ఏవకన్యాయాబోధో భవిష్యతీతి జైమినిగృహ్యపర్యాలోచనయా నరజోనంతరవివాహ సిద్ధిరితిమంతవ్యం.

అత్ర కదిత్,—గృహ్యసంగ్రహకారైః ప్రదానమాత్రస్యైవ విధానాత్ తస్యచవాగ్దానాది విషయకత్వేనాప్యుపపత్తి సంభవాత్ విందేతానగ్నికా మితివచనం స్వతంత్రతయా వివాహవిధిపరమే వాంగీకరణీయం, వివాహదానయోస్తు భిన్నాధికారికత్వేన. భిన్నఫలకత్వేనచభిన్నకర్మత్వేనానంతర్య నియమోనాస్తీతినగ్నికావస్థాయాం, దానప్రతిపాదనపూర్వకం రజోనంతరవివాహ ప్రతిపాదనపవగృహ్య సంగ్రహకారాణామప్యాశయః — ఏతేన —

దద్యాద్గుణవతేకన్యాం నగ్నికాంబ్రహ్మచారిణే ।
అపివాగుణహీనాయనో పరుంధ్యాద్రజస్వలాం ॥" ఇతి

బోధాయనవచనం॥ "ప్రదానం ప్రాగృతోః" ఇతి గౌతమవచనం॥ "ప్రయచ్ఛే న్నగ్నికాం కన్యా మృతుకాలభయాన్నరః" ఇతి వసిష్ఠవచనం "అప్రయచ్ఛన్ సమాప్నోతి భ్రూణహత్యా మృతా వృతౌ" ఇతి యాజ్ఞవల్క్యవచనం "యది సా దాతృ వైకల్యా ద్రజః పశ్యేత్కుమారికా । భ్రూణహత్యాశ్చ తావత్యః పతితస్స్యా త్తదప్రదః" ఇతి వేదవ్యాసవచనం "ప్రాప్తే తు ద్వాదశే వర్షే యః కన్యాం న ప్రయచ్ఛతి। మాసి మాసి రజస్తస్యాః పిబంతి పితరస్స్వయం" ఇతి పరాశరసంహితావచనం చ వ్యాఖ్యాతం భవతి. సర్వేషామపి వచనానాం దానమాత్రవిషయకత్వేన వివాహవిధిపరత్వా భావాత్, ఏవం చ ఋతుమతీవివాహనిషేధపరస్య కస్యాపి వచనస్యా భావాత్ జైమినీయగృహ్యపర్యాలోచనయా ఋతుమతీవివాహశ్శాస్త్రీయ ఇత్యేవ ఫలతీతి తదశాస్త్రీయతావాదోఽప్యసంగత ఇతి నిర్ణయంతి.

అన్యేతు, "ప్ర[illegible]" ఇత్యాది పారస్కరగృహ్యాది పర్యాలోచనయా భిన్నకర్మణో[illegible] వివాహయోః వాజపేయబృహస్పతిసవయోరివ క్రమ నియమ[illegible] అవశ్యకత్వాత్ దానవిధిపరాణామపి తదవ్యవహిత వివాహపర్యంతం వ్యాపారస్యాంగీకరణీయత్వాత్ గృహ్యసంగ్రహకారాణాం పూర్వోక్తతాత్పర్యమేవ యుక్తం, ఏతేన, బోధాయన గౌతమవసిష్ఠాది వచనాన్యపి వ్యాఖ్యాతానీతి ఋతుమతీవివాహశాస్త్రీయతావాదోఽసంగత ఏవ. యదపి "ప్రాగపి ఋతోః కన్యాయాస్సవాసం ఋతావపి యావద్గుణ వాన్వరో నలభ్యేత ఇతి" ఋతోరనంతరమపి దానాదివిధి పరతయా ప్రతీయమానం వచనం—తదపి గుణవద్వరలాభే గుణహీనాయ న దాతవ్యేత్యేవం పరమిత్యపరార్కే ప్రతిపాదితమితి నాస్మాకం ప్రతికూలం అతఏవ—

"పితృవేశ్మని యా కన్యా రజః పశ్యత్యసంస్కృతా।
తస్యాం మృతాయాం నాశౌచం కదాచిదపి శామ్యతి॥"
"పితృవేశ్మని యా కన్యా రజః పశ్యత్యసంస్కృతా।
భ్రూణహత్యా పితుస్తస్యా స్సా కన్యా వృషలీ స్మృతా॥"
"రజస్వలా చ యా కన్యా యది స్యాదవివాహితా।
వృషలీ వార్షలేయస్స్యాత్తస్యాం జాతస్స ఏవ హి॥"
"పితృగేహే తు యా కన్యా రజః పశ్యత్యసంస్కృతా।
సా కన్యా వృషలీ జ్ఞేయా తత్పతిర్వృషలీపతిః॥
మాతా చైవ పితా చైవ జ్యేష్ఠో భ్రాతా తథైవ చ।
త్రయస్తే నరకం యాన్తి దృష్ట్వా కన్యాం రజస్వలాం॥
ఉద్వహేద్యస్తు తాం కన్యాం బ్రాహ్మణో మదమోహితః।
అసంభాష్యో హ్యపాఙ్క్తేయస్స విప్రో వృషలీపతిః॥"
"పితుర్గేహే తు యా కన్యా రజః పశ్యత్యసంస్కృతా।
భ్రూణహత్యా పితుస్తస్యా స్సా కన్యా వృషలీ స్మృతా॥
యస్తాం వివాహయేత్కన్యాం బ్రాహ్మణో మదమోహితః।
అసంభాష్యో హ్యపాఙ్క్తేయ స్స విప్రో వృషలీపతిః॥"
"మాతా చైవ పితా చైవ జ్యేష్ఠో భ్రాతా తథైవ చ।
త్రయస్తే నరకం యాన్తి దృష్ట్వా కన్యాం రజస్వలాం॥
యస్తాం వివాహయేత్కన్యాం బ్రాహ్మణోఽజ్ఞానమోహితః।
అసంభాష్యో హ్యపాఙ్క్తేయ స్స విప్రో వృషలీపతిః॥"
"తస్మాద్వివాహయేత్కన్యాం యావన్నర్తుమతీ భవేత్।
వివాహో హ్యష్టవర్షాయాః కన్యాయాశ్చ ప్రశస్యతే॥"

ఇత్యాదివిష్ణుశంఖ లఘుశాతాతపలఘ్వాశ్వలాయన ప్రజాపత్యంగిరోబృహస్పతి పరాశరసంవర్తాది స్మృతయోప్యనుగృహీతాభవన్తి ఏవంచ నరజోనంతర వివాహశ్శాస్త్రీయ ఇతివర్ణయన్తి – వయోనిర్ణయకారాణామప్యయ మర్థస్సమ్మతఏవేతి మన్యామహే— వయోనిర్ణయకారాహ్యేవంవదన్తి— యద్యపి–త్రీణివర్షాణ్యుదీక్షేత కుమార్యృతుమతీసతీ

ఊర్ధ్వంతుకాలాదేతస్మాత్ విందేత సదృశంపతిం॥
అదీయమానాభర్తారం అధిగచ్ఛేద్యదిస్వయం।
నైనఃకించిదవాప్నోతి నచయంసాధిగచ్ఛతి॥

ఇత్యాదివచనైః రజోనంతరవివాహశ్శాస్త్రీయ ఇతిప్రతీయతే, తథాపి తేషాం వచనానామాపత్కల్పతయా తదభ్యనుజ్ఞానఏవ తాత్పర్యాత్ ఉక్తానేకవచన పర్యాలోచనయా రజోనంతరవివాహోహూన శాస్త్రీయ ఏవ, అతఏవ – తైత్తిరీయసంహితాయాం సప్తమేకాండే "ప్రజాపతిరకామయత ప్రజాయేయేతిసముఖతస్త్రివృతన్నిరమిమీత తమగ్నిర్దేవతాన్వసృజ్యత గాయత్రీఛందోరథన్తరం సామబ్రాహ్మణో మనుష్యాణామజః పశూనాంతస్మాత్తే ముఖ్యాముఖతోహ్యసృజ్యన్త" తిగాయత్రీఛందసాసాకం బ్రాహ్మణసృష్టి విధానముపపన్నంభవతి॥ తాదృశవిధానస్యహి తాత్పర్యం "ఛందస్సుపాదాక్షర సముదాయదబ్దసమాహ ఉపనయనే" ఇతిహారీతసూత్రేణ యస్యాజాతేర్యేనఛందసా సృష్టిస్తజ్జాతీయస్య తచ్ఛందః పాదాక్షరసంఖ్యా పరిమితేవయసి ఉపనయనంకర్తవ్యమితి ప్రకాశ్యతే, ఏవంచ బ్రహ్మక్షత్రియ వైశ్యానాంగాయత్రీత్రిష్టుబ్జగతీఛందోభిస్సాకం సృష్టిప్రతిపాదనాద్యథాక్రమం అష్టమఏకాదశద్వాదశవయాంస్యుపనయనస్య ముఖ్యః కాలః ముఖ్యకాలానుష్ఠానాశక్తా

బ్రాహ్మణేనక్షత్రియవైశ్యయోర్ముఖ్యకాలఏకాదశద్వాదశవయసోరప్య నుష్ఠానే నదోషః.

అజీవంస్తు యథోక్తేన బ్రాహ్మణస్స్వేనకర్మణా।
జీవేత్క్షత్రియధర్మేణ సహ్యస్యప్రత్యనంతరః॥
ఉభాభ్యామప్యజీవంస్తు కథంస్యాదితిచేద్భవేత్।
కృషిగోరక్షమాస్థాయ జీవేద్వైశ్యస్యజీవికాం॥

ఇతిమనువచనేన స్వధర్మాశక్తస్య బ్రాహ్మణస్యక్షత్రవిడ్ధర్మయోరప్యధికారవర్ణనాత్, ఏవంచ ఉపనయనస్థానీయత్వాత్స్త్రీణాంవివాహస్య ఉపనయనకాలఏవ తస్యాపికాలఇత్యంగీకరణీయత్వేన అష్టమవయోముఖ్యకాలః ద్వాదశవయః పర్యన్తంతుగౌణకాల ఇత్యేవాంగీకరణీయమితి కథచిదపినర్తుమతీ వివాహసిద్ధిః। ఏతదభిప్రాయేణైవమనురపి—

త్రింశద్వర్షోవహేత్కన్యాం హృద్యాంద్వాదశవార్షికీం
త్ర్యష్టవర్షోష్టవర్షాం వాధర్మేసీదతి సత్వరః॥

ఇతిస్మరతి॥

వివాహకాలవిమర్శకారాస్తు సత్యముపనయనకాల ఏవ వివాహకాలః తస్యద్వాదశవయః పర్యంతమేవగౌణకాల ఇతివర్ణనంపరమసంగతమేవ। ఆషోడశాద్బ్రాహ్మణస్యేతి ఆపస్తంబధర్మసూత్రేణ షోడశవయః పర్యంతంగౌణకాలస్య ప్రతిపాదనాత్, ఏవంచేదపిఅష్టమవయ ఏవముఖ్యకాలఇత్యేవ "వివాహోవ్యష్టవర్షాయాః కన్యాయాశ్చప్రశస్యతే" ఇతివచనేన ప్రతిపాద్యతే, "ఆషోడశాద్బ్రాహ్మణస్య సావిత్రీనాతివర్తతే" ఇతిమనురపిద్వాదశ వయసోనంతగమప్యుపనయనకాలం ప్రతిపాద

ఋషి « అజీవంస్తుయథోక్తేన ఇతిజీవికామాత్రవిషయ మన్యత్రాపిన ప్రవర్తతే ఏవంచకన్యావివాహ ప్రతిపాదకవచనానుసారేణ కన్యావివాహవదృతుమతీ వివాహప్రతిపాదకవచనానుసారే ణర్తుమతీవివాహోఽపిశాస్త్రీయ ఇత్యేవాంగీకరణీయం॥ తథాచకన్యా వివాహప్రతిపాదకానివచనాని, యమః—వివాహంచోపనయనం స్త్రీణామాహపితామహః మాధవీయేసంపత్తౌ

అష్టవర్షాభవేద్గౌరీ నవవర్షాతురోహిణీ।
దశవర్షాభవేత్కన్యా తతఊర్ధ్వంరజస్వలా॥

యమః—అష్టవర్షాభవేద్గౌరీ నవమేనగ్నికాభవేత్।
దశమేకన్యకాప్రోక్తా ద్వాదశేవృషలీస్మృతా ॥ఇతి॥

కన్యాలక్షణకథనపూర్వకం తాసాందానఫలవిశేషమాహాంగిరాః॥

గౌరీందదన్నాకపృష్ఠం వైకుంఠంరోహిణీందదత్।
కన్యాందదద్బ్రహ్మలోకం రౌరవంతురజస్వలాం॥

తథావైద్యనాథదీక్షితీయేమనుః।

త్రింశద్వర్షోవహేత్కన్యాం హృద్యాంద్వాదశవార్షికీం।
త్ర్యష్టవర్షోష్టవర్షాంవా ధర్మేసీదతిసత్వరః॥

తథానిర్ణయసింధు భారతవచనం,

త్రింశద్వర్షఃషోడశాబ్దాం భార్యాంవిందేతనగ్నికాం।
ద్వ్యష్టవర్షోష్టవర్షాంవాధర్మే సీదతిసత్వరః॥

అత్రషోడశాబ్దాయా నగ్నికాత్వవిశేషణాత్ రజోదర్శనాభావే షోడశవార్షికకన్యా వివాహోఽపి నదోషాయేతిలభ్యతే, ఏవంవయోవిశేషానుపాదానేనాప్యృతుమతీ వివాహంప్రతిపాదయన్తి కానిచనవచనాని వసి

ష్టః,— ప్రయచ్ఛన్నగ్నికాం కన్యాం ఋతుకాలభయాత్పితా, ఇత్యాదీన్య
స్మైరేవపూర్వంసంకలితాని। ఏతేషాంచ వచనానాం ముఖ్యకాలప్రతిపా
దన ఏవతాత్పర్యం, నత్వృతుమతీవివాహనిషేధేఽపి। మన్వాదిస్మృతౌ
ఋతుమత్యాఅపి వివాహశాస్త్రత్వప్రతిపాదనేన తేనసాకంవిరోధాపత్తేః।
యథాహిగుణవద్వరలాభే ఉప్రాప్తకాలేపి జాతమాత్రా దీనాంవివా
హాయుక్తః ఏవంగుణవద్వరలిప్సయా షోడశాదివయః పర్యంతంప్ర
తీక్షణమపియుక్తమేవ తథాచమనుః—త్రీణివర్షాణ్యుదీక్షేత కుమార్యృ
తుమతీసతీ। ఊర్ధ్వంతుకాలాదేతస్మాత్ విందేతసదృశంవరం॥ బోధాయ
నః—త్రీణివర్షాణ్యృతుమతీ కాంక్షేతపితృశాసనం। వైద్యనాథదీక్షితా
పరార్క-మాధవాదీనామపి ఉక్తవచనం నిర్దిశతామయమేవాభిప్రాయః॥
ఏవంచరజోదర్శనానంతరం వివాహనిషేధపరాణాం కన్యాపిత్రాదీనాం
ప్రాపుశ్చభ్రూణహత్యాది దోషబోధనపరాణాం ఉక్తవచనానామన్య
థైవోపపత్తిర్వర్ణనీయా। తథాహి—దాతుర్యద్దోష సంకీర్తనం ,, ఋ
తుమత్యాంపితుస్తిష్ఠన్త్యాం దోషః పితరమృచ్ఛతి,, — తద్గుణవద్వరలా
భేపియః కన్యాంనప్రయచ్ఛతి తద్విషయం। తృతీయేవర్షే గుణవద్వరాలా
భేపియః కన్యాంనప్రయచ్ఛతి తద్విషయంచతథాచబోధాయనః। —త్రీ
ణివర్షాణ్యృతుమతీంయః కన్యాంనప్రయచ్ఛతి।సతుల్యంభ్రూణహత్యాయై
దోషమృచ్ఛత్యసంశయం ॥ నయాచతే చేదేవంస్యాత్ యాతచేత్పృ
థక్ పృథక్। ఏకైకస్మిన్నృతౌ దోషంపాతకంమనురబ్రవీత్।

వసిష్ఠశ్చ— యావచ్చకన్యామృతవస్స్పృశంతితుల్యైస్సకామామపి
యాచ్యమానాం। భ్రూణానితావన్తిహతానితాభ్యాం మా
తాపితృభ్యా మితిధర్మవాదః ॥ఇతి॥

ఆభ్యాంహివచనాభ్యాం యాచమానాయ వరాయకన్యాంయో నప్రయచ్ఛతి తస్యైవ భ్రూణహత్యాదోషోవిహితః; ఏవం అయాచమానాయాపివరాయవర్షత్రయమేకాదాన భ్రూణహత్యాప్రతిపాదితా॥ ఏవంచవర్షత్రయపర్యన్తమపిదానకాలో విద్యతఏవ సదృశవరాఽలాభే ఽపితృతీయేవర్షేకథమపికన్యాదాతవ్యైవ, తతః పరన్తుదానాధికార ఏవనాస్తిస్వత్వస్యైవాభావాత్, యదాహమనుస్స్వయంవరంప్రక్రమ్య.

పిత్రే నదద్యాచ్ఛుల్కంతు కన్యామృతుమతీంహరన్।
సహిస్వామ్యాదతిక్రామేదృతూనాం ప్రతిరోధనాత్ ॥ఇతి॥

బోధాయనః—అపివాగుణహీనాయ నోపరుంధ్యాద్రజస్వలాం ॥ఇతి॥ ఏవమేవకన్యావృషలీత్యాది బోధకానామపివచనానాం సదృశవరలాభేఽపియానదీయతే తద్విషయకత్వేనోపపత్తిరితి నకోఽపిదోషః। యదపి—శుల్కగ్రహణనిషేధాది లింగైశ్శూద్రస్త్రీవిషయకత్వవర్ణనం—తదపినయుక్తం, శుల్కగ్రహణస్య బ్రాహ్మణస్త్రీవిషయేఽపి ప్రసంగాత్ శుల్కవతః ఆసురవివాహస్య "షడానుపూర్వ్యా విప్రస్య", ఇతివచనైస్బ్రాహ్మణవిషయే ఽపివిధానాత్, ఏవమేవ త్రీణివర్షాణీత్యాది వచనానాం ఆపద్ధర్మత్వమప్య సంగతం, తత్ప్రకరణస్యాప ద్ధర్మప్రకరణత్వాభావాత్ అన్యథా "ఆపద్యపత్యప్రాప్తిశ్చేత్యత్ర ఆపద్గ్రహణవైయర్థ్యాపత్తేరితి రజోఽనంతరవివాహ శ్శూద్రస్త్రీయ ఏవేతివర్ణయంతి॥

పరేతుఉపనయనకాల ఏవయద్యపివివాహకాలః యద్యపిచ ఉపనయనస్య షోడశవయః పర్యంతంగౌణకాల ఇతి తత్స్థానీయస్య వివాహస్యాఽపి నిర్ణయసింధావుదాహృతభారతవచనానుసారేణచషోడశవయః పర్యన్తం

కాలః తథాపిసర్వత్రాపిస్మృతిషు ఋతుదర్శనరూపా వధినిర్ణయస్యాకృత త్వాత్; ఉక్త భారతవచనేఽపి నగ్నికాఋతివిశేషణానుసారేణ ఋతు దర్శనాభావఏవ షోడశాదివయస్కాయా అపివివాహబోధనాత్; రజో ఽనంతరవివాహఃకరణేనసేత్స్యతి॥ అయమభిప్రాయః—యది ఉపనయ నస్యయావత్పర్యంత మనుష్ఠానంశాస్త్రితః ప్రాప్తంతావత్పర్యన్తం వివా హస్యాప్యనుష్ఠానం శాస్త్రసంమతంతర్హి నైవం మహర్షివర్యా ఋతు దర్శనంతదవధితయా నిర్దిశేయుః॥ నిర్దిశంతిచ తాదృశమవధిం॥ అతో జ్ఞాయతే అతిదేశతః ప్రాప్తస్యషోడశవయః పర్యన్తస్యకాలస్యరజోదర్శ నాభావవిశిష్టస్యైవ గౌణకాలత్వేనాఽపి గ్రహణమితి॥ ఏవంచద్వాద శాదివయసోఽపి రజోదర్శన విశిష్టస్య వివాహకాలత్వం నభవిష్యతీత్య భిప్రాయేణైవ మహర్షివర్యైః "అత ఊర్ధ్వంరజస్వలా" "రౌరవంతు రజస్వలాం" ఇతిద్వాదశాదివయస్కా వివాహోఽపి ప్రతిషిద్ధః। త త్రచవ్యాఖ్యానేషు రజస్వలాశబ్దేన నియతమేవద్వాదశాది వయస్సురజో దర్శనం సంభవేదితి నవివక్షితం యదిసంభవేత్ తదాపిత్రాదీనాంభ్రూ ణహత్యాదిదోష స్సమాపతేదితితతః పూర్వమేవవివాహకరణే నకస్యాపి దోషస్యప్రసరః, ఇతివర్ణితం॥

త్రింశద్వర్షోఽష్ట వర్షాంవాధర్మేసీదతిసత్వరః॥ ఇతివదతోమనో రప్యయ మేవాభిప్రాయః॥ రజస్వలావివాహనిషేధేన అష్టవర్షాద్యనృతు మతీ వివాహఏవయుక్తఇతి బోధయతాం పూర్వోక్తయమాదివచనానా మప్యేవం సత్యేవోపపత్తిః॥ సచ—రజస్వలావివాహనిషేధ పరత్వేనభవ దభిమతానాం సర్వేషామపివచనానాంగౌణకాల ప్రతిపాదనఏవతాత్ప ర్యం, నతురజస్వలావివాహ నిషేధేఽపి; త్రీణివర్షాణ్యుదీక్షేత కుమా

ర్వ్యతుమతీసతీ । ఇతిమన్వాదిస్మృతిభిః ఋతుమతీవివాహస్యా౽పివిధా
నేనతదవిరోధార్థంతత్రైవ్యాపస్తైర్వర్ణనీయత్వాత్ ఇతి-వాచ్యం;తథాస
తిరజోదర్శనస్యానియతత్వాత్ యస్యాష్షోడశాదివయస్యేవరజోదర్శనంత
స్యాః ఏకోనవింశవయః పర్యన్తమపివివాహకాల ఇతికల్పనాపత్త్యా,అ
ష్టోడశాద్బ్రాహ్మణ స్యేత్యాదిమన్వాది వచనమేవపరస్పర విరుద్ధంపంస
ద్యేతేతిరజో నంతరవివాహ నిషేధతాత్పర్య కత్వస్యైవయుక్తత్వాత్
యథాచ," కాలేదాతాపితావచ్యః,, ఇత్యాదినారజోనంతర వివాహస్య
నిషిద్ధత్వాత్ త్రీణివర్షాణీత్యాదీనాం ఆపత్కాలతయా తదభ్యనుజ్ఞానఏవ
తాత్పర్యం, తథాపూర్వమేవనిరూపితం" త్రీణివర్షాణీత్యాది,,వచనంహి
సతాపదృతుదర్శనానంతరమప్యనాపత్కాల్ప తయాఽపిదానకాలమభ్య
నుజానాతి; కిన్తుగుణవదగుణ వద్వరలిప్సయాతత్ర తత్రపర్యటతః తల్లాభ
తః పూర్వమేవస్వకన్యారజః పశ్యతః ఋతుప్రతిరోధనిమిత్త భ్రూణహ
త్యాదోషనివర్తక ప్రాయశ్చిత్తానుష్ఠాన పూర్వకందానాధికారంబోధ
యతి । తద్విషయే ఏకస్యా ఏవభ్రూణహత్యా యాశ్శాస్త్రసిద్ధత్వాత్ ।
యస్తుపునః యాచమానాయాపి వరాయ సాహసాదినానకన్యాం దదాతి
సత్స్వపి రజోదర్శనేషు; సప్రాయశ్చిత్తశతేనాపిదానాధికారమర్హ
తి కన్యాతు అస్వతంత్రాపితృ శాసనమేవకాంక్షంతీపరతంత్రయేనాపిపి
త్రానదత్తాస్వయంవరణ మర్హతీతి తయా ఏకస్మిన్వృతేతేనచ అశ్వ
లాయనోక్తప్రాయశ్చిత్తానుష్ఠానేన గృహీతాయాం తస్యాంనకోఽపి
దోషస్సంభవిష్యతి । అయంచార్థః—నైనఃకించిదవాప్నోతి నచయంసా
ధిగచ్ఛతి । నయాచతేచేదేవంస్యాద్యాచతే చేత్పృథక్పృథక్ । ఇత్యాది
వచన బలాల్లభ్యతే ॥ ఏతేననయాచతేచేదేవం స్యాదిత్యాది వచనస్యగు

ణ వద్వరలాభేఽపి యః కన్యాం న ప్రయచ్ఛతి గుణవద్వరాఽలాభేఽపి తృతీయవత్సరే యః కన్యాం న ప్రయచ్ఛతి· తద్విషయకత్వమేవ యుక్తమితి వచనమపిపరాస్తం । గుణవద్వరలాభేఽపి కన్యామదదతః ఋతుసంఖ్యాకభ్రూణహత్యా ప్రతిపాదకానాం వచనానాం తస్యదానాధికారం ప్రత్యవహారత్వబోధన ఏవతాత్పర్యాత్, త్రీణివర్షాణీత్యాదీనామపిగౌణకల్ప సమర్పకత్వాభావస్య పూర్వముపపాదితత్వేన గుణవద్వర లాభేపితృతీయ వత్సరే ఇతికల్పనాయా అపినిరాలంబనత్వాత్ నోపరుంధ్యాద్రజస్వలాం ఇత్యేవం జాతీయకానాం బహూనాంవచనానాం అవిరోధనైవ త్రీణివర్షాణీత్యాది వచనార్థవర్ణనస్యయుక్తత్వాత్ । విప్రతిషేధభూయసాంస్యాత్సధర్మత్వమితిన్యాయాత్, ఏతేన నోపరుంధ్యాద్రజస్వలాం ఇత్యాది వచనానాంవర్షత్రయానంతరదాన గోచరత్వేనోప పత్తివర్ణనమపి పరాస్తం; నగిరాగిరేతి బ్రూయాదిత్యస్యేవ నోపరుంధ్యాద్రజస్వలామిత్య స్యాప్యనువాదరూపత్వాద్యథా ప్రాప్తమేవాఽనువాదోయుక్తఇతి "దద్యాద్గుణవతే కన్యాంనగ్నికాం బ్రహ్మచారిణే, అపివాగుణహీనా యేతివిధి వాక్యతోఽర్థతః ప్రాప్తనగ్నికావివాహనిషేధఏవవాఽనువదితవ్యః" అనగ్నికాపదంతు న ఋత్వనంతరవర్షత్రయావచ్ఛిన్నస్త్రియం బోధయతి, కింతుసంజాతరజస్కాం । ఏవంచరజోదర్శన మాత్రేణ వివాహ నిషేధఏవోక్తవచన తాత్పర్య మితి నకోఽపి దోషః; ఏతేన కౌరవంతు రజస్వలా మితివచన మపివ్యాఖ్యాతం భవతి ॥ కలౌపరాశరస్మృత ఇతి; పరాశరసంహితావచనేన పూర్వోక్తేన ఋతుమతీవివాహ స్సర్వథాఽధర్మఏ తేత్యవగమాత్ నకథంచిదపిరజోఽనంతర వివాహశాస్త్రీయతాసిద్ధిః । యద్యపిమాధవాచార్యైః పరాశరస్మృతితివ్యాఖ్యానేత్రీణివర్షాణీత్యాది వచననిర్దేశాదత్వనంతర

వర్షత్రయపర్యంతం వివాహకాలబోధకేఽపి తాత్పర్యమితి ప్రతిపాదిత మితి ప్రతీయతే. తథాపి తత్రత్య మాధవగ్రంథస్యాఽప్య స్మదభిప్రాయక ల్పనమేవ యుక్తం, మన్వాదివచనస్మృత్యర్థసంగ్రహేణాకలియుగాఽసా ధారణధర్మోపదేశ నార్థం ప్రవృత్తైః పరాశరాచార్యైః ఋతుమతీ వి వాహ నిషేధనాత్ మన్వాదీనామపి తాదృశతాత్పర్య కల్పనమేవ యు క్తమితి వర్ణయంతి,

ఇతరేతు ఋతుమతీ వివాహనిషేధపరేషు సర్వత్రాపి వచనేషు, "య స్తాంవివాహయేత్కన్యాం బ్రాహ్మణోమదమోహితః" ఇతివిశిష్య బ్రా హ్మణగ్రహణానుసారేణ బ్రాహ్మణేతరే షామృతుమతీ వివాహోఽపి నదోషాయైవ క్షత్రియాదీనాం షోడశాదివయసామప్యుపనయన కాల త్వా త్తత్స్థానాపన్నస్య వివాహస్యాఽపి తదానీమేవానుష్ఠానస్యయుక్త త్వాత్, నచ—అత్రాఽపిరజోదర్శనాభావ విశిష్టస్యైవోపనయనకా లస్య వివక్షేతి—శంకనీయం। క్షత్రియాణాం ద్వాదశాది వయస ఏవము ఖ్యకాలత్వేన తతఃపూర్వం వివాహస్య అనుష్ఠానాసంభవాద్ద్వాదశాది వయస్సురజోదర్శనస్యాఽపిసంభవాత్; తదభావవిశిష్టద్వాదశాది వయ స్సుసర్వత్రా ప్యుపపాదనాసంభవాత్ ఏవంచ రజోదర్శనానంతర మపి క్షత్రియవిషయే వివాహోఽనుష్ఠానే నదోషఏవ; ఏవంచ "త్రీణివర్షాణ్యు దీక్షేతేత్యాది వచనానామ్, క్షత్రియాదివిషయకత్వమేవయుక్తమితివ ర్ణయంతి। తదపరేనక్షమంతే ఏవంసతి, "త్రీణివర్షాణ్యుదీక్షేతగృహే కన్య ర్తుమత్యపి" ఇత్యపిశబ్దప్రయోగస్వారస్య భంగాపత్తిః అపిశబ్దేనహి ఋతు మత్యావివాహోవచనాంతరేణ నిషిద్ధ ఇతిప్రతీయతే యదిపునర్నిషేధ పరాణాంసర్వేషామపివచనానాం బ్రాహ్మణశబ్దప్రయోగస్వారస్యానుసా

తేర్బ్రాహ్మణవిషయకత్వమేవేతి నియమః; తర్హి క్షత్రియాదివిషయేరజో ఽనంతరవివాహనిషేధపరస్యైతస్యాఽపివచనస్యాభావాదపి శబ్దప్రయో గస్వారస్యభంగాపత్తిః నను—నోపయంధ్యాద్రజస్వలాం ప్రదానం ప్రాగృ తోరిత్యాదివచనానాం సర్వసాధారణత్వేన ప్రతీయమానానాం ఋతుమ తీవివాహశాస్త్రీయత్వే నోపపత్తిరిత్యాక్షేపద్వారా క్షత్రియాదివిష యేఽపివివాహనిషేధపరత్వేన శబ్దప్రయోగస్వారస్యం సిద్ధమేవేతిచే న్న; దాననిషేధపరాణాముక్తజాతీయవచనానాం రజస్వలావివాహవి ధిపరనైవాహిక చతుర్థరాత్రసమావేశనాది విధిపరాపస్తంబ బోధా యనాది గృహ్యసూత్రవిరోధ జాగ్రతి తద్వివాహనిషేధ పరవిధ్యంతరా ఽఽక్షేపకత్వాసంభవాదపిశబ్ద ప్రయోగస్వారస్య భంగస్తదవస్థ ఏవే తినిషేధవాక్య ఘటిక బ్రాహ్మణశబ్దసామాన్యస్య క్షత్రియాద్యుపలక్షణ త్వమంగీకరణీయమేవేతి నిషేధాఽభ్యనుజ్ఞాన శాస్త్రయోరుభయోరపి సర్వసాధారణత్వమేవాంగీ కరణీయం। అథోచ్యేత—దానవిధినిషేధప రాణాంవచననాం వివాహవిధినిషేధపర్యన్తతాత్పర్యాంగీకరణమావశ్య కమితి పూర్వముపపాదితత్వాన్నో పయంధ్యాద్రజస్వలా మితి శాబ్దనిషే ధేజాగ్రతి [illegible]ఽఽక్షేపా ఽనపేక్షణాత్, అపేక్షణేఽపి చతుర్థా పరరాత్ర సమావేశనస్యా దృష్టార్థత్వమేవేతి పూర్వముపపాదితత్వాన్న కయాఽపిస్మృత్యా విరోధఇతినిషేధాక్షేపస్యాఽపిసంభవాత్ క్షత్రి యాదిమాత్రవిషయమేవాఽభ్యనుజ్ఞానం—ఇతి; తదాఽపి త్రీణివర్షా ణీత్యాది వచనజాతం కిం బ్రాహ్మణోమదమోహిత ఇతివిశేషవచనముపజీ వ్య రజోనంతరవివాహ మభ్యనుజానాతి, ఉతాఽఽహోసామాన్యము ఖేన ప్రవృత్తినిషేధ ముపజీవ్యేతి విచారణాయాంవినిగమనాఽవిరహా ణాద్విధినిషేధోప జీవనైవేదమభ్యనుజ్ఞాన శాస్త్రంప్రవృత్తమితి త్రీ

ణివర్షాణీత్యాదివచనం సర్వసాధారణమేవ యదిపునః సామాన్యము
ఖేన ప్రవృత్తత్వసామాన్యాదభ్యనుజ్ఞాశాస్త్రమపి సామాన్యతః ప్రవృత్త
నిషేధ మేవోజ్జీవతిసవిశేషముఖప్రవృత్తనిషేధమితీష్యతే; తత్రేద
ంవిచారణీయంవిశేషశాస్త్రత్వేన భవదభిమతం బ్రాహ్మణస్త్రీణామేవ
రజోఽనంతరవివాహం నిషేధతీతి కథంసిధ్యతీతి। తత్రనతావద్బ్రాహ్మణ
కర్తృకవివాహేనబ్రాహ్మణ్యాఏవ సంస్కార ఇతిప్రకారస్సమీచీనః క్ష
త్రియాదిస్త్రీణామపిబ్రాహ్మణకర్తృక వివాహేన సంస్కారస్యస్మృతి
సిద్ధత్వాత్। నాపిప్రకారాన్తరేణ తదసంభవాత్। సహి.

యస్తాంవివాహయేత్కన్యాం బ్రాహ్మణోమదమోహితః ఇత్య
త్రకర్తురివసంస్కార్యాయా అపిబ్రాహ్మణశబ్దేనవ్యవహారో విద్యతే
ఏవంచర్తుమతి సామాన్యస్య వివాహనిషేధపరోక్త వచనతాత్పర్యమ
భ్యుపగమనీయం। ఋతుదర్శన దోషసంకీర్తనపరాణాం సామాన్యము
ఖేనైవ ప్రవృత్తి దర్శనాత్। ఏవంచప్రత్యాసత్తిన్యాయేనాఽపి ఋతు
మతీ సామాన్యగ్రహణ ఏవ అపిశబ్దస్వారస్య మితి త్రీణివర్షాణీత్యాది
వచనానాం సర్వసాధారణత్వమేవ యుక్తం। అతఏవ యఃకర్యాత్క
రాత్రేణ వృషలీ సేవనంద్విజః ॥ ఇతిరజస్వలావివాహ నిషేధవాక్యేద్వి
జశబ్దగ్రహణోపపత్తిః ఏవంచర్తుమతీ వివాహ శాస్త్రీయతావాదో
బ్రాహ్మణస్త్రీవిషయేపి యుక్తఏవేతి ॥

పరేతు, బ్రాహ్మణస్య సర్వవర్ణీయవివాహాఽధికారేఽపి స్వ
వర్ణీయ కన్యావివాహ ఏవధర్మ ప్రజాసంపత్త్యర్థ ఇతి తత్కర్తృ
కతద్వివాహ గోచరాణాం బ్రాహ్మణీశబ్దాఽఘటితానామపి తద్విషయ
కత్వమేవ భవిష్యతీతి సంవర్తాదివిశేషవచనానాం। బ్రాహ్మణీమాత్ర

విషయకత్వేన సామాన్యముఖేన ప్రవృత్తానాం త్రీణివర్షాణీత్యాదీ
నాం బ్రాహ్మణీభిన్నవిషయకత్వమేవ ॥ నచైవమపి—సామాన్యతః ప్ర
వృత్తస్య నోపసంహార్యాద్రజస్వలామితి వచనస్య బ్రాహ్మణీవిషయకత్వ
మపి నిశ్చితేవాననా ఆద్యేతత్సమాన విషయక అభ్యనుజ్ఞాశాస్త్ర మపి
బ్రాహ్మణీవిషయమేవ ॥ ద్వితీయేతు సంకోచేప్రమాణాఽభావః ఏవం
బ్రాహ్మణ్యోమపమోహిత ఇత్యత్రాపి త్రైవర్ణికాఽవివక్షణే "యః
కరోత్యేకరాత్రేణ వృషలీసేవనంద్విజః" ఇతివాక్యేద్విజగ్రహణాఽనుప
పత్తిః తద్వివక్షణేతు త్రీణివర్షాణీత్యాదివచనసమానవిషయ కత్వమేవే
తి బ్రాహ్మణకన్యానామపి రజోనంతర వివాహాఽభ్యనుజ్ఞాయతఏవ॥
ఏవంవైవాహిక చతుర్థరాత్రి సమావేశనాఽన్యథా నుపపత్తిరపి తత్ర
గమికేతికథం తదనాప్త్రీయత్వమితి— శంకనీయం ॥ ఏవమపివాఆప
త్కల్పతయా తదభ్యనుజ్ఞాన ఏవతాత్పర్యం త్రీణివర్షాణీత్యా దీనామం
గీకరణీయం ॥ దద్యాదప్రాప్తకాలేఽపీత్యాదివాక్యానా మివఋతుమ
త్యర్థత్యపిశబ్ద ఘటితానామపి అభ్యనుజ్ఞానశాస్త్రాణామా పద్ధర్మవ్యవస్థా
పకత్వస్యైవ సర్వసమ్మతత్వాత్ ॥ వైవాహిక చతుర్థరాత్ర సమావేశ
నంత్వదృష్టార్థ సహశయనమాత్రపర్యవసన్నం నతు-మతీవివాహ లింగ
మితి పూర్వమేవ నిరూపితం ॥ యదపి—సమావేశనస్య సహశయన
మాత్ర పర్యవసాన సిద్ధాంత పక్షేఽపి ప్రణామాంజలి సమర్పణమేవ
వరిముక్తిరలమన్యామహ ఇతి—ఉక్తం; తత్రకేచిత్ సమాదధతే త
త్రైవంప్రష్టవ్యం కిం తేషాంసాహసికత్వాత్ సాహసికానాంచాత్యంత క్రో
ధసంసూచక ప్రణామాంజలి సమర్పణేనైవ మానముద్రాస్యాదిత్యత్ర
వివక్షితముతాహో తేషాం ప్రామాణికత్వాత్ ప్రామాణికానాంచ
ప్రణామాంజలి సమర్పణ పూర్వకోపసదనమేవ యథావదర్థ గ్రహణే

సముచితోపాయ ఇతి॥ ఆద్యే భవతామేవ వినాప్రమాణలేశం సాహసేన ప్రతిజ్ఞామాత్రేణ తత్తత్సిద్ధాంత వ్యవస్థాపనపరాణాం విషయే తాదృశ ముత్తరం తరలమితి మన్యామహే । యతోహి సాహసికపర్యనుయోగ సముచిత సమాహితి విధోపదేశతో గురవోపి దాసీంభవంతస్సంవృత్తాః ॥ ద్వితీయేతు నరజోనంతర వివాహసిద్ధి రిత్యాయాతం సన్మార్గేణేతి మంతవ్యమితి ॥

యుక్తంచైతత్ నోపరుంధ్యాద్రజస్వలా మితివచనం బ్రాహ్మణకన్యేతర విషయకమితి నయుక్తం ॥ 'ఉద్వహేద్యస్తు తాం కన్యాం' ఇతి వచనస్య 'నోపరుంధ్యాంద్రజస్వలామితి' వచనస్యచ ద్వయోరపి నిషేధపరత్వాన్నబ్రాహ్మణం హన్యాన్నాత్రేయం హన్యాదితివచనయోరివ నపరస్పర బాధ్యబాధక భావాదికం; కింతు నాత్రేయం హన్యాదితి వాక్యే నాత్రేయహనన పాపాధిక్యమివ బ్రాహ్మణోపదమోహిత ఇత్యనేన బ్రాహ్మణకర్తృక రజస్వలావివాహే పాపాధిక్య వర్ణనఏవ తాత్పర్యం । అతఏవ సర్వత్రాపిస్మృతిషు సర్వసాధారణ వివాహప్రకరణ ఏవైతేషాం నిర్దేశ ఉపపద్యతె । అన్యథాహి త్రీణివర్షాణీత్యాదీనాంక్షత్రియ ధర్మాధి కారఏవ నిర్దేశాపత్తేః ॥ సర్వథాపితు త్రీణివర్షాణీత్యాదినా ఆపత్కల్పతయైవ రజోనంతరవివాహాభ్యనుజ్ఞాయతే ॥ అభ్యనుజ్ఞాతస్యాఽపి పితృవరాది ప్రాయశ్చిత్తానుష్ఠాన పూర్వకమేవానుష్ఠానమితి కన్యావరయోః సర్వవిధపాప నివృత్తి సంభవేఽపి పితృవిషయే వ్యవహార్యత్వమేవ సంపద్యతే । భ్రూణహత్యాదీనాం వ్యవహార నిరోధక శక్తిమాత్రస్యైవ ప్రాయశ్చిత్తేన నివారణాత్ ।

తదుక్తం ।

కామతోవ్యవహార్యస్తు వచనాదిహజాయతే । ఇతి ॥

ఏవంచభ్రూణహంత్ర్యాణాం పిత్రాదీనాం లోకవిద్విష్టత్వమపి సిద్ధంభవతీతి లోకవిద్వేషప్రయోజకత్వాదపి నరజస్వలాదానాది సమయకల్పనం యుక్తం । ఏతావతాసందర్భేణ సకలగృహ్యసూత్రాణాం సర్వాసామపిస్మృతీనాం గౌతమాశ్వలాయన బోధాయన వసిష్ఠ పరాశరాది నిర్మితానామభిప్రాయో నిరూపితః—యథాఋతుమతీ వివాహానశాస్త్రీయఇతి ।

అత్రకేచిత్ప్రత్యవతిష్ఠన్తేస్మృత్యాదీనాం పౌరుషేయత్వాదపౌరుషేయం మంత్రలింగమేవప్రబలమితి తదన్యథానుపపత్త్యారజోనంతర వివాహశ్శాస్త్రీయఇతి । అయమాశయః—మంత్రాణాంహిప్రయోగసమవేతార్థస్మారకత్వేనైవ ప్రామాణ్యమితి మంత్రాధికరణపూర్వతంత్రే నిరూపితం ॥ వివాహాంగభూతాశ్చమంత్రాః ప్రౌఢాం స్త్రియంప్రకాశయంతః వివాహ్యాయాః ప్రౌఢాత్వమప్యావశ్యకమితి ప్రమాణయంతి । నహ్యరోహారుమితి సమావేశనాంగభూతమంత్రప్రకాశ్యమానోర్వారోహణాలింగనాదికం కన్యాయాం సంభవతి । యదితు కన్యాయామపి తత్సంభవత్యేవేతి సాహసమాశ్రీయతే తదాఽపి సోమః ప్రథమోవివిదేగంధర్వః ఇతిమంత్రప్రతిపాదితం మనుష్యచతుర్థపతిత్వం రజోఽనంతర వివాహలింగం భవతి । —తథాహి—

వ్యంజనేషుచజాతేషు సోమోభుంజీతకన్యకాం।
పయోధరేషుగంధర్వోరజస్యగ్నిః ప్రతిష్ఠితః ।

ఇతివచనంహి సోమస్యవ్యంజన కాలేపతిత్వం పయోధరకాలే గంధర్వపతిత్వం రజఃకాలేఽగ్నిపతిత్వం చబోధయతి । తత్రతృతీయపతేర

గ్నః రజఃకాలపవపతిత్వే చతుర్థ పతేస్తదుత్తరమేవ పతిత్వప్రసి ద్ధమేవేతి రజోనంతర వివాహలింగమేవ తదితి మంత్రలింగ విరోధోదు ష్పరిహార ఇత్యృతుమతీవివాహోఽపి శాస్త్రీయ ఇత్యేవభవతి ॥ యావతాచర్తుమతీ వివాహోఽపి శాస్త్రీయ ఇత్యుక్త్యా తావతా సమావేశ నాదిమంత్రాణామపిస్వారస్యం సిద్ధం ॥ ఏవంచమంత్రలింగావిరోధేనైవ స్మృత్యుపపత్తివర్ణనం యుక్తమితి తాసామపి తథాత్వశాస్త్రీయతాయా మేవతాత్పర్యం ॥ కన్యాశబ్దస్య అప్రాప్తయౌవనత్వసామాన్యవివాహి తాపరత్వమపి గౌణ్యావృత్త్యోపపన్నమితి "అర్యమణంను దేవంకన్యా అగ్నిమయక్షత" ఇత్యాదిమంత్రా అపిసమిద్ధాః॥ గౌణ్యాంమానాభావేనత త్వాశ్రయణమేవ యుక్త మిత్యాగ్రహేతు "అగ్నిరోర్యతి సూర్యాస్య స్వాహేతి, మిశ్రమంత్రలింగేన దేవతాద్వయ... ఉభయవివాహోఽ పి శాస్త్రీయ ఇత్యంగీక్రియతాం ॥ వినిగమనావిరహాత్ ॥ ఏవంచసమా నబలమంత్ర లింగద్వయ మూలకయోః "నోపయంధ్యాద్రజస్వలాం", 'త్రీణివర్షాణ్యుదీక్షేతేతి, వచనయోః రుభయోరపి పరస్పర బాధ్యబా ధక భావాఽయోగేన గ్రహణాఽగ్రహణ యోరివ వికల్ప ఏవపర్యవ సానం ॥ ఏవం 'గ్రామోవసూయురష్ప సౌతాప్రభావత । సూర్యాంప త్యైకంసంతీంమనసాసవితాదదాత్ । సకూతిమింద్రచ్యుతం సచ్యుతం జఘనచ్యుతం । కనాత్కాభాంన ఋధరప్రయస్యస్నిభసక్థ్యే,' ఇత్యా ది మంత్రాశ్చాత్ర ప్రమాణీభవంతీతి ॥

వయోనిర్ణయకారాస్తు యద్యపి మంత్రలింగం ప్రౌఢా వివాహ సాధకమత్ర ప్రసజ్యేత తథాపిమంత్రాణామర్థ వాదానాంచ విధ్యేకవా క్యతయైవ ప్రామాణ్యమితి జైమినీయ సిద్ధాంతానుసారేణ ప్రతీయమాన ప్రమాణాంతర విరుద్ధార్థప్రామాణ్యంనసంభవతీతి ప్రత్యక్షచోదనాయా

షానకస్మృతిబాధిత రజస్వలావివాహ ధర్మతాబోధనేఽపి తాత్పర్యమ భ్యుపగంతుం నశక్యతే ॥ యద్యపిమంత్రలింగమపౌరుషేయం స్మృత యస్తుపౌరుషేయాః; తథాఽపిశ్రుతి లింగవాక్య ప్రకరణస్థాన సమా ఖ్యానాం సమవాయే పారదౌర్బల్యమితిబలాబలాధికరణ పర్యాలో చనాయాం మంత్ర లింగాపేక్షయాఽపిస్మృతి ప్రాబల్యమపి గమ్యత ఇతిస్మృత్యనుసారేణైవార్థనిర్ణయోయుక్తః నహిశ్రుతిరిత్యే తావతా సర్వంప్రమాణం స్మృతిరిత్యేతావతా నప్రమాణం; శ్రుతేఅచమేదితి స్మృత్యాఽపి వేదంకృత్వావేదింకరోతీతి శ్రుతిబాధదర్శనాత్ ॥ కింతు ప్రమేయావగమ సన్నికర్ష విప్రకర్షాభ్యామేవ ప్రమాణస్య బలాఽ బలే ॥ ఏవంచోక్తసూత్రే శ్రుతిశబ్దేన శ్రౌతః స్మార్తో వానిరపేక్షతయా బోధకశ్శబ్ద ఏవగృహ్యతఇతి లింగాపేక్షయాస్మృతిర్బలీయసీతిసిద్ధమేవ॥ లింగవిరోధేఽపిస్మార్తశ్రుతేర్బలీయస్త్వాదితి నిబంధనకారవచనం,వా రుణీభిరాదిత్య ముపతిష్ఠత ఇత్యత్ర స్మృత్యాఽపి మంత్రలింగ బాధసి ద్ధాంతశ్చైత ఏవోపపన్నో భవతి యదిమంత్రలింగమేవ స్మృత్యపేక్ష యా ప్రబలమితిస్యాత్తదా ఉద్బుధ్యస్వాగ్నే — అగ్నిమూర్ధా ఇత్యాది మంత్రాణామగ్న్యాద్యారాధనఏవాం గత్యాపత్తిరితి బుధభౌమాది గ్రహారాధనవినియోగ స్మృతీనామప్రామాణ్యాఽపత్తిః ॥ విరో ధాధికరణేతు ఏకజాతీయ ప్రమాణభూతయోరేవ శ్రుతిస్మృత్యో ర్బలాఽబలవిచారః కృతః నతుభిన్న జాతీయయోరపీతి మంత్రలింగ విరుద్ధానామపిస్మృతీనామప్రామాణ్యయోజనే నతదధికరణస్య తాత్ప ర్యం ॥ భిన్నజాతీయాతు శ్రుతిస్మృతిర్వాయతరా ప్రమేయ సన్ని కృష్టా తతరైవబలీయసీ ॥ తదుక్తం ॥

నైవతావచ్ఛ్రుతిస్మృత్యోస్స్వరూపేఽపసిద్ధతా ।
బలాబలపరీక్షా వాఽప్రమేయ ద్వారికాహిసా ॥ ఇతి ॥

అనేనహి వచనేన అర్థికార్థపరశ్రుత్యపేక్షయా శాస్త్ర ప్రమేయ పరస్మృతి ప్రాబల్యం, శ్రుతె ఆచమేదిత్యాది స్మృతి విరుద్ధానాం వేదంశ్రుత్వా వేదంకరోతీతి ప్రభు పరవచనానామప్రామాణ్య బోధనార్థం నిరూపితం తత్సామాన్యాదత్రాఽపి స్మృతిప్రాబల్య మనేన మేవయుక్తం। అపిచవిధినా కర్మ విశేషం ప్రతి వినియుక్తాః ఖలుమంత్రాః కంచిదర్థం ప్రకాశయితు మర్హంతి, నాసతివినియోగే ఇతికన్యావివాహేహాపివినియుక్తానామేతేషాం కథంచిదపి లక్షణాదినా కన్యాప్రకాశకత్వమేవాంగీకరణీయ మితిమంత్ర లింగానామపి స్మృత్య విరోధానైవోపపత్తిర్వర్ణనీయా । అయమభిప్రాయః—ఇదంకర్మాఽనేన మంత్రేణకార్యమితి కర్మవిశేషే ప్రమాణాంతరేణాంగత్వే గృహీతే ఖలు తత్ర లింగేనకస్యచిదర్థస్యాఽనుమానం । లింగస్యైవాంగత్వస్యాఽపినిర్ణయే తు పరస్పరాశ్రయదోషః । అంగత్వ గ్రాహకంచ ప్రమాణంస్మృతిరేవేతి తదుపోపజీవ్య లక్షణాత్మకం మంత్రలింగం కథమపి నతద్బాధకంస్యాత్, ఉపజీవ బాధస్యాఽయుక్తత్వాత్ ॥ లింగస్వరూప సిద్ధ్యపేక్షయావతాస్స్మృత్యగీతా తావతా మంత్రలింగమపి స్వార్థమేవేతి సమానేస్మార్తత్వే విధిస్స్వవిరుద్ధం లింగమాభాసీకరోతి ॥ యుక్తంచైతత్—విధ్యుత్తర కాలమేవ మంత్రాణాం ప్రవృత్త్యా విధిరుపక్రమస్థో మంత్రాశ్చపాశ్చాత్త్యా ఇతి స్ఫుటం। ఉపక్రమస్థేనచ ప్రమాణేనదుర్బలేనాఽపి బోధితమేవార్థం ప్రబలమపి పాశ్చాత్యం ప్రమాణమనుసరతి । ఉపపాదితం చైతత్ వేదో వా ప్రాయదర్శనాదిత్యాదౌ తృతీయాధ్యాయే పూర్వతంత్రే । ఏ

వంచవర్షేలాఽపి స్మృతి రేవవస్తు సాధికేతి వివాహమంత్ర లింగానాం కదమపి రజస్వలా వివాహసాధనత్వం ॥ కించకాలాంతర భావినమర్థ మాదాయాఽపి మంత్రలింగానిసావకాశాని భవితుమర్హంతి । స్మృతీ నాం పునర్లింగ బలబాధ్యమానానాం సకశ్చిదన్యోఽవకాశశ్శక్యః కల్ప యితుమితి ‘‘సర్వత్ర ప్రతిహతానాం విపరీతం బలాబలమితి న్యాయేన స్మార్తైరపివిధిభి కేనకైరితాన్యపిలింగాన్యర్థాంతరవిషయతామాపాద్యన్తె ఇతిస్మృతిప్రాబల్యాంగీకరణమేనయుక్తం ॥ స్మృతయోహివ్యవస్థిత ధర్మాఽధర్మాది స్వరూపప్రతిపాదనపరాః నతవాతం దేశకాలాద్యాను గుణ్యేనకల్పితాన్యపి హేతుదర్శనాచ్చేతి న్యాయేనాపి నతదప్రామాణ్య శంకాఽవసరః ॥

శ్రుతింపశ్యంతి మునయస్స్మరంతి తథాస్మృతిం । ఇతిమనువచనమప్యత్ర ప్రమాణం॥ తాసాంసాదిత్వాత్ తత్పరతి పాద్యార్థోఽపి సాదిరితి కల్ప నాయుక్తి నహి ॥ జ్యోతిష్టోమోనుష్ఠేయ ఇత్యస్యసాదివాక్యావగత జ్యోతిష్టోమాదేరపి సాదిత్వాఽపత్తేః ॥ యద్యప్యర్థోనిత్యః యాత్వసావ నాఽనుపూర్వీసా అనిత్యేతి మహాభాష్యవచన మప్యనుకూలం । యద్యపి హేతుదర్శనాచ్చేతి సూత్రేస్మృతీనామస్య ప్రామాణ్య ముప పాదితం; తథాఽపినతన్మన్వాది స్మృతి విషయం । వేదార్థంప్రత్యక్షీ కృత్యైతమేవ శబ్దాంతరేణ ప్రతిపాదయతాం మహర్షివర్యాణాం జితా రిషడ్వర్గాణాం కామక్రోధాదిదృష్టహేతు సంభావనాయా అప్య సంభవాత్ ॥

యోఽవమన్యేత తేమూలేహేతు శాస్త్రాశ్రయాన్నరః।
ససాధుభిర్బహిష్కార్యో నాస్తికో వేదనిందకః । ఇతి

మనువచనంచాస్మాకమనుకూలం—కించ—కతిపయ భ్రాంతజనదృష్టాని
మంత్రలింగాని ॥ స్మృతయః పునః ప్రామాణికమూర్ధన్యాఽనేకమ
హర్షి జనప్రత్యక్షాః ఇతిస్మృతిప్రాబల్యమేవాంగీకరణీయం—కించ—
భవదుదాహృతస్తైర్వాహిక మంత్రలింగాన్యృషయో జానంతి వా నవా ॥
యది జానంతి కథమేతే మంత్రలింగాన్యమూన్యృతాన్యర్థవిశేషసాధకానిన
గణయాంబభూవుః॥నఖలుభవాదృశేభ్యోహీనప్రజ్ఞాస్తే, ఇతివిద్యమానమ
పి మంత్రలింగం స్మృతివిరోధాదప్రమాణమేవ తైర్గృహీతమితి మం
త్రలింగానుసారేణ రజస్వలావివాహ సాధనం నసంభవత్యేవ!—అస్తు
వామంత్రలింగప్రాబల్యం ఏవం చేదపి ఋతుమత్యాః వివాహసాధనంమంత్ర
లింగం కిమపి వేదే నోపలభ్యతే ॥ తన్మంత్రసర్గే ప్రార్థనాదీనాం కన్యా
యామపి సంభావ్యమానతయా ప్రౌఢాలింగత్వాభావాత్ ॥ యత్తు—
సోమః ప్రథమో వివిదే గంధర్వ ఇతి మంత్రగణం మనుష్యచతుర్థపతిత్వ
లింగకం; తదపి నతుర్యమతీవివాహ సాధనసమర్థం ॥ అగ్న్యనంతర పతిత్వ
బోధనమాత్రేణ అగ్న్యనపత్యకాలఏవవివాహ ఇతికల్పనాయాం ఉపరి
ష్టాత్ విశ్వావసో నమసేడామహేత్వా ఇతి మంత్రలింగ విరో
ధస్యపరిహారః॥అనేనహిమంత్రేణగంధర్వాఖ్యద్వితీయపతిఃస్తుతినమస్కృ
తయా పురస్సరం వివాహితాం వధూంమమ పత్నీంవిహాయపితృగృహా
గతామన్యాం కన్యాంప్రీతిత్వయాగంతవ్యామితి ప్రార్థ్యతే ॥ తత్రయద్య
గ్న్యనభ్యుపత్య కాలఏవ వివాహ ఇతిస్యాత్ తదా కిం ప్రార్థనమేవ ఖలుకర్త
వ్యం ॥ నన్వస్తు మంత్రలింగే వ్యవస్థాది వయఃసామాన్యాత్ అపివివాహసి
ద్ధావపి ప్రథమమంత్రలింగాబాధనాత్తదనుసారేణ తుర్యమతీవివా
హోఽపి శాస్త్రీయ ఏవేతి చేత్—న; స్పష్టాస్పష్టలింగయోః స్పష్టలిం
గానుసరణమేవయుక్తమితి ద్వితీయలింగాశ్రయణాస్యైవ యుక్తత్వా

త్ ॥ నచ—ప్రథమలింగమపిస్పష్టమేవేతి—వాచ్యం; అస్మదాదీనామి వసోమాదీనాం తరుణీ సంభోగాద్యసంభవేన వ్యంజనేషుచ జాతేషు ఇతి వాక్యఘటకస్యభుక్తేతి ఇత్యస్యా' ప్యనేపదాంతస్యాపి పాలయతీత్యర్థకత్వా దుక్తయవ్యాన సోమగంధర్వాఽగ్నిపాల యిత్రృత్వబోధన ఏవ తాత్పర్యాత్ వ్యంజనాదితః పూర్వమేవ వివాహేఽపి తాదృశ లింగోపపత్త్యా స్పష్టత్వాభావాత్। యదితుభుక్తేతి ఇత్యస్య అనుభవతీత్యే వార్థస్వీకరణ ఏవాగ్రహః తదాఽపిసత్కార్యవాదానుసారేణ అష్టమాదివయస్కాఽపి వ్యంజనాఽఽదిసంబంధోపపాదన సంభవేన ఋతుమద్వయస ఏవగ్రహణ మిత్యసంభవాన్నస్పష్టలింగత్వం॥ వివాహాంగమంత్రలింగైరేవరజస్వలా వివాహోఽసిద్ధా తదనంగమంత్రలింగైః ప్రౌఢాప్రకాశనసమర్థైరపినవివాహ్యాయాః ఋతుమతీత్వకల్పనంసంభవముక్తికమితిమంత్రలింగాఽనుసారేణ తద్వివాహశాస్త్రీయతావాదోఽసంగత ఏవేతివర్ణయంతి।

R. Krishnaswami Sastri.

అన్యేతు, దేవతాధికరణ న్యాయేనమంత్రాణామపి ప్రతీయమానార్థ ప్రామాణ్యమంగీకరణీయమేవ। నచ—ప్రమాణాంతరాఽవిరోధ ఏవ ప్రతీయమానార్థ ప్రామాణ్యమన్యథా అవిత్యోయూప ఇత్యాదీనామపి ప్రామాణ్యాఽపత్తేః; ఏవంచాత్రస్మృతి ప్రమాణవిరోధాన్నప్రామాణ్యమితి—శంకనీయం ప్రమాణాంతరపదేన లౌకికప్రమాణస్యైవగ్రహణేన లౌకికప్రమాణవిరుద్ధార్థ తాత్పర్యాభావేపి సమానజాతీయాలౌకికప్రమాణస్య ప్రథమతః ప్రవృత్త్యసంభవేన భిన్నజాతీయకప్రమాణద్వయస్యాఽపి ప్రతీయమానార్థతాత్పర్యకత్వేన వికల్పపర్యవసానే నోపపత్తివర్ణనస్యావశ్యకత్వా దస్మదుక్తరీత్యా సమానజాతీయ మంత్ర

లింగద్వయ మూలకస్మృతిద్వయ విరోధేఽపి వికల్ప ఏవ పర్యవసానాత్॥ అన్యథా నాఽతిరాత్రే షోడశినం గృహ్ణాత్యతిరాత్రే షోడశినం గృహ్ణాతీతి వాక్యయోరప్య ప్రామాణ్యాఽఽపత్తేః॥ అయమభిప్రాయః॥— ఆదిత్యో యూపః ఇత్యాదివాక్యానాం యూపాదిస్తుతిపరాణాం యూపే ఆదిత్యాభేదబోధనేఽపి తాత్పర్యాంగీకార ప్రయోజనాభావాత్ వాక్యార్థబోధతః పూర్వమేవ ప్రతీయమానప్రమాణాంతర విరోధాన్న స్వార్థప్రామాణ్యమితి యుక్తం మంత్రలింగాధిగతానాం ప్రౌఢాత్వాదీనాంతు వాక్యార్థబోధతః పూర్వం నకేనాఽపి ప్రమాణేన విరోధః। స్మృత్యాదీనాం పౌరుషేయాణామపౌరుషేయ వేదమూలకత్వేన ప్రమాణానాం మంత్రలింగ ప్రమాణ ప్రవృత్తేః పూర్వమేవ ప్రవృత్తిరితి వర్ణనాసంభవాత్। సంభవేఽపి మంత్రలింగ ప్రవృత్తేః పూర్వం తద్విరోధ బుద్ధ్యనుదయేన ప్రతీయమానార్థ ప్రామాణ్యోపపాదనే నదోషాత్। యత్ర ప్రవృత్తయోః ప్రమాణయోః పరస్పరవిరోధః తత్ర వికల్ప ఏవ పర్యవసానం. యథా విధినిషేధయోః। ఇతి సూత్రాణాం స్మృతివిరుద్ధానామపి స్వార్థప్రామాణ్యం కార్యం ఆవశ్యకత్వాత్॥ నచైవమపి మంత్రలింగాఽపేక్షయా స్మృతీనాం ప్రబలత్వాత్, తద్విరోధే మంత్రలింగప్రమాణాం న ప్రవృత్తిరితి వాచ్యం॥ అష్టకాదిస్మృతీనాం మంత్రలింగార్థవాదాదిమూలకత్వేనైవ ప్రామాణ్యమితి స్మృత్యధికరణన్యాయేన మంత్రలింగాఽపేక్షయా స్మృతి దౌర్బల్యస్య సాధితత్వాత్॥ మంత్రాణాం వైకవాక్యతయా వా వాక్యైకవాక్యతయా వా విధ్యన్వయస్య మంత్రాధికరణ ఖండదేనైరుపనాది తత్త్వేన విధ్యేకవాక్యతయైవాన్వయవర్ణనస్యాఽసంగతత్వాత్॥ శ్రుతిలింగవాక్యప్రకరణస్థానసమాఖ్యానామితి సూత్రేణతు అంగత్వప్రమాణానామేవ నిర్దేశః;

నధర్మత్వప్రమాణానామిత్యుక్తసూత్రే శ్రుతిశబ్దేనస్మృతిగ్రహణేపినధర్మ ప్రమాణమంత్రలింగ బాధస్సముచితః। అన్యథామంత్రలింగాది సిద్ధ అష్టకాదిస్మృతీనాం బౌద్ధాదిపరికల్పితనిషిద్ధస్మృతీనాంచతుల్యవత్ప్రామాణ్యాపత్తేః, స్మృతిత్వాఽవిశేషాత్। దుర్బలమంత్రలింగ సాచివ్యమాత్రేణ త్వష్టకాది స్మృతిప్రాబల్య [illegible]సంభవతీతి శిష్టాచారప్రామాణ్యే స్పష్టతయోపపాదితం॥ నచ—బౌద్ధపరికల్పితవచనానాం స్మృతిత్వమేవనాస్తీతి భ్రమితవ్యం; తేషామపి హేతుదర్శనాచ్చేతిసూత్రే స్మృతిత్వేన భట్టపాదైర్వ్యవహారాత్। ఏతేన లింగవిరోధేపి స్మార్తశ్రుతేశ్శ్రేయస్త్వాదితివచన మపివ్యాఖ్యాతంభవతి తస్యాఽపిధర్మత్వాఽవిషయత్వాత్। నచశ్రుతిలింగేతిసూత్రే అంగత్వప్రమాణస్యైవ నిర్దేశఇతి సంకోచేప్రామాణాభావాద్ధర్మత్వ ప్రమాణస్యాఽపి గ్రహణమిత్యేవాంగీక్రియతా మితివాచ్యం; తత్రశ్రుతిశబ్దేన తృతీయాదికారక విభక్తేరేవ గ్రహణేన తస్యాంగత్వమాత్ర గ్రాహకత్వాత్। అంగత్వంహినామ పరోద్దేశ ప్రవృత్తకృతికారకత్వేన విధివిషయత్వం, పరోద్దేశప్రవృత్తకృతేః విధివిషయత్వస్యచ అన్యలభ్యత్వాత్ కారకత్వలాభం వినానాత్మానం లభతఇతి తృతీయాది శ్రుతిరేవతత్స్వరూప బోధికేతియుక్తం॥ ధర్మత్వంతు వేదబోధితాఽలౌకికశ్రేయస్సాధనత్వ రూపంనతృతీయాది విభక్తి సమధిగమ్యమితి శ్రుతిలింగేతి సూత్రేధర్మప్రమాణస్యాఽపి నిర్దేశఇతి కల్పనానసంభవత్యేవ॥ ఏవంచ మంత్రార్థవాద సాధారణశ్రుతిబోధితత్వ మాత్రస్యైవ తద్బోధసంభవాత్ మన్త్రలింగాదీనామపి ధర్మత్వవిషయే నిరపేక్షప్రమాణత్వమేవయుక్తం॥ భట్టపాదైరపి చోదనాలక్షణోఽర్థోధర్మ ఇతిసూత్రే చోదనాపదేన మన్త్రార్థవాద సాధారణ వేద ఏవవివక్షితే నవిధివాక్యమాత్ర మితివ్యవస్థాపయద్భిరయమర్థోఽ

సుగృహీత ఇతిమన్త్రలింగస్మృత్యోర్మన్త్రలింగమేవప్రబలమిత్యాం
గీకరణీయం। ఏవంచమన్త్రలింగ విరుద్ధానాం స్మృతీనామేవా ఽప్రా
మాణ్యం విరోధాధికరణ న్యాయేనసిద్ధ్యతీతిస్థితే, తేనన్యాయేన మన్త్ర
లింగా ఽప్రామాణ్యవర్ణనమ సంభవదుక్తిక మేవ॥ ఏవంధర్మత్వప్రమా
ణ విషయేఽపి విధ్యపేక్షయా మన్త్రలింగానాం విప్రకర్షాభావాత్।శ్రౌ
తవిధ్యపేక్షయాఽపి మన్త్రలింగదౌర్బల్యం నసంభవతీతిస్థితే తదపేక్ష
ప్రమాణభావానాం స్మృతీనాంకథంమన్త్రలింగబాధకత్వమితి భవన్త
ఏవ వివేచయన్తు ఏవంచ,

నైవతావచ్ఛ్రుతిస్మృత్యోస్స్వరూపేణ విరుద్ధతా।
బలాబలపరీక్షావా ప్రమేయద్వారికాహిసా॥

ఇతివచనేనాఽపి నవిరోధఇతి సూచితం। ఏతేన—ఏకజాతీయ ప్రమా
ణభూతయోశ్శ్రుతి స్మృత్యోరేవ విషయే విరోధాధికరణ న్యాయప్ర
సరః; మన్త్రలింగస్మృత్యోస్తుభిన్నజాతీయత్వాన్నతత్రాఽపివిషయే తా
దృశన్యాయప్రసర ఇతి మన్త్రలింగవిరుద్ధస్మృత్యప్రామాణ్యవర్ణనం
నయుక్తమితి—వచనమపివరాస్తం॥—తథాహి—కిమిదం సమానజా
తీయత్వం? భిన్నజాతీయత్వంవా? తత్రనతావచ్ఛ్రుతి లింగసూత్ర ఘటక
ఏకశ్రుతి శబ్దసమధిగమ్యత్వం సమానజాతీయత్వం, భిన్నశబ్ద సమధిగ
మ్యత్వం భిన్నజాతీయత్వం; ఏవంచవిధ్యాత్మక వేదభాగానాంతాదృశ
స్మృతీనాంచైకశ్రుతిశబ్దసమధిగమ్యత్వాత్సమాన జాతీయత్వం, మన్త్ర
లింగస్మృత్యోస్తుభిన్నశబ్ద సమధిగమ్యత్వాత్ భిన్నజాతీయత్వమితి వర్ణ
నం సంభవతి। ఉక్తరీత్యోక్తసూత్రే ధర్మప్రమాణ నిర్దేశాఽసంభ
వేన ఉక్తసమానజాతీయత్వస్య ధర్మప్రమాణ ప్రాబల్య దౌర్బల్యనిష్ఠ

యాఽనుపయోగిత్వాత్ । నాఽపి సమప్రాబల్యరూపం విషమప్రా బల్యరూపంవాతత్; శ్రుతిస్మృత్యోః సమప్రాబల్య భావస్యాఽసంభ వాత్ శ్రుతిత్వేనైవ శ్రుతీనాం ప్రాబల్యేన మంత్రాణామపి శ్రుతి త్వాఽవిశేషాత్ తద్విరుద్ధస్మృత్యప్రామాణ్య బోధనేఽపి ఉక్తాధికర ణ తాత్పర్యమంగీకరణీయమేవ । వేదంకృత్వావేదిం కరోతీత్యత్ర తు త్వాప్రత్యయేనానంతర్య మాత్రం బోధితంనాఽవ్యవహితాఽనంతర్య మపీత్యవ్యవధానస్య శ్రుత్యప్రతిపాద్యత్వాత్ తు తే ఆచమేదితిస్మృతి ప్రాబల్యమితి యుక్తం యదప్యుక్తం అపిచేత్యాదినా—విధినాకర్మ వి శేషంప్రతివినియుక్తాః ఖలుమంత్రాః కంచిదర్థం ప్రకాశయితుమర్హం తి నాఽసతివిని యోగఇతి—సత్యం వినియోజకశ్రుత్యను సారేణైవ మంత్రలింగా ఽన్యథానయ సంయుక్తం, యథా ఉద్బుధ్యస్వాఽగ్నే ఇత్యాది మంత్రాణాం బుధగ్రహాదిగ్రహారాధనే వినియోగాఽనుసా రేణ కథంచిదపి బుధాదిపరత్వాశ్రయణం॥ వినియోజికాచశ్రుతిః శ్రౌ తీవాస్మార్తావేతినవిశేష ఇతిచ- తథాఽపినోపరుంధ్యా ద్రజస్వలామి త్యాదిస్మృతిభిః ఆరోహోరుమిత్యాది మంత్రలింగ బాధనం నసంభ వతి అరోహోరుమిత్యాది మంత్రవినియోజకత్వా భావాదుక్తస్మృ తీనాం ॥ అయమభిప్రాయః ॥ శ్రుతిలింగాధికరణేనహిస్వాశ్రయవినియో జకస్వవిరుద్ధశ్రుత్య పేక్షయామంత్రలింగ దౌర్బల్యమేవబోధ్యతే నతుశ్రు తిత్వేనశ్రుతీనాం మంత్రలింగత్వేన మంత్రలింగానాంచ ప్రాబల్యదౌ ర్బల్యే । ఏతేనవారుణీభిరాదిత్యముపతిష్ఠత ఇతిస్మృతిబాధ్యత్వేఽపి లింగస్యనాత్రవిరోధ ఇతిసూచితం । లింగవిరోధేఽపిస్మార్తశ్రుతేర్వా తీ యస్త్వాదితినిబద్ధనవచన స్యాఽప్యయమేవాఽభిప్రాయః । ఆరోహోరు రుమిత్యాది మన్త్రాణాం వివాహాంగత్వాజ్ఞాతయా వినియోగేఽపికన్యా

వివాహాంగతయాఽపి వినియోగాత్ కన్యాప్రకాశకత్వమేవక థంచిదప్యా
శ్రయణీయమితివచనమపి సంభవతి ॥ నచ - స్మృతిప్రమాణేనకన్యా
వివాహవశాత్ స్త్రీయఇతిసిద్ధా వివాహాంగతయా వినియుక్తానామపిక
న్యా వివాహాంగతాయా మేవపర్యవసానాత్ కన్యాప్రకాశకత్వమే
వాంగీకరణీయమితి - వాచ్యం ॥ ఉక్తమన్త్రలింగవిరోధస్మృతేరప్ర
మాణత్వేనకన్యావివాహస్యైవాసిద్ధేః ॥ అర్యమణంనుదేవంకన్యా అగ్ని
మయక్షతేతిమన్త్రలింగేన కన్యావివాహసిద్ధావాగోహాహుదు మిత్యాది
మంత్రలింగేన రజస్వలా వివాహోఽపి సిద్ధ్యతీతినకించి దనుపప
న్నంనామ ॥ వస్తుతస్తుస్మృతీనామపి రజోనన్తర వివాహేఽధర్మతా
బోధనేవతాత్పర్య మితిపూర్వముపపాదితత్వాత్ స్మృతిబాధంవినాఽపి
తద్వివాహసిద్ధేర్న కోఽపిదోషస్సమాపతతి ॥ రజస్వలావివాహనిషేధప
రత్వమేవయుక్తమితిచేల్ల నాతునసంభవతి మంత్రలింగవిరుద్ధానామప్రా
మాణ్యాదన్యథానయనమేవయుక్తం ॥ నచ - ఉపజీవ్యాఽనురోధేన
ఉపజీవకాఽన్యథానయనంనతు ఉపజీవకాఽనుసారేణ ఉపజీవ్యాఽన్య
థానయనం; మంత్రలింగంచస్వాశ్రయమన్త్రాణాం యత్కించిత్కర్మని
రూపితఅంగత్వగ్రహణాఽన న్తరమేవస్వాత్మానం లభతఇత్యంగత్వగ్ర
హణస్యస్మృత్యధీనత్వాత్ స్మృతిప్రాబల్యమేవయుక్తం; లింగస్యైవాం
గత్వస్యాఽపిగ్రహణే పరస్పరాశ్రయదోషఇతిశంకనీయం ॥ సామాన్య
సంబంధబోధక ప్రకరణాది సచివస్య లింగస్యై వ్యాంగత్వగ్రాహకప్ర
మాణత్వాత్ నిర్దేశేనాంగత్వగ్రహణా నంతరమేవ లింగస్వరూప సిద్ధి
రితివచనస్యాఽతిఫల్గుత్వాత్ ॥ తేనైవచాంగత్వనిర్ణయసంభవేస్మృత్యు
పజీవ్యత్వవాదాఽసాంగత్యాత్ ॥ ఉపజీవ్యత్వేపియాదృశాంశయోరుప
జీవ్యోపజీవకభావః తత్రైవఉపజీవ్యేనఉపజీవకబాధః నత్వంశాంతరేఽపి;

ప్రత్యక్షోపజీవ్యత్వేప్యాగమస్య ప్రత్యక్ష బాధకత్వాంగీకారాత్ ॥
స్పష్టతరం చైతదద్వైతసిద్ధ్యాదౌ ॥ ఏవంచ వయోనిర్ణ
యాం శేషస్మృత్యుపజీవ్యత్వాభావాత్ స్మృతివిరోధేన వయో
నిర్ణయేఽపి నోక్తన్యాయప్రసరః ॥ యదప్యర్ధజరతీయన్యా
యాపాదనం తదప్యజ్ఞానవిజృంభితమేవ, యథాహి అలాబ్వర్ధాంశభ
క్షణేపి తద్భక్షణనిషేధశాస్త్రైల్లింగం ఘటంసిద్ధం నైవం వయోనిర్ణ
యాంశబాధే అంగత్వాంశబాధాదికమితి వైషమ్యాత్ ॥ అస్యాపె
త్యాపిస్మృత్యు... త్వమేవం వర్ణితం ॥ వస్తుతస్తు స్మృత్యుపజీవ్య
త్వమేవ మంత్రలింగానాం న సంభవతి ॥ —తథాహి కిమిదముపజీవ్య
త్వం ప్రామాణ్యాంశే, ఉతోత్పత్త్యంశే, నాద్యః ॥ మంత్రాణాం స్వతః
ప్రమాణత్వాత్ । న ద్వితీయః మంత్రనిత్యత్వేన తల్లింగస్యాపి నిత్యత్వాత్ ॥
మంత్రాధికరణపర్యాలోచనాయాం తు స్మృత్యుపజీవ్యత్వమేవ మంత్ర
లింగానామితి పూర్వముపపాదితం స్మృత్వా కించిదేతత్ ॥ —యదపి
ప్రోక్తం, విధ్యుత్తరకాలమేవ మంత్రాణాం ప్రవృత్త్యుపకరిష్యత్వేన
విధిప్రాబల్యమితి—తత్రబ్రూమః ॥ అస్పష్టమంత్రలింగాపేక్ష
యాం తద్విరుద్ధస్పష్టవిధివాక్యప్రాబల్యాంగీకారేపి నతు తైః విధిశేషత్వేనచ శ్రౌ
త విధిరేవ గృహ్యతే యుక్తత్వాత్ నతు స్మార్తవిధిరపి ॥ ఏవంచ విధి
ప్రాబల్యాంగీకారేపి స్మృతిబాధోపపాదనం భవిష్యత్యేవ॥ యద్యపి—
ఇషేత్వేతి మంత్రప్రవృత్త్యనంతరమపి ఇషేత్వేతి శాఖామాఛ్ఛినత్తీతి
బ్రాహ్మణప్రవృత్తిదర్శనాత్ విధ్యుత్తరకాలమేవ మంత్రాణాం ప్ర
వృత్తిరితి న నియమస్సంభవతి,—యద్యపిచ— ఉపక్రమస్థత్వమాత్రేణ
ప్రాబల్యమపి న భవిష్యతి ॥ ఉపక్రమగతానామపి ఇదం రజతమిత్యా
దీనాం ఉపసంహారగతేన నేదం రజతమితి బాధజ్ఞానేన బాధదర్శనాత్॥

యదిపునరన్యోన్యసాపేక్షాణాం అర్థవాద విధీనాం పరస్పరవిరుద్ధానాం ఉపక్రమోప సంహార గతానాంసతాం కిమనురుధ్యకస్యన యసమితి శంకాయాం ఉపక్రమ గతమర్థవాదమనుసృత్యైవ ప్రధానస్యాపి విధేర్నయనం యుక్తమిత్యేవతాదృశన్యాయ శరీరం॥ భ్రమబాధజ్ఞాన యోస్తుస్వతః ప్రవృత్తావపరస్పరనిరపేక్షత్వాన్నోపక్రమగతేనాపిభ్రమేణ బాధజ్ఞానబాధ ఇతియుక్తం ॥ విధిమంత్రయోస్తు పరస్పరసాపేక్షతయైవప్రవృత్తేః ఉపక్రమగతవిధి ప్రాబల్య వాదోయుక్త ఏవేత్యుచ్యతే తత్రేదం ప్రష్టవ్యం మంత్రాణాం పరస్పరాపేక్షత్వం కిం ప్రమాణసిద్ధముతాహో స్వకపోల కల్పితం, తత్రనతావత్ప్రథమః కల్పస్సంభవతి॥ మంత్రాణాంపదైకవాక్యతయావా వాక్యైకవాక్యతయా వావిధ్యర్థబోధకత్వేన ప్రామాణ్యాభావస్య మంత్రాధికరణేఖండశదసైరుపపాదితత్వాత్ ॥ అన్యథాఅర్థవాదాధికరణస్యైవగతార్థత్వాన్మంత్రాధికరణం విలిఖంప్రసజ్యేత ॥ నద్వితీయః ॥ అప్రామాణికభవదీయ కల్పనాయాః అకించిత్కరత్వాత్ ॥ ఏవంచవిధి మంత్రయోః భ్రమబాధజ్ఞానయోరివ పరస్పరాపేక్షత్వం నాస్త్యేవేతి నోక్తాధికరణ ప్రసక్తిః॥ కింతు

పూర్వాపరబలీయస్త్వం తత్రనామప్రతీయతాం।
అన్యోన్యనిరపేక్షాణాం యత్రజన్మధియాంభవేత్॥
పౌర్వాపర్యే పూర్వదౌర్బల్యం ప్రకృతివత్

ఇతివచనానుసారాదపచ్ఛేదాధికరణన్యాయేనోత్తరకాలప్రవృత్తికానాంమంత్రాణామేవప్రాబల్యంస్యాదిత్యుపక్రమోపసంహారన్యాయసంచారాదికం గాఢాజ్ఞానవిజృంభితమేవ। ఏవంచోపక్రమస్థత్వ మాత్రేణప్రా

బల్యనిరూపణ మపినసంభవత్యేవ॥—తథాఽపిఅభ్యుపేత్యాప్యుపక్రమ
స్థత్వం తత్ప్రయుక్తప్రాబల్యంచ స్మృతిప్రాబల్యఖండనార్థమేవ ముక్త
మితినకథంచిదపి మన్త్రలింగాఽప్రామాణ్యశంకావసరః॥ యదప్యుక్తం-
మన్త్రాణాంభావిరజస్వలాత్వ బోధనేనాఽపిచారి తార్థ్యాదచరితార్థా
నాం స్మృతీనామే ''వానర్థక్యప్రతిహతానాం విపరీతంబలాబలమి''
తిన్యాయేన ప్రాబల్యమితి-తదపి నసంగతం। ప్రయోగసమవేతార్థస్మార
కత్వేనఖలు మన్త్రాణాంచారి తార్థ్యం నతు సంభవదర్థ ప్రకాశకత్వ
మాత్రేణేతి రజస్వలాయా వివాహసంబంధబోధనం వినామన్త్రాచారి
తార్థ్యవర్ణనాసంభవాన్మంత్రాణామపి చారితార్థ్యాభావాత్॥ అన్యథా
స్మృతీనామపి పూర్వకాలికాష్టవర్షత్వాదిబోధనేన చారితార్థ్యసంభ
వాదితి మంత్రలింగప్రాబల్యఏవ పర్యవస్యతి ఏవంచవ్యవస్థిత ధర్మాఽధ
ర్మవిషయకాణామపిస్మృతీనాం తదాతనదేశకాలాద్యానుగుణ్యేనకల్పి
తత్వశంకాయా అప్రసరేణ ''హేతుదర్శనాచ్చ'' తిసూత్రేణాప్రామా
ణ్యవర్ణనాయోగేఽపి విరోధాధికరణన్యాయేనాప్రామాణ్యవర్ణనసం
భవత్యేవ॥ ననుమన్వాదిస్మృతీనాం వైదికార్థవిషయకత్వమేవనియతం
''శ్రుతింపశ్యన్తిమునయః'' ఇత్యుక్తవచనాఽనురోధాత్॥ ఏవంచమన్త్ర
లింగవిరుద్ధానామపి తేషాంప్రామాణ్యమంగీకరణీయమేవేతిచేత్—నను
భోః కింమూలప్రమాణాఽప్రత్యక్షే ఽపితత్ప్రామాణ్యాంగీకరణమభి
ప్రేతముతాఽహోతత్ప్రత్యక్షఏవవా॥ నాద్యః ప్రత్యక్షమంత్రలింగ
విరోధమూలశ్రుత్యనుమానాసంభవేన విరోధాధికరణన్యాయేనా
ప్రామాణ్యస్యైవాంగీకరణీయత్వాత్॥ ''వైసర్జనహోమీయంవా
సోధ్వర్యుః ప్రతిగృహ్ణాతీ'' తిస్మృతేరప్యప్రామాణ్యస్య వ్యవస్థాపిత
త్వాత్॥ నద్వితీయః॥ ఇష్టాపత్తేః॥ ఏవంచసమావేశనాది మంత్రలింగ

విరుద్ధస్మృతిమూల ప్రామాణ్యస్యా ప్రత్యక్షత్వేన నరజస్వలావివాహని
షేధపరాణాం వచనానాముపపత్తిర్భవిష్యతీతి రజస్వలావివాహ శ్శా
స్త్రీయ ఇత్యేవాంగీకరణీయం—యదప్యుక్తం కతిపయభ్రాన్తజన దృ
ష్టానిమంత్రలింగాని॥ స్మృతయస్తు ప్రామాణికమూర్ధన్యానేకమహర్షి
జనప్రత్యక్షాః ఇతి॥ తదపినయుక్తం ఉక్తమంత్రలింగానామపి తత్ప్రత్య
క్షత్వాత్। అతఏవసహితే త్రీణివర్షాణ్యృతుమతీత్యాది వచనైస్స్పష్ట
మేవరజస్వలానామపి వివాహమభ్యనుజానతే॥ యదితూక్తజాతీయ వచ
నానామృతుమతీవివాహ పరత్వం నాస్తీతి పూర్వమేవోపపాదిత మితి
తదప్రత్యక్షాణ్యేవేమాని లింగానీతికథ్యతే ॥ తదాకామంభవన్త్వప్రత్య
క్షాణ్యేవలింగానీతి॥ నహితావతా విద్యమానమపిమంత్రలింగమవిద్యమా
నంసంపద్యేత యదిమహర్షి జనానాం ప్రత్యక్షం లింగ. [illegible] నాస్తీతి క
థ్యతే తర్హి ఉక్తలింగమపి తత్ప్రత్యక్షమిత్యాస్తాం ప్రత్యక్షంచాఽపిలిం
గంసాహసాదినా నేనిర్దిశన్తీతివదామః॥ యథాహి॥ ఔదుంబరీంస్పృ
ష్ట్వోద్గాయతీతి ప్రత్యక్షామపి శ్రుతిమనాదృత్యతద్విరుద్ధామేవకాంచనస్మృ
తిం ఔదుంబరీసర్వావేష్టితవ్యా ఇతిరూపామస్మార్షుః॥ ఏవం॥ ఏతేనభవదు
దాహృతనైవాహిక మన్త్రాన్నృషయోజానన్తివానవా యదిజానన్తికథ
మేతేమంత్రలింగాన్యమూన్స్వశాస్త్రార్థవిశేషసాధకాని నగణయాంబభూ
వుః॥సఖలుభవాదృశేభ్యోహీన ప్రజ్ఞాస్తై ఇత్యాదివచనమపి పరాస్తంఔ
దుంబరీసర్వావేష్టితవ్యేతి స్మృతికారా అపి ఔదుంబరీంస్పృష్ట్వోద్గాయతీతి
శ్రుతింజానన్తేవానవాయదిజానతే కుతస్తేనతాం గణయాంబభూవుః సఖ
లుశబరాచార్యాదిభ్యోహీనప్రజ్ఞాస్తై ఇతిపర్యనుయోగస్య భవతామపి
విషయోసమాపత్తే రితికథంచిదపి మన్త్రలింగానాం ప్రామాణ్యవర్ణనంన
సంభవిష్యతీతి మన్తవ్యం॥ ఉపపాదితంచైతచ్ఛివార్కమణిదీపికాయాం

దీక్షితవర్యైరితి తత్రైవద్రష్టవ్యం॥ శ్రుతప్రకాశికాకారైకుమరలభట్టాచా ర్యైశ్చాయమర్థోఽపివిశేషతఉపాదితః యావతాచమన్త్రలింగప్రామా ణ్యాసిద్ధిః తావతామూవేశనాది మంత్రలింగేనర్తుమతీవివాహశాస్త్రీయ తాఽపిసిద్ధాభవతి॥ యదితు కన్యాయామపి గౌణస్యమూవేశనాది సంభ వాత్ నతత్ప్రాధాలింగమిత్యుచ్యతే, తర్హి సోమః ప్రథమఇతిమంత్రలిం గంతాదృశమాస్తాం॥ నను—తదపి నప్రాధాలింగం భవతీతిపూర్వముప పాదితమితిచేత్— సత్యముపపాదితం; ఉపపన్నంతు నభవతి—తథాహి— నవయమగ్న్యుపపత్యకాలఏవ వివాహఇతివదామః కిన్తుతదాఽపి వివా హశ్శాస్త్రీయఏవేతి॥ తత్రతఉదీర్ష్వాత ఇతిమంత్రలింగవశేన ద్వాదశాదివ యస్కావివాహవదుక్తమంత్రలింగవశేనర్తుమత్యా వివాహోఽపిశా స్త్రీయఇతివదామః॥ నచ—వ్యంజనేషుచజాతేష్విత్యత్రభుక్తే పదస్య రక్షతీత్యర్థకత్వేన కన్యావిషయకత్వమపి సంభవతీతి సోమః ప్రథమఇతి మన్త్రలింగం నస్పష్టమితి—వాచ్యం, భుక్తేఇత్యాత్మనేపదాన్తస్య "భు జోఽనవనే" ఇతిపాణినిసూత్రేణ రక్షణార్థే ఆత్మనేపదనిషేధాత్ అను భవతీత్యర్థకత్వాశ్రయణస్యైవయుక్తత్వాత్॥ లక్షణయాతదుపపాదనే,

పూర్వం స్త్రియస్సురైర్భుక్తాః సోమగన్ధర్వవహ్నిభిః ।
భుంజ్యన్తే మానుషైః పశ్చాన్నతాదుష్యన్తి కర్హిచిత్ ॥

ఇతివచనవిరోధో దుష్పరిహరః॥ నహిరక్షణరూపేణ భోగేనకోఽపిదో షః కన్యాయాంప్రసజ్యతే॥ వ్యంజనైస్తు సముత్పన్నైరితి వ్యంజనా దీనామేవ భోగకలాపత్వేన స్మరణాదుప భోగోఽపి సంభవముక్తికఏవ॥ సత్కార్యవాదాఽనురోధేన బాలికాయామపి తదను భవసమర్థనన్తు

వ్యంజనేషుచజాతేషు సోమోభుక్తేచకన్యకాం ।

పయోధరేషుగంధర్వో రజస్యగ్నిః ప్రతిష్ఠితః ॥

ఇతివచనావగత క్రమబాధాపత్త్యానసంగతం ॥ తత్రమతే ఉత్పత్తిరేవాభివ్యక్తిరూపత్వేన జాతేవ్యుత్పత్తి కాలావచ్ఛేదనైవ అనుభవితత్వ బోధనాత్తస్యచకన్యాయామసంభవాత్ ప్రౌఢాలింగమేవతదితి వక్ష్యామః ॥ "ఇయమేవ సాప్రథమావ్యౌచ్ఛదంతరస్యాంచరతి ప్రవిష్టావధూర్జజాన", ఇత్యాదిమంత్రాస్తు వివాహాంగభూతా అపి ఇతిహాసరూపాస్సన్తో రజస్వలావివాహే ప్రమాణీభవంతీతి సర్వవిధమంత్రలింగాన్యపి రజోనంతరవివాహే ప్రమాణమితివర్ణయంతి ॥ వివాహకాల విమర్శకారాణామపి హ్యేవమిత్యాశయోయమేవేతి జానీమః ॥

పరేతు— అస్యాం మంత్రలింగాపేక్షయాస్మృతిరప్రమాణం ॥ తావతాప్యృతుమతీ వివాహస్థితిః పరంనభవిష్యతి ॥ మంత్రాణాం హి యదంగత్వం యత్రోక్తం తత్స్మారకత్వమాత్రేణ తత్రచారితార్థ్యాదర్థాంతర ధర్మత్వాది బోధనేపిన సామర్థ్యం ॥ మంత్రార్థత్వవ్యాపకం నధర్మత్వ ప్రయోగ సమవేతత్వాదికం కింతుతత్సమానాధికరణంతదిత్యేవసిద్ధాంతాత్ ॥ యత్రపునఃప్రకరణప్రమాణేన అగ్నిహోత్రహోమాంగత్వ మాత్రంనిశ్చితం ప్రకాశనీయార్థస్తునినిశ్చితః తత్రాపేక్షితాగ్న్యాది ధర్మత్వాది బోధనేనైవ మంత్రచారితార్థ్యమితి మంత్రలింగవశాదేవాగ్న్యాదినిర్ణయః ॥ ఏవంచ పాణిగ్రహణ సమావేశనాదిమంత్రాణాంక్లృప్తాంగభావ పాణిగ్రహణసమావేశనాదిస్మారకత్వేనైవ సామర్థ్యోపపత్తయాన్న ప్రౌఢాధర్మత్వ బోధనేపి వ్యాపారః ॥ యథాహి— నిర్వపామీత్యాది ద్విత్రిపదైరేవప్రయోగ సమవేతార్థస్మరణసంభవత్యపి దేవస్యత్వేత్యాది పదసముదాయవన్నిర్వపామిపదోపస్థాపి

త నిర్వాపస్మరణానైవాదృష్ట సిద్ధిః ఏవం అత్రాపి సుప్రజస్త్వాయేత్యా దిపదసముదాయ విశిష్టేన పాణింగృహ్ణామీత్యాది నాతస్స్మరణ ఏవా దృష్ట సిద్ధిరితి వర్ణనసంభవాత్ ॥ కించ మంత్రప్రకాశ్య మానానా మర్థానాం కన్యాయామపి సంభవాత్ నకిమపిప్రౌఢాలింగముప పద్యత ఇత్యపివక్తుంశక్యతేఽయముక్తం—సోమః ప్రథమఇతిమంత్రేణ బోధ్యమా నం మనుష్యచతుర్థపతిత్వం ప్రౌఢావివాహ శాస్త్రీయతాయాంగమక మితి—తత్రప్రతి బ్రూమః—సోమస్యప్రథమపతిత్వం, గంధర్వస్యద్వితీ యపతిత్వం వహ్నేస్తృతీయ పతిత్వంచ, కింవివాహ సంబన్ధిప్రథమ ద్వితీయ తృతీయాది దినవిషయకత్వేనాఽభిప్రేతం ఉతాఽఽహో "వ్యంజనేష్వితి వచనానుసారేణ వ్యంజనోత్తరకాలంసోమపతిత్వంతదు త్తరకాలపయోధరోత్తరకాలం గంధర్వపతిత్వం, తదుత్తరరజోనంతర కాల మగ్నిపతిత్వం, తదనంతర వివాహోత్తరకాలం మనుష్యపతి త్వమితి వివేచనీయం ॥ — ఆద్యేపి— ప్రథమదిన వ్యంజనోత్పత్తిః, ద్వితీయదినేపయోధరోత్పత్తిరితి వివక్షితంవా—నవా— నాద్యేప్రథ మః; ఏకైకదినాత్యయ మాత్రేణ పయోధరాదీనాముత్పత్త్యసంభ వాత్ ॥ నాద్యేద్వితీయః; "వ్యంజనేషుచజాతేషు సోమోభుఙ్క్తేచకన్య కామితివచన విరోధాత్, కన్యావివాహవాద ఏవ పర్యవసానాచ్చ॥ నద్వితీయః;

వ్యంజనైస్తుసముత్పన్నైస్సోమోభుఙ్క్తే [illegible]కాం ।
పయోధరైస్తుగంధర్వో రజసాగ్నిః ప్రతిష్ఠితః ॥
తస్మాద్వ్యంజనోపేతా మరజామపయోధరాం ।
అభుక్తాంచైవసోమాద్యైః కన్యకాంతుప్రశస్యతే ॥

ఇతిగృహ్యసంగ్రహకారవచన విరోధాత్ ॥ అనేనహివచనేన వ్యంజనాద్యుత్పత్తితః పూర్వమేవావివాహితా సంబంధిసోమాద్యనుభవస్యదోషత్వ సంకీర్తన పూర్వకం వివాహోవిధీయతే — అయం భావః — వ్యంజనేషుచజాతేషు సోమోభుంక్తే కన్యకాం, ఇతిహివచనం నతావత్సోమాద్యనుభవానంతర మేవవివాహం విదధాతి; కిన్తు అవివాహితావస్థాయాంతదనుభవస్య దోషత్వ సంకీర్తనపూర్వకం వ్యంజనాద్యుత్పత్తితః పూర్వమేవ వివాహం స్త్రియ ఇతి ॥ నచ—"తస్మాదవ్యంజనోపేతా" ఇతివచనస్య "వ్యంజనైస్తు సముత్పన్నైః" రితిగృహ్యసంగ్రహవాక్య శేషత్వేపి 'వ్యంజనేషుచజాతేషు ఇతిసంవర్తవాక్య శేషత్వాభావాత్ తద్వచనస్యాప్యుక్తార్థతాత్పర్యకల్పనంనసంభవతీతి—వాచ్యం; శాఖాంతరీయవాక్య శేషానుసారేణశాఖాంతరీయ వాక్యార్థనిర్ణయఇతి "బృహస్పతేర్వాఏతదన్నమ్ యన్నీవారాః" ఇతివాక్యస్య యాగవిధిపరత్వోపవర్ణన సమయేఖండదేవేనైవోపపాదితత్వేనోక్త తాత్పర్య కల్పనస్య తత్రాఽపి యుక్తత్వాత్ ॥ ఏతేన

పూర్వం స్త్రియస్సురైర్భుక్తాస్సోమగంధర్వవహ్నిభిః ।
భుజ్యన్తేమానుషైఃపశ్చాన్నతాదుష్యంతీధర్మతః ॥

ఇతివచనమపి వ్యాఖ్యాతంభవతి ॥ వివాహితానాన్తు స్త్రీణాం వ్యంజనాది కాలావచ్ఛేదేన సోమాద్యనుభవస్య శాస్త్రప్రమాణేనాదోషత్వేఽపి అవివాహితానాం తదనుభవస్యదోషత్వాదితి—అయమాశయః-ద్వివిధంహిపతిత్వం స్వామిత్వలక్షణమనుభవితృత్వలక్షణం చ ప్రథమంతుపతిత్వం పూర్వంవ్యంజనాదితః ద్వితీయంతువ్యంజనకాలే సోమోధరకాలే గంధర్వస్యప్రాదశాదివయసిరజః కాలేతువహ్నేః, ఋతుస్నా

నాసంతరంతు మనుష్యస్యేతి వివేకః ॥ నచ—ఉక్తవిధద్వివిధపతిత్వే ప్ర
మాణాభావ ఇతి —శంకనీయం ॥ సోమః ప్రథమో వివిదే ఇతి సోమో,
దదద్గంధర్వాయేతిచ మంత్రద్వయామ్నానస్యైవ ప్రమాణత్వాత్ ॥ ఏవంచ

వివాహో హ్యష్టవర్షాయాః కన్యాయాశ్చ ప్రశస్యతే।
ఇత్యాదిస్మృతయః ప్రథమమంత్రార్థానువాదికాః।
వ్యంజనేషుచ జాతేషు సోమో భుంజీత కన్యకాం ।
ఇతివచనం ద్వితీయమంత్రార్థానువాదకమిత్యవిరోధః ॥ ఏతేన
తాసాం సోమో దదచ్ఛౌచం గంధర్వశ్శిక్షితాం గిరం ।
అగ్నిశ్చ సర్వభక్షత్వం తస్మాన్నిష్కల్మషాః స్త్రియః ॥

ఇతివచనమపి వ్యాఖ్యాతం భవతి ॥ నచ—మనసా పశ్యన్నోద్వాహ్యా ఇతి
వచనశేషత్వేన వివాహాత్ పూర్వమేవ ప్రథమద్వితీయతృతీయపత్న
రద్వయేన సోమాద్యుపభోగస్య ప్రతిపాదనాత్తద్వచన విరోధ ఇతి—
శంకనీయం ॥ ఉపనయనస్థానీయస్య వివాహస్య గర్భాష్టమతః పూర్వం
మప్రసక్తత్వాత్ నాంతరితోఽగ్నిశ్చేత్యస్య ఇతివదుక్తవచనస్యార్థ వాద
త్వేనస్వార్థాప్రామాణ్యాత్ ॥ వ్యంజనకాలావచ్ఛేదేనతు వివాహ
స్యాతిదేశతః ప్రాప్తేః తస్మాదవ్యంజనోపేతామితివచనంతు యథార్థమే
వేతి యుక్తం వ్యంజనేషుచజాతేషు ఇత్యస్యతు హేతువన్నిగదార్థ వాద
స్యాపి స్వార్థప్రామాణ్యమపి దేవతాధికరణన్యాయేన యుక్తమేవ ॥
తస్యాపిస్వార్థాప్రామాణ్యకల్పనాయామపి నాస్మాకం క్షతిరిత్యన్యత్ర
విస్తరః ॥ సర్వథాపితు నోక్తలింగమృతుమతీవివాహ గమకం ॥ అత
ఏవనాజాతలోమ్న్యా సహసంవిశేతే తివచనమపి సార్థకంభవతి ॥
యది వ్యంజనోత్పత్త్యనంతరమేవ వివాహ ఇతిస్యాత్తదావ్యంజనో

త్పత్తితః పూర్వంభార్యాత్వస్యైవా సంపన్నత్వాత్ నాభార్యాముపగచ్ఛే
దితివచనేనైవ అనుపగమనస్య సిద్ధత్వేనవితథమేవతత్సంపద్యేత ॥ వ్యంజ
నోత్పత్తేః పూర్వమేవవివాహ ఇత్యంగీకారేతు సార్థక్యసంభవ ఇతిత
త్త్వం॥నచ—అస్మాభిః వ్యంజనోత్పత్తితః పూర్వమపివివాహ స్యాంగీ
కారాదస్మన్మతేప్యుక్త వచనసార్థక్య సంభవ ఇతి-వాచ్యం। సంకోచేప్ర
మాణాభావాత్। అసంకుచితసార్థక్యాసంభవాచ్చ॥నచ— ,,ఋతౌభా
ర్యాముపేయాది,, తివచనేన ఉక్తకాల భిన్నకాలావచ్ఛేదేనస్వభార్యాగమ
నస్యాపినిషిద్ధత్వాత్ తద్వచనవైఫల్యంభవన్మతేపితుల్యమితిసాంప్రతం;
ఋతుస్నానానంతరం విష్ణుర్యోనింకల్పయతు ఇత్యాదిమంత్రజపవిశిష్టస
మావేశనస్యవిహితస్య గర్భోత్పత్తిప్రయోజకస్యఋతుకాలభిన్నసప్తద
శాదిరాత్రావచ్ఛేదేనాపి ప్రసక్తస్యోపగమనస్యైవ నిషేధే ఉక్తవచన
తాత్పర్యం॥ నతువ్యంజనాది పూర్వకాలావచ్ఛేదేన రాగతః ప్రసక్తస్యో
పగమనస్యనిషేధేపి॥ నచ—సంకోచప్రమాణాభావఇతి — శంకనీయం
రాగప్రాప్తోపగమనాపేక్షయా విధిప్రాప్తోపగమనస్యైవ ప్రత్యాసన్న
త్వాత్॥ అస్తువా ఉభయవిధోపగమనస్యాప్యత్రగ్రహణం తావతాపి
నోక్తవచనవైఫల్యం॥

ఋతుస్నాతాంతుయోభార్యాం సన్నిధౌనోపగచ్ఛతి।
ఘోరాయాం బ్రహ్మహత్యాయాం పతతేనాత్రసంశయః॥

ఇత్యాదివచనానుసారేణ భార్యామేవోపగచ్ఛేదవేతి నియమద్వయాంగీ
కారేపి ఋతావేవేతికాల నియమానంగీకారాత్।

యథాకామీభవేద్వాపి స్త్రీణాంవరమనుస్మరన్।
ఇతియాజ్ఞవల్క్యస్మృత్యా ఋతుకాలభిన్నకాలావచ్ఛేదేనాపి భార్యో

సంగమనస్య విహితత్వాత్। వ్యంజనజన్మతః పరంబుతుకాలతః పూర్వ స్త్రీసేవాయామనుభవకాలత్వాన్న మనుష్యానుభవప్రసంగః॥ ఇత్యలమనేన ప్రసక్తానుప్రసక్తవిచారేణ॥

తాదృశశ్చవివాహః నిత్యోనైమిత్తికః కామ్యోవేతి విచారణాయాం— కామ్యఏవవివాహః। "నిరాశ్రమీనతిష్ఠేత దినమేకమపిద్విజః" ఇతివచనేన యత్కించిదాశ్రమేవస్థానమాత్రస్యైవప్రతిపాదనాత్ । తత్రచద్విజశబ్ద ప్రయోగానుసారేణ ద్విజత్వప్రయోజక బ్రహ్మచర్యవ్యతిరిక్తాశ్రమ సామాన్యస్య కామ్యత్వమేవేతి బహువివాహవాద కారావర్ణయంతి ॥ వయోనియమకారా అన్యమేకసిద్ధాన్త మవలంబంతే, స్త్రీణాంవివాహస్య ఉపనయనస్థానీయత్వేన అకరణేప్రత్యవాయశ్రవణాచ్చ నిత్యత్వేపి పుంసాంవివాహో కామ్యఏవ వివాహఇతి వర్ణయంతః ॥

వివాహకాలనియమకారాస్తు కలియుగే వానప్రస్థసన్యాసయోర్నిషిద్ధత్వాత్ బ్రహ్మచర్యాశ్రమమాత్రేఽవస్థానస్యాఽపి తథాత్వాన్నియత ఏవపుంసామపివివాహో వివాహ ఇతివర్ణయంతి ॥

పరేతుకలియుగేత్రవానప్రస్థాగ్నిహోత్రసన్యాసాదినిషేధ

చత్వార్యబ్దసహస్రాణి చత్వార్యబ్దశతానిచ।
కలేర్యదాగమిష్యంతి తదాత్రేతాపరిగ్రహః ॥
సన్యాసశ్చనకర్తవ్య ఇతివేదవిదాంమతం ॥

ఇతివచనస్యసతాత్పర్యం ॥

యావద్వర్ణవిభాగస్తు యావద్వేదఃప్రవర్తతే ।
సన్యాసంచాగ్నిహోత్రంచతావత్కుర్యాత్కలౌయుగే॥

ఇతి వేదప్రవృత్తిపర్యంతం తదనుష్ఠానస్యాఽవశ్యకత్వే పరవచనాఽను సారేణాఽస్యత్రైవార్ణికసస్య యుక్తత్వాత్ ॥ ఉపపాదితం చైతత్స జ్జనరంజనె పశుమార్గప్రవర్తన ఖండనేచాఽస్మత్కృత ఇతి తతఏవ ద్ర ష్టవ్యం ॥ ఏవంచోక్త ప్రకారేణ పుంసామపివిషయెవివాహ నిత్యత్వ సా ధనం నభవిష్యత్యేవ ॥ తథాప్యవిరక్తానాం నతకాన్విధురాంశ్చోద్దిశ్యైవ గృహస్థాశ్రమప్రవేశోపయోగి వివాహస్య విధానేన తేషాం నియత మేవ తదనుష్ఠానమావశ్యకమేవేతి పుంసామపి విషయె వివాహోనిత్య ఏవ । — యుక్తం చైతత్ — యథాహివివాహ స్త్రీ స్త్రీసంస్కారః ఏ వంపురుష సంస్కారోఽపి ॥ స్త్రియాంజాయాత్వసంపత్తైరివ పురుషే ప తిత్వ సంపత్తేరపి వివాహప్రయుక్త త్వాంగీకారాఽవశ్యకత్వాత్ । అతఏవహిదత్తాయా అపికన్యాయాః పాణిగ్రహణాది సంస్కారానిర్వృ త్తేవరాంత రాయాఽపిదానాది విధానం ॥ యదిహిప్రతిగ్రహమాత్రే ణైవస్వామిత్వం ధాన్యాదేరివస్యాత్ తదాపిత్రాదేః పునర్దానాది విధిర సంగత ఏవసంపద్యేత అతఏవహియజ్ఞేష్వ వినియోగాఽసహితత్వమపి భార్యాయాశ్చ్యుతి చోదిత ముపపన్నంభవతి॥ ఏవంచోభయసంస్కార రూపస్య వివాహస్య అంశభేదేన నిత్యకామ్యత్వ విభాగోనసంభవత్యేవ॥ నచ—కర్తృ భోక్తృ భయాశ్రితస్యాఽపి శ్రాద్ధస్య కర్తృంశేనిత్య త్వం భోక్తృంశేతు కామ్యత్వమితి దృష్టత్వాత్తదనుసారేణాత్రాప్యుప పత్తిరితి—శంకనీయం । ఉభయాశ్రితస్యాఽపి శ్రాద్ధస్య ఉభయసమ ఫల ఫలజనకత్వా భావేనోభయపర్యాప్తవాం పత్యఫలప్రయోజక వివాహవైషమ్యేణ తద్దృష్టాంతేనవివాహవిషయె కఃపప తివగనాఽసం

భవాత్ ॥ నచ— స్త్రీమాత్ర సంస్కారరూప ఏవవివాహః ఉపనయన స్థానీయత్వాత్ ఉపనయనంహి కుమారమేవ సంస్కరుతేనతుపితరమపి తత్కర్తారమితి సర్వసంప్రతి పన్నమితి—శంకనీయం ॥ ఉపనయనో త్తరకాలికానాం అధ్యయనాదీనాం ఉపనీతమంత్రవిషయ కత్వాదివ వాహోత్తర కాలిక ధర్మవిశేషాణామపి వివాహితా మాత్రాధి కారి కత్వాపత్తేః ॥ — అయమాశయః అష్టవర్షం బ్రాహ్మణముపనయీత ఇత్యాది మంత్రకరణ కోపనయనస్య నపితృసంస్కారోఽపి ఫలమి తియుక్తం ॥ తత్ఫలస్య ద్విజత్వసంపత్తేః పూర్వమేవ సిద్ధత్వాత్ ॥ అష్టవర్షంబ్రాహ్మణమితి కుమారస్యైవ ద్వితీయాంతపదే నోపాదాన మపితత్రగమకం ॥ వివాహవిషయేతు

గార్హస్థ్య మిచ్ఛన్భూపతికః కుర్యాద్దారపరిగ్రహం॥

ఇతివచనావగతగార్హస్థ్య ప్రయోజనస్య పురుషవిషయే వివాహాతః పూర్వమసిద్ధత్వాత్తస్య వివాహప్రయుక్తత్వ వర్ణనం యుక్తమేవేతివై షమ్యాత్॥ అస్తువా స్త్రీమాత్ర సంస్కారరూపం తావతాఽపి ,,నిరా శ్రమీనతిష్ఠేతదినమేకమపి ద్విజఇతివచనేన నియతమేవాపిరక్తానాంస్నా తకాదీనాం తదనుష్ఠానాఽఽవశ్యకతా ఽవగమాత్తన్నిత్యత్వాంగీకరణ స్యాఽవశ్యక త్వాత్ ॥ నహికుమారమాత్రసంస్కారరూపముపనయనమి తిపిత్రాదవిషయే ఽపితత్కర్తృత్వం కామనాప్రయుక్తమితి సంభవతి॥ కించఉపనయనస్థానీయత్వ వర్ణనస్య వివాహేనైవ స్త్రీణాంద్విజత్వా ఽది సిద్ధిరితివర్ణనస్య కాలాఽతిదేశఏవోపయోగః ॥ నాన్యత్ర, అన్య థా ఉపనయనంయథాపితైవ కర్తవ్యం వివాహోఽపి స్త్రీణాంపిత్రై

వక్తవ్య ఇత్యపి కల్పనాప్రసంగాత్; యదితు తత్రపిత్రాది వ్యతిరిక్తగా ర్హస్థ్య కామానామేవ వివాహానుష్ఠానే ఽధికారశ్శాస్త్రే చోదిత ఇత్యుచ్యతే। తర్హి తైస్తైరేవ శాస్త్రైః "నిరాశ్రమీ న తిష్ఠేత" ఇతి తస్య నిత్యత్వమపి ప్రతిపాదితమితి కథం వివాహకామ్యతా వాదోపపత్తిరితి భవన్త ఏవ వివేచయన్తు। ఏతేన ఉపనయనస్యైవ వివాహస్యాఽపి షోడశ వయః పర్యన్తమపి కాల ఏవేతి వచనమపి పరాస్తం। ఉపనయనస్థానీయత్వమాత్రేణ శాస్త్రవిరుద్ధార్థాంగీకరణాయోగస్యాఽనుపదమేవ ప్రతిపాదితత్వాత్। "నోపయచ్ఛేద్రజస్వలాం" ఇతి బహుశః రజోదర్శనానంతరం వివాహానర్హతాయాః ప్రతిపాదితత్వాత్ । షోడశవయస్కాయాః అపి వివాహ విధానపర భారతవచనాదీనామపి "ఏతస్త్వృతుదర్శనాభావే సతీతి విజ్ఞేయమితి" నిబన్ధకారవచనస్యాప్యేవం సత్యేవోపపత్తిరిత్యస్మదుక్తరీత్యైవోపపత్తి వర్ణనం యుక్తమిత్యృతుమతీ వివాహశాస్త్రీయతా వాదోఽసంగత ఏవేత్యలమనేన ప్రసక్తానుప్రసక్త విచారేణ । సర్వథాఽపితు వివాహకామ్యతావాదో ఽత్యన్తాసంగత ఏవ, నచ—"నిరాశ్రమీ న తిష్ఠేత దినమేకమపి ద్విజః" ఇతివచనేన యత్కించిదాశ్రమే ఽవస్థానమాత్రస్యైవ ప్రతిపాదితత్వాత్ గృహస్థాశ్రమస్వీకరణమేవ యుక్తమితి నియమాభావాత్తదనుసారేణ వివాహ నిత్యత్వ సమర్థనం న యుక్తమితి—వాచ్యం। అస్యహి వచనస్య యస్య యస్య యాదృశ యాదృశాశ్రమ శ్శాస్త్రచోదితః తస్యతస్య పురుషస్య తాదృశ తాదృశాశ్రమాఽవస్థానం వినైకమపి దినమవస్థానం న యుక్తమితి ప్రతిపాదన ఏవ తాత్పర్యం। నతు యత్కించిదాశ్రమే ఽవస్థానమాత్రబోధనే; అన్యథా సన్యస్తానామపి పునర్గృహస్థాశ్రమ ప్రవేశాఽపత్తేః। క్రమసన్న్యాస ప్రతిపాదకానాం వచనానాముత్తేన

తాత్పర్యాత్। యస్తు బ్రహ్మచర్యా ద్వా ప్రవ్రజేద్గృహా ద్వావనా ద్వేతి వచనం తదపి విరక్తవిషయకమేవేతి తత్రతత్రోద్ఘోషిత మిత్యవిరక్తానాం స్నాతకాదీనాం గృహస్థాశ్రమ స్వీకారస్యైవ శాస్త్రచోదితత్వాత్ వివాహనిత్యతా సమర్థనంయుక్తమేవ॥ పుత్రకామార్థవివాహయో స్సపత్నీకస్యైవాధికార ఇతి నిరాశ్రమీనతిష్ఠేతేతి వచనస్య తద్విషయేఽప్రవర్తనాత్తాదృశ వివాహయోః కామ్యత్వమేవ॥ తత్సంస్కృతానాంచ ఉపగమనమాత్రయోగ్యతా సంపత్త్యానకర్మాఽధికారః॥ ధర్మప్రజార్థ వివాహసంస్కృతానాన్తూపగమనాదాధర్మాదా చోభయత్రాఽప్యధికారః॥ సర్వవిధ వివాహానాంచ ప్రయోగః పరమేక ఏవ। నిత్యకామ్యయోః ప్రయోగవైలక్షణ్యాభావాత్॥ తత్ర బ్రాహ్మణస్త్రీణాంధర్మాఽనుష్ఠానావశ్యకత్వాత్ కేవలపుత్రార్థ వివాహే కామార్థ వివాహేచ నాధికారః॥ అతఏవహి సపత్నీకద్వితీయాది వివాహేఽపి ధర్మప్రజాసంపత్త్యర్థ మిత్యేవ సంకల్పశ్శిష్టవర్యైః క్రియతే। కామ్యవివాహేచ యదాకామ స్తదా వివాహ ఇతి, యుక్తం రజోదర్శనానంతర మపి వివాహస్స్యాచ్ఛూద్రాణాం॥ వస్తుతస్తు కామ్యకర్మణామపి శాస్త్రచోదిత కాలికానుష్ఠానమేవ ఫలాయకల్పతే నతు కామప్రాప్తకాలిక మిత్యన్యత్రవిస్తరః।—అయమాశయః—వివాహోహి త్రివిధః ధర్మప్రజార్థః కేవలప్రజార్థః కామార్థశ్చేతి। ప్రథమోనిత్యోఽన్త్యౌతుకామ్యౌ। యద్యపి మితాక్షరాయాం ధర్మపుత్రరత్యర్థత్వేన వివాహస్త్రివిధ ఇత్యాచారాఽధ్యాయే ధర్మార్థవివాహః పుత్రార్థవివాహః కామార్థవివాహ ఇత్యేవం త్రైవిధ్యముపపాదితం; తథాఽపి పుత్రార్థ వివాహస్యాఽపి నిత్యకామ్యభేదేన తత్రతత్ర ద్వైవిధ్యోఽపపాదనాద్వివాహ చాతుర్విధ్యాఽపత్త్యాజాతపుత్రః కృష్ణకేశ ఇతి శ్రుత్యా ధర్మార్థానామేవ పుత్రార్థత్వస్యాఽపి సంసూచిత

త్త్వేనచ ద్వితీయాదారాణామపి ధర్మప్రజార్థః కేవలపుత్రార్థః కేవల కామార్థశ్చేత్యేవ త్రైవిధ్యమిష్టమితి తాత్పర్యం॥ యద్యపి—సపత్నీకద్వితీయాది వివాహసంస్కృతానాం నకర్మాఽధికారః జ్యేష్ఠభార్యయా ఏకకర్మాఽధికారాదితి తత్రతత్రోపపాదితం—తథాఽపి జ్యేష్ఠభార్యాయామసన్నిధానేఽన్యతరం సన్నిహితాయామపి కర్మాఽధికారసంభవాత్ స్వరూపయోగ్యత్వం విద్యత ఏవ॥ అతఏవహి తస్యాం జ్యేష్ఠభార్యాసత్త్వదశాయాముత్పన్నస్యాఽపి బ్రాహ్మణత్వమేవేతి సిద్ధాంతః॥ యథాచధర్మప్రజార్థ వివాహేనైవ ద్వితీయజన్మసంభవ స్తథాన్యత్రవిస్తరః॥ బహువివాహవాదేతు సర్వభార్యాణామపి సర్వకర్మాధికార ఇతి సప్రమాణం నిరూపితమితి తత్సిద్ధాన్తాదరేఽపి నకస్యాపి పర్యనుయోగస్యావకాశః తాదృశేచ వివాహే ఋతుదర్శనాభావ విశిష్టోపనయన కాలఏవకాలక్షణే ఋత్వనన్తరమపి తద్వ్యాప్తిరియతావాదో సంభవయుక్తికఏవ॥

తదయంనిర్గళితార్థః

(1) ఋతుకాలతః పూర్వమేవబ్రాహ్మణస్త్రీణాంవివాహః కరణీయః ॥

(2) తత్రాఽష్టమాదివయ ఏవముఖ్యకాలః ॥

(3) యదితుపిత్రాదిప్రమాదేన రజోదర్శనంతదాఽత్యల్పతరయా ప్రాయశ్చిత్తాఽనుష్ఠానపూర్వకం వివాహాఽనుష్ఠానమప్యభ్యనుజ్ఞాయతే ।

(4) యదితు ఋతుదర్శనానంతరమపి సాహసాదినాపిత్రాదిభిర్నదీయతే తదావర్షత్రయప్రతీక్షణేన కన్యయాస్వయం వరణం కర్తవ్యం ।

(5) తత్రాఽపివరేణ కన్యాయాస్సవర్ణస్య చ ఆశ్వలాయనో

క్త ప్రకారేణ శుద్ధిస్సంపాదనీయేతి ॥

(6) యేతుపునర్దైవాత్ప్రాప్తరజస్కాయాః కన్యాయాః కూపాది

ష్వివపాతనం శాస్త్రీయం మన్యన్తే, సాహసికానాం కఠినహృదయా

నాంచ తేషాం శాస్త్రమప్యనాదరయమాణానామాస్తికత్వాఽభిమాన

ఏవకేవలంనాఽఽస్తిక భావోపీతి సుస్థిరముద్ఘోషయామః ॥

(7) సర్వధాపితు అసత్కల్పత్వేనైవ రజస్వలావివాహశాస్త్రీ

య్యనుజ్ఞాయత ఇతి వయోనిర్ణయకారాణామేవాశయ స్సమీచీనః

సత్వనాఽసత్కల్పత యాఽపి రజోదర్శనానంతరం వివాహశాస్త్రీ

చిత ఇతి వివాహకాల నిర్ణయకారాణామాశయ ఇతి సర్వే మన్య

మితి వర్ణయంతి ।

అస్మాకమపిపరేషాంనుతమేవ సమీచీనమితి ప్రతిభాతి ॥ అతో

వయమపితమేవ పక్షమనువర్తామహే ॥ యదిత్వన్యైరాస్తికవర్యైః సిద్ధాంత

రాఽనుసరణ మేవయుక్తమితి సముచిత ప్రమాణజాతైరుపపాద్యతే

తర్హి మహాజన మార్గానుసరణమేవ నిశ్శ్రేయస సంపన్నానాదరయ

మపితత్సిద్ధాంత మేవాఽనుసరిష్యామ ఇత్యస్వతంత్ర ప్రశ్నస్యాపరినిష్ఠి

తేషుచాస్మాసునద్యైరపి పురోభాగిభిర్భవితవ్యమితి బహుశః ప్రార్థయామ

ఇతి శివం ।

ఇతి,

తిరుపతి శ్రీ వేంకటేశ్వర విద్యాశాలా ప్రథమ మహోపాధ్యాయేన
అనంతకృష్ణశాస్త్రిణా విరచితా వివాహసమయ
మీమాంసా సంపూర్ణా.



శ్రీ నివాసో విజయతే





శ్రీగురుభ్యోనమః

శ్రీమన్నటేశాయనమః



ఆర్యాః,—

విదితచరమేవేదం తత్రభవతాం భవతాం? యత్ఖలుసమేపిలోకాః నిషిద్ధకర్మానుష్ఠానమాత్రతత్పరాః విహితకర్మానుష్ఠానపరాఙ్ముఖాశ్చ విద్యంతఇతి॥ తత్రహి నిషిద్ధకర్మానుష్ఠాన రాగాదయ ఏవనిమిత్తం॥ విహితకర్మానుష్ఠానపరాఙ్ముఖత్వేచ అశ్రద్ధాదయః॥ అశ్రద్ధాయాం పునః నిషిద్ధకర్మానుష్ఠాయిభిస్సర్వైరపి ప్రాయశ్చిత్తీయైర్వినైవ ప్రాయశ్చిత్తంసంవ్యవహారాదికమేవ॥ తత్ర యది ప్రాయశ్చిత్తీయానాం ప్రాయశ్చిత్తానుష్ఠానం నైవ సంవ్యవహారః, కృతప్రాయశ్చిత్తానామపి సంవ్యవహారాయోగ్యానాం అసంవ్యవహారశ్చనియతమనుష్ఠీయేత, నియతమేవతర్హి ధర్మాచరణాభిముఖ్యం సంభవేదితి॥

తత్రైవం సతి సముద్రయానం శాస్త్రనిషిద్ధంవా న వా? నిషిద్ధత్వేపి త
స్య ప్రాయశ్చిత్తం విద్యతే వా న వా? కృతప్రాయశ్చిత్తానామపి తత్సత్త్వే
సంవ్యవహారో విద్యతే న వేతి త్రేధా విప్రతిపత్తయః॥ తత్ర ప్రథమవిప్రతిప
త్తౌ సముద్రయానం న శాస్త్రనిషిద్ధం॥ సముద్రయాత్రాస్వీకారః కమం
డలువిధారణం దేవరేణసుతోత్పత్తిః కలౌ పంచవివర్జయేత్ ఇత్యాది
వచనంతు అథపతనీయాని త్రిప్రస్తుత్య సమామ్నాత సముద్రసంయాన మి
తి వచనైకవాక్యతాను సారేణ సాంయాత్రిక సంబంధి సముద్రాధికరణ
కయానమేవ విషయీకరోతి, సతు విలాసవిద్యాగ్రహణాద్యర్థం క్రియమా
ణం సముద్రయానమపి ॥ నచ — వినిగమనావిరహాత్ బోధాయనవచన
మేవ అన్యథా సముద్రయానసామాన్యనిషేధపరత్వేన నీయతామితి —
వాచ్యం, నిబంధనకారైః ద్విజస్యాబ్ధౌతు నౌయాతుః శోధితస్యాపి సం
గ్రహః ఇతివచన వ్యాఖ్యానావసరేత దుపష్టంభకత్వే నోక్తబోధా
యన వచననిర్దేశేన బోధాయనవచన ప్రాబల్యస్య నిర్ణీతత్వాత్ — అ
యంభావః — ద్విజస్యాబ్ధౌతు నౌయాతురితి వచనం హి, ధర్మజ్ఞసమయప్ర
మాణత్వేన మాధవీయాదిషు ప్రతిపాదితమితి మూలభూతాం కాంచన
స్మృతి మపేక్ష్యైవ ప్రమాణం భవతి॥ ధర్మజ్ఞసమయస్యాప్యాచారస్యైవ
స్మృతి మూలమేవ ప్రామాణ్యమిత్యంగీకరణీయత్వాత్ ॥ ఏవంచ, స
ముద్రయాన నిషేధ ఏవ నాస్తీతి కేచిద్వర్ణయంతి ॥

అన్యేతు ఋగ్విధాన సకృత్సముద్రయానేతు ప్రాయశ్చిత్తంతు
విద్యతే॥ బహుకాలాభ్యసనే ప్రాయశ్చిత్తం న విద్యతే ఇతి ప్రతిపాద్య బో
ధాయనీయ త్రైవార్షిక ప్రాయశ్చిత్త విధానాన్నైమిత్తికైక్యానిమి

త్త్యైక్యనిర్ణయాత్, బోధాయనవచనమపి సకృత్సముద్రయాన విషయ మేవేత్యే వాంగీకరణీయమితిసాంయాత్రిక సంబంధి సముద్రయానస్య బహుకాలాభ్యాసవిషయస్య అత్రగ్రహణ మయుక్తమితి సముపసర్గేణ న వివక్షితార్థః॥ ద్విజస్యాబ్ధౌతు నాయాతురిత్యాదితివచనోపష్టంభ క తయా ఉక్తబోధాయనవచనం నిర్దిశతాం నిబంధన కారాణామప్య య మేవాశయః॥ఏవంచ ధర్మజ్ఞసమయస్యాపితస్య మూలభూతంవచనం విద్యతఇతి యథాశ్రుతార్థమేవేతి సముద్రయానం శాస్త్రనిషిద్ధమేవ॥

తత్ర, తథాపి, సముద్రయానసామాన్యం శాస్త్రనిషిద్ధం ఉతత ద్విశేషోవేతి విచారణాయాంతత్సామాన్యమేవ శాస్త్రనిషిద్ధం॥ „ద్విజస్యాబ్ధౌతునాయాతుః„ „సముద్రయానస్వీకారః„ „సముద్రయాత్రాస్వీకారః„ „సముద్రసంయానం„ సకృత్సముద్రయానేతు ప్రాయశ్చిత్తంతు విద్యతే ఇత్యాదివచనానామ విశేషణైవ ప్రవృత్తత్వాత్. యానంకారాగృహేవాసో నాభిర్యానందినత్రయం। మ్లేచ్ఛావాసస్తథా పక్షంమోవర్తత సపాతకీతి॥ వచనేనతునోపసంహారః, ఉభయోరపిని షేధశాస్త్రత్వేన, పరస్పరోపసంహారస్యా యుక్తత్వాత్॥ అన్యథా, నబ్రాహ్మణం హన్యాన్నాబ్రాహ్మణం హన్యాది తివచనయోరపి పరస్పరోపసంహారాపత్తేః, అతఏవ ఉత్సర్గాపవాదన్యాయోపి నప్రవర్తతే, అప వాదశాస్త్రప్రవృత్తిరహితే దేశాన్తరే తచ్చారితార్థ్యం వినాతదప్రవ ర్తనాత్, ఏవంచ, సామాన్యవిశేషాది న్యాయాప్రవృత్తేః సముద్రయానసామాన్య మేవశాస్త్రనిషిద్ధమితి కేచిద్వర్ణయంతి.

అన్యేతు, సస్నానంనజపోహోమా ఇతివచనైక వాక్యతానుసా

రేణ స్నానజపాద్యభావవిశిష్టత్వేనైవ తస్య దోషాపాదకత్వేన ఏకాహం ద్వ్యహం వా యదవ్రతం వ్రతమేవ తద్భవతీతి శ్రుత్యనుసారేణ స్నానాద్యభావస్య స్వరూపేణ నిషేధ్యతావచ్ఛేదకత్వాంగీకారాయోగాత్ దినత్రయవ్యాప్తికతదభావస్యైవ నిషేధ్యతావచ్ఛేదకత్వ మంగీకరణీయమితి సముద్రయానస్వీకార ఇత్యాదివచనానామపి, విశేషవిషయకత్వాత్, భిన్నశాఖాగత అగ్నిహోత్రవాక్యమివ మాసం కారాగృహే వాసః ఇతి వచనసమానార్థకత్వమేవ యుక్తం, ఏకశాఖాగతానామేవ నిషేధవచనానాం పరస్పరోపసంహారాభావః; భిన్నశాఖాగతానాంతు నిషేధవచనానామపి పరస్పరోపసంహారో విద్యత ఇతి మీమాంసకసిద్ధాంతానుసారేణ భిన్నస్మృతిగతానాం నిషేధవచనానాం పరస్పరోపసంహార శ్రవణమాత్రేణ న బ్రాహ్మణం హన్యాన్నాత్రేయం హన్యాదితి వచనోపసంహారాపాదనస్య అయుక్తత్వాత్. ఏవంచ సామాన్యవిశేషన్యాయేన న్యాయాంతరేణ వా సముద్రయాన నిషేధపరాణాం సర్వేషామపి వచనానాం దినత్రయవ్యాప్తికనౌకాయాన పరత్వమేవ అంగీకరణీయమితి సముద్రయాన విశేష ఏవ శాస్త్రనిషిద్ధ ఇతి వర్ణయంతి, నిషిద్ధస్యాపి తస్య ప్రాయశ్చిత్తం విద్యతే వా న వేతి విచారణాయాం నాస్త్యేవేతి కేచి ద్వర్ణయంతి,

తేషామయమాశయః—యద్యపి బోధాయన ధర్మే ఋగ్విధానే చ త్రైవార్షిక ప్రాయశ్చిత్తం విహితం—తథాపి తద్యుగాంతరవిషయకమితి పశ్యామః । యతో హి కలివర్జ్యప్రకరణే "ద్విజస్యాబ్ధౌతు నౌయాతుశ్శోధితస్యాపి సంగ్రహః" ఇతి వచనం సమామ్నాతం కలియుగే ప్రాయశ్చిత్తాభావం బోధయతి। ఉక్తవచనం హి శోధితస్యాసంగ్రహం బోధనా స

మర్థంసత్ శిఖధ్వస్తఇతివత్, శుద్ధిప్రయోజనప్రాయశ్చిత్తాభావమేవబోధయతి॥ యథాహి, ప్రాయశ్చిత్తనిషేధపరాణాం ,, ప్రాయశ్చిత్తంనపశ్యామి యేన శుద్ధ్యేత్సఆత్మహా,, ఇత్యాదివచనానాం సంగ్రహ నిషేధతాత్పర్యకత్వం భాష్యభామత్యాదౌ వర్ణితం ॥ తథాసంగ్రహనిషేధ పరాణామపివచనానాం ప్రాయశ్చిత్తాభావ పరత్వేనదోషః, కలౌద్విజోద్ధాయానేతు ప్రాయశ్చిత్తమిహార్హతి ఇతివచనంతుదినత్రయన్యూనకాలికసముద్రయానవిషయం॥ఏకాహంద్వ్యహంవాఽహహుతంవాఽహుతిమేవ తద్భవతితి శ్రుతిస్తుదినద్వయవ్యాప్తిక స్నానాద్యభావజనిత పాపస్య ప్రాయశ్చిత్తాపనోద్యత్వమేవ బోధయతీతి నకించిదనుపపన్నంనామ ॥ ఏవంచ, సముద్రయాయినాం ప్రాయశ్చిత్తంనాస్త్యేవేతి'

అన్యేతు, కలియుగేపి సముద్రయాయినాం ప్రాయశ్చిత్తంవిద్యతఏవ బోధాయనధర్మసూత్రస్య ఋగ్విధానవచనస్యచ యుగాంతరవిషయకత్వేన సంకోచానుపపత్తేః। అన్యథానైమిత్తికస్యైవ నిమిత్తస్యాపి యుగాంతర విషయకత్వాపత్తేః ॥ నను—కలియుగే విశిష్య సముద్రయాన నిషేధాత్ తన్నిషేధస్య యుగాంతర విషయత్వం నసంభవతీతి చేత్సమానమేతన్నైమిత్తిక విషయేపి కలౌ ద్విజోద్ధాయానేతు ప్రాయశ్చిత్తమసార్హతీ తినైమిత్తికస్యాపి శ్రవణాత్, నచతస్యవచనస్య అర్థాంతర విషయకత్వేన ఉపపత్తిర్వర్ణి తేతి వాచ్యం। సత్యంవర్ణితా। అనుపపన్నాతుసాభవతి । నైమిత్తికాభేధన నిమిత్తైక్యమితి పూర్వోక్తరీత్యా బోధాయనీయ సంయానమేవ అత్రాపినిమిత్తత్వేన అనూద్యత ఇతివర్ణనీయత్వేన దినత్రయన్యూన సము

ద్రయానమేవాత్ర అనోద్యత్వమితి వచనస్యాతిఫల్గుత్వాత్ । నన్వేవమపి
కామకృతస్య ఇదానీంతనస్య సముద్రయానస్య గమనాగమనాభ్యాం అ
భ్యస్యమానస్య ప్రాయశ్చిత్తం నవిద్యతే బహుకాలాదభ్యసనే ప్రాయ
శ్చిత్తం నవిద్యత ఇతివచనాత్ ॥ ఏవంచద్విజస్యాబ్ధౌతు నౌయాతుశ్శోధిత
స్యాపి సంగ్రహ ఇతివచనమపి వ్యాఖ్యాతం భవతీతిచేన్న కామకృతస్య అభ్య
స్యమానస్య సకృత్సముద్రయాన ప్రాయశ్చిత్తానపనోద్యత్వ ఏవ బహు
కాలాదభ్యసనే ఇతివచస్తాత్పర్యం॥ నతుచతుర్గుణిత ప్రాయశ్చిత్తాపన
నోద్యత్వబోధనే పీత్యద్యతన సముద్రయానస్యాపి ప్రాయశ్చిత్తంవిద్యత
ఏవ॥ ఏవంచ ద్విజస్యాబ్ధౌతునౌయాతురితి వచనవిరోధోపి పరిహృతః॥
అథవా, సముద్రంయానప్రాయశ్చిత్తంహి, సముద్రయానవనిమిత్త అని
వారణీయ దోషవిశేషనివారణ ఏవసమర్థం ॥ నతుహఠాత్కారకృతసూ
ద్రాన్నభోజనాదినిమిత్తదోషనివారణే పీత్యర్థ పరంసత్ నసఃఖుపజాతా
నివారణీయ దోషకలుషితానామపి ప్రాయశ్చిత్తాభావ విధిపరంభవతీతి
సర్వమనవద్యం। మహాపాతకినామపి ప్రాయశ్చిత్తంవిద్యతే ఏవంస్థితేసము
ద్రయానమాత్ర విషయే కథంవాప్రాయశ్చిత్తాభావ ఉన్నేతుంశక్యతే.
స్ఫుటప్రాయశ్చిత్తవిధ్యభావేపి కల్పనీయమేవ ప్రాయశ్చిత్తమితి ఖలుధ
ర్మశాస్త్రకారాణామాశయ ఇతివదంతి.

కృతప్రాయశ్చిత్తానాంచ తేషాం సంవ్యవహారయోగ్యత్వం విద్య
తేవానవేతి విచారణాయాం ప్రథమతస్సముద్రయానం మహాపాతకం
వా ఉత ఉపపాతకం వేతి విచారణీయంభవతి, తత్రకేచిన్మహాపాతకమే
వ తదితివర్ణయంతి॥ తేషాంత్వాశయః మహాపాతకినామేవ కృతప్రాయ

శ్చిత్తానామపి పాపక్షయోనసంభవతీతి మితాక్షరాదిషూక్తత్వేన స
ముద్రయాయినామపి కృతప్రాయశ్చిత్తానాం పాపక్షయాసంభవస్య
ద్విజస్యాబ్ధౌతు నౌయాతుశ్శోధితస్యాపి సంగ్రహః ఇతివచనేన అవగమే
ననిమిత్తైక్యేన సముద్రయానమపి మహాపాతకమేవేతి ॥ యదితుపంచా
నామేవ పరిగణితానాం స్వర్ణస్తేయాదీనాం మహాపాతకత్వం నాన్యే
షామిత్యాగ్రహః తదాపి సమపాతకం తదిత్యంగీక్రియతాం సర్వథాపితు
కృతప్రాయశ్చిత్తానామపి తేషాం సంవ్యవహారయోగ్యత్వం నసంభవిష్య
తి॥ ప్రత్యంతదేశగమననిమిత్తపునస్సంస్కారేకృతేపి అబ్ధినౌయాతుః
కలౌ సంసర్గనిషిద్ధ ఇతి వదంతస్సంస్కారకౌస్తుభకారాశ్చాత్రాను
కూలాః॥ అతఏవహి ద్విజస్యాబ్ధౌతు నౌయాతుశ్శోధితస్యాపి సంగ్రహః
ఇతివ్యవహారమయూఖ నారదవచనం, మాసంకారాగృహేవాసః సో
భిర్యాస్యందినగ్రహణం మ్లేచ్ఛావాసస్తథాష్టకం యోవర్తేతసపాతకీ ఇతివచ
నంచసంగతంభవతి, ఉపపాతకాదీనాం హిపతనహేతుత్వాభావాత్ న
పాతకశబ్దేన గ్రహణమితి సమపాతకత్వమేవనౌకాయానస్య అంగీకరణీ
యం॥ యద్యపి సముద్రయాత్రాస్వీకారః కమండలువిధారణం ఇత్యా
దిషు బహుస్థలేషు సముద్రయానస్య నిషేధమాత్రం శ్రూయతే నిషి
ద్ధానాంచామహాపాతకానాం అన్యత్రాపరిగణనేన ఉపపాతకత్వాదిరూప
మేవయుక్తం ॥ మాసంకారాగృహేవాసః ఇతిశ్లోకేపాతకిశబ్దప్రయో
గమాత్రేణతు సమపాతకత్వనిర్ణయోనభవిష్యతి ॥ ఉపపాతకానా
మప్యభ్యాసాపేక్షయాపతనహేతుత్వమితిమితాక్షరాయాంసిద్ధాంతితత్వా
త్॥ ఉపపాతకానాంచాభ్యాసాపేక్షయాపతనహేతూనామపి ప్రాయ

శ్చిత్తానుష్ఠానమాత్రేణవినాశోపపత్త్యాసంవ్యవహార్యత్వ మపిసేత్స్యత్యే వంతథాపిగుణోపసంహార న్యాయేనస ర్వేషామపి వచనానామేకవాక్యతా యా ఆవశ్యకత్వాత్ సముద్రయాత్రాస్వీకార ఇత్యాదివచనానామపి కృతప్రాయశ్చిత్తానామపితేషామ సంగ్రాహ్యత్వబోధన పర్యంతం తాత్పర్య మభ్యుపగమనీయమితి సమపాతకత్వాంగీకరణమేవ యుక్తం॥ఏవంచసతిపాతక శబ్దప్రయోగోపి విన్నైవక్లేశం సమర్థితోభవతి॥ఉపపాతకాదిరూపత్వేత్వాపేక్షిక పతనహేతుత్వేనోప వర్ణన మావశ్యకమితి క్లేశః॥ ఏవంచకృతప్రాయశ్చిత్తానామపి తేషాం నసంవ్యవహార్యత్వ సిద్ధిరితి నకోపిదోషః॥ నచవినిగమనావిరహాత్ ద్విజస్యాబ్ధౌతు నావాయాతుశ్శోధితస్యాపిసంగ్రహః ఇతివచనమేవ సముద్రయాత్రా స్వీకార ఇతి వచనానుసారేణ కేవల నిషేధ పరంభవతు: కిమితి సముద్రయాత్రాస్వీకార ఇతి వచనమేవతదనుసారేణ నీయతే ఇతి శంకనీయం ॥ నిషేధవాక్యానాం నిషిద్ధాచరణానుష్ఠాన ప్రయుక్త పాతిత్య పర్యంతబోధనే ప్రామాణ్యస్యాంగీకరణీయత్వేన స్పష్టతయాతదనుష్ఠాతౄణాం పాతిత్య ప్రతిపాదక వచన సత్త్వదశాయాంతాదృశ వచనానుసారేణైవనిషేధమాత్రబోధకవచనజాతమపి నేయమితి వినిగమకసత్త్వేన ఉక్తశంకాయా అనవకాశాత్ ॥ ద్విజస్యాబ్ధౌతునావాయాతుశ్శోధితస్యాపి సంగ్రహః ఇతివచనంతు కృతప్రాయశ్చిత్తానామపి సముద్రయాయినాం పాపక్షయాభావం నప్రతిపాదయతి కింతుప్రాయశ్చిత్తాధీనపాపక్షయవతోపి పురుషస్య నౌయాన కర్తురసంగ్రాహ్యత్వం॥ ఏవంచ సమపాతకాది నిమిత్తైక్యస్యాపూర్వోక్తస్యాభావాదుపపాతకత్వాంగీకరణమేవ యుక్తమితి వా

చ్యం; ఉక్తవచనగతస్య శోధితస్యాపీత్య స్యకృతప్రాయశ్చిత్త స్యాపీత్యర్థ కత్వస్యైవాదరణీయత్వేన సమపాతక నిమిత్తైక్యం పూర్వోక్తమపి సంభవత్యేవేత్యుపపాతకత్వాసంభవాత్॥ శోధితస్యాపీత్యస్య కృత ప్రాయశ్చిత్తస్యాపీత్యర్థ ఏవ ఆదరణీయ ఇత్యత్ర కింగమకమితి చేత్ అన్యథానుపపత్తిరేవేతి బ్రూమః॥తథాహి॥యదిహ్యత్ర శోధితస్యాపీత్య స్య శుద్ధిమతోపీత్యర్థ ఇతిస్యాత్; తదాఽసంగ్రాహ్యత్వప్రయోజకా శు ద్ధివినాశాఽ సంగ్రాహ్యత్వమపి నిమిత్తాభావేనై ... స్యాపాయ ఇతి న్యాయేన గమిష్యతీతి సంగ్రాహ్యత్వస్యైవ ఆపాతాత్ సంగ్రాహ్యత్వ నిషేధోనోపపద్యేత॥ ... తహి ... వినిగమనా... సముద్రయాన నింద్యాబోధనం సవర్థ ... తత్సంపద్యత ... యం. వాక్య లక్షణాపేక్షయా పదలక్షణాయా ఏవగురుత్వన్యాయ్యా కల్ప నేతిన్యాయే నయుక్తత్వాదర్థ ... అంగీకరణాపేక్షయా శోధితస్యాపీతిపదస్యకృత ప్రాయశ్చిత్తస్యాపీత్యర్థ కత్వాదరణస్యైవ యుక్తత్వాత్॥ వాక్యలక్షణా ... పదలక్షణాత్తోజఘన్యేతిహి మీమాంసకసిద్ధాంతః॥ ఏవంచ శోధితస్యాపీ త్యస్య కృతప్రాయశ్చిత్త స్యాపీత్యర్థ కత్వమేవోపపన్నమితి సమపాతక త్వాంగీకరణమేవ యుక్తంభవతి ॥ యావతాచ మహాపాతకత్వం తా వతాకృత ప్రాయశ్చిత్తానామపి తదనుష్ఠాతౄణాం నసంవ్యవహార్య త్వసిద్ధిః॥యస్యాపి-మితాక్షరాయాం కృతప్రాయశ్చిత్తానామపిపాతకినాం ప్రాయశ్చిత్తస్య కింప్రయోజన మిత్యాశంక్య సంవ్యవహారసిద్ధిరితి సి ద్ధాంతితం॥ పాపక్షయాభావవచనస్య నరకోత్పాదన శక్త్యవినాశబోధనా ర్థమేవ ప్రవృత్తిరితిచతతఏవ సిధ్యతి॥ ఏవంచ, కృతప్రాయశ్చిత్తానామ

సంగ్రాహ్యత్వ బోధకమిదంవచనం నిందార్థవాదరూప మిత్యేవవర్ణనం యుక్తి సహంభవతి- తథాపి మితాక్షరాగతవ్యవహార పదస్య స్వకర్మానుష్ఠాన మాత్రపరత్వేన లౌకికా లౌకిక సర్వవిధవ్యవహార పరత్వాభావేన చావిరోధాత్॥ ఏవంచమితాక్షరాయాం పరిశేషవిధయా బోధిత లౌకికా లౌకిక సాధారణ సర్వవిధవ్యవహార నిషేధస్యైవ శబ్దమర్యాదయా "ద్విజస్యాబ్ధౌతు నౌయాతు," రితివచనేన ప్రకాశనమితిన కోపిదోషస్సమాగచ్ఛతి॥ యదితు సముద్రయానం నమహా పాతకకోటి మధ్యాసీత, కింతు ఉపపాతక కోటిమేవ, "మాసంకారాగృహేవాసో నాభిర్వ్యానందినత్రయం," ఇతిశ్లోకేపాతక శబ్దప్రయోగస్యైవం సత్యోపపత్తిః। యద్యపి-పాతక శబ్దోనిరపేక్ష పతనహేతుష్వేవ్యవసితః ప్రసిద్ధః- తథాపి మహాపాతకాదీ నామపి నిరపేక్ష పతనహేతుత్వాభావాత్॥ సాపేక్ష పతనహేతౌ ఉపపాతకేపి పాతక ప్రయోగ ఉపపన్న ఏవ॥ "అతఏవమహాపాపంచాతి పాపంతథాపాతక మేవచ," ఇతివచనేపాతకశబ్దేన కాత్యాయనాచార్యైరుప పాతకానామేవ గ్రహణమపి సంగతంభవతి॥ నచ—తత్రైవవచనే ఉపపాపమితి శబ్దాం తరనిర్దేశోపిన త్రిత ఇతితేనైవోపపాతకానాం గ్రహణమితి-భ్రమితవ్యం॥ పాపపరిగణనా వ్యాఖ్యాతైవ అత్రాపిఅతి పాతకానంతరం ఉపపాతకస్యైవ ఉపస్థిత్యాతత్పరత్వ వర్ణనస్యైవ యుక్తత్వాత్ ॥

ఏవంచ సమపాతకత్వాదా ప్రమాణాభావాదుప పాతకత్వమేవ సముద్రయానస్య యుక్తమిత్యాగ్రహః; తదాపి ఉపపాతకానామప్యభ్యస్తానాంపతన హేతుత్వమంగీకరణీయమేవేతి "మాసంకారాగృహేవాన,,

ఇతిశ్లోకే పాతకిశబ్దస్వారస్యానుసారేణ దినత్రయవ్యాప్తి కత్వాపేతు న్నైవ పాతకత్వ మభిప్రేతమిత్యవగమాత్ ఏకస్మిన్ దినేదినద్వయేవా కృత సముద్రయానస్య ప్రాయశ్చిత్తాదినా వినాశేపి దినత్రయవ్యాప్తికనౌకాయానే సతికృతప్రాయశ్చిత్తస్యాపి సంవ్యవహార్యత్వం నయుక్తమేవ॥ మహాపాతకానామివ అభ్యస్యమానోప పాతకానామపిపతనీయకోటౌ వేనపరిగణనస్యాయుక్తత్వాత్॥ యదాతు దినత్రయవ్యాప్తిక నౌకాయానస్య విషయఏవ ఏతాదృశీగతి స్తదా మువక్తవ్యం అసకృజ్జనదేశాన్తరగమ నాగమనాదినాబహుకాల మభ్యస్యమాన నౌకాయానవిషయ ఇతిభవంతఏవ విదాంకుర్వంతు ॥ సర్వథాపితుకృతప్రాయశ్చిత్తానామపి సముద్రయాయినాం స్వకర్మానుష్ఠాన మాత్రాధికారేపి లౌకికాలౌకిక సర్వవిధవ్యవహార యోగ్యత్వంనవిద్యతఏవ॥ తత్కర్తృక శ్రాద్ధాదౌతు తజ్జాతీయ బ్రాహ్మణానామేవ నిమన్త్రణం, తథైవబోధాయనధర్మసూత్రతోవగమాదితి ॥

అన్యత్తు, "ద్విజస్యాబ్ధౌతు నౌయాతుశ్శోధితస్యాపి సంగ్రహః," ఇతివచనం- నయథాశ్రుతార్థపరం-తథాహి, ద్వివిధాహిపాపశక్తిః నరకోత్పాదికావ్యవ హారనిరోధికాచేతి॥ తత్రకృతప్రాయశ్చిత్తానా మపిమహాపాతకినాం ప్రాయశ్చిత్తేనవ్య వహారనిరోధక శక్తి మాత్రవినాశేనవ్యవహార్యత్వంతుస్యాదేవ॥ పాపక్షయాభావాత్తు నరకానుభవః పరంవిద్యతఏవేతిమితాక్షరాయాముక్తం॥ తత్రమితాక్షరాకారాణాం కీదృశంవ్యవహార్యత్వం అభిమతమితిచేత్ స్వకర్మానుష్ఠాన మాత్రాధికారఇతి పూర్వపక్షిణోవదంతి॥ తత్తునయుక్తం॥ సంకోచప్రమాణాభావాత్। కించ

వ్యవహారత్వం విద్యత ఏవేతి, వాక్యగతవ్యవహారపదస్యైవ స్వకర్మాను ష్ఠానపరత్వం ప్రతిపాద్యతే? ఉతాహో తదుపపాదనార్థం ప్రవృత్తే ద్వివిధాహి పాపశక్తిః, నరకోత్పాదికా వ్యవహారనిరోధికా చేతి వాక్యగతవ్యవహారపదస్యాపి తాదృశార్థకత్వం ప్రతిపాద్యత ఇతి వివేచనీయం॥ తత్ర న తావత్ప్రథమః కల్పస్సంభవతి॥ వివరణవిప్రియమాణ యోరేకార్థకత్వస్యావశ్యకత్వేన వివరణవాక్యే సర్వవిధవ్యవహారనిరోధకశక్తివినాశస్యైవ వివక్షణేనాముష్మికఫల విరాత్రసంబంధ పునర్నరకోత్పాదనశక్తే రుపయోగస్త్వైహిక విషయే సర్వవిధవ్యవహారయోగ్యత్వమపి సమర్థితం॥ ప్రపంచ విప్రియమాణవాక్యే సర్వవిధైహికవ్యవహారయోగ్యత్వప్రతిపాదన పరతాత్పర్యస్యాభ్యుపగమనీయత్వేన మితాక్షరాగ్రంథవిరోధాత్॥ "శోధితస్య సంగ్రహః" ఇతి వచనం యథాశ్రుతార్థప్రమాణం న భవతి। న ద్వితీయః, పాపసామాన్యస్య స్వకర్మానుష్ఠాన లక్షణవ్యవహారమాత్రనిరోధకశక్తిరేవ వ్యవహారనిరోధకశక్తిపదేన వివక్షితేతి ఖలు తదానీం వక్తితం భవతి॥ తత్ర యది తథాభ్యుపగమ్యేత తదా కేనాపి పాపేన సహ భోజనాదివ్యవహారనిరోధో నాస్తీత్యేవాభ్యుపగమనీయం భవతి॥ ఇష్టాపత్తౌ తు అకృతప్రాయశ్చిత్తానామపి స్వకర్మానుష్ఠానవ్యతిరిక్త సర్వవిధ వ్యవహార యోగ్యత్వస్య సత్వే ప్రాయశ్చిత్తానుష్ఠానేన స్వకర్మానుష్ఠానాధికారస్యాపి సంపత్తౌ కృతప్రాయశ్చిత్తస్సర్వథా వ్యవహారయోగ్య ఇత్యేవ ఆపతతీత్యాయాతం మార్గేణ। కించ శోధితస్యాపి సంగ్రహ ఇత్యత్ర శోధితపదార్థః క ఇతి వివేచనాయామపి నిందార్థవాదత్వమేవ భవిష్యతీ తదపి కించిద్విచారయామః, అత్ర కేచిత్ శోధితస్యేత్యస్య కృతప్రాయశ్చిత్తస్య

ప్రీత్యర్థఇతివర్ణయంతి॥ తత్తునయుక్తం॥ ప్రమాణాభావాత్॥నచ-అశుద్ధిమ
త్త్వస్యాఽసంగ్రాహ్యత్వప్రయోజకస్యాభావేఽసంగ్రాహ్యత్వస్య నిమిత్తా
భావేనైమిత్తికస్యాప్యపాయఇతిన్యాయేన స్యాదేవేతి శోధితస్యాపిసంగ్ర
హనిషేధోఽనుపపన్న ఇత్యన్యథానుపపత్త్యాలక్షణయాతాదృశార్థకల్పన
మితి-శంకనీయం ఉక్తార్థకల్పనేఽపి పూర్వోక్తరీత్యా సంగ్రహనిషేధాను
పపత్తి తాదవస్థ్యాత్ భక్షితేఽపిలశునేన రోగశాన్తిరితిన్యాయ విష
యత్వాత్—ఘట్టకుట్ట్యామేవప్రభాతాత్॥ యదితుశోధి తస్యాపీత్యస్య
ఆన్తరశుద్ధిమతోఽపీత్యర్థ కత్వేనోపపత్తిః; ద్వివిధాశుద్ధిఃబాహ్యాభ్యన్త
రభేదాత్॥ తత్రప్రాయశ్చిత్తాదినాఆన్తరాశుద్ధివినాశేఽపిబాహ్యాశుద్ధేరవి
నాశాత్ లౌకికవ్యవహారసహభోజనానధికార ప్రయోజక బాహ్యాశుద్ధ్య
భావాత్సంగ్రహనిషేధోయుక్త ఏవేత్యుచ్యతే; తర్హిదం ద్రష్టవ్యం॥ ఇ
దంస్వకపోలకల్పితమప్రమాణానుసారేణాన్వితమితి॥ప్రథమపక్షే పున
స్సర్వజ్ఞానాం మహర్షివర్యాణామేవస్వ కపోలకల్పితవచన మప్రమాణమి
తి హేతుదర్శనాచ్చేతి సూత్రేపూర్వ తంత్రే ప్రతిపాదనేనా స్మదాదీనాం
స్వకపోలకల్పితోపపత్త్యాదీనాం వారిధిరేవావధిరితి సర్వవిదితమేవ ‘ఆ
పాతవాతే చలతిద్విపేంద్రే చక్రీవతో వారిధి రేవకాష్ఠా,, ఇతిన్యాయాత్॥
ద్వితీయేతుపక్షే ప్రాయశ్చిత్తేనాన్తరాశుద్ధిమాత్ర వినాశఇత్యత్ర కస్యా
పిప్రమాణస్యాసంభవేనోక్తకల్పనాయాః ప్రామాణికత్వస్య దురుప
పాదత్వాత్॥ కించ, కిం ప్రాయశ్చిత్తసామాన్యమేవాన్తరాశుద్ధివినాశకం?
ఉతాహోస్విదన్యాన ప్రాయశ్చిత్తమేవేతివివేచనీయంతత్రనతావత్ప్రథ
మః కల్పస్సంభవతి॥ బహూనామేవప్రాయశ్చిత్తానాముభయవిధనాశకా

నాం స్మృతిషు ప్రతిపాదనాత్ అంతరాశుద్ధి రూపపాపనాశనార్థం అను
ష్ఠితేన ప్రాయశ్చిత్తేన బాహ్యాశుద్ధేరపినష్టప్రాయత్వాత్। బాహ్యానాంని
షిద్ధానుష్ఠానేన సహాపివిజాతీయాఽశుద్ధిరుత్పద్యతే॥ కిన్తు అంతః కరణాత్మశ
రీరాదీనాంహి నిషిద్ధకర్మణాం పరస్పరాభిదాధ్యవసాయేన అంతః కరణని
ష్ఠాయా మాత్మనిష్ఠానాంవాఽశుద్ధ్యాదీనాం శరీరనిష్ఠత్వేనభానమాత్రమే
వ॥ ఏవంచ అంతరాశుద్ధినాశే బాహ్య శుద్ధినాశోఽపిస్వతస్సిద్ధ ఏవేతిస్వ
తశ్శుద్ధిమతో బాహ్యాశుద్ధిరపితత్సజాతీయాసిద్ధ్యేదేవేతి సంగ్రహనిషేధ
స్యాత్యన్తమనుపపన్నత్వాత్। నాపిద్వితీయః॥ తన్మాత్రవిషయేతాదృశక
ల్పనాయాఅప్రామాణికాయా అనాదరణీయత్వాత్। నచ- "ద్విజస్యాబ్ధౌ
తు నౌయాతుః" ఇతివచనస్యఅన్యథానుపపన్నత్వాత్ తదుపపత్త్యర్థ
మేవైతాదృశకల్పనేతి-వాచ్యం। ఉక్తవాక్యస్యఅన్యథోపపత్త్యేవర్ణయిష్య
మాణత్వాత్, తాదృశకల్పనాయామేవ వినిగమకంవిద్యతే సభవముక్తక
ల్పనాయా మితిచానుపదమేవ నిరూపయిష్యామః॥ ఏవంచాభ్యంతరశు
ద్ధిమతాం తత్సజాతీయ బాహ్య శుద్ధేరప్యావశ్యకత్వాత్। సముద్రయాన
నిమిత్తోభయవిధాశుద్ధి వినాశస్యాప్యావశ్యకత్వాత్ శోధితస్యాపిత్యాజ
నాన్తరశుద్ధి మాత్రవతో గ్రహణానయుక్త మేవేత్యర్థవాదతా వాదప
వసుస్థితో భవతి। కించలౌకికవ్యవహారే సహభోజనాదిరూప బాహ్యాశు
ద్ధిః ప్రతిబంధికా అలౌకికవ్యవహారే త్వాంతరాశుద్ధిరిత్యాదినియమస్యా
ప్యప్రామాణికత్వేనోభయవిధాశుద్ధేరపిసర్వ విధవ్యవహారనిషేధప్రయో
జకత్వమేవాంగీకరణీయం। విశేషతస్తుబాహ్యాశుద్ధిర్వ్యవహారప్రతిబంధికే
తితు వచనబలాదేవ నేత్యాశి॥ ఏవంచప్రాయశ్చిత్తే నైకపాపనిమిత్తోభయ

విధాశుద్ధినాశపవ సర్వవిధవ్యవహార యోగ్యత్వసిద్ధిరితి అంతరాశుద్ధిమా
త్ర వినాశేస్వకర్మానుష్ఠాన వ్యధికారాపత్త్యా భవదీయసిద్ధాన్తోపి దత్త
జలాంజలిః ప్రసజ్యేతేతి కృతప్రాయశ్చిత్తానాం సముద్రయాయినాం స
ర్వవిధవ్యవహార యోగ్యత్వమపివిద్యత ఏవేత్యేవాంగీకరణీయం॥ యదా
తుశ్రూర్వపత్యోపపాదన సమయో క్తరీతిమనుస్మృత్య సముద్రయానస్యోప
పాతకత్వ మంగీక్రియతే; తదోపపాతకవిషయే ప్రాయశ్చిత్తేన పాపక్ష
యోపి సంభవతీతి కృతప్రాయశ్చిత్తానాం నరకసంబంధోపి నభవిష్యతీతి
సర్వవిధవ్యవహారయోగ్యత్వ మప్యర్థసిద్ధమేవేతి మన్యామహే॥అథైవమపి
భారతేదానధర్మేషు శ్రాద్ధవర్జ్యప్రాధికారే శ్రూయమాణం "సాముద్రి
కో రాజభృత్యః తైలికః కూటకారకః" ఇతివచనం నిర్ణయసింధౌచతత్త్రిక
సేణగతం॥ అగారదాహీగరదః సముద్రయాయీచకుండాశ్యక్షకూటకారీ,,
ఇతివచనం, మనుస్మృతావుపలభ్యమానం "సముద్రయాయీబందీచతైలి
కః కూటకారకః ,, ఇతివచనంచోపపద్యతే, తత్రయది " ద్విజస్యాబ్ధౌ
తునౌయాతు శోధితస్యాపిసంగ్రహః ,, ఇతివచనం లౌకికాలౌకికాది
సహభోజనానధికారం సముద్రయాయినః ప్రతిపాదయేత్ తర్హి తేనైవ
వచనేనశ్రాద్ధభోజనానధికారోపి సన్నిగ్ర ప్రాయఇతిరాజభృత్యాది సాహ
చర్యేణ సముద్రయాయినోపి తదనధికారవర్ణనం వితథమేవసంపద్యేత,
కించ, ద్విజస్యాబ్ధౌతునౌయాతు శోధితస్యాపిసంగ్రహః ,, ఇతివచనస
మానార్థ కత్వముపసంహృతిస్య సముద్రయాత్రాస్వీకార ఇతివచనస్య
యుక్తం? ఉతాహో సముద్రయాత్రాస్వీకార ఇత్యాది వచనసమానా
ర్థకత్వముపసంహృతస్య ద్విజస్యాబ్ధౌతు ,, ఇతివచనస్యయుక్తమితి విచా

రణాయాం స్మృత్యంతరపరాశరమాధవీయయోః " ద్విజస్యాబ్ధౌతునౌ
యాతుః" ఇతివచనస్య ధర్మజ్ఞసమయప్రమాణకత్వేన నిర్దేశాత్ ॥ ధర్మ
జ్ఞసమయస్య చధర్మజ్ఞపురుషసంబంధి వ్యవస్థారూపత్వాత్, గ్రంథాం
తరవచనాంతరైః కృతవ్యవస్థానుసారేణైవ ధర్మజ్ఞసమయప్రమాణక
త్వేననిర్దిష్టానాం వచనానాముపపత్తిర్వక్తవ్యేతి గ్రంథాంతరేషు సము
ద్రయానపాతకస్య నిషేధయోరేవ శ్రవణాదకృతప్రాయశ్చిత్తస్యైవాస్య
సంవ్యవహారాశ్రవణాచ్చ కృతప్రాయశ్చిత్తస్యాస్య సంవ్యవహార్యపరత్వేన
ప్రతీయమానం సర్వమపివచనజాతం సముద్రయాత్రాస్వీకారాదిఇతివచన
సమానార్థకంసంపన్నం నిందార్థవాదరూపమేవప్రతిపద్యతే ఇతికృతప్రా
యశ్చిత్తానామపిసముద్రయాయినాం సర్వవిధవ్యవహారయోగ్యత్వమ
పినిశ్చితప్రాయమితిసర్వమనవద్యం ॥ ఏతేనసంస్కారకౌస్తుభవచనమపిపూర్వో
క్తంవ్యాఖ్యాతం భవతీతితదసంగ్రహాదివాదస్సర్వోఽపి కేవలసాహస
మూలకఇతి పంచతవర్గ్యాస్మృత్యోఽపిహేతుదర్శనాచ్చేతిన్యాయేన "నైన
ర్జనాహినామాయం వాసోవస్త్యః ప్రతిగృహ్ణాతి" ఇతి స్మృతికారవచనమివఅ
ప్రమాణమితివక్తవ్యమ్ ॥

పరేతుప్రాయశ్చిత్తైరపైత్యేనో యదజ్ఞానకృతంభవేత్ " కామ
తోఽవ్యవహార్యస్తు " ఇతియాజ్ఞవల్క్యస్మృతౌ అవ్యవహార్యఇతి పద
చ్ఛేదస్యైవయుక్తత్వాత్ కృతప్రాయశ్చిత్తానాం పాతకినాం వ్యవహార
నిరోధక శక్తివినాశబోధన నసంభవతి ॥ కిన్తునరకోత్పాదక శక్తి
వినాశబోధనమేవ ॥ ఏవంచశోధితస్యాఽపి సంగ్రహణత్యాగాపరిశోధితస్యా
ఽపీత్యస్యనరకోత్పాదకశక్తివినాశవతోఽపీత్యర్థకత్వాదరణ మేవయు

క్తం॥ "బాలఘ్నాంశ్చ కృతఘ్నాంశ్చ విశుద్ధానపిధర్మతః" ఇత్యాదౌ కుల్లూకభట్టాదిభిస్తథైవ వ్యాఖ్యానాత్ ॥ బహిస్తూభయథాఽపి స్మృతేరాచారాచ్చేతి బాదరాయణసూత్రతద్వ్యాఖ్యాన భాష్యభామత్యాదీనాం చైవమేవోపపత్తేః ॥ ఏవంచ "శోధితస్యాఽపి సంగ్రహ ఇతి" వచనం యథాశ్రుతార్థకం సత్ కృతప్రాయశ్చిత్తస్యాఽపి సముద్రయాయిన స్సంవ్యవహార్యత్వనిషేధతాత్పర్యకమేవసంపద్యతే ॥

యుక్తంచైతత్ ॥ యథాహి కామతోవ్యవహార్యస్య ప్రతిపాదనాఽన్యథాఽనుపపత్త్యా కృతప్రాయశ్చిత్తానాం కామకృతపాపానాం వ్యవహార నిరోధకశక్తి వినాశమాత్రముపపాదితం మితాక్షరాయాం తథా "బాలఘ్నాంశ్చ కృతఘ్నాంశ్చేత్యాదౌ వ్యవహారనిషేధాఽన్యథాఽనుపపత్త్యా సంసర్గనిరోధకశక్తి వినాశమాత్రోపపాదనమేవయుక్తం ॥

ఏవంచ పృథక్సంగ్రహ నిషేధస్థలే "కామతోవ్యవహార్యస్తు" ఇతివచనే వ్యవహార్యస్తు ఇతిపదచ్ఛేదేఽపినదోషః నాఽపివాతత్రత్యమితాక్షరావచన విరోధ ఇతిసూచితం॥

ఏవంచ శోధితస్యాఽపీత్యస్య కృతప్రాయశ్చిత్తస్యాఽపీతివాసంపాదిత నరకోపయోగ్యశుద్ధివినాశవతోఽపీత్యర్థ వివక్షణమేవయుక్తం॥

నచ - విధిగమనావిరహే వ్యవహారవిరోధకశక్తివినాశవతోఽపీత్యర్థపర ఎవత్వ్యతామితి - శంకనీయం; తదానీంసంగ్రహపదేనాఽపిభవతాఽలౌకిక సంగ్రహస్య లక్షణయాప్రతిపాదనం కర్తవ్యమితిగౌరవం అస్మాకన్తు సంగ్రహశబ్దస్య సంవ్యవహారపరస్యాఽన్యథాసయనం నకర్తవ్యమితి లాఘవమితివిని గమకసత్త్వాత్ ।

ఏవంచసముద్రయాయినాం కృతప్రాయశ్చిత్తానాం సముద్రయానస్యమహాపాతకత్వే ఉపపాతకత్వేవో భయథాఽపి స్మృత్యాచారాఽనుసారేణా సంవ్యవహారః ప్రయుక్త ఇత్యేవ బహిష్కారభయథాఽపి స్మృతిరాచారాచ్చేతి సూత్రాది పర్యాలోచనసిద్ధ్యతీతి కృతప్రాయశ్చిత్తానాం సముద్రయాయినాం సంవ్యవహారోపయుక్త ఏవేతిమన్యా మహా ఇతివర్ణయన్తి ॥

తదపరేసత్కుమన్తే ॥ యది స్త్రీ సద్ఽనిషేధవచనం కృతప్రాయశ్చిత్తస్యాఽపి తత్కర్తృసంగ్రహప్రతిపాదకవచనం చేతివచనద్వయం మివాత్రాప్యేకస్యా మేవస్మృతౌ సముద్రయాన నిషేధపరం ॥ కృతప్రాయశ్చిత్తస్యాఽపి సముద్రయాయినః సంగ్రహానిషేధపరం వచనం వోపల్ శ్యేత : తదా ॥

బాలఘ్నాంశ్చ కృతఘ్నాంశ్చ విశుద్ధానపి ధర్మతః ।
శరణాగతహంతౄంశ్చ స్త్రీహంతౄంశ్చ నసంవసేత్ ॥

ఇతివచనమివ "ద్విజస్యాబ్ధౌతునౌయాతుః" ఇతివచనమపి భవముక్తరీత్యా వ్యాఖ్యామంశక్యేత ॥ నైతదస్తి ॥ సముద్రయాత్రా స్వీకారాంకముండేలు విధారణమితిస్మృతివిశేషే కేవలనిషేధమాత్రిన్యక్వచిత్ప్రబోధితస్యాఽపి సంగ్రహాఇతి సముద్రయానసంగ్రహాభయ నిషేధోభయోపలంభేనైకరూపత్వా భావాత్ ॥

నచ—ఏకవాక్యతయా సముద్రయాత్రా స్వీకారఇత్యాదీనామపి సంగ్రహానిషేధతాత్పర్య కల్పమప్యంగీక్రియతఇతి—వాచ్యం ॥

ధర్మజ్ఞసమయ ప్రమాణత్వే ననిర్దిష్టస్య " ద్విజస్యాబ్ధౌతునా యాతు ,, రితివచనస్య వేదప్రమాణక స్మృతిరూప సముద్రయాత్రా

స్వీకారవచన సమానార్థకత్వమేవ యుక్తమితి పూర్వం ప్రతిపాదితత్వేనోక్త కల్పనాయా అసంభవాత్ ॥ అన్యథా వాక్యభేదాపత్తేః ।

అయమభిప్రాయః ।

కృతనిర్ణేజనాంశ్చైవ నజుగుప్సేత కర్హిచిత్ ॥

ఇతివచనస్య "బాలఘ్నాంశ్చకృతఘ్నాంశ్చేతి వచనస్యచైవ "కృతనిర్ణేజనాంశ్చైవ, "ద్విజస్యాబ్ధౌతు నౌయాతురి "తివచనయోస్సామాన్యవిశేషభావేనోపపత్తిర్న సంభవతి, ఉభయోరపి ప్రామాణ్యస్యాఽనిశ్చితత్వాత్ నిశ్చితప్రమాణభావాభావయ విషయకత్వాచ్చ సామాన్యవిశేషన్యాయస్య ॥ ఉపపాదితం చైతదద్వైత సిద్ధౌ విస్తరేణేతి ।

కించయుగసామాన్యధర్మాణామపి మ్లేచ్ఛావాసాదీనాం సాహచర్యేణ మాసంకారాగృహేవాస, ఇతివచన సముద్రయానస్య పరిగణనాత్, కలివర్జ్య ప్రకరణేఽపి సముద్రయాత్రాస్వీకార ఇతి తత్పరిగణన మనువాదరూపమేవ సంపద్యతే; ఇతి ద్విజస్యాబ్ధౌతు నౌయాతురితివచనమప్రయోజక మితి పశ్యామః ॥ నను యుగాంతరేషు సముద్రయానస్యాధర్మస్యాఽపి ప్రాయశ్చిత్తానుష్ఠాన మాత్రేణ సర్వథా నిర్ణేజనంకలౌతు నతథా నిరూపణార్థమేవ కలివర్జ్యప్రకరణ పఠనమేవేతిచేత్ — న—తత్ర ప్రకరణ నిషేధమాత్ర పరాణామపి వచనానాముపలంభేన పూర్వతనసముద్రయానానుష్ఠాన వ్యవస్థాపనపర ధర్మజ్ఞానాం తాత్పర్య మితి వక్తుమశక్యత్వేన ద్విజస్యాబ్ధావితివచనస్యార్థవాదత్వాశ్రయణస్యైవ యుక్తత్వాత్ అర్థవాదత్వేహికల్పిత విధ్యేక వాక్యత యావాక్యైక వాక్యత్వం సముద్రయాన సంగ్రహానిషేధ పరత్వేతువాక్యభేద ఇతి విధిత్వేనప్రతీయమానానామప్యపిశబ్దఘటితానామర్థవాదత్వాంగీకరణమేవ

యుక్తం బాలఘ్నాశ్చకృతఘ్నాంశ్చ ప్రత్యాదీనాంతు ధర్మజ్ఞ సమయ ప్రమాణకత్వాభావేన కేవల వేదమూలకత్వాద వాక్యభేదాచ్చయ థాశ్రుతార్థ పరత్వమపి యుక్తమేవ ॥ బహిర్యానయథాఽపిస్మృతేరా చారాచ్చేతి సూత్రమపిస్మృతి బద్ధమపితం వేదమూలస్మృతి విశేషస్యై వ నరకోత్పాదకశక్తిమాత్రవినాశకత్వప్రతిపాదనపరమితి మతాను రాద్ధాంతాఽపి స్యైవాఽత్రయుక్తత్వాత్ ॥ అస్తునాబహిర్యానయథా ఽపీతి సూత్రేస్మృతిశబ్దేన ధర్మజ్ఞసమయస్యాఽపి గ్రహణం॥ తేనతాఽ పిన సముద్రయాయినాం కృతప్రాయశ్చిత్తానామ సంవ్యవహార్యతాఽ పత్తిః॥ తస్యాస్త్రైవర్ణికేతర మాత్రవిషయకత్వేన మాధవాచార్యైః పరాశరస్మృతివ్యాఖ్యానే ప్రాయశ్చిత్తాధ్యాయే నిరూపితత్వేన ఇదా నీంతన సముద్రయాయివిషయేఽపి తదప్రవృత్తిరితివర్ణయంతి॥ తన్న యుక్తం; ధర్మజ్ఞసమయస్యాఽపి స్మృతిసజాతీయ ప్రమాణభావస్యా ఽంగీకరణీయత్వే సామాన్య విశేషన్యాయ ప్రవృత్తిసంభవాత్ మహా పాతకత్వే ఉపపాతకత్వేవా సర్వేషామపివచన ఽవిరోధస్యసమానత్వ స్యైవాంగీకరణీయత్వాత్॥ ధర్మజ్ఞసమయోహినామ శాస్త్రనిబంధనః ప్ర మాణముత శ్రుతినిబంధన ఇతివిచారణాయాం శ్రుతి నిబంధనః ప్రమాణ మిత్యేవయుక్తంవర్ణయామః॥ ధర్మజ్ఞసమయానామసతి మూలాంతరబలం శ్రేశ్రుతిమూలకత్వకల్పనస్యైవయుక్తత్వాత్॥ అన్యథా స్మృతీనామపి స్మృ త్యంతరమూలకత్వేనైవ ప్రామాణ్యాపత్తేః ధర్మజ్ఞసమయానాం స్మృతీ నాంచ వైలక్షణ్యంతు శ్రుతివాక్యాఖ్యమూలకత్వేన స్మృతిత్వం తదార్థికా ర్థమూలకత్వేన ధర్మజ్ఞసమయత్వమితి।—అయమాశయః—ధర్మజ్ఞాహి నారదాదయః కృతప్రాయశ్చిత్త సముద్రయాయి సంవ్యవహారాభ్యను జ్ఞానపరాం శ్రుతిముపలభ్యైవ సర్వకాలావచ్ఛేదేన సముద్రయానవిషే

ధం కలికాలావచ్ఛేదేన కృతప్రాయశ్చిత్తస్యాశ్వ సంవ్యవహారంచాస్మా ఘుః ॥ తత్ర నిషేధస్య వాచ్యార్థస్యాస్మరణాత్సముద్రయాన నిషేధవచనానాం స్మృతిత్వం ॥ కలికాలమాత్రా సంవ్యవహార స్తావర్ధికఇతి తత్పరాణాంవచనానాం ధర్మసమయత్వం॥ నహిధర్మజ్ఞసమయస్య మాత్రేణ స్మృతి విరోధేప్రామాణ్యం ॥ ఊఢాపునర్వివాహా దీనామపి ధర్మశాస్త్రత్వాపత్తేః ॥ ఏతేన శాస్త్ర విరోధేపి పూర్వాగతసమయాది వదస్తదీయ సముద్రయానాదపి ప్రామాణ్యసంభవాదన్యాదృశ ఏవ సమయః కల్ప్యతామితి శంకాపి పరాహతా ॥ సాక్షాత్కృత సర్వశ్రుతీనాం మహర్షీణామేవతత్రాధికారాత్ ॥ నచ—

ఏతాని లోకగుప్త్యర్థం కలేరాదౌ మహాత్మభిః ॥ ఇతివచనేన మహర్షీణాం సమయవిశేష కరణస్య లోకగుప్త్యర్థత్వావగమాత్ దేశకాలభేదేన ధర్మజ్ఞైః సమయవిశేష పరికల్పనమపి లోకరక్షణార్థ మావశ్యకమిత్యవగమాదేత త్కాలానుగుణం సముద్రయానాభ్యనుజ్ఞాన సమయకల్పనం యుక్తమేవేతివాచ్యం ॥ లోకగుప్తిర్నామ బ్రహ్మక్షత్రియ వైశ్యశూద్రాణాం వర్ణానామసంకీర్ణతైవ ॥ నతుస్వస్వోదర పూరణం యస్యకస్యచిత్ కలక్టర్ ప్రభృత్యధి రోహణంవా ॥ సాచసముద్రయానాభ్యనుజ్ఞాన సమయ పరికల్పనేన వాస్యాత్ ఉతపూర్వతనతన్నిషేధ సమయానుపాలనేన వేతి విచారణాయాం నిషేధానుపాలనేనైవ భవతీతి నావిదితమేతత్కస్యాపి ॥ నహిసంధ్యాజపాదికం వినాశూద్ర చండాలాది సహవాసపూర్వకం నావాయానశీలా బహుకాల మసంకీర్ణాః భవంతీతివక్తుంశక్యం ॥ సర్వథాపితు యథావర్ణ సంకరాదికం నస్యాత్ యథావాధర్మవిప్లవోనస్యాత్ తథైవ సర్వైరాస్తిక వర్యైర్యతితవ్యం॥ తియుక్తం ॥


"సంకరోనరకాయైవకులఘ్నానాం కులస్యచ॥"
"నబుద్ధిభేదం జనయేత్

ఇతి ఏతేనబహిస్త్రాథయధాఽపీతిసూత్రీయ మాధవాచార్యవివరణమపివాస్మాకం విరుద్ధమితిసూచితం । తస్యవర్ణసాంకర్య ప్రయోజకాఽధర్మావిషయత్వాత్॥ సర్వమనవద్యమితి సూక్ష్మదర్శినోవదతింతి శివం॥

శ్రీవెంకటేశ్వర విద్యాశాలా ప్రథమమహోపాధ్యాయేన
అన న్తకృష్ణశాస్త్రిణా విరచితోఽభ్ధియాన విమర్శ
స్సంపూర్ణః॥



శ్రీ మన్నటరాజో విజయతే.



S. V. N. PRESS, TIRUPATI,—1913.

శుద్ధాఽశుద్ధపత్రికా.

పుట.	పఙ్క్తి.	అశుద్ధం.	శుద్ధం.
2	10	సాధీయాః.	సాధీయాం.
3	18	వెత్యైధు.	వెత్యైధు.
7	18	నమావెశేన.	సమావెశనొద్దెశేన.
8	18	చంద్రోవ.	చంద్రోప.
12	6	లోశతః.	కిన్తు,లోకతః.
12	8	నపన,	నమేవ.
12	20	శాస్త్రిణా.	శాస్త్రిణా.
13	1	ఏపం.	ఏవం,
13	16	మమినాస్త్యైవ.	మపినాస్త్యైవ.
13	19	జ్యోతిశ.	జ్యోతిశ్చ.
15	5	ష్ఠియ.	ష్ఠీయ.
15	6	ష్టిత.	ష్ఠిత.
15	6	గ్ధో॥	గ్ధో
16	4	ప్రాప్త్వం.	ప్రాప్తం.
17	2	ణపి.	ణమపి.
20	9	తొూది	తొూగి.
20	15	యుపతి.	యువతి.
24	10	ప్రొయా.	ప్రౌఢాయా.

పుట.	పఙ్క్తి.	అశుద్ధం.	శుద్ధం.
25	16	నష్టా,	నష్ఠా.
25	18	విధి.	విధీ.
27	12	నానామివ.	నానాముపనీతమాత్రవిషయకత్వమివ.
29	6	పర్జ.	వర్జ.
29	7	చార్తైః	చార్త్యైః
30	9	ఏవన.	ఏవ.
31	20	నిర్వ్యృ.	నిర్వృ.
32	10	కృత్వా.	హుత్వా.
32	12	పచ్ఛ.	వచ్ఛ.
34	2	ద్వితి.	ద్వితీ.
36	6	ప్రాతా.	ప్రాయా.
39	18	వచవ.	వచస.
43	17	శాస్త్రి.	సాస్త్రీ.
44	22	ష్ఠాప్రా,	ష్టాప్రా.
48	15	తత్త్యా.	తత్త్వా.
49	1	సిద్ధ.	సిద్ధ్య.
50	7	వగ.	ఽగ.
51	9	సిద్ద్యా.	సిద్ధ్యా.
52	3	శాస్త్రి.	శాస్త్రీ.
53	10	విష్ఠ,	విన్ద.
54	7	రిస్వా.	రిస్ఫా.

పుట.	పఙ్త్కి.	అశుద్ధం.	శుద్ధం.
54	11	శాన్త్రి.	శాస్త్రి.
56	21	రణా.	రణై.
58	3	ధానా.	ధానాద్వా.
58	6	తవా.	తవ్యా.
58	11	వదచ.	వచన.
58	19	మిప్య.	మవ్య.
60	18	యపపి.	యజపి.
63	11	కధ.	కథం.
64	18	డశ	డశా
68	16	నాసి	నాపి
69	19	వదస	వచన
69	21	ఏతె	ఏవె
69	21	చిథ	చిద
69	23	డత్వ	దృత్వ
70	3	సంద్ర	సంగ్ర
71	6	రన్యం	రస్యం
73	7	ద్వ్యజ	ద్వజ
73	23	పణా	ప్రణా
77	4	నమావా	సమవా
81	2	మాది	మాదీ
83	11	వాగ్ద	వాద్ధ

పుట.	పఙ్త్కి.	అశుద్ధం.	శుద్ధం.
84	19	తినాం	తీనాం
84	22	ధార్భ	దార్భ
85	4	రున్ధ	రుద్ధ
93	21	వంజ	వ్యంజ
100	10	పివాహ	పివివాహ
2	3	విశ్రతి	విప్రతి
5	8	వతితి	వతీతి
5	20	ఘన	ధన
6	8	పిత్య	పీత్య
6	10	ముద్రం	ముద్ర
8	1	గ్యత్స్వ	ర్యత్వ
10	10	ష్వేవస్వర	ష్వేవస్వర
10	13	పప	పవ
12	3	సర	నర
12	4	తాప	తావ
12	8	మర్ధతం	మర్ధితం
12	11	వననం	వచనం
12	16	సర్య	సర్వ
12	19	పలతీ	పతతి
15	21	నస్వ	నస్య
16	5	నిదిష్టా	నిర్దిష్టా



॥ श्री ॥

विध्युक्तवैवाहिक शास्त्रजिज्ञासा.

श्रीमत्कृष्णमतानुयायिना

रघुनाथेनकृता.

कल्यब्दे ४९८३, चित्रभानुवर्षे तुलामासे.

मद्रासाख्यनगरे, मौंटरोडाख्यप्रदेशे.

हिंदुमुद्रालये—मुद्रितं.

शुद्धिपत्रम् ।

पृष्ठ.	पंक्ती.	अशुद्ध.	शुद्ध.
१	४	भासमाना	भासमानः
७	२	पश्चादग्नेद	पश्चादग्नेर्द.
,,	२०	पशात्	पाशात्.
८	५	सुभागा	सुभगा.
,,	१२	पंचद्वृ	पंचपद्वृ.
९	२०	समन त्कर्मेमा.	समनत्कर्मया.
१०	२१	पतीवर्ती	पातिवर्ती.
,,	२४	प्रफर्व्यां	प्रफर्व्यं.
११	१	आभिर्नृणा	आभिर्नृणां.
,,	१०	अतो अस्मः	अतोऽस्मा.
,,	१३	प्रफर्व्यां	प्रफर्व्यं.
,,	१७	रार्त	रात्रं.
१२	१३	शिवनौ	शिवनो.
,,	१६	पत्य	पत्या.
,,	१७	सह	सो.
१३	१५	दा अग्ने	दाग्ने.
,,	१७	विश्वा	विश्वा.
१४	२	यद्दर्दंपती	यद्दंपती.
,,	१५	दुंनरअश्वत्थ	दुंबराश्वत्थ.
,,	१९	शय्येकात्	शयैक्यात्.
१६	९	चथुर्थ्यां	चतुर्थ्यां.
१७	६	आद्रया	आर्द्रया.
१८	८	सापयंन्	सापयन्.
,,	१३	संयोजयंन्....	संयोजयन्.
,,	६	ऊरू	[illegible].

१८	१६	प्रजातातिः	प्रजापतिः
२०	४	द्विशङ्कय·	द्विषङ्कयः
,,	,,	परेतु	परैतु.
,,	१३	मम्रो	मम्रौ.
,,	१६	तेम्रो	तेम्रौ.
२१	१३	उद्वेजायामः	उद्वेजयामः
२४	११	स्तत्पर्या	स्तात्पर्य.
,,	१४	नखान	नखाम.
२५	८	भर्त्रॄ	भर्तॄ.
२८	१५	तिसृणां	तिसॄणां.
३४	८	जुत्व्हा	जुव्ह.
,,	१५	रूपणा	रूपेणा.
,,	१९	जुव्हू	जुहू.
,,	२४	पेवीः	देवीः
३५	५	मनुष्यणां	मनुष्याणां.
,,	१५	निषण्वा	निषण्वा.
३६	२	प्रसित्ध	प्रसिधि.
३७	५	चित्याव	चित्यव.
,,	८	आवरो	अवरो.
३८	६	मानानू	मानान.
,,	,,	संघर्षयित्रीन्	संघर्षयितॄन्.
,,	९	जरदद्दा	जरद्दा.
४२	६	विष्टण्वावेशी	विष्ण्वावेशी.
४६	६	व्यासः	व्यासाः
४७	३	अबादि	आबादि.
४८	१	एततूनिषेधस्य	एतन्निषेधस्य.
,,	१८	शास्त्रीयेमेव	शास्त्रीयमेव.
५१	६	गार्हस्थे	गार्हस्थ्ये.

ॐ एकमेवा द्वितीयं ब्रम्हविजयते.



१. अथ वक्ष्यामः परिणामं विवाहविषयाणां कलावपि शास्त्रप्रमाणभूताना श्रुतिस्मृति पुराणानां जिज्ञासायाः ।

२. रागतः प्राप्तत्वात् विवाहविषयकं शास्त्र नापूर्वविधिः किंतु नियमविधित्वेन भासमाना परिसंख्या विधिः । अतः विवाहः पुरुषाणां वा स्त्रीणा वा ऐच्छिकः । अत्रोदाहरंति ।

मनुः अध्याये ५ श्लोके ५६.

" न मांसभक्षणे दोषो न मद्ये न च मैथुने ।
प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला " ॥

चमसश्च—भाग० ए० स्कं० अ० ५ श्लो० ११.

" लोके व्यवायामिषमद्यसेवा नित्यास्तु जंतो र्न हि तत्र चोदना ।
व्यवस्थिति स्तेषु विवाहयज्ञ सुराग्रहैरासु निवृत्तिरिष्टा " ॥

३. ब्रम्हचारिणा विवाहः ऐच्छिक इति वदंति स्मृतयः पुराणानिच ।
तथाहि—

स्मृतिपुराणानि	अध्याय संख्या	श्लोक संख्या	धर्मशास्त्रसंग्रहस्यपत्र संख्या
मनुस्मृतौ	१	२४३।२४४।२४९	,,
विष्णु	२८	,,	११३
लघुहारीत	३	,,	१८२
याज्ञवल्क्य	१	४९	४१४
उशना........	३	,,	५१७
व्यास	१	,,	३२४
दक्ष	१	,,	३८३
गौतम	३	,,	४०६
वसिष्ठ	७	,,	४७०
विष्णुपुराणे तृतीये अंशे..	१०	१३,१४,१५	,,
भागवतसप्तमस्कंधे	१२	१४	,,
एकादशस्कंधे.	१७	३०,३७	,,
मार्कंडेयपुराणे.	२८	१५,१६	,,
अग्निपुराणे....	१५३	१७	,,

५. दृश्यते स्त्रीणां विवाहः ऐच्छिक इति उदाहरिष्यमाणैः स्मृतिपुराणवचनैः ।

श्रीभागवतचतुर्थस्कंधे अ० १. श्लो० ६३.

"तेभ्यो दधारकन्ये द्वे वयुनां धारिणीं स्वधा ।
उभे ते ब्रह्मवादिन्यौ ज्ञानविज्ञानपारगे" ॥

श्रीधरः—"तयोस्तु संततिर्नाभवत् जीवन्मुक्तत्वात्"

वीरराघवः—"सनकादिवत् ऊर्ध्वरेतस्के ते इति भावः"

मनु० अ० २ श्लो० ४.

" अकामस्य क्रिया काचित् दृश्यते नेह कर्हिचित् " ।

वसिष्ठ संहितायां अ० १७ प० ४८९.

" यावच्च कन्यामृतवः स्पृशंति तुल्यैः सकामामभियाच्यमानां ।
भ्रूणानि तावंति हतानि ताभ्यां मातापितृभ्यामिति धर्मवादः "॥

श्रीभागवते तृतीयस्कंधे अ० २१ श्लो० २७ " मृगयतीं पतिं "
चतु० अ० १ श्लो० ६ 'कामयानां' **वीरराघवः** 'पतिं कामयमानां'
पूर्वोक्तस्कंधे अ० २२ श्लो० ९ " अन्विच्छति पतिं युक्तं "
पराशरमाधवीये " द्विविधाः स्त्रियः ब्रह्मवादिन्यः सद्योवध्वश्च "
निष्कामाः सकामाश्चेति भावः

९. यदि विवाहः ऐच्छिकः, तर्हि विवाहस्य मुख्यकालः बधूवराणां प्रबुद्धदशायामेव भवितव्यः। स कालः वराणां षोडशवर्षः बधूनां तु रजस्वलात्वप्राप्तिः । अयंकालः दशवर्षानंतरीयः । अत्रोदाहरंति ।

पराशर० अ० ७ प० २४.

" अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी ।
दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥
प्राप्ते तु द्वादशे वर्षे यः कन्यां न प्रयच्छति ।
× × ×
+ नरकं यांति दृष्ट्वा कन्यां रजस्वलां " ॥

यम० प० ५६२ श्लो० २२.

" प्राप्ते द्वादशमे वर्षे यः कन्यां न प्रयच्छति ।
मासि मासि रजस्तस्याः पिता पिबति शोणितं " ॥

वृद्धगौतम० अ० ४ प० ६१६.

" श्रीभगवानुवाच ।

कन्याचाऽक्षतयोनिः स्यात् कुलीना पितृमातृतः

ब्राह्मादिषु विवाहेषु परिणीता यथाविधि ।

सा प्रशस्ता वरारोहा शुद्धयोनिः प्रशस्यते " ॥

वसिष्ठ० अ० ८ प० ४७१. " अस्पृष्टमैथुनां "

अ० १७ प० ४८०..

" प्रयच्छेन्नग्निकां कन्यां ऋतुकालभयात्पिता " ।

नारदः— " दीर्घकुत्सितरोगार्ता व्यंगा संस्पृष्टमैथुना ।

दुष्टान्यगतभावा च कन्यादोषाः प्रकीर्तिताः " ॥

याज्ञवल्क्य० अ० १ प० ४१४ श्लो० ५२.

" अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् । अनन्यपूर्विकां " ॥

आश्वलायन गृह्य सूत्रे १–५–३.

बुद्धिरूपशील लक्षणसंपन्नां मरोगामुपयच्छेत.

गौतमः अ० १८ प० ४७३. " प्रागतोरप्रयच्छन् दोषी "

संवर्त० प० ५८९–५९०.

" अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी ।

दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥

माता चैव पिता चैव ज्येष्ठो भ्राता तथैव च ।

त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलां ॥

तस्माद्विवाहयेत् कन्या यावन्नर्तुमती भवेत् ।

विवाहोष्टमवर्षायाः कन्यायास्तु प्रशस्यते " (!) ॥

भारते आनुशासनिके अ० ४४ भीष्मः

त्रीणि वर्षाण्युदीक्षेत कन्या ऋतुमती सती ।

चतुर्थेन्वथ संप्राप्ते स्वयं भर्तारं मर्जयेत् ॥
प्रजा नहीयते तस्याः रातेश्च भरतर्षभ ।
अतोन्यथा वर्तमाना भवेद्वाच्या प्रजापतेः ॥

मनु० आपद्धर्मे अ० ९. श्लो० ९०-९१.

" त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती ।
ऊर्ध्वं तु कालादेतस्मात् विंदेत सदृशं पतिं ॥
अदीयमाना भर्त्तारमधिगच्छेद्यदि स्वयं ।
नैनः किंचिदवाप्नोति न च यं साधिगच्छति " ॥

विष्णु० अ० २४ प० ११०.

" ऋतुत्रयमुपास्यैव कन्या कुर्यात्स्वयंवरं ।
ऋतुत्रयेव्यतीते तु प्रभवत्यात्मनस्सदा ॥
पितृवेश्मनि या कन्या रजः पश्यत्यसंस्कृता ।
सा कन्या वृषली ज्ञेया हरंस्ता न विदुष्यति " ॥

याज्ञवल्क्य० अ० १ प० ४१९ श्लो० ६४.

" अप्रयच्छन समाप्नोति भ्रूणहत्यामृतावृतौ ।
गम्यं त्वभावे दातृणां कन्या कुर्यात्स्वयंवरं " ॥

गौतम० प० ४७२ " त्रीन् कुमार्यृतूनतीत्य स्वयं युज्येत "

बृहत्पराशर० अ० ४ प० ११७.

" जात्यादिगुणयुक्ताय पुंस्त्वे सति वराय च ।
कन्यालंकृत्य दीयेत विवाहो वेधसः स तु ॥
रेतो मज्जति यस्यास्तु सूत्रंच ह्लादिकेनिलं ।
पुमान्स्यात् लक्षणैरेतैर्विपरीतैश्च षंडकः " ॥

आ० गृ० सू० १-१८-२ " षोडशेवर्षे "

दक्ष० अ० १ प० ३८३. "अप्राप्त व्यवहारो सौयावत्षोडशवार्षिकः"

आ० गृ० सू० १-५-२. "बुद्धिमते कन्यां प्रयच्छेत्"

६. अतः वरस्य षोडशवर्षात्पूर्व वध्वाः दशवर्षात्पूर्वं विवाहो न कर्तव्यः इति साधारणो विधिः । किंच कन्यायाः दानकालस्तु तस्याः द्वादशवर्षानंतरः गौणः निद्यश्च. तथापिकन्यायाः ऋतुत्रयपर्यंतं वर्तते तदनंतर सा स्वय आत्मान दातु समर्था भवति ॥

७. विवाहो नाम कन्यादानोत्तरकालीनः अथवा स्वयस्वस्यदानोत्तरकालीनो वा वरवध्वोः यस्समयः सभवसहितः सएव। अतःपरं वधू. भर्तुः सगोत्रा सपिडा ससूतका भवति-अत्रोदाहरंति ।

ऋग्वेदे मंडले १० सूक्ते ८५. "सायनः, विवाहे कन्याहस्तग्रहणे गृभ्णामीत्येषा" सूत्रितन्च--आ० गृ० सू० १-७-३.

गृभ्णामिते सौभगत्वाय हस्त मया पत्याजर दष्टिर्यथासः ।
भगोअर्यमासवितापुरंधिर्मह्यंत्वा दुर्गार्हपत्यायदेवाः ॥ ३६ ॥
तांपूषञ्छिवतममिरयस्वयस्यां बीज मनुष्या ३ वपंति ।
यानऊरूउशती विश्रयाते यस्या मुशतः प्रहरामशेप ॥३७॥

हे वधु ते तव हस्तं गृभ्णामि गृण्हामि किमर्थं सौभगत्वाय सौभाग्याय मया पत्या त्व यथा जरदष्टिः प्राप्तवार्धक्यासी भवासि भगोऽर्यमा सविता पुरंधिः पूषा एतेदेवास्त्वा त्वां मह्य अदुः दत्तवंतः किमर्थं गार्हपत्याय यथाहं गृहपतिः स्यामिति ॥ ३६ ॥

हे पूषन् पोषक एतन्नामकदेव शिवतमामत्यंतमंगलभूतां तामेरयस्व आईरय सर्वतः प्रेरय यस्यामूरौत्रीजंरेतोलक्षण मनुष्या वपंत्यादधते यानोस्माकमूरू उशती कामयमाना विश्रयाते यस्यामूरौ उशंतः कामयमाना वयं शेपं स्पर्शनयोग्यं पुंस्प्रजननं प्रहराम उरौव्यंजन संबंधं करवामेत्यर्थः ॥ ३७ ॥

आ० गृ० सू० १–७–३ प० २६.

पश्चादग्नेदृषदश्मानं प्रतिष्ठाप्योत्तर पुरस्तादुदकुंभं समन्वारब्धा-यांहुत्वातिष्टन् प्रत्यङ्मुखः प्राङ्मुख्या आसीनाया गृण्हामिते सौभगत्वाय हस्तमित्यंगुष्टमेव गृण्हीयाद्यदिकामयीतपुमांस एवमेपुत्राजायेरन्निति ॥३॥

आ० गृ० सू० १–७–६ प० २८.

सू० ६. प्रदक्षिण मग्निमुदकुंभचात्रिःपरिणयन्जपाति अमोहम-स्मिसात्व सात्वमस्य मोह द्यौरहं पृथिवीत्व सामाह मृकूत्वंतावेह विवहा-वहै प्रजां प्रजनयावहै संप्रियौरोचिष्णू सुमनस्य मानौ जीवेवश-रदःशत मिति ॥

सू० ७. परिणीय परिणीयाश्मानमारोहयती ममश्मान मारोहा-श्मेवत्व स्थिराभव । सहस्व पृतनायतोभितिष्ट पृतन्यत इति ॥

सू० १३. अर्यमण नुदेव कन्या अग्निमयक्षत-सइमा देवो अर्यमा प्रेतो मुचातु नामुतःस्वाहा--वरुण नुदेवं कन्या अग्निमयक्षत-सइमां देवो वरुण. प्रेतो मुचातु नामुतः स्वाहा--पूषण नुदेव कन्या अग्निमयक्षत सइमांदेवः पूषाप्रेतो मुचातु नामुतः स्वाहेत्यविच्छिदत्यंजलिंस्रुवे जु-हुयात् ॥

ऋग्वेद मं० १० सू० ८५ ऋक् २४.

प्रत्वामुंचामि वरुणस्य पाशाद्ये नत्वाबध्नात्सविता सुशेवः ।
ऋतस्य योनौ सुकृतस्य लोके रिष्टांत्वा सहपत्यादधामि ॥

सायनः—जातं प्राणिनं सवित्रा प्रेरितो वरुणः आत्मपाशैः बध्नाति तस्माद्वरुणस्य पशात् हे वधु त्वात्वां प्रमुंचामि येन त्वात्वां सविता वरुणस्य प्रेरकः सुशेवाः सुखोऽबध्नात् वंधनं कृतवान् । तां मोचयित्वा चर्तस्य यज्ञस्य योनौ स्थाने यागभूमौ सुकृ-तस्य लोके कर्मक्षेत्रे भूलोके चारिष्टामहिंसितां त्वां पुत्राद्यर्थं पत्या सहदधामि । स्थापयामि ॥ २४ ॥

आ० गृ० सू० १.७.

ऊर्णास्तुके केशपक्षयोर्बध्ने भवतः । प्रत्वामुंचामिवरुणस्यपाशादिति ॥

ऋग्वेद मं० १० सू० ८५ ऋक् २५.

प्रेतो मुंचामि नामुतः सुबद्धा ममुतस्करं ।
यथेयमिं द्रमीढ्व सुपुत्रासुभागासति ॥

सायनः—इतः पितृकुलात् प्रमुचामि त्वां नामुतो भर्तृगृहा त्प्रमुंचामि अमुतो भर्तृगृहे सुबद्धां करं यथेयंकन्यका हे इंद्रमीढ्वः सेक्तः सुपुत्रासुभगा सुष्टुभाग्या वासति भवति तथाकुरु ॥ २५ ॥

आ० गृ० सू० १.८. " उत्तरामुत्तरया. "

आ० गृ० सू० १-१९.

अथैनामपराजितायां दिशिसप्तपदान्यभ्युत्क्रामयतीषएकपदीूर्जे द्वि-पदीराय स्पोषाय त्रिपदी मायोभव्याय चतुष्पदी प्रजाभ्यः पचढृतुभ्यः षटपदीसखा सप्तपदीभव सामामनुव्रताभवपुत्रान्विदावहै बहूंस्तेसंतुज-रदष्टयइति ।

सू० २७. ध्रुवमरुंधतीं सप्तऋषी नितिदृष्ट्वा वाचं विसृजेत जीव पत्नीं प्रजां विंदेयेति ।

सायनः—विवाहानंतरभाविनिप्रयाणे पृषात्वेतो नयत्वित्यनयारथादि यानमारो हयेत् । सूत्रितच—आ० गृ० सू० १-८-१.

ऋग्वेदे मं० १० सू० ८५ ऋ० २६.

पूषात्वेतोनयतु हस्त गृह्याश्विनात्वाप्रवहतां रथेन । गृहान्गच्छ गृह-पत्नीयथासो वशिनीत्वं विदथमावदासि ।

सायनः—गृहान् भर्तृ सबंधिनो गच्छत्व गृहपत्नी यथासोभवसि, स्वग-

हस्वामिनी भवसि, वशिनी सर्वेषां गृहागतानां वशंप्रापयित्री पत्युर्वशे वर्तमानावा, विदथ पतिगृहमावदासि, आवदसि, गृहस्थितं भृत्यादि जनमावद ।

आ० गृ० सू० १-८-१.

प्रयाण उपपद्यमाने पूषात्वेतो नयतु हस्तगृह्येति यानमारोहयेत् ।

सायनः—विवाह होमा ननरं स्वगृह गंतव्यं ।

सायनः—इहप्रिय मित्येषा वध्वा गृहप्रवेशिनी । सुत्रितंच--आ० गृ० सू० १-८-८.

ऋग्वेदे मं० १० सू० ८५ ऋ०.

इहप्रियं प्रजयाते समृध्यतामस्मिन्गृहे गार्हपत्याय जागृहि ॥
एनापत्यातन्वा १ ससृजस्वा थाजिव्रीविदथमावदाथः ॥ २७॥

सायनः—हे वधूः ते तवास्मिप्रतिकुले प्रियं प्रजयासहसमृध्यतां-अस्मिन् गृहेगार्हपत्याय गृहपतित्वाय जागृहि-वुध्यस्व-एनानेन पत्या सहतन्वं स्वीयं शरीरं ससृजस्व संसृष्टाभव अधाऽथजिव्री जीर्णौजायापती युवां विदथं गृहमा वदाथः आभिमूख्येन वदतं ।

आ० गृ० सू० १-८-८. इह प्रियप्रजयाते समृध्यता मितिगृहं प्रवेशयेत्.

सायनः—गृहप्रवेशआनः प्रजां जनयत्वि त्याद्याश्च तस्रो होमार्थाः । सूत्रितंच--आ० गृ० सू० १-८-९.

ऋग्वेदे मं० १० सू० ८५.

आनः प्रजांजनयतु प्रजापति राजरसायसमन त्कर्यमा ।
अदुर्मंगलीः पतिलोकमाविशशंन्नोभवाद्विपदेशं चतुष्पदे॥ ४३॥
अघोर चक्षुरपतिघ्न्येधिशिवा पशुभ्यः सुमनाः सुवर्चाः ।
वीरसूर्देवकामास्योनाशंन्नो भवाद्विपदेशंचतुष्पदे ॥ ४४ ॥

संराज्ञीश्वशुरे भवसंराज्ञीश्वश्र्वां भव।
ननांदरि संराज्ञी भवसराज्ञी अधिदेवृषु ॥ ४५ ॥
समंजंतु विश्वेदेवाः समापो हृदयानिनौ।
संमातरिश्वा संधाता समुदेष्ट्री दधातुनौ ॥ ४६ ॥

सायनः—प्रजापतिर्देवो नोऽस्माकं प्रजामाजनयतु अर्यमा चाजरसाय जरापर्यतं जीवनायसमनक्तु संगमयतु सा त्व अदुर्मंगलीः दुर्मंगलरहिता सुमंगली + + सती पतिलोकं पतिसमीप माविश प्राप्नुहि नो अस्माकं द्विपदेशंभव तथाचशं चतुष्पदे भव ॥ ४३ ॥

हे वधुत्वं अघोरचक्षुः क्रोधादभयंकरचक्षुः एधि भव तथाऽपतिघ्नीभव तथा पशुभ्यः शिवाहितकरीभव सुमनाः सुवर्च्चाश्च भव वीरसूःपुत्राणामेव प्रसवित्री देवकामास्योना सुखकरीचभव ॥ ४४ ॥

हे वधु श्वशुरादिषुत्वं संराज्ञीभव देवृषु देवरेष्वित्यर्थः॥४५॥

आ० गृ० सू० १–८–९.

विवाहाग्नि मुपसमाधाय पश्चाद स्यानडुहं चर्मास्तीर्य प्राग्ग्रीव मुत्तर लोमतस्मिन्नुपविष्टायां समन्वारब्धायां आनःप्रजां जनयतु प्रजापति रितिचतसृभिः प्रत्यृचंहुत्वा समजंतु विश्वेदेवा इतिदध्नः प्राश्य प्रतिप्रयच्छेदाज्यशेषेण वानक्तिहृदये।

ऋग्वेदे मं० १० सू० ८५ ऋ०.

उदीर्ष्वातः पतीवतीह्ये ३ षाविश्वावसुं नमसागीर्भिरीळे।
अन्यामिच्छपितृषदंव्यक्तां सते भागोजनुषातस्यविद्धि ॥२१॥
उदीर्ष्वाऽतो विश्वावसो नमसेळामहेत्वा।
अन्यामिच्छप्रफर्व्यां १ संजायां पत्यासृज ॥ २२ ॥

सायनः—आभिर्नृणा विवाहःस्तूयते हे विश्वावसो अतःस्थानात्कन्या समीपादुदीर्ष्व उत्तिष्ट एषा कन्यापतिवती हि संजाता अत-उदीर्ष्वेतिवाऽतः शद्बो योज्यः विश्वावसुमेतन्नामानं गंधर्वं नमसा नमस्कारेणगीर्भिः स्तुतिभिश्चेळे स्तौमितर्ह्येनां विहाय कां स्वीकरोमीति यदिब्रूषेतर्ह्यन्यां पितृषदंपितृकुले-स्थितां व्यक्तामनूढेति परिस्फुटां विगतां जनांवा स्तनो द्गमादिराहित्येनाऽप्रौढामित्यर्थः स तादृशः पदार्थः तेतवभागः कल्पितः तस्य त भाग वित्धिजानीहि जनुषा जन्मनाल भस्वेत्यर्थः ॥ २१ ॥

अतो अस्माच्छयनात्धेविश्वावसो कन्यास्वामिन् गंधर्व उदीर्ष्व उद्गच्छ + विश्वावसुर्नामगंधर्वः कन्यानामधि पतिर्यतः । ऊभामितेनकन्यामितिहि मंत्रः स तादृश देवत्वां नमसानमस्कारेणेळामहेस्तुमः सत्वमन्यां प्रफर्व्यां वृह्मि-तत्वां कन्यामिच्छ जायांमां पत्यासह पुनःसंसृज ॥ २२ ॥

आ० गृ० सू० १-८.

अक्षारलवणाशिनौ ब्रह्मचारिणा वलंकुर्वाणावधः शायिनौस्यातां ॥ १० ॥

अतऊर्ध्वं त्रिरातं द्वादशरात्रं ॥ ११ ॥

भाष्यं—अतोगृह प्रवेशनीय होमादूर्ध्वं त्रिरात्रं द्वादशरात्रं वानियतौ स्यातां ॥ ११ ॥

आ० गृ० सू० १-८-१२. " संवत्सरं वैकऋषिर्जायत इति " ।

भाष्यं—संवत्सरं वानियतौ स्यातां एकऋषिकल्पः पुत्रो जायते इति कृत्वा । अन्येत्वाहुः व्रतांते एकऋषिस्संपद्यते पितृगोत्रं विहाय पतिगोत्रं भजत इत्यर्थः ॥ १२ ॥

आ० गृ० सू० १-८-१३.

चरितव्रतः सूर्याविदे वधूवस्त्रं दद्यात् ॥ १३ ॥

ऋग्वेदे मं० १० सू० ८५. "सत्येनोत्त भितेति सूक्तं द्रष्टव्यं"।

आ० गृ० सू० १-८.

अन्न ब्राह्मणेभ्यः ॥ १४ ॥ अथस्वस्त्ययन वाचयीत ॥ १५ ॥

आ० गृ० सू० १-९-१. .

पाणिग्रहणादिगृह्य परिचरेत्स्वय पत्न्यपिवा पुत्रः कुमार्यतेवासीवा ॥ १ ॥

यजुःशाखायां—अनुक्रमणिकायां. प० १६२.

तयासह दर्भेष्वासीनः प्राणानायम्य आवाभ्यां कर्माणिकर्तव्यानि प्रजाश्च उत्पादयितव्याः पत्न्यर्थं पुनः प्राणानायम्य-आवाभ्याकर्माणि कर्तव्यानि प्रजाश्चोत्पादयितव्याः ॥ इति पत्नीवाचयति । .

\+ \+ \+

प० १६४. स्वस्यदक्षिण हस्तेन तस्याः दक्षिण हस्तंगृहीत्वा पूषात्वे तोनयतु हस्त गृह्याश्विनौत्वा प्रवहनांरथेन । गृहान्गच्छ गृहपत्नी यथासो-वशिनीत्व विदथमावदासि ॥ इति अग्नेः अभिमुखमानीय ।

\+ \+ \+

तस्या उत्तान सांगुष्टं दक्षिणं हस्त अर्वाचीनेनस्वदक्षिण हस्तेन-॥ गृभ्णामिते सुप्रजास्त्वाय हस्तं मयापत्यजरदष्टिर्यथासः । भगो अर्यमा सविता पुरंधिः मह्यंत्वा दुर्गार्हपत्यायदेवाः । तेहपूर्वेजनासहयत्र पूर्ववहो-हिताः । मूर्धन्वानूयत्र सौभ्रवः पूर्वोदेवेभ्य आतपत् । सरस्वति प्रेदमव सुभगे वाजिनीवति तान्त्वाविश्वस्य भूतस्य प्रगायामस्यग्रतः । यएति प्रदिशस्सर्वादिशोनु पवमानः ॥ इति चतसृभिः हस्त गृहीत्वा तयासह उत्थाय अग्नेरुत्तरतो गत्वा तत आरभ्य प्रागायतनानिउदगाय तनानिवासप्त पदानि क्रमयति-एकमिष इत्यादिभिःसप्तभिः ॥

अ० १६५–तै० ब्रा० कांडे ३ प० १४६ भाष्ये प० ५१३.

एकमिषे विष्णुस्त्वान्वेतु द्वेऊर्जे विष्णु० त्रीणिव्रताय विष्णु० चत्वारिमायोभवाय विष्णु० पंचपशुभ्यो वि० षड्रायस्पोषाय वि० सप्त सप्तभ्यो होत्राभ्यो वि० इतिसप्तभिः प्रतिमंत्रं दक्षिणेन पदाप्रक्रमय्य सप्तमेपदे निहिते सखा सप्तपदाभव सखायः सप्तपदा अभूमसख्यंते गमेयं सख्यात्ते मायोषं सख्यान्मेमायोष्ठाः समयावसंकल्पावहैसंप्रियौरोचिष्णू सुमनस्यमानौ इषमूर्जमभिसंवसानौसन्नौ मनागुं सि संव्रता समुचित्तान्या करं । सात्वमस्यमूहममूहमस्मि सात्वंद्योरहं पृथिवीत्वं रेतो हं रेतोभृत्त्वं मनोहमस्मिवाक्त्वं सामाहमस्मिऋच्त्वं सामामनुव्रताभवपुंसे पुत्राय वेत्तवैश्रियै पुत्राय वेत्तवा एहिसूनृते-इति जापित्वा-अग्निप्रदक्षिणंकृत्वा ॥

*   *   *   *   *

अ० १६८. आतिष्ठेममश्मानमश्मेवत्वं स्थिराभव । अभितिष्ठ पृतन्यतः सहस्व पृतनायतः ॥

*   *   *   *   *

वध्वंजलिं गृहीत्वातेन देवतीर्थेन ॥ इयंनार्युपब्रूते कुल्पान्यावपंतिका । दीर्घायुरस्तु मेपतिर्जीवातु शरदःशतं ॥ स्वाहा ॥

*   *   *   *   *

तुभ्यमग्रेपर्यवहंत्सूर्यांवहतुनासह । पुनःपतिभ्योजायां दा अग्ने प्रजयासह । पुनः पत्नीमग्नि रदा दायुषासह वर्चसा । दीर्घायुरस्यायःपतिःसएतु शरदःशतं । विश्वाउतत्वयावयं धाराउदन्याइव । अतिगाहेमहिद्विषः ॥ तयासह अग्निप्रदक्षिण कृत्वा ।

*   *   *   *   *

अर्यमणं नुदेवं कन्या अग्निमयक्षत । सइमां देवोअध्वरः प्रेतोमुंचाति नामुतः सुबद्धाममुतस्करत् ॥ स्वाहा ॥

*   *   *   *   *

अ० १.६९. त्वमर्यमा भवसि यत्कनीनां नामस्वधावत्स्वर्यं बिभर्षि । अंजंतिवृक्षं सुधितं नगोभिर्यद्दंपतीसमनसाकृणोषि ॥ स्वाहा ।

* * * * *

अ० १.७०. योगे योगे तवस्तरं वाजे वाजे हवामहे । सखाय इंद्र मूतये ॥ सुकिंशुकंशल्मलिं विश्वरूपं हिरण्यवर्णं सुवृतं सुचक्रं । आरोह वध्वमृतस्यलोकं स्योनं पत्येवहतुं कृणुष्व ॥

* * * * *

संम्राज्ञीश्वशुरेभव संम्राज्ञी श्वश्र्वांभव । ननांदरि संम्राज्ञीभव संम्राज्ञी अधिदेवृषु ॥

प्रवेश होमे प० १.७४.

ध्रुवैधि पोष्यामयिमह्यंत्वा दाद्बृहस्पतिः ।
मयापत्या प्रजावती सजीव शरदःशत ॥ स्वाहा ।

* * * * *

इहप्रियं प्रजयाते समृध्यता मस्मिन्गृहे गार्हपत्याय जागृहि । एना पत्यात न्व ‿ संसृजस्वा थाजीव्री विदथमावदासि ॥

भाष्ये हरदत्तीये—कामसिध्दिमाह अनेनपत्या मया तन्वं तवशरीर ससृजस्व । संभोगकाले एव चिरकाल मनुभव ॥

प० १.७८. नैय्यग्रोधौदुंबरअश्वत्थप्लाक्षेषु अन्यतमदडंगंध पुष्पालंकृतंवाससा सूत्रेण वापरिवेष्टितं निधायतस्मिन्विश्वावसुंगंधर्वं मावाह्य अभ्यर्च्य दंपत्योःशयनकटे तयोर्मध्येनिदध्यात् ॥

* * * * *

आपस्तंभ सू०.—त्रिरात्र मुभयोरधःशय्याब्रह्मचर्यं क्षार लवण वर्जनंच—**सुदर्शन भाष्ये** ॥ शय्यैकात् दुर्वारमपि मैथुनं अतिप्रयत्नेन वर्जनीयं इत्येवमर्थं तान्निषेधः ॥

सू०–तयोः शय्यामंतरेण दंडोगंधलिप्तो वाससासूत्रेणवापरिवीत-स्तिष्ठति–भा०–तस्मिंश्चगंधर्वो विश्वावसुः भावयितव्यः ॥

सू०–तं चतुर्थ्यामपररात्र उत्तराभ्या मुदीर्ष्वात इति द्वाभ्या मुत्थाप्य प्रक्षाल्यनिधायाग्नेरुपसमाधानादिआज्यभागांते अन्वारब्धाया मग्ने प्रायश्चित्त इति प्रतिमंत्रं सप्ताहुती र्हुत्वाजयादि प्रतिपद्यते परिषेचनांतं कृत्वा अपरेणाग्निं प्राचीमुपवेश्य तस्याः शिरस्याज्यशेषात् भूस्वाहेति व्याहृती-भिरोंकारचतुर्थीभिरानीयापश्यंत्वेति द्वाभ्यां यथा लिंगं मिथः समीक्ष्य-समंजंत्वित्याज्यशेषेण हृदयदेशौसंमृज्य प्रजापते तन्वंमइति ति स्रोजापित्वा ॥ आरोहोरु मुपवर्हस्व बाहुं परिष्वजस्वजायां सुमनस्यमानः । तस्यां पुष्यतं मिथुनौसयोनीत्र्व्हीं प्रजांजनयंतौ सरेतसा ॥ आर्द्रयारण्या यत्रामंथत्पुरुषं पुरुषेणशक्रः ॥ तदेतौ मिथुनौसयोनी प्रजया मृतेनेह-गच्छतं ॥ अहंगर्भ मदधामोषधीष्वहं विश्वेषु भुवनेष्वंतः ॥ अहं प्रजा-अजनयं पितॄणामहं जनिभ्योअवरीषु पुत्रान् ॥ पुत्रिणेमा कुमारिणा विश्वमायुःर्व्यश्नुतं––उभाहिरण्यपेशसावीतिहोत्राकृतद्वसु ॥ दशस्यंत्वा मृतायकं शमूधोरोमशं हथोदेवेषु कृणुतादुवः ॥ इति–समावेशने जपेत्–भा० समावेशनं–वध्वामैथुनार्थं शयनं ऋतुसमावेशन इत्यृतुलिंगात् ।

मंत्रप्रश्न प० ११.

विष्णुर्योनिं कल्पयतुत्वष्टारूपाणिपिंशतु । आसिंचतु प्रजापतिर्धा तागर्भं दधातुते ॥ गर्भंधेहिसिनीवालिगर्भंधेहि सरस्वति । गर्भंते अश्विनौ देवावाधत्तां पुष्करस्रजा ॥ हिरण्ययीअरणीयन्निर्मंथतोश्विना तंतेगर्भं हवामहे । दशमेमासिसूतवे ॥ यथेयं पृथिवीमही तिष्ठंतीगर्भमादधे । एवं

त्वंगर्भमाधत्स्व दशमेमासिसूतवे ॥ यथा पृथिव्यग्नि गर्भाद्यौर्यथेंद्रेणगर्भिणी । वायुर्यथा दिशांगर्भ एवंगर्भं दधामिते ॥ विष्णोश्रेष्ठेन रूपेणास्यां नार्यां-गवीन्यां ॥ पुमांसं गर्भमाधेहि दशमेमासिसूतवे । नेजमेष परापत सुपुत्रः पुनरापत अस्यैमे पुत्रकामायै गर्भमाधेहि यःपुमान् ॥ व्यस्ययोनिं प्रतिरे-तोगृहाण ॥ पुमान् पुत्रोधीयतां गर्भेअतः तं माता दशमासो बिभर्तु । सजायतां वीर तमास्वानांम आते गर्भोयोनिमेतु पुमान् बाणइवेषुधिं ॥ आवीरोजायतां पुत्रस्ते दशमास्यः ॥ १३ ॥

अनु० १७८, १७९, १८०, १८१, १८२.

चतुर्थ्यां रात्र्यां अंत्ययामे * * * आवयोः विवाहशेषहोमंकरिष्ये इति संकल्प्य * * * अपश्यंत्वा मनसाचे कितानंतपसोजातं तपसो-विभूतं ॥ इहप्रजामिहरयिंरराणप्रजायस्व प्रजया पुत्रकाम ॥ इतिपत्नी पतिंसमीक्षेत ॥ अपश्यंत्वा मनसादीध्यानां स्वायांतनूं ऋत्वियेना-धमानां ॥ उपमामुच्चा युवतिर्बभूयाः प्रजायस्व प्रजयापुत्रकामे ॥ इतिपतिः पत्नींसमीक्षेत ।

* * * * *

समंजंतु विश्वेदेवाः समापो हृदयानिनौ ॥ संमातरिश्वासं धातासमुदेष्ट्री दिदेष्टुनौ ॥ इतितयोः हृदयदेशौ युगपत्संमृज्य । प्रजापते तन्वंमे जुषस्व-त्वष्टर्देवेभिः सहसा मइंद्र ॥ विश्वैर्देवैरातिभिः संरराणःपुंसांबहूनांमातरः स्याम ॥ आनः प्रजांजनयतुप्रजापति राजरसायसमनक्त्वर्यमा ॥ अदुर्मंगलीः पतिलोकमाविशशंन्न एधिद्विपदेशं चतुःष्पदे ॥ तां पूषंच्छिवतमा मेरयस्व-यस्यां बीजंमनुष्यावपंति ॥ यान उरूउशती विश्रयाते यस्यामुशंतः

प्रहरेमशेफं ॥ इतिजपेत्—प्राणानायम्य फलदान तांबूलदानानि करिष्ये इति संकल्प्य तांबूलचर्वणंकृत्वा * * तद्रात्रौ अन्यस्यां वारात्रौ उपलिप्तं गधपुष्पधूपवासितं घृतदीप दीपितं स्वास्तरणतल्पसंयुक्तं गृहंपत्न्यासह प्रविश्य प्राणानायम्य समावेशनं करिष्ये इति संकल्प्य ॥ आरोहोरु मुपबर्हस्वबाहुं परिष्वजस्वजायां सुमनस्यमानः ॥ तस्यांपुष्यतं मिथुनौ सयोनी बव्हींप्रजां जनयंतौ सरेतसा ॥ आर्द्रयारण्या यत्रामंथ पुरुषं पुरुषेणशक्र. ॥ तदेतौ मिथुनौसयोनी प्रजयामृतेनेहगच्छतं ॥ अहं गर्भमदधामोपधीष्वहं विश्वेषुभुवनेष्वतः ॥ अहंप्रजा अजनयं पितॄणा महंजरिभ्यो अवरीषुपुत्रान् ॥ पुत्रिणेमाकुमारिणा विश्वमायुर्व्यश्नुतं ॥ उभाहिरण्यपेशसावीतिहोत्राकृतद्रसु ॥ दशस्य न्त्वामृताय कंशमूधो होमशांहथोदेवेषु कृणुतोदुवः ॥ इतिजपित्वातयामह संविशेत् ॥

सुदर्शन भाष्ये—समावेशन वध्वा मैथुनार्थं शयनं ॥

सुधीविलोचने.

अनेक भर्तृकायाः प्रथमभर्तृगोत्रेण तेनव्यवायेसति ॥
अक्षत योन्या भर्त्रंतर गोत्रेण ॥ ऋष्यश्रृंगः ॥
स्त्रीणां आद्यस्यैवः भर्तुः य द्गोत्र तेन निर्वपेत् ॥
यदिन्वक्षतयोनिःस्यात् पतिमन्य समाश्रिता ॥
तद्गोत्रेण तयादेयं पिंडं श्राद्धं तथोदकं ॥

तै० ब्रा० २ कां० पृ० ५६८.

अथ त्रयोदशीमाह.—सकूतीमिंद्रसच्युतिं । सच्युतिंजघनच्युतिं । कनात्काभांन्नआभर । प्रायप्स्यान्निवसकृथ्यौ ॥ इति ॥

सायनः—हे इंद्र कनात्काभां कनकबद्धासमानां [illegible] नो

अस्मदर्थं आभर आनय । कीदृशीं सकूर्तिं कूर्तिः आकूतिः संकल्प. तेनसहितां अस्मास्वनुरक्तामित्यर्थः । सच्युतिच्युतिः क्षरणंवीर्यस्यंदनं तेनसहितां अनुरागातिशयेन हि सहसावीर्यं स्यंदति । एतदेवपुनःसच्युतिमित्यनूद्य जघनच्युतिमित्यनेन व्याख्यायते । आहरणे दृष्टांतः सकृथ्यौ प्रायच्छन्निव यथा अत्यंतकामुकः ऊरूद्वयंप्रतियच्छन्मुद्युक्तः अत्यंतसादरेण स्त्रिय माहराति तद्वत् ॥

अथ चतुर्दशीमाह.—विनइंद्र मृधोजहि । कनीखुनदिवसापयंन् । अभिनः सुष्टुतिनय ॥ इति ॥

सायनः—हेइंद्रमृधः अस्मद्विवाहप्रतिबंधकान् शत्रूनविजाहि विविधं मारय । कनीखुनदिवसापयन् यथापूर्व भूमौविक्षिप्तं द्रव्यं अतिशयेनखनित्वा सपुरुषः स्वपुत्रं प्रत्यानीय संयोजयति । तद्वत् त्वमपि कन्यारत्नमस्मासुसयोजयंन् नोऽस्मदीयां सुष्टुति शोभनांकीर्तिं अभिसर्वतोनय प्रापय ॥ एतच्च मंत्रद्वय कन्या लाभार्थे कर्मणिविनियोज्य ॥

अथ पंचदशीमाह.—प्रजाततिः स्त्रियांयश. । मुष्कयोर दधात्सप कामस्य तृप्तिमानंदं ॥ तस्याग्ने भाजयेहमा ॥ इति ॥

सायनः—योयप्रजापतिः जगतः स्रष्टा स्त्रियां यशः भार्यायांगर्भरूपेण यशसःकारणं यद्वीर्यंतन्मुष्कयोः अंडयो.सप संबंधं अदधात् स्थापितवान् । तस्यैवस्थापितस्य विशेषणानिकामस्यतृप्तिं तृप्तिकारणं तस्मिनूगालिते सति योषिन्मेभूयादिति कामोनिर्वर्तते तस्मिन्निवृत्तिरेवतृप्तिः । अतएवानंदं सुखकारणं । हे अग्नेइह विवाहेकर्मणि मांतस्यवीर्यस्य सुखं भाजयप्रापय ॥

अथाष्टादशीमाह, प० ५७०.

यथाहमस्याअतृपं ं स्त्रियैपुमान् । यथास्त्रीतृप्यति पुंसि प्रियेप्रिया। एवंभगस्यतृप्याणि । ६ । यज्ञस्य काम्यः प्रियः ॥

सायनः—अस्यैस्त्रियैअस्यां विवाहेन यब्धायांस्त्रियां पुमानहं यथा अतृपं येनप्रकारेणतृप्तोस्मि । यथाच प्रियास्त्रीप्रिये । पुंसितृप्यति एव महं भगस्यतृप्याणि सौभाग्येन तृप्तोभवानिकीदृशोहं यज्ञस्य काम्यः यज्ञोहिस्वानुष्टानाय कामयते । अतएव यज्ञस्याहंप्रियः॥

सामवेदे.—**गो० गृ० सू० २ प्र० १ का०.**

पश्चादग्नेःसंवेष्टितं कटमेव जातीय वान्यत् पदाप्रवर्तयंतीं वाचयेत्—प्रमेपतियानः पंथाः कल्पतामिति ॥ २० ॥

सामवेद मंत्र ब्राह्मणे १ प्र० १ ख० म०.

प्रमेपतियानः पंथाः कल्पता८ ऽशिवा अरिष्टापतिलोकं गमेयं ॥८॥

गो० गृ० सू० २ प्र० १ का०.

दक्षिणेनपाणिनादक्षिणमं समन्वारब्धायाः षडाज्याहुतीर्जुहोत्यमि रेतुप्रथम इत्येतत्प्रभृतिभिः ॥ २४ ॥

सा० मं० ब्रा० १ प्र० १ ख० म०.

अग्निरेतुप्रथमो देवताभ्यः सोस्यैप्रजांमुंचतु मृत्युपाशात् । तदयंराजा वरुणोनुमन्यतां यथेयंस्त्रीपौत्र मघवन्नरोदात् स्वाहा ॥ ९ ॥ इमामग्नि-स्त्रायतां गार्हपत्यः प्रजामस्यै जरदष्टिंकृणोतु ॥ अशून्योपस्था जीवतामस्तुमातापौत्रमानंदमभिविबुध्यतामियं स्वाहा ॥ १० ॥ द्यौस्ते पृष्टं रक्षतु वायुरूरू अश्विनौच । स्तनंधयस्ते पुत्रांतूसविताभि रक्षत्वावाससः परिधानाद्बृहस्पतिर्विश्वेदेवा अभिरक्षंतु पश्चात् स्वाहा ॥ ११ ॥

मातेगृहेषु निशिघोषउत्थादन्यत्रत्वद्रुदत्य: सविशंतु ॥ मात्व ऽरूदमु आवधिष्टा जीवपत्नी पतिलोके विराजपश्यती प्रजासुमनस्यमाना ऽ स्वाहा ॥ १२ ॥ अप्रजस्यंपौत्रमर्त्यं पाप्मानमुतवाअघ ॥ शीर्ष्णस्स्रजामिवोन्मुन्य-द्विशद्भ्य: प्रतिमुचामिपाश ८ स्वाहा ॥ १३॥ परंनुमृत्युरमृतमआगाद्वैवस्वतोनो अभयकृणोतु ॥ परमृत्यो अनुपरेहिपथांयत्रनो अन्यइतरो देवयानात् ॥ चक्षुष्मतेशृण्वनेतेब्रवीमिमान. प्रजांरीरिषोमोतवीरांत् ॥ स्वाहा ॥ १४ ॥

गो० गृ० २ प्र० २ कां० ४ सू०.

पाणिग्रहोजपति इममश्मानमारोहेति ॥ ४ ॥

मा० मं० ब्रा० १. प्र० २ ख० म०.

इममश्मान मारोहाश्मेवत्व ८ स्थिराभव । द्विषतमपबाधस्व माचत्व द्विषतामध· ॥ १ ॥

गो० गृ० २ प्र० २ का० ६ सू०.

त ऽसोपस्तीर्णाभिघारितमग्नौ जुहोत्यविच्छिद्यांजलि—इयनार्युपब्रूते—इति ॥ ६ ॥

सा० मं० ब्रा० १. प्र० २ ख० म०.

इयनार्युपब्रूतेग्नौलाजानावपनी ॥ दीर्घायुरस्तुमेपतिः शतवर्षाणि जीव-त्वेधता ज्ञातयोममस्वाहा ॥ २ ॥

गो० गृ० २ प्र० २ का० ७ सू०.

अर्यमणनुदेव पूषणमित्युत्तरयो: ॥ ७ ॥

सा० मं० ब्रा० १. प्र० २ ख० म०.

अर्यमगंनुदेवकन्या अग्निमयक्षत ॥ सइमांदेवो अर्य्यमा प्रेतोमुंचातु-मामुतस्वाहा ॥ ३ ॥

पूषणनुदेवंकन्या अग्निमयक्षत । सइमांदेवःपूषाप्रेतोमुचातुमामुतस्वाहा ॥

गो० गृ० २ प्र० २ कां० ८ सू०.

हुतेपतिर्यथेत परिव्रज्य प्रदक्षिणमग्निं परिणयति मन्त्रवान्वा ब्राह्मणः कन्यल्तापितृभ्यइति ॥ ८ ॥

मा० मं० ब्रा० १ प्र० २ ख० म०.

कन्यल्तापितृभ्यः पतिल्लोकं पतीयमपदीक्षामयष्ट ॥
कन्या उतत्वयावय धाराउदन्याइवातिगाहेमहिद्विषः ॥ ९ ॥

भाष्यं—कन्यल्ता कन्यापितृभ्यः पितृभ्रातृप्रभृतिभ्यः अप तान्परित्यज्य पतिलोक पतिगृह आगत्य पतीय पतिसम्बधिनीं दीक्षामयष्ट इष्टवती उतअपिच कन्यात्वया सहएकत्रीभूताः उदन्याधाराः उदकधाराः इव बल्वतो वेगवतः परस्पर भेदशून्यास्तादात्म्य भावाश्चवयद्विषः द्वेष्टन्भतिगाहेमहि अतिक्रांत्य विलोडयामः उद्वेजायामः ॥ ९ ॥

गो० गृ० २ प्र० २ कां० ११ सू०.

शूर्पेणशेषमग्नावोप्य प्रागुदीची मभ्युत्क्रामयंत्येक मिषइति ॥ ११ ॥

मा० मं० ब्रा० १ प्र० २ ख० म०.

एकमिषे विष्णुस्त्वानयतु ॥ द्वेऊर्जेविष्णुस्त्वानयतु ॥ त्रीणिव्रताय विष्णुस्त्वानयतु ॥ चत्वारिमायोभवायविष्णुस्त्वानयतु ॥ पंचपशुभ्यो विष्णुस्त्वानयतु ॥ षडायस्पोषाय विष्णुस्त्वानयतु ॥ ६ ॥ सखासप्तपदीभव सख्यंतेगमेय ृसख्यंतेमायोषाः सख्यंतेमायोष्ठ्याः ॥ ७ ॥

गो० गृ० २ प्र० २ कां० १६ सू०.

अनगिन्काया. मध्येनपाणिनाऽ ञ्जलिमुपोद्गृह्य दक्षिणेन पाणिना

दक्षिणं पाणिं सांगुष्ठमुत्तान गृहीत्वैताः षट्पाणिग्रहणीया जपति-गृभ्णामितइति ॥ १६ ॥

सा० मं० ब्रा० १ प्र० २ ख० म०.

गृभ्णामिते सौभगत्वाय हस्तं मयापत्या जरदष्टिर्यथासः ॥ भगोअर्यमासवितापुरंधिर्मह्यन्त्वादुर्गार्हपत्यायदेवाः ॥ १० ॥ अघोरचक्षुरपतिघ्न्येधि शिवापशुभ्यस्सुमनाः सुवर्चाः ॥ वीरसूर्जीवसूर्देवकामास्योनाशंनोभव द्विपदेशं चतुष्पदे ॥ ११ ॥ आनःप्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा ॥ अदुर्मङ्गलीः पतिलोकमाविशशंनो भवद्विपदेशं चतुष्पदे ॥ १२ ॥ इमात्वमिन्द्रमीढ्वः सुपुत्रां सुभगांकृधि ॥ दशास्यांपुत्रानाधेहिपतिमेकादशंकृधि ॥ १३ ॥ सम्राज्ञीश्वशुरेभव सम्राज्ञीश्वश्र्वाभव ॥ ननान्दरि सम्राज्ञीभव सम्राज्ञीअधिदेवृषु ॥ १४ ॥ ममव्रतेते हृदयंदधातु ममचित्तमनुचित्तंतेअस्तु ॥ ममवाचमेकमनाजुषस्व बृहस्पतिस्त्वानियुनक्तुमह्यं ॥ १५ ॥

गो० गृ० २ प्र० ३ कां० ६ सू०.

प्रोक्तनक्षत्रे षडाज्याहुतीर्जुहोति-लेखासंधिष्वित्येत-प्रभृतिभिः ॥ ६ ॥

सा० मं० ब्रा० १ प्र० ३ ख० म०.

लेखासंधिषुपक्ष्मस्वावर्तेषुचयानिते ॥ तानितेपूर्णाहुत्यासर्वाणिशमयाम्यहं ॥ १ ॥ केशेषुयच्चपापकमीक्षितेरुदितेचयत् ॥ तानि * * ॥ २ ॥ शीलेषुयच्चपापकं भाषितेहसितेचयत् ॥ तानि * * ॥ ३ ॥ आरोकेषुचदन्तेषुहस्तयोः पादयोश्चयत् ॥ तानि * * ॥ ४ ॥ ऊर्वोरुपस्थे जंघयोः संधानेषुचयानिते ॥ तानि * * ॥ ५ ॥ यानिकानिचघोराणि सर्वांगेषुतवाभवन् ॥ पूर्णाहुतिभिराज्यस्य सर्वाणितान्यशीशमं ॥ ६ ॥

गो० गृ० २ प्र० ३ कां० सू०.

ध्रुवमसिध्रुवाह पतिकुलेभूयासममुष्यासाविति पतिनामगृण्हीयादात्मनश्च ॥
॥ ९ ॥

रुन्धाहमस्मीत्येवमेव ॥ ११ ॥

अथै नामनुमन्त्रयते ध्रुवाद्यौरित्येतयर्चा ॥ १२ ॥

मा० मं० ब्रा० १ प्र० ३ ख० म०.

ध्रुवाद्यौः ध्रुवापृथिवी ध्रुवविश्वमिदं जगत् ॥ ध्रुवास पर्वताइमे ध्रुवास्त्री पतिकुलेइय ॥ ७ ॥

गो० गृ० २ प्र० ३ कां० १३ सू०.

अनुमन्त्रिता गुरू गोत्रेणाभिवादयते ॥ १३ ॥

भाष्यं—अनुमन्त्रितैव वधू रभिवादयते * * * पितृगोत्रेण * * सप्तमेपदेगतायां वध्वापाणिग्रहण मन्त्राणां निष्टांस्मरति * * वृत्तायांखलु चतुर्थ्यांनयैवन्वगादि समर्गादिकर्मृतिन्व निष्पन्न ॥

गो० गृ० २ प्र० ३ कां० १५ सू०.

तावुभौतःप्रभृति त्रिरात्रमक्षारलवणाशिनौ ब्रह्मचारिणौ भूमौसहशयीयाता ॥ १५ ॥

भाष्यं—तावुभौदपतीतःप्रभृति विवाहकर्मारभ्य * * त्रिरात्रं तिस्त्रोरात्रयोयत्रत्रीण्यहोरात्राणि इत्येतत् अक्षारलवणाशिनौ ॥ गोक्षीरं गोघृतं चैव धान्यंमुद्गास्तिलायवाः ॥ अक्षारलवणाह्येते क्षाराश्चान्ये प्रकीर्तिताः ॥ इति स्मृत्युक्तलक्षणं अशितुंशीलंययोः तौ अक्षार लवणाशिनौस्यातां * * ब्रह्मचारिणौ चस्यातांदंपती * * ब्रह्मचर्य मिहव्यवायवर्जनमुच्यते ॥

सा० मं० ब्रा० १ प्र० ३ ख० म०.

इहधृति रिहस्वधृति रिहरति रिहरमस्व ॥

मयिधृतिमयिस्वधृति मयिरंतिर्मयिरमोमयिरमस्व ॥ १४ ॥

गो० गृ० २ प्र० ५ कां० १ सू०.

अथातश्चतुर्थीकर्म ॥ १ ॥

भाष्यं—अथेतिपूर्वप्रकृतार्थ—अथ विवाहरात्रे या चतुर्थीरात्रि. तस्याकर्म चतुर्थीकर्म वर्तिष्यते—इति सूत्रशेष'—

* * * *

विवाहे चैवनिर्वृत्ते चतुर्थे हनिरात्रिषु ।

एकत्वमागताभर्तु पिंडे गोत्रेच सूतके ॥ इति ।

चतुर्थी होममंत्रेणत्व डमासहृदयेत्रिते । भर्त्रासगुज्यतेपत्नी तद्गोत्राते नसाभवेत् ॥ इति चानयोर्वचनयोस्तत्पर्या पर्यालोचनयाप्येतदवगम्यते— अत्रखल्वेकत्ववचने चतुर्थेहनिरात्रौ गोत्रैक्य मनुशिष्यते ॥

गो० गृ० २ प्र० ५ कां०.

तेनैनां सकेशनखानभ्यज्य स्नापयित्वाऽऽप्लावयति ॥ ६ ॥

ऊर्ध्वं त्रिरात्रात्सभवत्येके ॥ ७ ॥

भाष्यं—प्रकृतात् त्रिरात्रादूर्ध्वं परत' सभवत्यनेन इति सभव. सभोग: व्यवाय कर्तव्य इत्येके आचार्या. मन्यते * * * यद्यजात लोम्न्येवातीव पुरुषोपभोगाभिलाषिणीभवति तर्हित्रिरात्रादूर्ध्वं तद्रक्षार्थं सभवितव्य * * * विनापि ऋतुकालस्त्रीणा रक्षार्थं सभवितव्य ॥

गो० गृ० २ प्र० ५ कां०.

यदर्तुमती भवत्यु परतशोणिता तदासभवकाल: ॥ ८ ॥ दक्षिणेन

पाणिनोपस्थमभिमृशेद्विष्णुर्योनिं कल्पयत्वित्ये तयर्चागर्भंधेहि सिनीवाली-निच ॥ ९ ॥ समाप्यर्चौसभवतः ॥ १० ॥

भवदेवभट्ट धृतमनुः

विवाहे चैव निर्वृत्ते चतुर्थेहानि रात्रिषु ।
एकत्व मागता भर्तु. पिंडे गोत्रेच सूतके ॥

बृहस्पतिः

पाणिग्रहणिका मंत्रा· पितृगोत्रापहारकाः ।
भर्तृगोत्रेण नारिणा देय पिंडादिकं तत· ।
चतुर्थी होम मंत्रेण त्वङमांस हृदयेंद्रियै ।
भर्त्रा सयुज्यते पत्नी तद्गोत्रा तेन साभवेत् ॥

पराशर धर्मशास्त्रे अ० ३ श्लो० २७, २८.

" नोदकेन न वा वाचा कन्यायाः पतिरुच्यते ।
पाणिग्रहण संस्कारात्पि यतपति लक्षणं ॥
पाणिग्रहणमात्राणा दाराद्या रक्षणेपुच ।
तेषां निष्ठा तु विज्ञेया विद्वद्भि. सप्तमे पदे " ॥

लिखित संहितायां प० ३११.

" विवाहे चैव निर्वृत्ते चतुर्थे हनिरात्रिषु ।
एकत्व सागता भर्तु· पिंडे गोत्रे च सूतके ।
स्वगोत्राभ्द्रश्यते नारी उद्वाहात्सप्तमे पदे ।
भर्तृगोत्रेण कर्तव्य दान पिंडोदक क्रिया " ॥

यमः प० ७०. श्लो० ७८, मुंबई.

स्वगोत्राभ्द्रश्यते नारी विवाहात्सप्तमे पदे ॥ स्वामिगोत्रेण कर्तव्या तस्याः पिंडोदक क्रिया ॥ ७८ ॥ * * * ॥ अनूढानपृथक्कन्या पिंडे

गोत्रेच सूतके ॥ पाणिग्रहण मंत्राभ्यां स्वगोत्राभ्द्रश्यते ततः ॥ ८४ येन येनतु वर्णेनया कन्या परिणीयते ॥ तत्सम सूतकं याति तथ पिंडोदकेपिच ॥ ८५ ॥ विवाहे चैव सवृत्ते चतुर्थे हानिरात्रिषु । एकत्व साव्रजेभ्द्रर्तुः पिंडगोत्रेच सूतके ॥ ८६ ॥

श्रीमहाभारततात्पर्यनिर्णये विंशतितमेध्याये.

तत्रापश्यन्कन्यका भूमिपानां भौमानीताः समरेतान्विजित्य ॥

व्दाष्टीसहस्राणि शतचरूपशीलोदाराअक्षता.स व्रतस्थाः॥ ? ? ? ॥

औशनसः प० ५२६.

स्त्रीणाम सस्कृतानांतुप्रदानात्परतः पितुः ॥

सपिडाना त्रिरात्र स्यात् सस्कारो भर्तुरेवच ॥

अहस्त्वदत्तकन्यानामशौच मरणेस्मृत ॥

प० ५३७—गृहेमृतासुदत्तासु कन्यकासुत्र्यहपितु ॥

परपूर्वासु भार्यासु पुत्रेषु कुलजेषुच ॥

त्रिरात्रंस्यात्तथा चार्ये भार्यासुप्रन्यगासुच ॥

संस्कार कौस्तुभे—प० २०७.

मन्त्रैर्यदिनसस्कृतेति सप्तमपदादिक्रमेणमत्रातामत्राविवक्षिताः तत्रैव भार्यात्वोपपत्तेरिति माधवः ॥

प० २२५. प्रतिगृहीतायामस्यां वध्वां भार्यात्वसिध्ये—गृह्याग्नि-सिध्येच विवाह होमं करिष्ये—इति सकल्प्य ॥

इतिपूर्वोक्तवचनैः संभवात् परतः चतुर्थी होमानंतरमेव भार्यात्वसिध्दिर्भवतीतिज्ञायते ॥

८. कन्यादानं तु सकृदेव कर्तव्य मितिसाधारणो नियमः ।

तथाहि, मनुः अ० ९ श्लो० ४७.

" सकृदशो निपतति सकृत्कन्या प्रदीयते ।
सकृदाह ददानीति त्रीण्येतानि सतां सकृत् " ॥

७१ श्लोकेच.

" न दत्वा कस्यचित्कन्यां पुनर्दद्याद्विचक्षणः ।
दत्त्वा पुनः प्रयच्छन् हि प्राप्नोति पुरुषानृतं " ॥

विष्णुः अ० ५ प० ८३.

" यः कन्यां पूर्वदत्तामन्यस्मै दद्यात् । स चौरवत् शास्यः " ॥

अग्निपुराणे, अ० १५४ श्लो० ३.

" सकृत्कन्या प्रदातव्याहरस्तां चौरदडभाक् " ॥

९.. **अस्यशास्त्रस्य अपवादो वर्तते** ।। भर्त्तरि नष्टे मृते प्रव्रजिते क्लीवे पतिते वा दत्ता कन्या अन्यस्मै दानयोग्या भवति। सादिधिषुणासह पुनःसंस्कर्तुं योग्याभवतितथापि पुनर्भूरिति उच्यते, संस्कृतत्वात् तत्पुनर्भर्तुः धर्मपत्नी भवति तयोः पुत्राः पौनर्भवा अपि " दायादाः " महतोभयात्त्रातारोभवति ॥

अत्राहुः मनुः अ० ९. श्लो० ९७.

" कन्याया दत्तशुल्कायां म्रियेत यदि शुल्कदः ।
देवराय प्रदातव्या यदि कन्यानुमन्यते " ॥

श्रीनंदनः ॥ " अनुमत्यभावे अन्यस्मै देया सकृत्कन्या प्रदीयते इत्यस्य अयमपवादः " ।

वशिष्टः अ० १७ प० ४८९.

" अद्भिर्वाचा च दत्तायां म्रियेताथो वरो यदि ।
न च मंत्रोपनीता स्यात् कुमारी पितुरेव सा ॥

यावच्चेदाहृता कन्या मंत्रैर्यदि न संस्कृता ।
अन्यस्मै विधिवद्देया यथा कन्या तथैवसा " ॥

अग्निपुराणे अ० १५४ श्लो० ५६.

" नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ।
पंचस्वापत्सु नारीणां पतिरन्यो विधीयते ।
मृते तु देवरे देयात् तदभावे यथेच्छया " ॥

कात्यायनः—" स तु यद्यन्यजातीयः पतितः क्लीब एव च ।
विकर्मस्थः सगोत्रो वा दासो दीर्घामयोपि वा ।
ऊढापि देया सान्यस्मै सप्रावरणभूषणा " ॥

शातातपः—" वरश्चेत् कुलशीलाभ्यां नयुज्येत कदाचन ।
न मंत्राः कारणं तत्र नच कन्यानृतं भवेत् ।
समाच्छिद्य तु तां कन्यां बलादक्षतयोनिकां ।
पुनः गुणवते दद्यात् इति शातातपोऽब्रवीत " ॥

धर्मसिंधौ, भा० १ प० ३ पृ० ८०.

" सप्तपदीविधेः पूर्वं आद्यानातिसृणां (मनोदत्ताना वाचादत्ताना-अग्निपरिगतानां) सकटे अन्येन विवाहो भवति ।

पृ० ८७. ब्राह्मादिष्वपि कन्यादानोत्तरमपि. सप्तपदीविधेः पूर्ववरस्य षंढत्वादि दोषज्ञाने वरमृतौवा कन्या अन्यस्मै देया " ।

मनुः अ० ९ श्लो० ८६ आपद्धर्मे.

" प्रोषितो धर्मकार्यार्थं प्रतीक्ष्योऽष्टौ नरस्समाः ।
विद्यार्थं षड्यशोर्थंवा कामार्थंत्रीं स्तुवत्सरान् " ॥

श्रीनंदनः

" ऊर्ध्वंभर्त्रंतरपरिग्रहे न दोषोस्तीत्यभिप्रायः यत्तुमृतभर्तृकाणां ब्रह्मचर्यवचनात् फलातिशय कामाना। नान्यास। इत्याविरोधः " ॥

माधवेनोदाहृतोमनुः

" नष्टे मृते प्रव्रजिते क्लीबेच पतितेपतौ ।
पचस्वापत्सु नारीणां पतिरन्यो विधीयते ॥

माधवः—" परिवेदन पर्याधानयोरिव स्त्रीणां पुनरुद्वाहस्यापि प्रसंगात्
क्वचित् अभ्यनुज्ञांदर्शयति-नष्ट इति " ।

मनुः अ० ९ श्लो० १७५—१७६.

" यापत्यावा परित्यक्ता विधवा वा स्वयेच्छया ।
उत्पादयेत्पुनर्भूत्वा सपौनर्भव उच्यते ।
सा चे दक्षतयोनिःस्यात् गतप्रत्यागतापिना ।
पौनर्भवेन भर्त्रा सापुनः संस्कारमर्हति " ॥

पराशरः—" कृतेतु मानवो धर्मः त्रेतायां गौतमः स्मृतः ।
द्वापरे शंखलिखितौ कलौपाराशरःस्मृतः ॥ २४ ॥ अ० १
अतःपरं गृहस्थस्य धर्माचारं कलौयुगे ।
धर्मं साधारणं शक्यं चातुर्वर्ण्याश्रमागतं ।
संप्रवक्ष्याम्यहंभूयः पाराशर्यंप्रचोदितः ॥ १२ ॥ अ० २
गते मृते प्रव्रजिते क्लीबेच पतितेपतौ ।
पचा पत्सुच नारीणां पतिरन्यो विधीयते ॥ ३१ ॥ अ० २

विष्णुः—अ० १५ प० ९२—९३.

अथ द्वादशपुत्रा भवंति * औरसः प्रथमः * क्षेत्रजो द्वितीयः। पुत्रिका पुत्रस्तृतीयः * * पौनर्भवः चतुर्थः अक्षताभूयः संस्कृता पुनर्भूः, भूयस्त्वसंस्कृतापि परपूर्वा । * दत्तकश्चाष्टमः * * * एतेषां पूर्वःपूर्वः श्रेयान्—" सएवदायहारः, सचान्यानूबिभृयात् " ।

याज्ञवल्क्यः अ० १ प० ४१९.

" दत्तामपिहरेत्पूर्वाच्छ्रेयांश्चेद्दूरआव्रजेत् " ।

अ० २ प० ४५३ श्लो०.

" औरसोधर्मपत्नीज स्तत्समः पुत्रिकासुतः ।
क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणे तरेण वा ॥ १३१ ॥
अक्षतायांक्षतायां वा जातः पौनर्भवस्तथा ।
दद्यान्माता पितावायं स पुत्रो दत्तको भवेत् ॥ १३३ ॥
पिंडदोशहरश्चैषां पूर्वाभावे परःपरः ॥ १३९ ॥

वशिष्ठः अ० १७ प० ४८७, ४८८, १८९.

बव्हीनां द्वादशह्येव पुत्राः पुराणदृष्टाः । स्वयमुत्पादितः स्वक्षेत्रे संस्कृतायां प्रथमः । तदलाभे नियुक्तायां क्षेत्रजो द्वितीयः। तृतीयः पुत्रिका विज्ञायते ॥ पौनर्भवश्चतुर्थः । पूनर्भूः कौमारं भर्तारमुत्सृज्यान्यैः सहचरित्वा तस्यैव कुटुंबमाश्रयति सा पुनर्भूर्भवति । या च क्लीवं पतित मुन्मत्तंवा भर्तारमुत्सृज्यान्यं पतिं विंदते मृते वा सा पूनर्भू भवति । कानीनः पंचमो या पितुर्गृहेऽसंस्कृताकामादुत्पादयेन्मातामहस्यपुत्रोभवतीत्याहुः । गुढेच गुढोत्पन्नः षष्टः इत्येते दायादाः बांधवास्त्रातारो महतो भयादित्याहुः । * * * क्लीवोन्मत्तानां प्रेतपत्नी षण्मासं व्रतचारिण्य- क्षारलवणं भुंजाना शयीतोर्ध्वं षड्भ्योमासेभ्यः स्नात्वा श्राद्धंच पत्ये दत्वा विद्याकर्मगुरुयोनिसंबंधान् सन्निपात्य पिता भ्राता वा नियोगं कारयेत् तपसे वोन्मत्तामवशांव्याधितां वा नियुंज्यात् ज्यायसीमपि षोडशवर्षां नचेदामयाविनीस्यात् प्राजापत्ये मुहूर्ते पाणिग्रहणवदु पचारोऽन्यत्र संस्थाप्य वाक्पारुष्याद्दंडपारुष्याच्च ग्रासाच्छादनस्नान- लेपनेषु प्रागृयामिनीस्याद नियुक्तायामुत्पन्न उत्पादयितुः पुत्रोभवती-

त्याहुः । स्याच्चेन्नियोगिनो दृष्टा लोभान्नास्तिनियोगः प्रायश्चितं वाप्युप-
नियुज्यादित्येके ॥ अथाप्युदाहरंति ॥

" पाणिग्रहे मृते बाला केवलं मंत्रसंस्कृता ।
सा च त्वक्षतयोनिः स्यात् पुनः संस्कारमर्हतीति " ॥

श्रीमहाभारते आदिपर्वणि अ० १२० श्लो०.

पांडुरुवाच—इमेवैबंधुदायादाः षट्पुत्रा धर्मदर्शने ॥
षडेवाबंधुदायादाः पुत्रास्ताञ्छृणुमे पृथे ॥ ३२ ॥
स्वयंजातः प्रणीतश्च परिक्रीतश्चयः सुतः ॥
पौनर्भवश्चकानीनः स्वैरिण्यांयश्चजायते ॥ ३३ ॥
दत्तःक्रीतः कृत्रिमश्च उपगच्छेत्स्वयंचयः ॥
सहोढोज्ञातिरेताश्च हीनयोनि धृतश्चयः ॥ ३४ ॥
पूर्वं पूर्वतमाभावं मत्वालिप्सेतवैसुतं ॥
उत्तमाद्देवरात्पुंसः कांक्षंते पुत्रमापादि ॥ ३५ ॥
अपत्यं धर्मफलदं श्रेष्टं विदंति मानवाः ॥
आत्मशुक्रादपिपृथे मनुःस्वायं भुवोब्रवीत् ॥ ३६ ॥

अ० १२२.—पतिव्रता मेतदेवभविता पातकंभुवि ॥
पत्यानियुक्तायाचैव पत्नीपुत्रार्थ मेवच ॥ १९ ॥
नकरिष्यति तस्याश्च भविष्यातितदेवाहि ॥
इतितेन पुराभीरु मर्यादा स्थापितावलात् ॥ २० ॥
उद्दालकस्य पुत्रेण धर्म्यावै श्वेतकेतुना ॥
सौदासेनचरंभोरु नियुक्ता पुत्रजन्मनि ॥ २१ ॥
मदयंती जगामर्षिंवसिष्टमितिनः श्रुतं ॥
तस्माल्लेभेचसापुत्र मश्मकं नामभाविनी ॥ २२ ॥

एवंकृतव्रती सापिभर्तुः प्रियचिकीर्षया ॥
अस्माकमपिते जन्मविदितं कमलेक्षणे ॥ २३ ॥
कृष्णद्वैपायनाद्भीरु कुरूणां वंशवृध्दये ॥
अतएतानि सर्वाणि कारणानि समीक्ष्यवै ॥ २४ ॥
ममैतद्वचनधर्म्यं कर्तुमर्हस्य निंदिते ॥
ऋतावृतौ राजपुत्रि स्त्रिया भर्तापतिव्रते ॥ २५ ॥

अ० १२३.—पांडुस्तुपुनरेवैनां पुत्रलोभान्महायशाः ॥
वक्तुमैच्छद्धर्मपत्नीं कुंतीत्वेनमथाब्रवीत् ॥ ७६ ॥
नातश्चतुर्थं प्रसवमापत्स्वपिवदत्युत ॥
अतःपरं स्वैरिणीस्यात् बंधकीपंचमेभवेत् ॥ ७७ ॥
सत्वंविद्वन् धर्ममिम मधिगम्यकथन्नुमां ॥
अपत्यार्थं समुत्क्रम्य प्रमाददिवभाषसे ॥ ७८ ॥

श्रीभारते भीष्मपर्वणि अ० ९० श्लो०.

अर्जुनस्यात्मज. श्रीमानिरावांन्नामनामतः ॥
सुतायां नागराजस्यजातः पार्थेनधीमता ॥ १ ॥
ऐरावतेन सादत्ताह्यनपत्यामहात्मना ॥
पत्यौहते सुपर्णेन कृपाणादीनचेतना ॥ २ ॥
भार्यार्थतांचजग्राह पार्थःकामवशानुगा ॥

श्रीमहाभारततात्पर्यनिर्णये अ० २० श्लो०.

कुर्वन्स्नान माययानागवध्वाहृतोलोक भुजगानांक्षणेन ॥
तस्याःपितागरुडेनात्तपत्युः पुत्राकांक्षी चोदयामासपार्थ ॥ १९९॥

नारदः

"उद्वाहितापि सा कन्या नचेत्संप्राप्तमैथुना ॥
पुनः संस्कारमर्हेत यथाकन्या तथैवसा ॥

नारदः अ० १२ श्लो०.

नष्टेमृते प्रव्रजिते क्लीबेच पतितेपतौ ॥
पचस्वापत्सुनारीणां पतिरन्यो विधीयते ॥
अष्टौवर्षाण्यपेक्षेत ब्राह्मणीप्रोषितपतिं ॥ ९७ ॥
अप्रसूतातुचत्वारि परतोन्यसमाश्रयेत् ॥
क्षत्रियाषट्समास्तिष्ठेदप्रसूता समात्रय ॥ ९८ ॥
वैश्याप्रसूताचत्वारि द्वेवर्षेत्वितरावसेत् ॥
नशूद्रायाः स्मृतः काल एषप्रोषितयोषितां ॥ ९९ ॥
जीवतिश्रूयमाणे तुस्यादेष द्विगुणोविधिः ॥
अप्रवृत्तौतु भूतानां दृष्टिरेषा प्रजापतेः ॥ १०० ॥
अतोन्यगमनेस्त्रीणा मेषदोषो नविद्यते ॥

बौधायनः

निसृष्टायांहृतायां वापियस्या भर्ताम्रियेततदा ॥ साचेदक्षतयोनिःस्यात् गतप्रत्यागतापिवा ॥ पौनर्भवेन विधिनापुनः संस्कारमर्हति ॥

शास्त्रप्रदीपोद्धृतस्मृतिः ॥ पचत्वचेद्वरोगच्छेत्वाग्दानेतु कृतेसति ॥ कन्यान्यस्मै प्रदातव्या तथासप्तपदात्पर ॥

श्रीमन्महाभारततात्पर्यनिर्णयस्य—चतुर्थाध्यायस्य दशम श्लोकस्य व्याख्यान.—श्रीमन्मध्वमतानुयायिभिः चेट्टिकोनेर्याचार्यैः उदाहृतास्मृतिः—

नष्टेमृते प्रव्रजिते क्लीबेच पतितेपतौ ।
पंचस्वापत्सुनारीणां पतिरन्यो विधीयते ॥

ऋग्वेदः अ० ८ मं० १० सूक्त १०९.

तेऽवदन्प्रथमा ब्रह्म किल्बिषेऽकूपारः सलिलो मातरिश्वा ।
वीळुहरास्तप उग्रो मयो भूरापो देवीः प्रथमजा ऋतेन ॥ १ ॥

सोमो राजा प्रथमो ब्रह्मजायां पुनः प्रायच्छदहृणीयमानः ।
अन्वर्तिता वरुणो मित्र आसीदग्निर्होता हस्तगृह्यानिनाय ॥ २ ॥
हस्तेनैव ग्राह्य आधिरस्या ब्रह्मजायेयमिति चेदवोचंन् ।
न दूताय प्रह्येतस्थ एषा तथा राष्ट्र गुपित क्षत्रियस्य ॥ ३ ॥
देवा एतस्यामवदंत पूर्वे सप्त ऋषयस्तपसे ये निषेदुः ।
भीमा जाया ब्राह्मणस्योपनीता दुर्धां दधाति परमेव्योमन् ॥ ४ ॥
ब्रह्मचारी चरति वेविषद्विषः स देवानां भवत्येकमगं ।
तेन जायामन्वविद बृहस्पतिः सोमेन नीता जुह्वां नदेवाः ॥ ५ ॥
पुनर्वैदेवा अददुः पुनर्मनुष्या उत ।
राजानः सत्य कृण्वाना ब्रह्मजाया पुनर्ददुः ॥ ६ ॥
पुनर्दाय ब्रह्मजाया कृत्वीदेवैर्निकिल्बिष ।
ऊर्जंपृथिव्या भक्त्वायोरुगायमुपासते ॥ ७ ॥

सायनः " अत्रेतिहासमाचक्षते जुहूरिति । वाग्नामा सा ब्रह्मणो जाया च बृहस्पतेर्वाचस्पतित्वात् बृहस्पतेर्जुहूः नाम भार्या बभूव । कदाचिदस्य किल्बिषमस्याः दौर्भाग्यरूपणासांचक्रे । अतएव स एनां पर्यत्याक्षीत् । अनतरमादित्यादयो देवा मिथो विचार्यैनामकिल्बिषां कृत्वा पुनर्बृहस्पतये प्रादुरिति " ॥

तदत्रवर्ण्यते प्रथमामुख्यास्तेदेवाः ब्रह्मकिल्बिषे ब्रह्मणोबृहस्पतेः किल्बिषेपापे जुह्वूदौर्भाग्यरूपे विषयेऽवदन् निष्कृत्युपायमवोचन् केते अकूपारः । अत्रयास्कः । आदित्योप्यकूपारउच्यते अकूपारोभवतिदूरपारः नि० ४-१८ । इति अकुत्सितपारोमहागतिरादित्यः सलिलाऽब्देवतावरुणः मातरिश्वा वायुर्वीलुहराः हरति विनाशयति तमांसीतिहरः तेजः प्रभूततेजस्कः तपः तपसातापनेनोग्रउद्गूर्णोर्मिः मयोभूः सुखस्यभावयिता सोमः देवीःदेव्य आपः कीदृश्यः ऋतेनसत्यभूतेनब्रह्मणा प्रथमजा आदितएवो-

ःपादिताः एतउपायमुक्का प्रायश्चित्तमप्यकारयंन्निति भावः ॥ १ ॥ प्रथमोमुख्यः सोमः राज्ञाह्रणीयमाणः पापापगमनेनालज्जमानःसनूतामेनामकिल्बिषांब्रह्मजायां पुनर्बृहस्पतये प्रायच्छत् ततोवरुणो अन्वार्तिता सोममनुमोदयिताऽसीन् सर्वथात्वं परिगृहाणेति दयामकार्षीत् तथामित्रश्च अनंतरंहोता देवानामाव्हाता मनुष्यणां होमनिष्पादको वाऽग्निर्हस्तगृह्यतां हस्तेगृहीत्वानिनाय अनैषीत् प्रादादित्यर्थः ॥ २ ॥ देवाबृहस्पतिमूचुः हे बृहस्पते अस्याआधिः आधीयंतआभरणान्यत्रेत्याधिः शरीर अस्याः शरीर हस्तेनैवग्राह्योगृहीतव्यमेव पुनस्तेदेवा इदानीमियं ब्रह्मजायेत्येनाऽवोचंन् अत्रादिषु चशब्दश्चेदर्थे अतएव एषाब्रह्मजाया पुराप्रह्ये प्रहितायत्वया भार्यान्वेषणार्थं प्रेषितायदूताय तथानतस्थे स्वात्मानंनप्रकाशयति तत्रदृष्टांतः यथाक्षत्रियस्यराज्ञोगुपितं रक्षितं राष्ट्रराज्यं शत्रवेयथा नप्रकाशयति तद्वदसौदौर्भाग्ययुक्ततया तस्मैस्वात्मानं नप्रकाशितवतीइदानींतु तद्राहित्येन प्रकाशमानेयं ब्रह्मजायैवेत्यब्रुवंन् ॥ ३ ॥ पूर्वेचिरंतनादेवा आदित्यादयः एतस्यांविषयेअवदंत इयपापरहितेत्यवादिषुः तथायेसप्तर्षयः सप्तसंख्याकाऋषयः तपसेतपश्चरणाय निषेदुः निषण्णाबभूवुः तेप्यवादिषुः ततोभीमा शत्रुरूपाणां पापानां भयंकरी पतिवत्न्येषा जायाब्राह्मणस्यबृहस्पते रुपनीतासमीपेदेवैः स्थापिता तथाहि । तपःप्रभावो दुर्धादुर्धानामपि परमेव्योमंन् व्योमन्युत्तमेस्थाने दधाति विदधातिखलु तस्मादेनामपि देवतापरिग्रहरूपस्तपेमहिमाबृहस्पते रंतिकेस्थापयति ॥ ४ ॥ बृहस्पतिर्मामलभतेति जुहूः परोक्षयावदति हेदेवाः पूर्वं स ब्रह्मचारी जाया भावेन ब्रह्मचारीचरति अतएव विषः सर्वेषु यज्ञेषु व्याप्तवान् देवान्वेविषत् । स्तुतिभिर्हविर्भिश्च व्याप्नुवंन् देवानामेकमंगंभवति जायापती यज्ञस्य द्वे अंगेखलु * * तेन देवानां परिचरणेन बृहस्पतिर्जायां जुहूनामिकां मामन्वविंदत् । अनुगम्यालभत । नशब्दउपमार्थे । पूर्वं यथा सोमेन नीतां सोमोददद्गंधर्वायेत्यादिक्रमेण नीतां जुव्हं जुहूं यथा कश्च-

वान् तद्वदिदानीमपि ॥ ५ ॥ त्याभहेनमाह । देवा ब्रह्मजायां जुहूं बृहस्पतयेपुनरददुः वैशद्वः प्रसिध्दवाची उताप्यर्थे मनुष्या अपि पुनरददुः । एव देवमनुष्यैः कृत दानं सत्य यथार्थ जानाना कुर्वाणा राजानोऽपि पुनस्तस्मै ददुः एवमव्यवहार्यनिमित्त पापमपि व्यनाशयन्ति-तिभावः ॥ ६ ॥ देवैः देवा निकिल्बिष तस्या किल्बिषाभाव कृत्वी कृत्वा ब्रह्मजायां ब्रह्मणो बृहस्पतेर्भार्या पुनर्दाय पुनर्दत्त्वा * * पृथिव्या ऊर्जं रसभूतमन्न हवीरूप भक्काय * भक्का विभज्योरुगाय बहुकीर्ति बहुभिः स्तोतव्यं वा बार्हस्पत्य यज्ञमुपासते सेवते ॥ ७ ॥ **अत्र अथर्व वेदस्य ५–१७–द्रष्टव्यं.**

ऋग्वेदे म० १० सू० ४० ऋ० २

कुहस्विदोषा कुहवस्तोरश्विनाकुहाभिपित्वं करतः कुहोषतुः ॥
कोवांशयुत्रा विधवेवदेवरं मर्यंन योषा कृणुतेसधस्थआ ॥ २ ॥

सायनः—हे अश्विनाश्विनौ कुहस्वित् क्वचिद्दोषा रात्रौ भवथः इतिशेषः । कुहवस्तो क्वादिवाभवथः कुहकाभिपित्वमभिप्राप्तिकरत कुरुथ कुहक्कवोषथु वसथ किञ्च को यजमानः सधस्थे सहस्थाने वेद्याख्य आकृणुते आकुरुते परिचरणार्थमात्माभिमुखी करोति तत्रदृष्टांतोदर्शयति शयुत्रा शयने विधवा मृतभर्तृका नारिदेवर भर्तृभ्रातर मभिमुखीकरोति मर्यंन यथाच सर्व मनुष्य योषा सर्वांनारी सभोगकालेऽभिमुखीकरोति तद्वदित्यर्थ तथाच यास्कः क्कस्विद्रात्रौभवथः क्कदिवा क्काभिप्राप्तिकुरुथ क्कवसथ कोवां शयने विधवेव देवरंदेवर कस्माद्द्वितीयोवर उच्यते विधवा विधातृकाभवति विधवनाद्वा विधावनाद्वेति चर्माशिराअपिवाधव इतिमनुष्यनाम तद्वियोगाद्विधवा देवरोदीव्यतिकर्मामर्यो मनुष्यो मरणधर्मा योषायौतेराकुरुते सधस्थाने नि० ३–१५ । इति ॥

अंतेष्ट्यां—चित्युपरिदक्षिणशिरसं निधाय उत्तरतःपत्नींच ॥ इमानारी-
शंखःपित्र्यस्त्रिष्टुप्पत्नीचित्यारोहणेविनियोगः ॥ इमानारीरविधवाः
सुपत्नीराजनेनसर्पिषासंविशंतु ॥ अनश्रवोऽनमीवाःसुरत्ना आरो-
हतु जनयो योनिमग्रे ॥ पत्नींचितिमारोप्य—उदीर्ष्वनारी
दमनोग्नि स्त्रिष्टुप्—पत्नीचित्यावरोहणे विनियोगः ॥ उदीर्ष्व-
नार्यभि जीवलोकं गतासुमेत मुपशेष एहि ॥ हस्तग्राभस्य-
दिधिषो स्तवेदपत्युर्जनित्वमभिसंबभूथ—इतिमंत्रेण भूतले पत्नीं
अवरोहयेत्—देवरोते वासीवाभूतले आवरोहयेत् ॥

आ० गृ० सू० ४–२–१८ " उत्तरतः पत्नीं "

भाष्यं—एतावद्वर्णत्रयस्यापिसमान.

सायनः—देवरादिकः प्रेतपत्नीमुदीर्ष्वनारीत्यनया भर्तृसकाशादुत्थापयेत् ।
सूत्रितच ॥

ऋग्वेदे मं० १० सू० १८.

उदीर्ष्वनार्यभिजीवलोकं गतासुमेत मुपशेषएहि । हस्तग्राभस्यदि-
धिषोस्तवेतमत्युर्जनित्वमभिसंबभूथ ॥ ८ ॥

धनुर्हस्तादाद दानोमृतस्यास्मे क्षत्राय वर्चसे बलाय । अत्रैवत्वमि
हवयसुवीरा विश्वाः स्पृधो अभिमातीर्जयेम ॥ ९ ॥

सायनः—हे नारि मृतस्यपत्नि जीवलोकं जीवानां पुत्रपौत्रादीनां
लोकं स्थानं गृहमभिलक्ष्योदीर्ष्व । अस्मात्स्थानादुत्तिष्ट
ईरगतौ आदादिकः गतासुमपक्रांतप्राणमेतंपतिमुपशेषे तस्य
समीपेस्वपिषि तस्मात्त्वमेहि आगच्छ यस्मात् त्वं हस्त
ग्राभस्य पाणिग्राहं कुर्वतः दिधिषोः गर्भस्यनिधातुः तवास्य
पत्युः संबंधादागतमिदं जनित्वं जायात्वमभिलक्ष्य संबभूय
सभूतास्यनुसरणनिश्चयमकार्षी स्तस्मादागच्छ ॥ ८ ॥

10

मृतस्य क्षत्रियस्य हस्तात्धनुराददानः किमर्थं अस्मै अस्माकं क्षत्राय प्रजापालनसमर्थाय बलाय वर्चसे तेजसे बलाय सेनालक्षणाय च धनुराददानोऽहं ब्रवीमीति शेषः किमिति त्वमत्रैव अस्मिन् स्थानएव भव वयं चेहास्मिन् लोके सुवीराः सुपुत्रयुक्ता भवनो विश्वाः सर्वानभिमाती रभिमन्यमानान्स्पृधः सघर्षयित्रीन् बाधकान् शत्रून् जयेम सहेमहि ॥ ९ ॥

आ० गृ० सू० ४–२–१८.

तामुत्थापयेद्देवरः पतिस्थानीयोऽन्तेवासी जरदासो वोदीर्ष्वनार्यभिजीवलोकमिति ॥

भाष्यं—अथपत्नीमुत्थापयेत्—कः—देवरः पतिस्थानीयः सपतिस्थानीय इत्युच्यते-अनेनज्ञायते-पतिकर्तृकं कर्म पुंसवनादि पत्यसंभवे देवरः कुर्यादिति ।

आपस्तंबीये अंतेष्टयां प० ६.

प्रेतंचितिमारोप्य इयनारीतिप्रेतपत्नीं प्रेतसमीपंनीत्वा उदीर्ष्वेतिमन्त्रेण प्रेतपत्नीं उत्थाप्यततः सुवर्णमितिप्रेतहस्ते सुवर्णंन समृज्य ॥

तैत्तिरीये आरण्यके ६ प्रपाठके १. अनुवाकः

इयंनारी पतिलोकं वृणाना निपद्यत उपत्वा मर्त्यप्रेतं । विश्वं पुराणमनुपालयंती तस्यैप्रजांद्रविणं चेहधेहि ॥ उदीर्ष्वनार्यभिजीवलोकमितासु मेतमुपशेषएहि । हस्तग्राभस्यदिधिषो स्त्वमेतत्पत्युर्जनित्वमभिसंबभूव ॥ सुवर्णंहस्तादाददाना मृतस्य श्रियै ब्रह्मणे तेजसे बलाय । अत्रैवत्वमिह वयꣳ सुशेवा विश्वा स्पृधो अभिमातीर्जयेम ॥ धनुर्हस्तादाददाना मृतस्य श्रियै क्षत्रायौजसेबलाय । अत्रैवत्वमिह वयꣳ

सुशेवा विश्वा स्पृधो अभिमातीर्जयेम ॥ मणिं हस्तादाददाना मृतस्य श्रियैविशे पुष्ट्यैबलाय । अत्रैवत्वमिह वयं सुशेवा विश्वास्पृधो अभिमातीर्जयेम ॥ ३ ॥

सायनः—हे मर्त्य मनुष्य या नारी मृतस्य तव भार्या सा पतिलोकं वृणाना कामयमाना प्रेत मृत त्वां उपनिपद्यते समीपे नितरां प्राप्नोति । कीदृशी पुराण विश्व अनादिकालप्रवृत्तं कृत्स्नं स्त्रीधर्मं अनुक्रमेण पालयन्ती पतिव्रतानां स्त्रीणां पत्या सहैव वासः परमो धर्मः । तस्यै धर्मपत्न्यै त्व इह लोके निवासार्थमनुज्ञां दत्वा प्रजां पूर्वं विद्यमानां पुत्रादिकां द्रविण धन च धेहि सपादय अनुजानी-हीत्यर्थः ॥ हे नारि त्व इतासुं गतप्राण एतं पतिं उपशेषे उपेत्य शयन करोषि उदीर्ष्व अस्मात्पतिसमीपादुत्तिष्ठ जीवलो-कमभि जीवंतं प्राणिसमूहमभिलक्ष्य एहि आगच्छ । त्वं हस्त-ग्राभस्य पाणिग्राहवत दिधिषोः पुनर्विवाहेच्छोः पत्युः एतत् जनित्वं जायात्व अभिसंबभूव आभिमुख्येन सम्यक् प्राप्नुहि ॥ हे नारि त्व श्रियै सपदर्थं ब्रह्मणे ब्राह्मणजात्यर्थं तेजसे कांत्यर्थं बलाय शरीरबलार्थं मृतस्य पुरुषस्य हस्तात् सुवर्णं आददाना सती अत्रैव लोके तिष्ठ वयं अपि इह लोके सुशेवाः सुखं सेवमानाः संतः स्पृधः अस्माभिः सह स्पर्धमानाः विश्वाः अभि-मातीः सर्वान् शत्रून् जयेम ॥ ३ ॥

धनुर्हस्तादाददाना मृतस्य श्रियै क्षत्रायौजसे बलाय ॥ अत्रैवत्वमिह वयं सुशेवा विश्वा स्पृधो अभिमातीर्जयेम इति राजन्यस्य । मणिं हस्तादाददाना मृतस्य श्रियैविशे पुष्ट्यै बलाय ॥ अत्रैवत्वमिह वयं सुशेवा विश्वा स्पृधो अभिमातीर्जयेम इति वैश्यस्य इति । १६–१७ एतौ मंत्रौ पूर्वोक्तब्राह्मण मंत्रवत् व्याख्येयौ ॥

अथर्ववेदे—प० २०४ श्लो० २७.

या पूर्वं पतिं विन्वाथान्यं विंदतेऽपरं

पंचौदनं च तावजददातोन वियोषतः ॥ २७ ॥

समान लोकोभवति पुनर्भुवापरः पतिः ॥

काश्यपस्मृता.

सप्तपौनर्भवाः कन्यावर्जनीयाः कुलाधमाः ।

वाचादत्ता मनोदत्ता कृतकौतुक मगल्या ॥ १ ॥

उदकस्पर्शकायाच याच पाणिगृहीतिका ।

अग्न्युपायं गतायाच पुनर्वाह्यस्य बाल्काः ॥ २ ॥

इत्येता· कश्यपप्रोक्तादहेयु कुलमग्निवत् ॥

प्ररोहत्यग्निनादग्ध पादपाना कुलमहत् ॥ ३ ॥

विज्ञानेश्वरः प० ८ श्लो० ६७.

अनन्यपूर्विकामित्यत्र अनन्यपूर्वा परिणेयोक्ता तत्रान्यपूर्विका कीदृशीत्याह—अक्षतेति अन्यपूर्वा द्विविधा पुनर्भूः स्वैरिणीचेति पुनर्भूरपि द्विविधा क्षताचाक्षताच तत्रक्षता सस्कारा प्रागेव पुरुषसबंधदूषिता अक्षतापुनः सस्कार दूषिता ॥

संस्कारकौस्तुभे प० १७२.

अन्यपूर्विकाः सप्तविधाः पुनर्भ्वः । वाचादत्ता मनोदत्ता अग्निपरिगता सप्तपदंनीता भुक्ता गृहीतगर्भा प्रसूताचेति बौधायनोक्ताः ॥

श्रीमन्महाभारततात्पर्यनिर्णये द्वादशाध्याये.

युधिष्टिरेजात उवाच पांडुर्वाव्होर्बलाज्ज्ञानबलाच्चधर्मः ॥

रक्षोन्यथानाशमुपैतितस्माद्बलद्वयाढ्यं प्रसवाशुपुत्र ॥ ५० ॥

इतीरितेऽथयाहूतवायुः संस्पर्शमात्रादभवद्बलद्वये ॥
सवायुरेवा भवदत्र भीमनामाभृतामाः सकलाहियस्मिन् ॥ ९३ ॥

*　　*　　*　　*　　*

पांडुः पुनः प्राहऽथा मिदंवचः ॥

*　　*　　*　　*　　*

अतोमहेंद्रोबलवानरंतरःतेषां समाव्हानमिहार्हतिस्वराट् ॥ इतीरिता साव्हयदाशुवासवंततःप्रजज्ञे स्वयमेवशक्रः ॥ सचार्जुनोनामनरांशयुक्तो-विष्टण्वावेशी बलवानस्त्रवेत्ता ॥ ९९ ॥

श्रीमन्महाभारततात्पर्यनिर्णये चतुर्दशाध्याये.

ऊचुः सुयोधनमुखाः सहसौबलेन पांडोर्मृतिः किलपुरातनयाः कृतस्य ॥ ९६ ॥ नक्षेत्रजा अपिमृते पितरिस्वकीयैः सम्यङ्नियोग मनवाप्यभवाययोग्याः ॥ तेषामितीरितवचोनुजगादवायुराभाष्यकौरव गणान्गगनस्थएव ॥ ९७ ॥ एतेहिधर्ममरुदिंद्रभिषग्वरेभ्यो जाताः प्रजीवति पितर्युरुधर्मसाराः ॥ शक्याश्चनैव भवतां क्वचिदग्रहाय नारायणे नसतत परिरक्षितायत् ॥ ९८ ॥ वायोरदृश्य वचनं परिशंकमाने प्वावि-र्बभूवभगवान्स्वयमब्जनाभः ॥ व्याससरूप उरुसर्व गुणैकदेह आदायतान विशदाशुस पांडुगेहं ॥ ९९ ॥

पुराणेपि पूर्वोक्तोर्थ अस्तीतिकेचिद्वदंति तथाहि—ब्रह्मपुराणे—
मृतेभर्तरियानारीत्यक्तवत्यथचस्वयं ॥ सवर्णाज्जनयेद्गर्भंभर्तुः पौनर्भवंसुतं ॥ यदिसाबालविधवाबलाद्भुक्ताथवाक्वचित् ॥ तथाभूयःस्तुसंस्कार्या गृही-त्वायेनकेनचित् ॥

१०. मनोदाना नंतरं वा वाद्दानानंतरं वा कन्या अन्यस्मै अनापदि नदातव्या। दत्ताचेत् दाता चोरवत्शास्यः। एवमेव अग्नि परिगता सप्तपदंगता कन्या अनापदि नान्यं आश्रयेत। आश्रिताचेत् जारिणी भवति। इति सर्वे ऋषयः वदंति। आपद्दितु पूर्वोक्ताः चतुर्विधाः कन्या अक्षतयोनयः पुनः दानयोग्या भवंतीति केचित ऋषयो वदंति। आपद्यपि ताः दानयोग्याः न भवंतीति केपिनवदंति। ताश्चेत् अक्षतयोनयः स्युः विवाह संस्कारयोग्या इतिचबहवः ऋषयः वदंति। केपिऋषयःताःसंस्कारायोग्या इति नवदंति। यतःपुरुषसंयोगा नंतरमेव ताः भर्तुःगोत्रं आश्रयंतेनतत्पूर्वमिति मन्वादिवचनैः अवगम्यते अतः अक्षतयोनयः पितृगोत्रान् भर्तृसंसर्गात् पूर्वं नविसृजंति। अतः ताः दानयोग्या इतिवक्तुंशक्यंते। दानयोग्या वानवा दिधिषुणा पाणिंगृहीतुंताः योग्या एव। तासांसंततयः अदुष्टाः पौनर्भवाः संस्कृतमात्रुजातत्वात्। अन्यथातु वयंसर्वे पौनर्भवत्वात् दुष्टाःबभूविम॥

११. एकस्मै मनोदत्ता वाचादत्ता एकेनसह अग्निपरिगता सप्तपदंगता भुक्ता गर्भंगृहीतवती प्रसूता एवंभूतास्त्री अन्येन विवाहिताचेत् सापुनर्भूरित्युच्यते अस्याः पुत्राः पौनर्भवा इत्युच्यंते आसांसप्तानांमध्ये आद्यंचतुष्टयं संस्कारयोग्यं अतः ताः धर्मपत्न्यः तासांपुत्राः औरसा इवदायादा इति प्रकीर्तितत्वात् अन्यासांतिसृणां संस्कारस्याऽनुक्तत्वात् ताः क्षतयोनयः भुक्ताः गृहीतगर्भाः प्रसूताः पुनर्भ्वः असंस्कृता भवंति तासांपुत्राः पौनर्भवाः श्राद्धादिषुवर्जनीयाः यथा वक्ष्यमाणाः—अनधीयानाः, दुर्बलाः, चिकित्सकाः, देवलकाः, विपणेनजीवंतः, वार्धुषयः, कुशीलवाः, भृतकाध्या-

पकाः, भृतकाध्यापिताः, शूद्रगुरवः, वाग्दुष्टाः, पित्राविवदमानाः, मद्यपाः, दांभिकाः, मित्रद्रुहः, द्यूतवृत्तयः, पिशुनाः, आचारहीनाः, क्लीबाः, नित्ययाचनकाः, कृषिजीविनः, प्रेतनिर्यातकाः, इत्यादयः ॥ (भृगुसंहितायां अ० ३)

केचिद्वदंति—पूर्वोक्तसर्वं शास्त्रमेव तथापि अस्मिन् कलियुगे पूर्वोक्त श्रुति-स्मृति-सूत्रपुराणादीनां शास्त्रत्वं अपास्तं अतः बुधैः तत्शास्त्रं अधुनानांगीकृतं अतः इदानीमपिसर्वैःबुधैः तत् शास्त्रत्वेन नांगीकर्तव्य मिति ॥ अत्रब्रूमः ॥

शास्त्रस्य-शास्त्रत्वं—बुधानां अनंगीकारेण निरस्तं नभवति वेदेयत्साधुत्वेनउक्तं तस्य असाधुत्व कल्पना ब्रह्मणापिकर्तुं अशक्या वेदस्य स्वतः प्रमाणभूतत्वात् यदिस्मृतयः वेदविरुद्धाभवेयुः तर्हि ता अप्रमाणानि बभूवुः यदिनाविरुद्धाः तर्हिताअपिप्रमाणान्येव तासां अप्रामाण्यं कल्पयितुं केपिऋषयः पुराणद्रष्टारश्च समर्थाः नभवंति ॥ किमु इतरे बुधाः महात्मानः ॥ एवंसति अयंपूर्वपक्षः बुद्धिमाद्भिः आर्यैः दूषयितव्यः ॥

पूर्वपक्षिणः वक्ष्यमाणान् श्लोकानवलंबंते—तथाहि—क्रतुः

ऊढायाः पुनरुद्वाहं दत्ताकन्यानदीयते । न यज्ञे गोवधः कार्यः कलौच न कमंडलुः । विधवायां प्रजोत्पत्तिः देवरस्यनियोजनं । बालिकाक्षतयोन्याश्च वरेणान्येन संस्कृतिः । दत्तौरसेतरेषांच पुत्रत्वेन परिग्रहः । अस्थिसंचयनादूर्ध्वं अंगस्पर्शनमेवच । शिष्यस्य गुरुदारेषु गुरुवत् वृत्तिरीरिता । सवर्णानां तथादुष्टैः संसर्गः शोधितैरपि । बलात्कारादि दुष्टस्त्री संग्रहोविधिचोदितः । नवोदकेदशाहंच दक्षिणागुरुचोदिता ॥

एतानिलोकगुप्त्यर्थं कलेरादौ महात्मभिः ।
निवर्तितानिसर्वाणि व्यवस्थापूर्वकं बुधैः ॥

किंचस्मृत्यर्थसारे–आदित्यपुराणे.

ऊढायाः पुनरुद्वाहं जेष्टांशं गोवधंतथा ॥ कलौपचन कुर्वीत भ्रातृजायां कमंडलुं ॥

वायवीयसंहितायां.

मृतेजीवति वापत्यौ नसुतं देवरादितः ।
क्रांतसप्तपदां कन्यांनो द्वहेच्च कलौद्विजः ॥

बृहन्नारदीय पुराणे.

दत्तायाश्चैव कन्यायाः पुनर्दानं परस्यच ॥

क्रतुः–देवराच्च सुतोत्पत्तिः दत्ताकन्या नदीयते ।
न यज्ञेगोवधः कार्यः कलौनच कमडलुः ॥

हेमाद्रौ–देवलः

समुद्रयातुः स्वीकारः कमंडलुविधारण ॥ दत्ताक्षतायाः कन्यायाः पुनर्दानपरस्यच ॥ दीर्घकाल ब्रह्मचर्य वर्जयेत कलौयुगे ॥ एतान्यस्तुत्यजेत्धर्मान् सद्विजोदोषभाग्भवेत् तस्यैवं निष्कृतिर्नास्ति तप्तकृच्छ्रशतैरपि ॥

कश्चनपुरुषः नाम्नाक्रतुः कलौस्थितः श्रुतिस्मृतिपुराणेषु उक्तं शास्त्रं "कलेरादौ" "महात्मभिः" "बुधैः" निवर्तितं इति वदति । केते महात्मानः केते बुधाः तान्-सःनवदति । यदिते नऋषयः तर्हितेषां वाक्यं प्रमाणं नभवति । यदिऋषयः तर्ह्यपिते पूर्वऋषीणां वाक्यानि अप्रमाणानिकर्तुं असमर्था एव । पराशर शास्त्रस्य कलिकालीय शास्त्रत्वात् तन्निरोत्धुं अशक्ता इति किमुवक्तव्यं ॥

पुराणपर्यालोचने सति—सर्वेषां पुराणानां उत्पत्तिः कलौ अभूत् इति दृश्यते । अतः कलौ वर्जनीयानि कर्माणि तेषु अवश्यं वक्तव्यानि । तानि पुराणानि वक्ष्यमाणानि—१ ब्राह्मं २ पाद्मं ३ वैष्णवं ४ शैवं ५ भागवतं ६ नारदं ७ मार्कंडेयं ८ आग्नेयं ९ भविष्यं १० ब्रह्मवैवर्तं ११ लैंग १२ वाराहं १३ स्कांदं १४ वामनं १५ कौर्म्यं १६ मात्स्यं १७ गारुडं १८ ब्रह्मांडं ॥ इति ॥

श्रीभागवते द्वादशस्कंधे सप्तमेऽध्याये श्लो० २२–२४.

एवं लक्षणलक्ष्याणि पुराणानि पुराविदः ।
मुनयोऽष्टादशप्राहुः क्षुल्लकानि महांतिच ॥
ब्रांह्मपाद्म वैष्णवंच शैव लैंग सगारुडम् ।
नारदीयं भागवत माग्नेयं स्कादसंज्ञित ॥
भविष्य ब्रह्मवैवर्तं मार्कंडेयच वामनं ।
वाराहं मात्स्य कौर्मंच ब्रह्माडाख्यमिति त्रिषट् ॥

तेषांमध्ये अग्निपुराणं बौध्धावतारानन्तरं अभूदिति वक्ष्यमाणैः तत्पुराणगत वचनैरवगम्यते—तथाहि ।

अग्निपुराणे अ० १६.

वक्ष्येबुध्धावतारञ्चपठतः शृण्वतोर्थदं ॥ पुरादेवासुरैयुध्धे दैत्यैः देवाः पराजिताः ॥ रक्षरक्षेति शरण वदंतो जग्मुरीश्वर ॥ महामोहस्वरूपोसौ शुध्धोदनसुतो भवत् ॥ मोहयामास दैत्यांस्तांस्त्याजिता वेदधर्मकं ॥ तेच बौध्धा बभूवुर्हि तेभ्योन्ये वेद वर्जिताः ॥ आर्हतः सोभवत् पश्चादार्हता नकरोत्परान् ॥ एवं पाषंडिनोजाताः वेदधर्मादि वर्जिताः ॥ ४ ॥ नरकार्हं कर्मचक्रुर्ग्रहीष्यंत्य धमादपि ॥ सर्वे कलियुगांतेतु भविष्यंतिच सकराः ॥ * * * ॥ कल्कीविष्णुयशः पुत्रो याज्ञवल्क्य पुरोहितः ॥ उत्सादयिष्यतिम्लेच्छान् गृहीतास्त्रः कृतायुधः ॥ ८ ॥

अस्मिन् पुराणेयदुक्तं तत्सर्वं प्रसिद्ध स्मृतीरवलंब्यैवउक्त मितिभाति वक्ष्यमाणवचनैः ॥

अग्निपुराणे अ० १६२.

मनुर्विष्णुर्याज्ञवल्क्यो हारीतोत्रिर्यमोंगिरा ।
वशिष्टदक्ष संवर्तशातातप पराशरा ॥ १ ॥
आपस्तंबोशनो व्यासः कात्यायन बृहस्पती ।
गोतमः शंखलिखितौ धर्ममेते यथाब्रुवन् ॥ २ ॥
तथावक्ष्ये समासेन भुक्ति मुक्ति प्रदश्रृणु ॥

अस्मिन् पुराणेपि पूर्वोक्त विवाहशास्त्रं वेदेषु स्मृतिषुच प्रणीतं कलौनिषिद्ध मितिनोक्तं प्रत्युत शास्त्रीय मिति स्पष्ट तया उक्तं—तथाहि ॥

अग्निपुराणे अ० १५४.

सकृत् कन्याप्रदातव्या हरस्तां चोर दंड भाक् ॥
अपत्य विक्रयासक्ते निष्कृतिर्नविधीयते ॥
कन्यादान शचीयागो विवाहोथ चतुर्थिका ॥
विवाहमेतत्कथित नामकर्म चतुष्टय ॥
नष्टेमृते प्रव्रजिते क्लीबेच पतितेपतौ ॥
पचस्वापत्सुनारीणां पतिरन्योविधीयते ॥
मृतेतुदेवरे देयात् तदभावे यथेच्छया ॥

कलौ उद्भूतं इदं पुराणं—अष्टादशमहापुराणानांमध्ये एकं—"कलौ पाराशरःस्मृतः" इति प्रसिद्धायाः स्मृतेः अविरुद्धंच—अस्मिंश्च वेदस्मृतिमहाभारतादिप्रमाणेषुच यत् प्रणीतं-तत्-पूर्वपक्षिभिः पूर्वोक्त श्रुतिस्मृतिमहापुराणेषु अनुक्तवचनैः अशास्त्रीकर्तुं वर्षशतैरपि असाध्यं ।

केचित पूर्वपाक्षिण.तानि वचनानि आदिपुराणात् उत्धृतानि इति वदंति **अन्येतु**—आदित्यपुराणादिति—**अपरेतु** इतर ग्रंथादिति—एतेषांमत्धे **कोपिग्रंथः प्रमित्धास्मृतिर्वा—पुराणंवान**—अद्यादिपुराणानि—अष्टादश पुराणानांमत्धे **कान्यपिन**—तानि प्रसित्धव्याख्यानकर्तृभिः **नव्याख्यातानि**—तेषां संपूर्णासंहितापि **नकुत्रापिदृश्यते** यदि वर्तेरन् यदि प्रमाणभूतानिभवेयुः तथापि इतर पुराणानि—तत्रापि—**पूर्वोक्तं कलौ** प्रवर्तितं अग्निपुराण—खडयितुं—अशक्तान्येवभवितव्यानि—**समानशास्त्रद्वैधे उभयमपि ग्राह्यमिति न्यायात**—स्मृतीःरोत्धृतानि अशक्तानीति किमु वक्तव्य—अस्मिन् विषये द्वैतिनः वैष्णवाः उदाहरंति ॥

वेदाश्च पंचरात्राणि प्रमाण मुख्यमीरितं ॥ अविरूत्धानि यान्येषां पुराणानिचकानिचित् ॥ भारतादीनिचान्यानि प्रमाणानीति वैविदुः ॥ श्रुतिस्मृतीतुनस्याज्ञे तत्रोक्तं पुण्यमाचरेत् ॥ इति ॥

किंच "ऊढायाः पुनरुद्वाहं" निषित्धकन्यानांमत्धेएक मिति वदंति—ऊढा-का? उद्वाहः कः? या ससभवा—साऊढा—उद्वाहः पाणिग्राहणिकैः मंत्रैः **संस्कारः संभवसहितः**—तथासति—किंनिषित्धं भवति—? संभवसहितानां क्षतयोनीनां—पुनस्संस्कारः—एततूकर्तव्य मितिवयं **नब्रूमः** ॥ "**दत्ता** कन्या नदीयते" इति अपरनिषेधकं **शास्त्रं**—दानंतुत्रिविधं—मनोदान । वाक्दानं । अग्निसाक्षिकंदानमिति—एवं दत्तानां पुनर्दानं सर्व कालेपि निद्य निषित्ध चेतिऋषयः वदंति तत् कलावेव निषित्धमितिन—एव सति अस्य निषेधस्य प्रयोजनं नपश्यामः किंच—**वयंतु** अनापदि तासां पुर्नदान अशास्त्रीयं अतः अयुक्तमिति—किंच—तासां परिगृहीतारः **अपांक्तेयाः इति वदामः**—आधुनिकाः सर्वे **महात्मानः बुधाः** एतत् कुर्वंति—उपदिशंतिच । दानानंतरं बहुशः संस्कृतापि कन्या अनापद्यपि अन्यस्मै दातुं योग्या इति वदंति—ताः पुनर्भ्वः नेतिचमन्यंते

अतः आधुनिकाः **पंडिताः महात्मानः बुधाः** एतत् निषेधस्य शास्त्रत्वं नांगीकुर्वंतीतिभाति ॥

किंच कलौ—" न यज्ञे गोवधः कार्यः " इति एकं निषेधकं शास्त्रमितिच वदति—कलेः पूर्वमेव—गोवधस्यनाचारोभूत्—श्रीमद्रामायण भारतादिषु कुत्रापि यज्ञे गोवधः नदृश्यते—कलिकालात्पूर्वमेव अस्य आचारस्य नष्टत्वात्—तस्य निषेधः अनावश्यकएव ॥

कमंडलु धारणमपि कलौ निषित्धं—इतिच वदति—अस्य निषेधस्य शास्त्रीयत्वं षण्मतस्थापनाचार्यशिष्यैः श्रीमद्रामानुजपूर्णबोध शिष्यैश्च आधुनिकैः सर्वैरपिच नांगीकृत—यदि कमंडलुधारण निषित्धं—तर्हि सर्वे **आधुनिकाः महात्मानः बुधाः** वयमिव कलिकालीयशास्त्र अपहाय—पौर्वयुग शास्त्रं—अवलंबंत इतिभाति ॥

विधवायां प्रजोत्पत्तिरपि पूर्वोक्त वचनैः निषिधा—विधवायां प्रजोत्पादनं वयमपि प्रशस्तमितिनवदामः प्रजोत्पादनार्थं विधवायां सयोगः सर्वदा त्याज्यएव—कलिकाल मात्र इतिन—विधवायां प्रजोत्पादनेन सा प्रजा उत्पादयितुः नभवति—किंतु—सा गोळक इत्युच्यते—सर्वकालेषु निंद्या भवति ॥

देवरस्य नियोजनमपि निषित्धमिति पूर्वोक्ताः **महात्मानः बुधाः** वदंति—तत्—श्रीमहाभारतोदाहृत वाक्यैः अभ्युपगतत्वात् शास्त्रीयमेव ॥ निषित्धंवानवा तादिदानीं अवश्यं कर्तव्यमेवेतिवयं नवदामः ॥

बालिका क्षतयोन्याश्च वरेणान्येन संस्कृतिरपि निषित्धेति वदंति—अस्य निषेधस्य शास्त्रीयत्वं अगी कुर्वाभिः सर्वैः अक्षतयोनयः अन्यैः वरैः मांगल्यधारणानंतरमपि संस्क्रियंते—एवमेव इतरेषु वचनेष्वपि द्रष्टव्यं ॥

हेमाद्रौ उत्धृतो देवल: कमंडलु धारिणां—दीर्घ काल **ब्रह्मचारिणांच** दत्तायाः कन्यायाः पुनर्दानकर्तृणांच कृच्छ्रशतैरपि निष्कृतिर्नास्तीति वदति—श्रीमदद्वैतिसन्यासिन.मठाधिपतयः उडपिवासिमाध्वसन्यासिनः इदानीं कमंडलु धारयति । दीर्घ ब्रह्मचर्यं चरंतिच—अतः सस्कृताः पुनर्भ्वः स्त्रियः तासा भर्तारः पौनर्भवाश्च—एते सर्वे पूर्वोक्त सन्यासिभिः समा:भाति—उभयेषां एकागतिरिति निष्पन्न भवति—तथा सति—अक्षतयोनीनां विवाहस्य युक्तत्वेन प्रतिपादकानां चिंता नास्तीतिभाति ॥

अस्थिसंचयनादूर्ध्वं अंगस्पर्शनमपि निषिध्धमिति—**महात्मानः बुधाः** वदंति—अग्निपुराणवत् विष्णुपुराणमपि कलौ उद्धृतं (अं० ४ अ० २० द्रष्टव्य) तस्मिन् पुराणे पूर्वोक्तांगस्पर्शस्य कर्तव्यता उपदिष्टा भवति ॥

वि० पु० अं० ३—अ० १३ श्लो० १४.

चतुर्थे हानि कर्तव्यं भस्मास्थिचयननृप ॥
तदूर्ध्व मगस्पर्शश्च सपिंडानामपीष्यते ॥

पूर्वोक्तैः महात्मभिः बुधैः यद्यत् निषिध्ध मिति उक्तं तत्तत् निषिध्धमिति अस्मिन् पुराणेवा इतर महापुराणेष्वपिवा नोक्त ॥

किंच—अग्निहोत्र गवालंभ सन्यासं पलपैतृकं ॥
देवराच्च सुतोत्पत्तिः कलौपच विवर्जयेत् ॥
अश्वालंभ गवालंभ सन्यासं पलपैतृकं ॥
देवरेण सुतोत्पत्तिः कलौपच विवर्जयेत् ॥
इति केचित् **महात्मानः बुधाः** वदंति ॥

मुचुकुंदकृष्णसंवादात्पूर्वमेव कलि.प्रादुरभूत् इति श्रीभागवतादवगम्यते । एतत्सवादकालानतर भगवान् श्रीकृष्णः अश्वालंभं पांडवैः

कारितवान् स्वयच अकरोत्—तथैव अग्निहोत्रमपि—तदासन्यासिनः बहवः अभूवंन्—एतावत्कालपर्यंतं श्रीमच्छंकर-रामानुज-पूर्णबोधपरपरागत सन्यासिनः वर्ततएव—पूर्वोक्तश्लोकयोः वर्जनीयाइत्युक्तानांमध्ये—त्रीणि—कलौबुधैः नवर्जितानीति दृश्यते—परंब्रह्म श्रीकृष्णः श्रीमच्छंकर-रामानुज पूर्णबोधाः सदाशिवानंतवायवः पूर्वोक्तश्लोकयोः उक्तस्य कलिकालीयशास्त्रस्य—शास्त्रत्व नांगीचक्रुः—इति दृश्यते—अतः इदंशास्त्रं नेतिवदामः ॥

१३. विवाहस्य ऐच्छिकत्वात् पूर्वोक्तायां आपद्यपि स्त्रियाः पुनः भर्तृपरिग्रहः ऐच्छिकएव किंच अन्य भर्तुरपरिग्रह आमुष्मिकफलविशेषोपि भवति सा इहापि सद्भिः साध्वीति चोच्यते ॥ अत्राहुः ॥

मनुः अ० ५ श्लो० १५६–१६२.

पाणिग्राहस्य साध्वी स्त्री जीवतोवा मृतस्यवा ॥
पतिलोकम भीप्सती नाचरे त्किंचिदप्रिय ॥

* * * *

न द्वितीयश्च साध्वीना क्वचिद्भर्तोपदिश्यते ॥

अ० ९ श्लो० २९.

पतिया नाभिचरति मनोवाक् देहसयता ॥
सा भर्तृलोक माप्नोतिसद्भिः साध्वीति चोच्यते ॥

विष्णुः अ० २५ प० १२०.

मृते भर्तरि साध्वीस्त्री ब्रह्मचर्ये व्यवस्थिता ॥
स्वर्गंगच्छत्य पुत्रापि यथाते ब्रह्मचारिणः ॥

याज्ञवल्क्यः अ० १ श्लो० ७५.

मृते जीवतिवा पत्यौयानान्य मुपगच्छति ॥
सेहकीर्ति मवाप्नोति मोदते चोमयासह ॥

पराशरः अ० ४ प० १९.

मृते भर्तरिया नारी ब्रह्मचर्ये व्यवस्थिता ॥
सा मृता लभते स्वर्गं यथा सद्ब्रह्मचारिणः ॥

१४. एवंच स्त्रीणां प्रव्रजन कालौ द्वौवर्तेते.

दानकालएकः आपत्प्राप्तौ अपरः एतयोर्मध्ये एकस्मिन् काले प्रव्रजेत प्रव्रजनानंतरं गार्हस्थे पुनः प्रवेशो नविद्यते यदि पुनः प्रविशेत् सा वांताशिनीति प्रकीर्त्यते भ्रष्टा भवतिच अतः कन्यादान काले आपदिच अक्षता कन्या प्रष्टव्यात्वं सकामावा निष्कामावेति यदि सकामा अथवा न निष्कामा तर्हि तस्याः मुंडनादिकं न कर्तव्यं यर्हिमा सम्यगालोच्य प्रव्रजितुं इच्छति तर्हि तस्याः मुंडनादिकं कर्तव्यं ॥

ननु इदानीं तनेषु एतच्छास्त्ररीत्या आचारोनदृश्यते एवं सति सज्जनैः आचारो बलीयान् इति न्यायात् आचारएव ग्राह्यः न शास्त्रं इतिचेत्—मैवं—शास्त्रमेव अनुष्ठातव्यं नतु शास्त्र विरुध्द आचारः ॥ तथाहि ॥

वृ० गौ० अ० १४ प० ९९.

धर्मं जिज्ञासमानानां प्रमाणं प्रथमं श्रुतिः ॥
द्वितीयंतु स्वशास्त्राणि तृतीयं लोक संग्रहः ॥

मनुः अ० २ श्लो०

श्रुतिस्मृत्यु दितंधर्म मनुतिष्टन् हि मानवः ॥
इहकीर्ति मवाप्नोति प्रेत्यचानुत्तमं सुखं ॥ ९ ॥
श्रुतिस्तु वेदोविज्ञेयो धर्मशास्त्रंतुवै स्मृतिः ॥
ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मोहि निर्बभौ ॥ १० ॥

योवमन्येत तेमूले हेतु शास्त्रा श्रया द्विजः ॥
स साधुभिर्बहिष्कार्यो नास्तिको वेद निंदकः ॥ ११ ॥
श्रुतिद्वैधंतु यत्रस्यात् तत्र धर्मा वुभौस्मृतौ ॥ १४ ॥

गौतमः अ० ११ प० ४१५.

देशजाति कुलधर्माश्चाम्नायैरविरुत्धाः प्रमाणं ॥

व्यासः अ० १ श्लो०.

श्रुतिस्मृति पुराणानां विरोधो यत्र दृश्यते ॥
तत्र श्रौतं प्रमाणंतु तयोर्द्वैधे स्मृतिर्वरा ॥ ४ ॥

गो० गृ० सू० २ प्र० ३ कां० प० ३३०–३३१.

भुक्तोच्छिष्टं वध्वै प्रदाय यथार्थं ॥ २२ ॥

भाष्यं—स्मृतिमूलः खल्वाचार तया विरोधे स्वयमेव बाध्यतेनजातुचि-दपितां बाधितुर्मोष्टे । नहि पश्चिमसित्धेनाचारेण पूर्वसिन्ध शास्त्रमुपरोत्धव्य इतियुक्त ।

* * * *

गृह्योक्तधर्माणां जनपदादिधर्माणांच विरोधे गृह्योक्तधर्माणा मेव-करणं इति गृह्यकारगणांमत विज्ञायते ॥ २२ ॥

आ० गृ० सू० १–७–२.

"यत्तुसमान तद्वक्ष्यामः" ।

भाष्यं—जनपदादि धर्माणां वक्ष्यमाण धर्माणांच विरोधे सति वक्ष्यमाण मेवधर्मं कुर्यात् जनपदादि धर्ममिति यद्वक्ष्याम.तत् सर्वत्र समा-नमेवेत्यर्थः ॥ वैदेहेषु सद्यएवव्यवायोदृष्टः गृह्येतु ब्रह्मचारिणौ त्रिरात्रं इति ब्रह्मचर्यं विहितं तत्र गृह्योक्तमेव कुर्यात् न देश धर्म मिति सित्धं ॥

स्मृतिसारे.

समयाचारिका धर्माः जाति देश कुलोद्भवाः ॥
ग्रामाचाराः परिग्राह्याः येच विध्य विरोधिनः ॥

चतुर्विंशतिमते.

स्मृतेर्वेद विरोधेतु परित्यागो यथा भवेत् ॥
तथैव लौकिक वाक्य स्मृतिबाधे परित्यजेत् ॥

भागवते–५ स्कं० ६ अ०.

तेच ह्यर्वाक्तनयानिजल्लोक यात्रयांधपरंपरयाश्वस्ताः
तमस्यधे स्वयमेव प्रपतिष्यति ॥ १२ ॥

श्रीमत्कृष्णोपनिषदि–भगवद्गीतायां–अ० ४.

भगवानुवाच–इम विवस्वते योग प्रोक्तवानहमव्यय ॥
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवे ब्रवीत् ॥ १ ॥
एवं परपरा प्राप्तं इम राजर्ष योविदुः ॥
सकालेनेह महता योगोनष्टः परतप ॥ २ ॥
कुरु कर्मैव तस्मात्त्व पूर्वैः पूर्वतर कृत ॥ १५ ॥

श्रीमच्छंकर भा०.

एव क्षत्रिय परंपरा प्राप्त इमं–राजर्षयो राजानश्चते ऋषयश्च राजर्षयो विदुः इम योगं सयोगः कालेनेह महतादीर्घेण नष्टो विछिन्न सप्रदायः सभूतः ॥ २ ॥ पूर्वैर्जनकादिभिः पूर्वतरं कृतं नाधुनातनं कृत–निर्वर्तित ॥ १५ ॥

श्रीमद्रामानुज भा०.

योयतवोदितो योगः सकेवलं युत्धप्रोत्साहनायेदानीमुदित इतिन मंतव्य–मन्वंतरादावेव निखिल जगदुत्धरणाय परमपुरुषार्थलक्षणमोक्ष

साधन तयेमं योगमहमेव विवस्वते प्रोक्तवान् विवस्वांश्च मनवे मनुरिक्ष्वा-कवे इत्येवं संप्रदाय परंपरया प्राप्तमिमं योगं पूर्वे राजर्षयो विदुः समहता कालेन तत्तच्छ्रोतृ बुद्धिमांद्या द्विनष्टप्रायोभूत् १—२—पूर्वै विवस्वन्मन्वा-दिभिः कृतं पूर्वतर पुरातनं तदानीमेव मयोक्त वक्ष्यमाणाकारं कर्मैवकुरु ॥ १५ ॥

श्रीमन्मध्व भा०.

पूर्वानुष्ठितश्चायं धर्म इत्याह इम मिति ॥ १ ॥
पूर्व कृत कर्म पूर्वभावीत्यर्थः ॥ १५ ॥

आनंदगिरिटीकायां.

ते तदैव संपाद्य कर्मकृतवंतो न तदिदानीम प्रामाणि
कत्वात् अनुष्ठेयमित्याशक्याह—पूर्वतर मिति ॥ १५ ॥

श्रीधरीयटीकायां.

एवंराजानश्चते ऋषयश्चेति अन्येपि राजर्षयो
निमिप्रमुखाः स्वपित्रादिभिरिक्ष्वाकु प्रमुखैः प्रोक्त
इमं योग विदुर्जानातिस्म अद्यत नाना मज्ञाने
कारणमाह सयोगः कालवशा दिहलोके नष्टोविच्छिन्नः ॥ २ ॥
पूर्वैर्जनकादिभिरपि मुमुक्षुभिः सत्व शुध्यर्थं
पूर्वतरं युगांतरेष्वपिकृतं—तस्मात्त्वमपि प्रथमंकर्मैवकुरु ॥ १५ ॥
तच्चतत्वविद्भिः सहविचार्य कर्तव्य
न लोक परंपरामात्रेण त्याह किं कर्मेति ॥ १६ ॥

श्रीमद्भगवद्गीतायां अ० १६ श्लो०.

यः शास्त्रविधि मुत्सृज्य वर्तते कामकारतः ॥
नससिद्धि मवाप्नोति न सुखं न परांगतिं ॥ २३ ॥

तस्मात् शास्त्रं प्रमाणंते कार्याकार्य व्यवस्थितौ ॥
ज्ञात्वा शास्त्र विधानोक्तं कर्मकर्तु मिहार्हसि ॥ २४ ॥

श्रीमच्छंकर भा०.

शास्त्रविधिं–शास्त्रंवेदः तस्यविधिं–कर्तव्या कर्तव्य ज्ञानकारणं-२३. शास्त्रमेवविधान–शास्त्रविधानं ॥ २४ ॥

श्रीमद्रामानुज भा०.

शास्त्र वेदाख्यविधिः २३. तस्मात् कार्याकार्य व्यवस्थितौ. उपादे यानुपादेय व्यवस्थायां शास्त्रमेव तवप्रमाणं धर्मशास्त्रेतिहास पुराणोप- बृहितावेदाः ॥

आनंदगिरिटीकायां.

शिष्यते बोध्यतेनेन पूर्वोर्थ इति शास्त्रं ॥ २३ ॥

श्रीधरीयटीकायां.

शास्त्रविधि–वेदविहितं धर्मं ॥ २३ ॥

श्रीमहाभागवते पंचमस्कंधे षष्ठेध्याये १२ गद्ये.

आचाराणां आचारत्वं वेदमूलकं–अन्यथातेषां अप्र- माणत्वमेव ॥ तथाहि ॥

श्रीधरः

तेच ह्यर्वाक्तनयानिजलोक यात्रयांधपरंपरयाश्वस्तास्त मस्यंधे स्वयमेव प्रपतिष्यंति ॥ अर्वाक्तनया अवेदमूलया निजलोक यात्रया–स्वेछाकृत प्रवृत्ता–आश्वस्ताः कृत विश्वासाः ॥ इति ॥

अतः सद्भिः शास्त्रमेवानुसरणीयं तद्विरुद्धाचारः त्याज्यः अस्मिन् ग्रंथेयन्मयाप्रोक्तं तच्छास्त्रीयमिति जाने-यदितत् अशास्त्रीयं तर्हि तस्य अशास्त्रीयत्व दर्शकाणि श्रुतिस्मृत्यापद्धर्मीयाणि-प्रमाणानि प्रेषणीयानीति विनयपुरस्सरं सर्व पंडितान् आचार्यान् गुरूनपि श्रीमत्कृष्णमतानुयायी रघुनाथः प्रार्थये.

कल्यब्दे, ४९८३.

चित्रभानुवर्षे तुलामासे.

समाप्तोयं ग्रंथः

॥ केचित् महात्मा
॥ वक्ष्यमाण श्लोका - ८२

पराशरः नष्टेमृतेप्रव्रजिते क्लीबेचपतितेपतौ । पंचापत्सु च ना

अत्रिः नष्टेसन्यासमापन्ने व्याधिग्रस्तेचभर्तरि । पुनःस्त्रीणांवि

गौतमः मरणानन्तरं भर्तुर्यद्यनाहतयोनयः । स्त्रियो विवाहम

विश्वामित्रः अस्पृष्टलिंगयोनीनामाविंशतिवयःस्त्रियाः । पुन

नारदः उद्वाहितापि साकन्यानचेत्संप्राप्तमैथुना । पुनः सं

च्यवनः पूर्वं निषेकान्नारीणां मृतेपत्यौततःपरं । दशाहाभ

वैशंपायनः पुरुषाणामिवस्त्रीणांविवाहाःबहवोमता. । भर्तृ

काश्यपः आषोडशवयो नार्योयदिता मृतभर्तृकाः । पुन

जाबालिः ब्राह्मणाःक्षत्रियाःवैश्याःशूद्राःस्वकुलयोषितां ।

अगस्त्यः भर्त्रभावेवयःस्त्रीणां पुनःपरिणयोमतः । नतत्र

व्याघ्रपात् पत्निनाशेयथापुंसो भर्तृनाशेतथास्त्रियाः । पु

वसिष्ठः भर्तृसंबंध शून्यानां भर्तृनाशेतुयोषितां । पुन

बृहस्पतिः अज्ञातभर्तृसंबंधाः भवंतियदियोषितः । गा

विवाहेच्छायदा स्त्रीणांभर्तृनाशेतुजायते ।

मृकंडुः निषेकानंतरंस्त्रीणां भर्तुर्मर्तुर्म... । पाणि

याज्ञवल्क्यः आ... ...यःस

॥ श्रीः ॥

श्रीयज्ञेश्वरशर्मविरचिता

प्रस्थानचन्द्रिका ।

निर्णयसागरयन्त्रालयाधिपतिना मुद्रिता ।

१८८९

मूल्यमेक आणकः ।

आर्यविद्यासुधाकरकर्तृभिः सुरतनगरनिवासिभिर्भट्टयज्ञेश्वरशर्मभिर्जलपर्यटनचिकीर्षूणां बोधाय नानाधर्मशास्त्रेभ्यो वचनानि संगृह्य प्रस्तावचन्द्रिका नाम निबन्धो रचितः। तं च प्रकृतकालोपयुक्तत्वादावां मुद्रयितुं प्रवृत्ताः स्वः। एतं सम्यग्विचार्य बुधा यदुचितं तत्कुर्वन्त्विति।

काव्यमालासंपादकौ

दुर्गाप्रसाद-काशिनाथौ।

॥ श्रीः ॥

अप्राप्य यस्य महिमानमचिन्त्यशक्तिं वाचो भवन्ति मनसापि समं निवृत्ताः ।
तं नित्यमेकमजमीश्वरमत्र लोके बुद्धिप्रकाशकमहर्निशमानतोऽस्मि ॥

धर्मशास्त्रप्रणेतॄणां मन्वादीनां पदाम्बुजम् ।
नत्वा लोकहितार्थाय कुर्वे प्रस्थानचन्द्रिकाम् ॥

इह तावत्प्रवसता द्विजेन के देशा अभिगम्याः, के च परिवर्जनीया इति विचार्यते—

मनुः—'सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् । तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ॥ कुरुक्षेत्रं च मत्स्याश्च पञ्चालाः शूरसेनकाः । एष ब्रह्मर्षिदेशो वै ब्रह्मावर्तादनन्तरः ॥ हिमवद्विन्ध्ययोर्मध्यं यत्प्राग्विनशनादपि । प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः ॥ आ समुद्रात्तु वै पूर्वादा समुद्राच्च पश्चिमात् । तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः ॥', तयोर्हिमवद्विन्ध्ययोः । 'कृष्णसारस्तु चरति मृगो यत्र स्वभावतः । स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्त्वतःपरः ॥', स्वभावतः न तु बलादानीतः । परोऽन्यो म्लेच्छदेशो न यज्ञार्ह इत्यर्थ इति कुल्लूकभट्टः । 'एतान्द्विजातयो देशान्संश्रयेरन्प्रयत्नतः । शूद्रस्तु यस्मिन्कस्मिन्वा निवसेद्वृत्तिकर्षितः ॥' एतावद्भिर्मनुवचनैर्ब्रह्मावर्तकुरुक्षेत्रादयो देशा ये प्रदर्शितास्त एव प्रवासयोग्या नान्ये इति न नियम्यते, किं तु यज्ञियदेशा एत इत्येव, अत एवान्यदेशोद्भवा अपि द्विजातयो यज्ञार्थत्वाददृष्टार्थत्वाच्चैतान्देशान्प्रयत्नादाश्रयेरन् । शूद्रस्तु वृत्तिपीडितोऽन्यदेशमप्याश्रयेदिति कुल्लूकभट्टो व्याचख्यौ ।

'प्रनष्टाश्रमधर्माश्च देशा वर्ज्याः प्रयत्नतः' इति वायवीये । तथा स्मृतिसारे—'नैकवासा न च द्वीपे नान्तरिक्षे कदाचन । श्रुतिस्मृत्युदितं कर्म न कुर्यादशुचिः क्वचित् ॥' इति । दिवोदासीये—'म्लेच्छदेशे तथा रात्रौ सन्ध्यायां विप्रवर्जिते । न श्राद्धमाचरेद्विद्वान्न चाकाशे कदाचन ॥' इत्यादीनि वचनानि तु श्राद्धयज्ञादिकर्मणि प्रोक्तदेशानां वर्जनीयत्वबोधकानि, न तु प्रवासकर्मण्यपि वर्जनीयत्वबोधकानि । अत एव निर्णयसिन्ध्वादिमहानिबन्धेषु श्राद्धे वर्जनीयदेशनिरूपणप्रकरण इमानि वचनान्युपनिबद्धानि ।

यद्यपि 'सिन्धुसौवीरसौराष्ट्रांस्तथा प्रत्यन्तवासिनः । अङ्गवङ्गकलिङ्गांश्च गत्वा संस्कारमर्हति ॥' इति प्रायश्चित्तमिताक्षराधृतदेवलवचनेन सिन्ध्वादिदेशान्प्रति प्रवासं कुर्वतो द्विजस्य पुनरुपनयनं प्रदर्शितम्, इदं च तीर्थयात्राव्यतिरेकेण द्रष्टव्यमिति विज्ञानेश्वर आह, अन्यत्राप्युदाहरन्ति—'सौराष्ट्रसिन्धुसौवीरानवन्तीर्दक्षिणापथम् । एतानि ब्राह्मणो गत्वा पुनःसंस्कारमर्हति ॥' इति बौधायनः, अन्यच्च त्रिस्थलीसेतौ—'कर्मनाशाजलस्पर्शात्करतोयाविलङ्घनात् । गण्डकीबाहुतरणात्पुनःसंस्कारमर्हति ॥' इति पठन्ति, तथापि व्यवसायार्थं तत्र तत्र गमनं नैव विधेयमिति नियमयितुं न शक्यते, अशब्दार्थत्वात् ।

यदि त्वेतेषां वचनानां सिन्ध्वादिदेशगमननिवृत्तावेव तात्पर्यं स्यात्, तदा तु 'गन्तुर्नास्त्येव निष्कृतिः' इत्येव स्मृतिकारा ब्रूयुः । एतच्च तीर्थयात्राव्यतिरेकेण द्रष्टव्यमिति वदन्विज्ञानेश्वरोऽपि ज्ञापयति, यथा किल व्यवसायार्थं तत्र तत्र देशे द्विजाः प्रवासं कुर्वन्तीति ।

दुष्करम्। तस्मात्प्रायश्चित्तं कारयित्वा तथाविधेन संव्यवहारः कार्य इत्येव युक्ततरं भाति। तथा चोक्तं याज्ञवल्क्येन—'प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत्। कामतो व्यवहार्यस्तु वचनादिह जायते॥' इति। अज्ञानकृते सर्वत्र पापक्षयः। यत्र तु—'ब्रह्महासुरापगुरुतल्पगमातृपितृयोनिसम्बन्धगस्तेननास्तिकनिन्दितकर्माभ्यासिपतितात्याग्यपतितत्यागिनः पतिता पातकसंयोजकाश्च' इति गौतमोक्तं महापातकादौ व्यवहार्यत्वं निषिद्धम्, तस्मिन्पतनीयेऽपि कर्मणि कामतः कृते व्यवहार्यत्वमात्रम्, न पापक्षयः, न च पापक्षयाभावे व्यवहार्यत्वमनुपपन्नम्। द्वे हि पापस्य शक्ती—नरकोत्पादिका, व्यवहारनिरोधिका च। तत्रेतरशक्त्यविनाशेऽपि व्यवहारनिरोधिकायाः शक्तेर्विनाशो नानुपपन्नः। तस्मात्पापानपगमेऽपि व्यवहार्यत्वं नानुपपन्नमिति मिताक्षरायां प्रायश्चित्ताध्याये विज्ञानेश्वरः।

इदमत्रावधेयम्, यदि महापातकादौ कामकृते व्यवहार्यत्वनिषेधस्य गौतमोक्तस्यापि प्रायश्चित्तानुष्ठानेन नाशः, तदोपपातकान्तर्भाव्येन नौकया समुद्रीयद्वीपान्तरे म्लेच्छदेशान्तरे वा गमनेन प्राप्तस्यासव्यवहार्यत्वस्य प्रायश्चित्तानुष्ठानेन निरासो भवतीति किमु वक्तव्यमिति।

ननु म्लेच्छदेशे स्वाचारात्परिभ्रश्यते गन्ता इति चेदाचारात्परिभ्रंशो हि प्रायश्चित्तस्य निमित्तं भवितुमर्हति, न तु यावज्जीवमसव्यवहार्यत्वस्य अतो हि पश्चात्तापेन वा परप्रेरणया वा स्वज्ञातिपरिच्युतिभयादिना वा प्रायश्चित्तं कर्तुमिच्छति, सोऽवश्यमनुग्राह्यः शिष्टैः।

तथा चोक्तं पतितत्यागप्रकरणे मिताक्षरादिमहानिबन्धेषु। एवं महापातकादिभिः पतितस्य प्रायश्चित्तमुक्तम्, यस्त्वौद्धत्यादेतन्न चिकीर्षति तस्य किं कार्यमित्यत आह—'दासी कुम्भं बहिर्ग्रामान्निनयेरन्स्वबान्धवाः। पतितस्य बहिष्कुर्युः सर्वकार्येषु चैव तम्॥' इत्याद्युक्त्वा, अयं च त्यागो यदि बन्धुभिः प्रेर्यमाणोऽपि प्रायश्चित्तं न करोति तदा द्रष्टव्यः। 'तस्य तु गुरोर्बान्धवानां राज्ञश्च समक्षं दोषानभिख्याप्य। अनुभाष्य च पुनः पुनराचारं लभस्वेति। स यद्येवमप्यनवस्थितमतिः स्यात्ततोऽस्य पात्रं विपर्यस्येत्' इति शङ्खस्मरणात्। पतितस्य ये दोषा महापातकप्रभृतयस्ते बन्ध्वादीनां समक्षमभिख्याप्य पश्चात्तापजननार्थमुद्घाट्य तं च पतितं प्रत्याचारं लभस्वेति पुनः पुनरभिभाष्योपदेशं कुर्यात्। एवं कृतेऽपि तस्य मतिराचारस्वीकरणे न प्रवर्तेत, तर्हि घटस्फोटपूर्वकं बहिष्कुर्यादिति स्मृत्यर्थः। एवं हि दयालुभिः शास्त्रकृद्भिः पतितस्यापि संग्रहार्थं प्रयतितव्यमिति स्पष्टमेवाभिहितम्। तस्माद्देशपर्यटनार्थं तत्तद्देशीयविद्याशिल्पादिपरिज्ञानार्थं वा समुद्रमध्ये नौकया प्रयाणं कृत्वा गृहागतस्य स्वीयकुलाचारपरीप्सोः पुरुषस्य दोषतारम्येन प्रायश्चित्तैर्विशोधनं स्वीकरणं च शास्त्रविहितमवश्यमभ्युपेयं दीर्घदर्शिभिर्विद्वद्वरैः।

समुद्रयातुः किं प्रायश्चित्तं शास्त्र उपदिष्टमिति यच्छ्रूयताम्—प्रायश्चित्ताध्याये मिताक्षरायाम्—'समुद्रयानं ब्राह्मणस्य न्यासापहरणम्, सर्वपण्यैर्व्यवहरणम्, भूम्यनृतम्, शूद्रसेवा, शूद्राच्छूद्रायामभिजायते तेन यदपत्यं च भवति, तेषां तु निर्देशश्चतुर्थकालं मितभोजना अ-

पोऽभ्युपेयुः सवनानुकल्प स्थानासनाभ्यां विहरन्त एते त्रिभिर्वर्षैस्तदपहरन्ति पापम्' इति बौधायनेनोक्तम् । इदं च बहुकालशूद्रसेवाविषयमिति व्यवस्थापितं शूद्रसेवाविषये विज्ञानेश्वरेण ।तत्तुल्यन्यायेन बहुकालसमुद्रयात्राविषयत्वमपि लभ्यत एव। एवं च दीर्घकालपर्यन्त समुद्रप्रयाणे त्र्यब्दं प्रायश्चित्त प्राप्नोति । तथा च शूद्रसेवासमुद्रप्रयाणयोस्तुल्यदोषाधायकत्व स्फुटमभिहित भवति । सप्रतिकाले शूद्रसेवामापद्यनापदि च कुर्वाणा दाक्षिणात्या नागरा गुर्जरादयश्च द्विजा अचीर्णप्रायश्चित्ता अपि संव्यवह्रियन्ते, तदा कोऽय समुद्रयातुर्महानपराधो येनाय कृतप्रायश्चित्तोऽपि न सव्याह्रियेत ।

अथापि ब्रूयात् । आपदि सेवादिकमभ्यनुज्ञातमिति । यथाह मनुः—'विद्या शिल्पं भृतिः सेवा गोरक्ष्यं विपणि' कृषि । धृतिर्भैक्ष्य कुसीदं च दश जीवनहेतवः ॥' इति। आपत्प्रकरणाज्जीवनहेतव इति निर्देशाच्च । एषा मध्ये यया वृत्त्या यस्यानापदि न जीवन तया वृत्त्या तस्यापदि जीवनमभ्यनुज्ञायते, यथा ब्राह्मणस्य भृतिसेवादि । एवं शिल्पादावपि ज्ञेयम् । 'भृति प्रेष्यभावेन वेतनग्रहणम्, सेवा पराज्ञापरिपालनम्' इति कुल्लूकभट्ट ।एवं चाभ्यनुज्ञातत्वात्सेवादिक कर्तव्यम्, समुद्रयान तु नाभ्यनुज्ञातमिति तन्न कर्तव्यमिति । बाढम् । विपणिर्वणिज्या वणिक्कर्म तच्च सांयात्रिकत्वमपि । सांयात्रिकः पोतवणिक । अनया दिशा इदमप्यभ्यनुज्ञात भवति । किंच 'आपद्वृत्तिः कलौ वर्ज्या' इति प्रागभिहित न विस्मर्तव्यम् ।

आपद्वृत्त्यापि जीवन चिरकाल वंशपरम्परया वा न केनापि ऋषिणाभ्यनुज्ञातम् । लोभात्तथा कुर्वता प्रत्युत दोषोऽभिहित' । यथाह याज्ञवल्क्य—'क्षात्रेण कर्मणा जीवेद्विशां वाप्यापदि द्विज' । निस्तीर्यैतामथात्मान पावयित्वा न्यसेत्पथि ॥' इति । तथा—'जात्युत्कर्षो युगे ज्ञेयः पञ्चमे सप्तमेऽपि वा । व्यत्यये कर्मणां साम्य पूर्ववच्चाधरोत्तरम् ॥' इति। मूर्धावसिक्तादीनामनुलोमसकरजातीनामुत्कर्षो युगे जन्मनि सप्तमे पञ्चमे वा । अपिशब्दात्षष्ठे वा बोध्यः । व्यवस्थितश्चाय विकल्पः । व्यवस्था चैवम्—ब्राह्मणेनोढायां शूद्रायामुत्पादिता निषादी । सा ब्राह्मणेनोढा दुहितर काचिज्जनयति । सापि ब्राह्मणेनोढेत्येवप्रकारेण षष्ठी सप्तमं ब्राह्मणं जनयति इत्यादि ज्ञेयम् । कर्मणां व्यत्यये यथा—'ब्राह्मणो मुख्यया वृत्त्या अजीवन्क्षात्रेण कर्मणा, तेनाप्यजीवन्वैश्यकर्मणा, तेनाप्यजीवञ्शूद्रकर्मणा' इत्येवकर्मणा व्यत्यये सति यद्यापद्विमोक्षेऽपि तां वृत्तिं न त्यजति तदा सप्तमे षष्ठे पञ्चमे वापत्यजन्मनि क्रमेण शूद्रवैश्यक्षत्रियसाम्यम् । यस्य हीनवर्णस्य कर्मणा जीवति तत्समानजातिर्भवतीति विज्ञानेश्वरः । अलमनया प्रसक्तानुप्रसक्त्या ।

विनापि तीर्थयात्रां समुद्रमध्ये म्लेच्छदेशगमने बौधायनोक्त त्र्यब्दं प्रायश्चित्तम् । तच्च 'सिन्धुसौवीरसौराष्ट्रान्' इति वचनेन पुनःसस्कारसमुच्चित कार्यम् । पुनःसंस्कारप्रकारस्तु ग्रन्थान्तरादवगन्तव्यः । अस्मिंश्च पुनःसस्कारसमुच्चितत्र्यब्दप्रायश्चित्ते कृते इतरेषां पापानां प्रसङ्गसिद्धत्वा न प्रायश्चित्तान्तरस्य प्रसङ्गः । यद्वा—'यद्यप्यसकृदभ्यस्तं बुद्धिपूर्वमघ महत् । तच्छुध्येदब्दकृच्छ्रेण महतः पातकादृते ॥' इति मिताक्षराधृतसुमन्तुवचनबोधितेनैकाब्दात्मकसर्वप्रायश्चित्तेन समुच्चयः कार्यः। कृच्छ्रस्वरूपं तु—'त्र्यहं प्रातः त्र्यहं सायं त्र्यहमद्यादयाचितम् । त्र्यह परं च नाश्नीयात्प्राजापत्यं चरन्द्विजः ॥' इति । एवंकर्तुमशक्तेन प्रत्याम्नाया आचरितव्याः ।

एकस्याब्दस्य त्रिंशत्कृच्छ्राणि भवन्ति। कृच्छ्रप्रत्याम्नायाश्चानेकविधास्तत्र तत्रोक्ताः। तथाहि, एकगोदानम्, दशसहस्रगायत्रीजपः, गायत्र्या सहस्र तिलहोमः, शतद्वयप्राणायामाः, द्वादशब्राह्मणभोजनम्, यावत्केशशोषणं विरम्य तीर्थे द्वादश स्नानानि, वेदसंहितापारायणम्, योजनयात्रा, द्वादशसहस्र नमस्काराश्चेति । एतेषां मध्यादन्यतमप्रत्याम्नायेन गणनया यथायथ शक्त्यनुसारतोऽनुष्ठेयम् ।

उक्तं च याज्ञवल्क्येन—'देशं कालं वयः शक्ति पापं चावेक्ष्य यत्नतः । प्रायश्चित्त प्रकल्प्यं स्याद्यत्र चोक्ता न निष्कृतिः ॥' इति । निमित्तानामानन्त्यात्प्रतिनिमित्तं कर्तुमशक्तत्वात्सामान्येनोपदिष्टानुपदिष्टविषये प्रायश्चित्तज्ञानार्थमिदम् । यदुक्त प्रायश्चित्तजातं वक्ष्यति च तद्देशकालादिकमवेक्ष्य यथा कर्तु. प्राणविपत्तिर्न भवेत्तथा विषयविशेषे कल्पनीयम्, इतरथा प्रधाननिवृत्तिप्रसङ्ग स्यादिति विज्ञानेश्वर.।

एवमुक्तप्रकारेण प्रायश्चित्तानुष्ठाने कृते तत्र तत्र देशे सचरतां द्विजातिप्रभृतीनां स्वधर्मस्थितिः परिरक्षिता भवेत्, इतरदेशीयविद्याशिल्पादिकौशलानि नीतिव्यवहारादिरीतयश्चानुभवगोचरा भवेयु । एवं चानेकोदारगुणप्रभवस्थानस्य प्रस्थानस्य सकोचो हि परमहानिकर । यथाह विश्वावसु—'व्यापारान्तरमुत्सृज्य वीक्षमाणो वधूमुखम् । यो गृहेष्वेव निद्राति दरिद्राति स दुर्मतिः ॥'. 'आकिंचन्याद्रतिपरिचयाज्जाययोपेक्ष्यमाणो भूपालानामननुसरणाद्विभ्यदेवाखिलेभ्य. । गेहे तिष्ठन्कमतिरलस कूपकूर्मै सधर्मा किं जानीते भुवनचरित किं सुख चापभुङ्क्ते ॥' अनेकविधान्क्लेशान्विपह्यापि सर्वत्र वसुधातले पर्यटन विप्रा कुर्वन्ति स्म इति विष्णुपुराणेऽभिहितम्—'अटन्ति वसुधां विप्राः पृथिवीदर्शनाय वै । अनिकेता ह्यनाहारा यत्र सायगृहास्तु ते ॥' इति । अनिकेतत्वमनाहारत्व चानेकदिनसाध्ये निर्जनगिरिकाननादिप्रदेशेषु चङ्क्रमणप्रसङ्गे प्राप्नोत्येव । प्रशसित चाभियुक्तैः कविभिरपि देशाटनम्—'देशाटन पण्डितमित्रता च तथा महीपालसभाप्रवेशः । अनेकसच्छास्त्रविलोकन च चत्वारि चातुर्यकराणि लोके ॥', 'देशे देशे किमपि कुतुकादद्भुत वीक्षमाणाः सपाथेव द्रविणमपिमितं सद्म भूयोऽप्यवाप्य । सगुज्यन्ते सुचिरविरहोत्कण्ठिताभि. सतीभिः सौख्य धन्या किमपि दधते सर्वसंपत्समृद्धा ॥' तथा धर्ममीमांसाविदा महाभाष्यसेतुकृता हरिणाप्युक्तम्—'अय निज परो वेति गणना लघुचेतसाम् । उदारचरिताना तु वसुधैव कुटुम्बकम् ॥' इति ॥

मन्वादिस्मृतिवाक्यानि ग्रन्थकारवचांसि च ।
प्रमाणमनुरुध्यैव विचारोऽत्र कृतो मया ॥
अथापि वेदविज्ञत्वात्स्खलनं मम लेखने ।
क्षन्तुमर्हन्ति विद्वांसः सारमार्यो हि गृह्णते ॥

—— ——

श्रीकृष्णः शरणं मम ।

विधवाविवाहखण्डनम् ॥

श्रीकुम्भकोणनगरवासि-

श्रीभागवतश्यामाचार्यविरचितम्

शालिवाहनशाके १८२९ वैक्रमेऽब्दे १९६४

श्रीसद्धर्मार्थे

संस्कृतमासिकपत्रे क्रमेण प्रकाशितम् ।

[illegible]

श्रीमदीश्वरराजगुरुभ्यो नमः ।
परिच्छेदा अस्य ग्रन्थस्य समुदाहृताः ॥
आद्ये साधकमानानामभावस्य निरूपणम् ॥ १ ॥
द्वितीये बाधकानां च प्रमाणानामुदाहृतिः ॥
तृतीये वादिनोर्ग्रन्थ द्वयस्यापि निराकृतिः ॥ २ ॥
प्रकरणैः पञ्चभिः प्रोक्ता विस्तरेण च मार्मिकी ॥
नान्यग्रन्थे कृता कैश्चिन्मीमांसैतादृशी पुनः ॥ ३ ॥

अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ
कपक	कल्पक	२	७
पुनर्भु	पुनर्भूः	७	१
नकायाः	स्वकायाः	"	४
बालात्त्यत्का	बलात्त्यक्ता	"	२०
व्ययां	व्यतायां	"	२६
कन्यना	कन्यका	८	४
सेह;	सेक्तः	"	८
अन्त्रगतेन	अन्तर्गतेन	"	१४
चात्वाना	चात्वाला	"	२२
व्याहकलेवनो	व्याहृतलेङ्कवनो	"	२५
ह—याय	ध्यायीय	९	१०
सवशुर्षी	सदृशीं	"	१५
हसात	.येति	"	२५
विविवाह	विवाह	१२	४
वियोगे	वियोगो	१३	२६
मीतिसूक्तं	मीत्युक्तं	१९	८
शून्यनां	शून्यानां	"	११
चश्चत्वारिं	चतुश्चत्वारिं	२१	१६
अय	अया	२२	१६
पाणिग्रहणं	पाणिग्रहण	"	२१
ताभ्यमेव	ताभ्यामेव	"	"
रजककानां	रजकानां	"	२५

श्रीकृष्णः शरणम् ।

विधवा विवाह खण्डनम् ॥

अथ प्रचार्यमाणे सद्धर्मे प्रमाणचूडामणिभिर्वेदैस्तदनुकूल-शास्त्रैर्यतो ब्राह्मणादिवर्णधर्मव्यवस्था दृढमनादितः सम्प्रवृत्ता सर्ववैदिकसज्जनानां निःश्रेयसकरीति निश्चयेन सविस्तरं प्रतिपाद्यते ऽस्मन्मित्ररत्नैः श्रीगयादत्तचतुर्वेदिभिरतस्तन्मूलदार्ढ्याय भारतमहिलानां पातिव्रत्यपरमधर्मसंरक्षणाय गोलकादिवर्ण-साङ्कर्याभावाय रिक्थपिण्डोदकव्यवस्थावस्थानायच स्त्रीणां देशकालवयोऽवस्थाधिकारानुचिन्तनस्य शास्त्रेष्वनुक्तत्वात्त्रिवर्णविधवास्त्रीणां पुनर्विवाहः शास्त्रैर्निषिद्धः शिष्टैरद्यया-वदनादृतः सत्सम्प्रदायाचार्यैश्च घण्टाघोषेण निवारितो बहुभिः पण्डितप्रकाण्डैर्गुरुतरग्रन्थैश्च भूयोऽपि च यः खण्ड्यते तद्विषयेऽत्रापि नवं ग्रन्थरत्नं प्रकाशयितुमुचितमिति चिन्तापरस्य मम गृहं ऽत्रमथुरायामेव प्रयागादित्रिस्थलीयात्रां कृत्वा यदृच्छया सम्प्राप्तैः श्रीभागवतश्यामाचार्यैः कुम्भघोणनगर-वास्तव्यैर्बहुतरसद्ग्रन्थरत्नप्रणेतृभिर्विरचितो निबन्धोऽजस्रेव तेभ्य उपलब्धः सोऽयं स्वसधर्मप्रणयिमहोदयेभ्यः शङ्कासमा-धिग्रन्थान्तर्गततया वर्णव्यवस्थाग्रन्थेन सनाथीभूतः क्रमेण समुपाह्रियते मयेति ।

पूर्णबोधहृदयाचलवासं वादिगन्धगजभेदनदक्षं । सूक्ततीक्ष्ण-नखरायुधघोरं बादरायणमृगाधिपमीडे ॥ १ ॥ श्रीसत्यवागगुरु-वर्यपदाब्जरागसंरक्तचित्तगृहवेशितरामदेवः । कोऽपि प्रचकि कलिकालविजृम्भमाणरण्डाविवाहनिरसिष्णुसुमानकर्ता ॥ २ ॥

यदुक्तं रण्डाविवाहस्य विधिविहितत्वं अधुनातनैर्दुर्बोधादिभिः तदसत्। विधायकप्रमाणाभावात्। तथाहि ऋग्वेदस्य सप्तमाष्टकेऽष्टमाध्याये ऽष्टादशे वर्गे स्थितः। 'कुहस्विद्दोषा कुह वस्तोरश्विना कुहाभिपित्वं करतः कुहोषतुः। को वां शयुत्रा विधवेव देवरं मर्यं न योषा कृणुते सधस्थ आ'। इत्यय मन्त्रः न तावत्पुनर्विवाहस्य विधायकः। लिङ्लोट्तव्यप्रत्ययानामभावात्। नापि समिधो यजतीति यल्लुटः लट्त्वपरिकल्पनं। इत्थंदेवनासम्बन्धाल्लेट्त्वकल्पकस्य प्रकृतेऽभावात्। अज्ञातज्ञापकस्वरूपविधिशक्तिप्रतिबन्धकस्य सिद्धार्थनाबोधकस्येवशब्दस्य सत्वाच्च। अस्तु वा विधायकत्वमस्याः श्रुतेः। तथापि न त्वदभिमतपुनर्विवाहसिद्धिः। श्यालाः स्युर्भ्रातरः पत्न्याः स्वामिनो देवृदेवरौ इति कोशबलेन देवरशब्दस्य भर्तृसहोदरमात्रवाचकत्वेन विधवाकर्तृकशय्याधिकरणकदेवराभिमुखीकरणस्यैव युगान्तरविषयकस्यात्राभिमतत्वात्॥ यथा च विधवाकर्तृकदेवरगमनस्य कलियुगातिरिक्तयुगविषयकत्वं तथा प्रमाणानि वक्ष्यामः। नचैवं सति देवरो दीव्यतिकर्मेति देवरशब्दस्य रन्तृसामान्यवाचकत्वप्रतिपादकयास्कभाष्यविरोध इति वाच्यं। यास्कभाष्यस्य देवरपदस्य भर्तृभ्रातरि न केवलरूढिः किन्तु योगोऽपीति प्रतिपादकत्वात् अन्यथा योषा यौतेरिति मर्यो मरणधर्मेति वाक्यद्वयेन योषामर्यशब्दयोस्संमिश्रवाचकत्वपश्वादिवाचकत्वे सिध्यतां एतदभिप्रायेणैवैतन्मन्त्रव्याख्यायां विद्यारण्येन देवरं भर्तृभ्रातरमित्युक्त्वा लोकार्थे सम्मतितया देवरो दीव्यतिकर्मेति यास्कभाष्यवचनमुदाहृतम्॥ १॥

एतेनैव 'अभिगावो अनूषत योषां जारमिव प्रियमित्यपि मन्त्रो न विधायकः। विधिशक्तिप्रतिबन्धकस्येव शब्दस्यात्रापि सत्वात् लिपिवत्का विद्यमानस्यापि 'विकिरिष्यामि' ... सुरूपं ... यथेस्तादाविव दृष्टान्तत्वसम्भवाच्च। चन्द्रबिम्बादिव विषं चन्दना-

द्विधं चानलः । पत्नाद्भागितो वल्कादित्वादाविवासम्भावितत्वाच्च दृष्टान्तत्वदर्शनाच्च । २ । नाप्यैतरेयब्राह्मणतृतीयपञ्चिकागतविरो-निसंदर्भं । 'तस्मादेकस्य बह्व्यो जाया भवन्ति नैकस्यै बहवः सहपतय इतिवाक्यं विधायकं लिङादीनामभावात् । नन्वेक-कालेबहुपतिनिषेध एव स्वरसतो कालभेदेनैकस्याः बहुपतित्व-त्वामनुमनुत इतिचेन्न । सहशब्दस्य समानबोधकत्वेपि त्वदभि-मतसमानकालबोधकत्वे नियामकाभावात् सामान्यवाचकस्य शब्दस्य विशेषपर्यवसाने प्रकरणादिरूप-नियामकस्य वक्तव्य-त्वाच्च । समानकालेबहुपतिमत्ताविधिश्रुत्याप्तत्वाभावाच्च । किञ्च ऋक् च वा इदमग्र इत्यारभ्य तस्मात्तिसृभि स्तुवन्ति तिसृ-भिरुद्गायन्ति तिसृभिर्हि सामसम्मितमित्यन्तेन पूर्ववाक्य-नैकस्य साम्न ऋक्त्रय तत्त्वेकस्या ऋचस्सामद्वयमिति ऋक् सामदृष्टान्तः कथितः । तत्र समानकाले भिन्नकाले वा नैकस्यां ऋचि सामद्वयगान प्रमित तन्न्यायेनदार्ष्टान्तिकेऽपि कालाविशे-षेणैव बहुपतिनिषेधो वक्तव्यः नन्वेवंमति सहपदं व्यर्थमि-तिचेन्न पतिपदार्थान्वितसमानरूपार्थबोधकस्य सहशब्दस्य मनुष्यत्वेन सजातीय--बहुपतिनिषेधाय प्रयुक्ततया सार्थक्यात् ननु मनुष्यत्वेन साजात्यविवक्षायाः किं प्रयोजनमिति चेदत्रब्रूमः सामः प्रथमो विविदे गन्धर्वो विविद उत्तरः तृतीयो अग्निष्टेपति-स्तुरीयस्ते मनुष्यजा, इत्युक्तसोमादिदेवतारूपपतीनां बहुत्वमिव मनुष्यरूपपतीनां बहुत्वं माभूदिति ज्ञापनं प्रयोजनमिति । ननु बहुवचनेनैव बहुत्वे लब्धे बहुशब्दो व्यर्थ इति चेत्तद्भवतोपि समंमन स्पष्टीकरणं प्रयोजनमिति चेत्तदस्माकमपि समंमेव ॥३॥ 'उदीर्ष्वनार्यभिजीवलोकमितासुमेतमुपशेषएहि पाणिग्राभस्यदि-धिषोस्त्वमेतत्पत्युर्जनित्वमभिसम्बभूथेति. आश्व चतुर्थप्रश्ने प्रथ-मखण्डके तृतीयपञ्चाशत्तमीनिर्णयमानो मन्त्रोपि न विधायकः

लिङादीनामश्रवणात् लिटः लेट्त्वपरिकल्पकाभावाच्च अस्तु वा लिटो लेट्त्वं तथाप्याख्यातस्य न विधायकत्वं विधिशक्तिप्रतिबन्धकस्य त्वमित्यामन्त्रणस्य विद्यमानत्वात् नचामन्त्रणस्य विधिशक्तिप्रतिबन्धकत्वमसिद्धमिति वाच्यं जैमिन्याचार्येण द्वितीयाध्याय प्रथमपादे विधिमन्त्रयोरिति सप्तमाधिकरणे गुणप्रधानकर्मविधायकाख्यातद्वयमिव तृतीयमभिधायकाख्यातमपि । देवांश्चयाभिर्यजतेयस्योभयं हविरार्तिमाच्छेत् वर्हिर्देवसदनं दामि अग्नीदग्नीन्विहरेत्यादौ वर्ततइति निरूपितत्वेनामन्त्रणविभक्तेर्विधिशक्तिप्रतिबन्धकत्वस्य सिद्धान्तितत्वात् । तदुक्तं भाट्टदीपिकायां एवं अग्नीदग्नीन्विहरेत्यादौ सम्बोधनविभक्तेरभिमुखश्रोतृमात्रविषयाया अभिमुखानभिमुखसाधारणविधिविरोधित्वमिति । यच्चविपक्षीयं एतन्मन्त्रोत्तरार्धस्य व्याख्यानं त्वम्पाणिग्राहस्य पाणिं गृहीतवतः दिधिषोः पुनर्विवाहेच्छोः पत्युः एत जनित्वं जायात्व अभिसम्बभूव प्राप्नुहीति । तदसत् दिधिषुशब्दस्य पुनर्विवाहेच्छुपरत्वे कोशादिरूपनियामकाभावात् एष्यत्कालीन पुनर्विवाहवतः पुंसः प्राक्कालएव पाणिग्राहपतिपदाभ्यामव्यवहार्यत्वाच्च नच भाविनीं सञ्ज्ञाप्राप्तिमपेक्ष्यास्य सूत्रस्य शाटकंवयेति वदयं व्यवहार इति वाच्यं तथाकल्पकस्य पुनर्विवाहस्यैव विप्रतिपन्नत्वात् एतज्जनित्वमित्यत्र एतत्पदवैयर्थ्याच्च । तामुत्थापयति देवरादिः त्व पतिसालोक्यमेभूयादितीच्छयैव पाणिग्राभस्य विवाहसमये मन्त्रवत्हस्तं गृहीतवतः दिधिषोः गर्भस्यधातुः पत्युः एतज्जनित्वं जन्म लोकान्तरप्राप्तिरूपं अभिसम्बभूव पुरुषव्यत्ययः अभिसम्बभूविथेति बह्वृचाः पठन्तीति भट्टभास्करकृतव्याख्याविरोधापाताच्च । इयं नारी पतिलोकं वृणाना निपद्यत

उप त्वा मर्त्यसप्रेत विश्वं पुराणामनुपालयन्ती तस्यै प्रजां द्रविणं चेह धेहीति पूर्वमन्त्राननुगुणयापाताच्च। अस्मिन्हि मंत्रे विश्वं पुराणामनुपालयन्तीत्यंशस्य विश्वं कृत्स्नं पुराणं चिरं तनं एकपत्नीनां व्रतं अनुपालयन्तीति भट्टपादादिभिर्व्या-ख्यातत्वेन स्त्रिय एकपत्नीव्रतपरिपालनस्यैवोदितत्वात् ॥ ४ ॥

यच्चोक्तं 'नष्टे मृते प्रव्रजिते क्लीबे च पतिते तथा। पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयत इति मनुवचनं पुनर्विवाहकर्त-व्यतायां प्रमाणमिति तदसत् अधुनातनमनुस्मृति पुस्तकेष्वस्य वचनस्यानुपलंभात् उपलंभेपि। कामन्तु क्षपयेद्देहं पुष्प मूलफलैश्शुभैः। नतु नामापि गृहीयात्पत्यौ प्रेते परस्य च ॥१॥ आसीतामरणात् क्षान्ता नियताब्रह्मचारिणी। योधर्म एकपत्नीनां कांक्षन्ती तमनुत्तमम् ॥ २ ॥ नान्योत्पन्नाप्रजास्तीह न चाप्य-न्यपरिग्रहे ॥ न द्वितीयश्चसाध्वीनां क्वचित् भर्तोपदिश्यते ॥३॥ यस्मै दद्यात्पितात्वेनां भ्राता वा नुमतेपितुः। तं शुश्रूषेतजीवंतं संस्थितं च न लंघयेत् ॥ ४ ॥ पाणिग्राहस्य साध्वीस्त्री जीवतो वा मृतस्य वा। पतिलोकमभीप्संती नाचरेत्किञ्चिद-प्रियं ॥ ५ ॥ इतिपञ्चमाध्यायवचनैः नान्यस्मिन्विधवानारी नियोक्तव्या द्विजातिभिः। अन्यस्मिन्हिनियुंजानाः धर्मं हन्यु स्सनातनं ॥ १ ॥ नोद्वाहिकेषु मंत्रेषु नियोगः कीर्त्यते क्वचित् न विवाहविधावुक्तं विधवावेदनं पुनः ॥ २ ॥ न दत्वाकस्य चित्कन्यां पुनर्दद्याद्विचक्षणः। दत्वा पुनः प्रयच्छन्हि प्राप्नोति पुरुषानृतं ॥ ३ ॥ सकृदंशो निपतति सकृत्कन्या प्रदीयते सकृ-दाह ददानीति त्रीण्येतानि सतां सकृत् ॥ ४ ॥ इति नवमा-ध्यायवचनैश्च विरोधपरिहारायात्राध्यान्हियमाणसप्तम्यन्त पति पदस्य स्मृतिमुक्ताफलोदाहृत पाणिग्रहणसंस्कारात्पति त्वं सप्तमे पद इति यमवचनासिद्धसप्तपदीप्रयोज्यपतित्वाति

रिक्थवाग्दत्तत्व मनोदत्तत्व कृतकङ्कणबन्धत्व उदकदत्तत्व पाणि गृहीतत्वान्यतमप्रयोज्यामुख्यपतित्ववद्बोधकत्वस्यावश्यवक्तव्यतया भवदभिमतपुनर्विवाहासाधकत्वात् न च वाग्दत्तत्वादि प्रयोज्यपतित्ववतिपतिशब्दप्रयोगो नास्तीतिवाच्यं । यस्याः म्रियेत कन्यायाः वाचा सत्ये कृते पतिरिति नवमाध्याये मनुनैव तथाप्रयुक्तत्वात् ॥ १ ॥ एतेनैव नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ । पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते इति पराशरस्मृतिवचनमपि व्याख्यातं पतिशब्दस्यामुख्यपतित्ववद्वाचकत्वात् एतावित्यस्य सप्तपदी प्रयुक्तमुख्यपतित्ववद्वाचकत्वाङ्गीकारेऽपि यद्वै मनुरवदत्तद्भेषजमिति श्रुति परिगृहीतत्वेन बहुत्वेनच प्रबलैरुदाहृतमनुवचनैरविरोधाय अपतौ इत्यकारप्रश्लेषस्यावश्यकतया रागप्राप्तपत्यंतरनिषेधकत्वांगीकारेण भवदभिमतपुनर्विवाहासाधकत्वात् ॥ २ ॥ एवं सा चेदक्षतयोनिः स्यात् गतप्रत्यागतापि वा । पौनर्भवेण भर्त्रा सा पुनस्संस्कारमर्हतीति नवमाध्यायीयमनुवचनमपि न पुनर्विवाहसाधकतामश्नुते । तथाहि या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया । उत्पादयेत्पुनर्भूत्वा स पौनर्भव उच्यत इति पूर्वश्लोकयच्छब्देन निर्दिष्टायाः पतिपरित्यक्तायाः पुनस्तमेव पतिं प्राप्तवत्या अत्र सेति तच्छब्देन ग्रहणात् । पतिपरित्यक्ताया एवात्र पुनःसंस्कारोक्त्या विधवापुनर्विवाहासिद्धेश्च । तच्छब्दस्य भवदभिमतविधवाग्राहकत्वांगीकारे पतिपरित्यक्ताविधवयोस्संग्रहाय ते इति द्विवचनांतस्य वक्तव्यत्वापाताच्च । सेति पदस्य विधवामात्रग्राहकत्वे प्रथमातिक्रमापाताच्च न विवाहविधावुक्तं विधवावेदनं पुनरित्यासुदाहृतस्ववचनव्याकोपापाताच्च । किञ्च पौनर्भवेण भर्त्रेति पदद्वयं वर्तते अस्यार्थस्तु । पुनःभवति स्वां प्राप्नोतीति

पुनर्भूः भूप्राप्ताविति धातुः पुनर्भूरेव पौनर्भवः स्वार्थेऽण् तेन भर्त्रेति पूर्वं मन्त्रवत्याणिगृहीतिपातिनेतियावत् । नच मृतभर्तृकायाः पौनर्भवो भर्तास्ति । नन्वयत्यः पौनर्भवशब्दः पत्यन्यवाचक इति-चेन्न । तथाप्रमाणाभावात् । पतिपरित्यक्तायाः सपूर्वपतिनैव पुनर्विवाहत्वं विधवाया अन्येन विवाहत्वमित्यर्थकल्पने पुनः शब्दस्वारस्यभङ्गः वाक्यभेदकल्पनं चेति दोषद्वयापाताच्च ननु पौनर्भवलक्षणप्रकरणे पतिपरित्यक्तायाः पुनः संस्कार्यत्वोक्तिः कुत इति चेत्—ब्रूमः प्राक्पतिपरित्यक्तायां अक्षतयोन्यां पुनर्विवाहसंस्कारानन्तरं जातस्य मृतभर्तृकायां जातस्य गोलकस्येव न पौनर्भवत्वमित्यर्थसूचनायेति ॥ ३ ॥ एतेनैवेदानीं पुनर्विवाहसाधकतया वर्ण्यमानानि—पाणिग्राहे मृते बाला केवलं मन्त्रसंस्कृता । साचेदक्षतयोनिःस्यात्पुनःसंस्कारमर्हति । इत्यादि-वसिष्ठवचनानि । दत्तामपि हरेत्कन्यां श्रेयांश्चेद्वर आव्रजेत् इत्यादियाज्ञवल्क्यवचनानि "वरश्चेत्कुलशीलाभ्यां न युज्येत कदाचन । न मन्त्राः कारणं तत्र न च कन्यानृतं भवेत् । समाच्छिद्य तु तां कन्यां बलादक्षतयोनिकां । पुनर्गुणवते दद्यादिति शातातपोऽब्रवीदित्यादि शातातपवचनानि च निरस्तानि एषां वचनानां पाणिग्राहवरपदघटितानां सप्तपद्याः प्रागेव विवाहान्तरबोधकत्वेन भवदभिमतपुनर्विवाहासाधकत्वात् ४ एवं-यदिसा बालविधवाबलात्त्यक्ताथवा क्वचित् । तदाभूयस्तुसंस्कार्या गृहीत्वायेन केनचित् । इतिप्रजापतिवचनमपि निरस्तं याज्ञवल्क्य-पराशराभ्यां मन्वत्रितिवचने-श्रुनामेमानबाईमिवचनेच धर्मशास्त्रप्रयोजकत्वेन प्रजापतेरपरिगणितत्वेनतदुक्तस्याश्रद्धेयत्वात् अश्रद्धेयत्वेप्युदाहृतप्रबलमनुवचनाद्यविरोधायैतद्वचनस्य शूद्रादिहीनजातिविषयकताया एव कल्पनीयत्वाच्च ॥ ५ ॥ अतो विधवाभिमतपुनर्विवाहकर्त्तव्यतायां न किञ्चिन्मानमितिसिद्धं ।

इति श्रीमद्वाद्यभागवतश्यामाचार्यकृतेपुनर्विवाहखण्डनेसाधक-
मानाभाव निरूपणनामप्रथमःपरिच्छेदः ॥ प्रमाण-
बाधितञ्च पुनर्विवाहकर्तव्यत्वं । तथाहि । मन्त्रेप्रथमप्रश्ने-
चतुर्थखण्डेस्थितः —कन्यतापितृभ्योयतीपतिलोकमवदीक्षामदास्थ
प्रेतोमुञ्चातिनामुतःसुबद्धाममुतस्करत् । इत्ययंमन्त्रः । हरदत्तेन-
व्याख्यातः । कन्यैव-कन्यता शब्दः पितृभ्यः पितृकुलात्पतिलोकं
यतीगच्छन्तीदीक्षांकन्याभ्रंशं अवादास्थ स्वकवती । हेइन्द्रमीढ्वः
वर्षणेनसेह; इमांवधूंइतः पितृकुलात्प्रमुञ्चातिप्रमुञ्चमन्तर्भा-
वितण्यर्थ; । नअमुत;पतिकुलात् किन्तु सुबद्धां अमुतः करत् अमु-
ष्मिन्पतिकुले तुसुबद्धां कुर्विति । अत्रकन्यतेत्येवार्थकेणताशब्देन
कन्याभावमेवपतिकुलप्राप्तेः सुबद्धामित्यनेनयावज्जीवं प्रथमप्राप्त-
पतिकुलसम्बन्धानपगमस्य च स्पष्टमुदितत्वेन पुनर्विवाहस्यैतन्म-
न्त्रबाधोदुर्वारः॥१॥ एवं कृष्णयजुर्षिषष्ठेकाण्डेषष्ठप्रश्नेतुर्येऽनुवाके-
तृतीयपञ्चाशतिमन्त्रगतेन । यदेकस्मिन्यूपेद्वेरशनेपरिव्ययति-
तस्मादेकोद्वेजायेविन्दतेयन्नैकांरशनांद्वयोर्यूपयोः परिव्ययतितस्मा-
न्नैकाद्वौपतीविन्दतइति । एकस्याः पतिद्वयनिषेधकेणानेनवाक्येन
च बाधः । नन्विदं वाक्यं एककालावच्छेदेनैवैकस्याः पतिद्वयं-
निषेधतीतिचेन्न अश्रुतस्यैककालावच्छेदेनेत्यस्यकल्पनेमानाभावात्
भवदभिमतमानानां च पूर्वपरिच्छेदएवखण्डितत्वाच्च । मृतभर्तृ-
कायाः पत्यन्तरेविनियोगाङ्गीकारप्रथमतायूपपरिवीतायाः पशु-
रशनायाः पशुविशसनानन्तरं अरातीयन्तमधरंकृणोमीतिमन्त्रेण
चात्वालाख्यस्थानेदाहोर्त्तिकानुगुणयथार्थप्रक्षेपोनस्यात् । प्रत्युतनस्या
एव रशनायाः यूपान्तरेविनियोजनं स्यादिति दोषापाताच्च
आत्रेयायहिरण्यं ददाति त्यत्रनैकाद्वौपतीविन्दतइत्यत्रलटः लेट्त्व-
परिकल्पनेन नष्टसमभिव्याहृतकेवलतामन्त्रस्यनिषेधकस्यसम्भ-
वेनपुनर्विवाहस्यैतन्मन्त्रबाधोदुर्वारः ॥ २ ॥ एवं सोमोददद्-

गेन्धर्वायगन्धर्वोददद्ग्नये । रयिञ्चपुत्रांश्चादादग्निर्मह्यमथोइमां। इतिमन्त्रप्रथमप्रश्नेतृतीयखण्डे स्थितेन वाक्येनचविरोधः। तथाहि अयञ्चमन्त्रः पाणिग्रहीत्रापुरुषेणजप्तव्यः यदि भवद्भिरित्याहितिःयो-ऽपिमन्त्रवत्पाणिग्रहीतास्यास्तदायमपि मन्त्रस्तेनजप्तव्यः स्यात्। न चेष्टापत्तिः अग्नेः प्राथमिकपतये कन्याप्रदातृत्वेन स्वस्यैकन्या-प्रदातृत्वाभावेन एतदुच्चारितस्य मन्त्रस्य बाधितार्थकत्वापा-तात् अग्निदत्तकन्याकत्ववतः पत्युर्मृतत्वेन दानकर्तुरेवाभा-वेन इमामदादित्युक्तेरप्यसङ्गत्यापाताच्च तन्मन्त्रविरोधोपि दुर्वारः॥ ३॥ एवं आम्नाये स्मृतितन्त्रे च लोकाचारे च सूरिभिः। शरीरार्द्धं स्मृता जाया पुण्यापुण्यफले समा। यस्य नोपरता भार्या देहार्द्धं तस्य जीवति। जीवत्यर्द्धशरीरे ऽस्मिन् कथमन्यः स्वमाप्नुयात्॥ इति बृहस्पतिवचनोपबृंहि-तेन कृष्णयजुर्वेदीयषष्ठकाण्डप्रथमप्रश्नाष्टमानुवाकीयपञ्चमपञ्चा-शदन्तर्गतेन अर्द्धो वै एष आत्मनो यत्पत्नीति वाक्येन च पुनर्विवाहो बाधितः। तथाहि न भर्तरि जीवति पत्यन्तर-विवाहो भवद्भिरप्यङ्गीक्रियते अनेन च वाक्येन पत्न्याः पत्य-र्द्धरूपताया एव वर्णितत्वेन पतिसद्भावप्राप्त्या पुनर्विवाहः सुतरां निषिद्धतयैवाभिप्रेत इति श्रुतिबाधो दुर्वारः॥ ४॥ प्रागुदाहृतैः कामन्तु क्षपयेद्देहं इत्यादि पञ्चमाध्यायीयमनुवचनैः ॥१॥ नान्यस्मिन् विधवानारी इत्यादि नवमाध्यायीमनुवचनैः ॥ २॥ देवराच्च सुतोत्पत्तिर्दत्ताकन्याप्रदीयते। न यज्ञेगोवधः कार्यः कलौनचकमण्डलुः। इति स्मृतिमुक्ताफलोदाहृतवृद्ध-पराशरवचनेन ॥ ३॥ एतत्समानानुपूर्वीकेणमाधवीयोदाहृतक्रतु-वचनेन ॥ ४॥ ऊढायाः पुनरुद्वाहंज्येष्ठांशङ्गोवधंतथा। कलौपञ्च न कुर्वीतभ्रातृजायाकमण्डलुमित्यादित्यपुराणवचनेन। दत्तायाः श्चैवकन्यायाः पुनर्दानं परस्य च। वर्जयेत्कलावितिबृहन्नारदी-

ब्रह्मपुराणवचनेन ॥ ५ ॥ च पुनर्विवाहस्यबाधः स्फुट एव । उदाहृतवचनेषु पुनर्विवाहाकर्तव्यताया एव साक्षात्प्रतिपादनात् ६ एवं पुनर्विवाहस्य स्मृत्यन्तरविरोधोपि तथाहि अविप्लुतब्रह्मचर्येलक्षण्यां स्त्रियमुद्वहेत् । अनन्यपूर्विकांकान्तामसपिण्डांयवीयसीमिति याज्ञवल्क्यवचनं । पुनर्विवाहं विरुणद्धि ॥ ७ ॥ अनन्यपूर्विकां–दानेनउपभोगेन वा पुरुषांतरापरिगृहीतामिति विज्ञानेश्वरेणव्याख्यातत्वात् । एवं स्मृतिमुक्ताफलोदाहृतं अज्ञानात्तु द्विजोयस्तु विधवामुद्वहेद्यदि । परित्यज्यविधिवत्त्वेनां प्रायश्चित्तं समाचरेदित्याश्वलायनवचनं 'सप्तपौनर्भवाः कन्याः वर्जनीयाः कुलाधमाः । वाचादत्तामनोदत्ताकृतकौतुकमङ्गला । उदकस्पर्शिनीयाचयाचपाणिगृहीतिका । अग्निम्परिगताया च पुनर्भूप्रभवाचया । इत्येताः काश्यपेनोक्ताः दहन्तिकुलमग्निवत् । प्ररोहेदग्निनादग्धः पादपस्सुचिरादपि । नतुपौनर्भवादग्धं कुलं जातुप्ररोहति । इति काश्यपवचनं ॥ ९ ॥ स्मृतिमुक्ताफलोदाहृतं दत्ताकुप्ताञ्चवर्जयेदित्यापस्तंबवचनं ॥ १० ॥ गृहस्थस्सदृशीं भार्यां विन्देतानन्यपूर्वां यवीयसीमसमानप्रवरैर्विवाह इति गौतमवचनं ॥११॥ मिताक्षरोदाहृतं भर्तरि प्रेते ब्रह्मचर्यं तदन्वारोहणं वेति विष्णुवचनम् ॥ १२ ॥ प्रागुदाहृतं आम्नाये स्मृतितन्त्रेचेति बृहस्पति वचनं ॥ १३ ॥ विधवाकबरीबन्धोभर्तृबन्धायजायते । शिरसोवपनं तस्मात्कार्यं विधवयासदेतिस्मृतिमुक्ताफलोदाहृतं वसिष्ठवचनं ॥ १४ ॥ एकाहारस्सदाकार्यो न द्वितीयः कदाचन । यवाग्वैर्वाफलाहारैः शाकाहारैः पयोव्रतैः । प्राणयात्रां प्रकुर्वीत यावत्प्राणः स्वयं व्रजेत् । पर्यङ्कशायिनीनारीविधवापातयेत्पतिं । तस्माद्भूशयनं कार्यं पतिसौख्यसमीहयेति वसिष्ठवचनं ॥ १५ ॥ यावज्जीवं प्रेतपत्युदकस्पर्शो एकभुक्तमशय्यां ब्रह्मचर्यं क्षारलवणमधुमांसवर्जंचेति स्मृति-

मुक्ताफलोदाहृतमापस्तम्बवचनं ॥ १६ ॥ तत्रैवोदाहृतं "गत्वा विप्र-स्सकृद्गत्वा विधवां कामपीडितः। न तस्य निष्कृतिर्दृष्टा कारीषगमनादृते" इतिपराशरवचनं ॥ १७ ॥ च तत्रैवोदाहृतम् "यो विप्रो विधवां साध्वीं गच्छेदागर्भधारणात्। स चण्डालसमो ज्ञेयः पतितः स्यान्न संशय" इति यमात्रिवचने ॥ १८।१९ तत्रैवोदाहृते "विधवाऽऽयुः श्रियं हन्ति सर्वं हन्ति पराङ्गमेति" मार्कण्डेयवचनं ॥ २० ॥ इतिहासपुराणः पञ्चमो वेदानां वेद इति वेद-तया श्रुतिपरिगृहीतमहाभारतस्थं । तस्मिन्कुलक्रमायातमाचारं चाचरेद्बुधः । सगरीयान्महाबाहो सर्वशास्त्रोदितादपीतिव-चनं ॥ २१ ॥ आदिपर्वणि १०४ अध्याये 'अद्यप्रभृति मर्यादा मया लोके प्रतिष्ठिता। एकएव पतिर्नार्या यावज्जीवम्परायणं। मृते जीवति वा तस्मिन्नापरं प्राप्नुयान्नरं। अभिगम्य परं नारी पतिष्यति न संशयः इति दीर्घतमसो वचनं ॥ २२ ॥ एवं वेदः प्राचेतसा दासीत्साक्षाद्रामायणात्मनेति वेदत्वेनोदितरामायणाद्योध्याकाण्डे एकोनत्रिंशसर्गे स्थितं "श्रुतिर्हि श्रूयते पुण्या ब्राह्मणानां यश-स्विनां। इह लोके च पितृभिर्या स्त्री यस्य महामते। अद्भि-र्दत्ता स्वधर्मेण प्रेत्यभावेपि तस्य सेति वचनंचे ॥ २३ ॥ स्युदाहृतानि-वचनानि विपक्षाभिमत—पुनर्विवाहकर्तव्यतां विरुन्धन्तीति स्मृतिबाधोऽपि । एवं मन्त्रवत्पुनर्विवाहकर्तव्यतायास्तदभावाद्वे दकशिष्टाचारविरोधश्च। नच शिष्टाचारस्याप्रामाण्यं पूर्वमी-मांसाप्रथमतृतीयचतुर्थाधिकरणे "अपिवा कारणग्रहणत्वेन जैमिन्याचार्येण शिष्टाचारप्रामाण्यस्य रिं द्धान्तितत्वात् । ननूलूप्यां मृतभर्तृकायां नागकन्यायां पुत्रोत्पादयितुर्जुनाचारः पुनर्विवाहकर्तव्यतायां प्रमाणमिति चेन्न। विस्तरतः पाण्डव-कथाप्रतिपादकमहाभारतादिपर्वान्तर्गत—सप्तदशाधिकद्विशततमे ध्याये। तदनुसारिग्रन्थान्तरेषा। मृतभर्तृकोलूप्यर्जुनेन मन्मथपा-

निगृहीतेत्यप्रतिपादनात् । अतएव ऐरावतेन सा दत्ता ह्यनपत्या महात्मनइति परैर्भारतवचनतयोदाह्रियमाणं वचनं दत्तेत्य-स्य नियुक्तेत्यर्थकतया साधकाद्यं । अन्यथा चित्राङ्गदादि विवाहप्रकरणइवात्रापि महाभारतकर्त्ताव्यासः विवाहमेव ब्रूयात् । अस्तुवेन्द्रांशस्यार्जुनस्य नागकन्योलूपी विषये विवाहा चारः सतु 'न देवचरितं चरेदिति न्यायेन नास्मत्कर्तृकमानुषीपुन-र्विवाहानुष्ठापकः । व्यतिक्रमसाहसदर्शनं तु धर्मबुध्याऽननु-ष्ठीयमानत्वादवैदिकमिति मीमांसकैरुद्घोषितत्वात् । अन्यथा श्रीकृष्णकर्तृकपरदारगमनाचारेण परदारगमनस्याप्यनुष्ठेयता-स्यात् । युगांतरीयब्राह्मणानां मद्यपानमांसभक्षणाचारेण तयो-रिदानीमप्यनुष्ठेयतास्यात् । नच मनुनैव पञ्चमाध्याये नमां-सभक्षणेदोषो न मद्ये नचमैथुने । प्रवृत्तिरेषा भूतानां निवृ-त्तिस्तु महाफलेत्युक्तत्वेनेष्टापत्तिरितिवाच्यं । अस्य वाक्यस्य न हिंस्यात्सर्वाभूतानि नमांसमश्नीयात् नसुराम्पिबेत् न पर-दारान्गच्छेदित्यादिप्रबलश्रुतिबाधपरानुरोधाय "लोके व्यवायामि-षमद्यसेवाः नित्यास्तु जन्तोर्नहि तत्र-चोदना । व्यवस्थिति-स्तेषु विवाह यज्ञान्सुराग्रहैरासु निवृत्तिरिष्टेत्येकादशभागवतोक्तरीत्या क्षत्रियादिकर्तृकयज्ञकालीनमांसभक्षण—सुराग्रहकालीनमद्यपानयो र्वामदेव्यव्रतत्वानुसन्धानपूर्वके क्रियमाणस्त्रीरमणेच दोषो नास्तीत्येवप्रतिपादकत्वात् । ननु महाभारत आरण्यक पर्वणि नलोपाख्याने आस्थास्यति पुनर्भैमी दमयन्तीस्वयम्वरं । तत्र-गच्छति राजानो राजपुत्राश्च सर्वशःइति वचनेन पुनर्विवाहोऽ भिप्रेतः एवं पद्मपुराणे पद्मकल्प—वृत्तान्त--वेदनप्रकरणे उज्वल नामक पक्षिराट् तत्सुतकुंजरपक्षिणोः सम्वादे दिवोदासनृप-तिकृताः सद्गुलायाः दिव्यादेव्या एकविंशतिविवाहा-वादिताः । अतः पुनर्विवाहः प्रामाणिक इतिचेन्न । मानसस्य

भिचारोपि न भूयादित्यभिप्रायेणैव स्वपाणिग्रहणार्थं प्राप्तानपीन्द्रा दिलोकपालानपरिगणय्य मानुषमात्रं नलं देवतासमक्षमेव परिणीतवत्या पतिव्रताशिखामणेः दमयंत्याः पुनः स्वयम्वरवृत्तान्तस्य ऋतुपर्ण समीपत्वेन पर्णादद्विजवचनश्रवणोहितनलनयनमात्रप्रयोजनक तेति पुनः स्वयम्वरवार्तायाः स्वजनकभीमराजादिभ्योप्यज्ञापित त्वेन युगान्तरेपि पुनर्विवाहवार्तायाः जगुप्सिततेतिच 'अयमर्थो न सम्वेद्यो भीमे मातः कदाचनेत्यादि पूर्वोत्तरानुपूर्वीविमर्शकैरवश्यं ज्ञातव्य त्वेन दमयन्त्याः पुनर्विवाहो जातइत्यनुक्तत्वेनच भवदभिमता सिद्धेः। एवं चित्रोपाख्यानेपि मृत्युधर्मकृतो राजा विवाहसमयेपिसः। यदा यदा महाभागो दिव्यादेव्यास्सभूमिपः। करोति सततोद्योगं विवाहायातिदुखितः। भर्तापि म्रियते काले प्राप्तलग्नस्तदातदा। एकविंशतिभर्त्तारः कालेकाले मृतास्तथा। ततो राजा महादुखी सञ्जातः ख्यातविक्रम इत्यादिवचनैः सुकृतकिञ्चित्पुण्यफलं दिवोदासपुत्रीत्वम्प्राप्तवत्याः दिव्यादेव्याः प्राग्वाराणस्यां सुवीराख्यवैश्यभार्यात्वावस्थायां कृतेन व्यभिचारादिदुराचारातिशयेनैव पाणिग्रहणानन्तरं सप्तपदीसंस्काराप्रागेवैकविंशतिभर्त्तारो मृता इत्येवोक्तत्वेन भवदभिमतपुनर्विवाहाासिद्धिः स्फुटैव। एतेनैव परोदाहृता "उतयत्पतयो दश स्त्रियाः पूर्वे अब्राह्मणाः ब्रह्मचेद्धस्तमग्रहीत् सएव पतिरेकधा ब्राह्मण एव पतिर्न राजन्यो न वैश्य इति" श्रुतिरपि न विपक्षाभिमतपुनर्विवाहसाधिका। अस्याः श्रुतेः प्रथमं पाणिग्रहीत्रपूर्णसप्तपद्यन्तविवाहवद्राजन्यादेः पतित्वनिषेधकत्वस्यापि सम्भवेन सावकाशत्वात्। अतःपुनर्विवाहस्य कर्त्तव्यतायाः शिष्टाचारविरोधोपिदुर्वारः॥ २४॥ ननु पुनर्विवाहस्यसम्भवासादिवत् उदाहृतवृद्धपराशरवचनकतुवचनादित्यपुराणवचनबृहन्नारदीयवचनेषु 'कृते सप्तपदे भर्तुर्वियोगेन् यदि जायते। न देवा

युगान्तरस्मै कलौ कन्या मनीषिभिरितिति वाग्भ्यवचनेन कलि वर्ज्येष्वेव परिगणितत्वेन पुनर्विवाहः सर्वयुगेषु न निषिद्ध इतिचेन्न। विधवोद्वाहनं कर्म चतुर्युगसहस्रके। न कर्तव्यं न दातव्यमृषयः प्रवदन्तिहि। तेषां प्रमाणं छित्वा तु रौरवं नरकं व्रजेत्। इति स्मृतिसारसङ्ग्रहवचनेन पुनर्विवाहस्य सर्वयुगेष्वपि निषिद्धत्वात्। ननु विधवोद्वाहनं कर्मेति वचनेन संभोगान्तविवाहवत्पतिशून्यायाः क्षतयोन्याः विवाहो निषिध्यते नाक्षतयोन्याः सप्तपद्यन्तरकालीनपुनर्विवाह इतिचेन्न। विवाहस्य सम्भोगान्तत्वं प्रमाणाभावात्। हरिवंशेऽथोदशेऽध्यायेपाणिग्रहणमन्त्राणांनिष्ठास्यात्सप्तमेपदइति बादरायणाचार्येण विवाहस्य सप्तपदान्ततायाएव स्फुटमुदितत्वात् च। साधकमानशून्यस्य बाधकमानवतश्चकर्मणः कालविशेषे निषेधमात्रेणतद्भिन्नकालेऽनुष्ठेयत्वासंभवाच्च। तुलामासनिवेशाश्च स्त्रीशेषं केशदूषितं। श्राद्धशेषं शूद्रशेषं वर्जयेत्तु विचक्षणइत्यादिवचनैः तुलामासलशुन भक्षणादेर्निषिद्धतामात्रेणेतरमासेषु तत्कर्तव्यतायाअदृष्टत्वाच्च। कलिवर्ज्यप्रतिपादकवृहन्नारदीयवचनेषु कलावेवेत्यवधारणस्याभावाच्च। अतः पुनर्विवाहस्सर्वदानिषिद्धएवेति सिद्धं। एवं पुनर्विवाहकर्तव्यतायां वहुविप्लवापातश्च। तथाहि। लोकेश्रुतिस्मृति सदाचारनिर्बन्धवद्धाः स्त्रियः स्वयमरूपा अपि सुरूपाअपि धीमत्योपि कुलीना अपि धनवत्योपि युवत्योपि दैववशान्मन्त्रवत्स्वपाणिग्रहीतॄन् आमयाविनोपि कुरूपानपि वैधेयानपि अकुलीनानपि नित्यदरिद्रानपि वृद्धानप्यपरित्यज्य "दुःशीलोदुर्भगोवृद्धो जडोरोग्यधनोपिवा। पतिः स्त्रीभिर्नहातव्योलोकेप्सुभिरपातकीतिस्मृतिवचनार्थं मनुसन्धायैव यावज्जीवत्वात् शुश्रूषन्ते यदि च मृतभर्तृकायाः पुनर्विवाहोवैधः प्रायश्चित्तविवाहवत्स्वर्गादिफलप्रदः स्यात्

तदा स्वबुद्धिपूर्वकं क्रियमाणस्य ऐहिकामुष्मिकोभयफलप्रदस्य पुनर्विवाहस्य स्वानुमतिं विनैव पित्रादिकृताद्दामुष्मिकमात्रफलप्रदात्प्राथमिकविवाहादुत्तमत्वेनोत्तमविवाहेच्छया सर्वा अपि स्त्रियः स्वस्याः पुनर्विवाहाधिकारसिद्ध्यर्थं प्रथमं परिगृहीतभर्तॄनवश्यं नानोपायैर्मारयेयुः। अतोबहुविप्लवापत्तिर्दुर्वारा ॥ २५ ॥ यदत्रोक्तं वंगालादेशीयेन केनचिद्वादिना । पुनर्विवाहानङ्गीकारे कामसुखोत्कटेच्छावतीनां जारसङ्गेन गर्भधर्त्रीणां लोकापवादभिया तन्निगूहयित्रीणां बालरंडानामौषधादिसेवनेनात्मनाशो भ्रूणहत्या च स्यात् स्त्रीणां कामसुखनिर्बंधकरणेन स्त्रीप्रकोपात्कुलनाशश्च स्यादिति । तदप्यनेनैव निरस्तं भ्रूणहत्याद्यपेक्षया ज्ञानवृद्ध — वयोवृद्धभर्तृहत्यादिपापस्यैव ज्यायस्त्वात् । नहि वराटिकाहान्यभावमपेक्ष्य कोटिहानिमानभ्रान्तः किञ्च बालविधवोपकारोद्देशेनैव पुनर्विवाहकरणे अशक्तेन स्वेनातृप्तायाः स्वस्त्रिय उपकाराय स्वेनैव स्वस्त्रियः पुनर्विवाहः कर्तव्यः स्यादित्यलं मृतमारणेन । अतः पुनर्विवाहकर्तव्यत्वं प्रमाणबाधितंचेत्यसदेव सिद्धं । इतिश्री मदाद्यभागवतश्यामाचार्यविरचिते पुनर्विवाहखण्डने बाधकमाननिरूपणंनाम द्वितीयः परिच्छेदः ॥ यच्चोक्तं आधुनिकाभ्यां चित्रभानुतुलामासे तारणभाद्रपदमासे च स्वस्वकृतग्रन्थख्यापकाभ्यां पुनर्विवाहवादिभ्यां विध्युक्तैववाहिकशास्त्रजिज्ञासाख्यग्रन्थे श्रीपुनर्विवाहजिज्ञासाख्यग्रन्थे च पुनर्विवाहाचारस्य सदाचारत्वसमर्थनाय पुरुषाणामिव स्त्रीणामपि विवाहस्यैच्छिकत्वं तदुपपादकतया विवाहविधेः परिसंख्याविधित्वं च प्रतिज्ञाय तदुपपादनाय "न मांसभक्षणे दोषो न मद्ये न च मैथुने प्रवृत्तिरेषा भूतानामिति मनुवचनं "लोके व्यवायामिषमद्यसेवा नित्यास्तु जन्तो र्नहि तत्र चोदनेत्येकादशभागवतवचनश्चोदा

स्यात्र व्यवायस्य रागतःप्राप्तत्वेन निवृत्तिफलकत्वविह्विवाह-विधिरपि परिसंख्या विधिरित्याहुः अपिच विद्वानेश्वरोपि स्वस्त्रीगमनमपि परिसंख्येति स्फुटमब्रवीदिति । तदसत् । दत्त्वा वरमनुज्ञातो गुरोः कामंयदीश्वरः । गृहं वनं वोपविशेत्प्रव्रजेत्तत्र वा वसेदिति सप्तमभागवतोक्तरीत्या अनुशासनपर्वैकविंशाध्यायव्याख्यायां' यथा कृषिकृतामेव राजदेयं भवत्येवं स्त्रीमतामेव दैवं पित्र्यञ्च ऋणमापतति स्त्रीमत्त्वंतु कामकृतं न वैधमिति तदभावे ऽप कस्यापि ऋणी न भवतीति प्रघट्टकार्थ इति नीलकण्ठोक्तरीत्या च मार्कण्डेयादीनां विवाहाकरणेपि प्रत्यवायाभावेन च पुरुषाणां विवाहस्यैच्छिकत्वेपि "असंस्कृतायाः कन्यायाः कुतो लोकास्तवानघे । एवन्तु श्रुतमस्माभिर्देवलोके महाव्रते । तपः परमकं प्राप्तं न तु लोका त्वयाजिताः । तन्नारदवचः श्रुत्वा साब्रवीदृषिसंसदि । तपसोऽर्धं प्रयच्छामि पाणिग्राहस्य सत्तम । इत्युक्ते चास्या जग्राह पाणिं गालवसम्भव" इति । श्रीमहाभारत गदापर्वस्थवचनेन स्त्रीणां विवाहाभावे प्रत्यवायस्योक्तत्वेन स्त्रीणां प्रदानकर्मैव यथोपनयनं तथेति स्मृत्या च प्रदानात्मक विवाहाभावे स्त्रीणामसंस्कृतत्वस्योक्तत्वेन स्त्रीणां विवाहस्यावश्यकतयैच्छिकत्वोक्तिरसङ्गतैव । ननु स्त्रीणां प्रदानकर्म न संस्कारः नाकरणे· प्रत्यवाय—सम्पादकञ्च । तथात्वे 'श्रुतावतीनामाभिभो कुमारी ब्रह्मचारिणीति गदापर्ववचनेनैव कौमारब्रह्मचर्यवत्त्वेन प्रमितायाभरद्वाजसुतायाः कथमुत्तमलोकावाप्तिः कथंवोत्तररामायणोक्तायाः कौमारब्रह्मचारिण्याः वेदवत्याः प्रत्यवायाभावः कथंवा चतुर्थभागवतोक्तयोर्वयुनाधारिण्योः स्वधासुतयोरसंस्कृतयोः प्रत्यवायाभावः कथम्वा देवीभागवतपञ्चमस्कन्धोक्ताया मन्दोदरीनाम्न्या राजकुमार्या असंस्कृतायाः प्रत्यवायाभाव इतिचेन्न । श्रुताव-

त्वेन स्वस्वपितृसङ्कल्पपूरणायैव ताभ्यां तपसश्च कृतत्वेन तेभ्यांवरदानसमये 'तस्माद्योभिमतः कामःपितुसम्पत्स्यते शुभे इति' इन्द्राविष्णुभ्यामुक्तत्वेन 'तपसोग्रेण तं लब्ध्वा तेन रेमे सहाच्युतेति ग्रन्थकृतोक्तत्वेन च तयोस्संस्कारवत्त्वेनैव प्रत्यवायाभावसम्भवात्। नापि वयुनाधारिण्योरसंस्कृतत्वं। तत्र मानाभावात्। उभे ते ब्रह्मवादिन्यौ ज्ञानविज्ञानपारगे इति मूलवाक्येन विवाहाभावस्यानुक्तत्वात्। भवदुदाहृतस्य तयोस्तु सन्ततिर्नाभवत् जीवन्मुक्तत्वादिति श्रीधरीयव्याख्यानस्य वा सनकादिवदूर्ध्वरेतस्के ते इतिभाव इतिवीरराघवीयव्याख्यानस्य वा यथाकथंचित्प्रत्यवायाभावे मानत्वेपि तयोर्विवाहो नाभूदित्यत्रामानत्वात्। यद्यपि मन्दोदर्या अविवाहितत्वं देवी भागवते प्रतिपाद्यते। तथापि उत्तरग्रन्थे तस्या उत्तमलोकानुक्त्या अज्ञानान्निषिद्धमाचरित्र्या मन्दोदर्याः प्रत्यवायवत्वमेवास्तु। अस्तुवोत्तरत्र तस्या उत्तमलोकप्राप्त्युक्तिः। तथाप्यष्टादशपुराणोपपुराणानन्तर्गतस्य सम्प्रतिपन्नाप्तभावग्रन्थकारानुदाहृतस्य मुख्यतः शक्तिपूजाद्यनुष्ठेयार्थप्रतिपादकस्य बोप देवकृतस्य देवीभागवतस्याप्रमाणत्वेन तदुक्तकथाया अश्रद्धेयत्वात्। श्रद्धेयत्वेपि उदाहृतप्रबलभारतवचनानुरोधाय विवाहो न कृतइत्यस्य वाचनिकाद्विवाहो न कृतइत्यर्थस्यैव वर्णनीयत्वेन मन्दोदर्या अपि मानसप्रदानरूप संस्कारवत्त्वमभ्याहृतमेव अतः स्त्रीणां प्रदानात्मको विवाहः संस्काररूप एवेति स्त्रीणां विवाहस्य नाकरणे प्रत्यवायासम्पादकत्वरूपमैच्छिकत्वं। अत्राह प्रथमवादी विध्युक्तवैवाहिकशास्त्रजिज्ञासाग्रन्थे। स्त्रीणां विवाहो न संस्कारः। सकामत्वस्यैव विवाहप्रयोजकत्वाभिप्रायेण सकामानामेव स्त्रीणां विवाहस्य तत्रतत्रोदितत्वात्। 'अकामस्य क्रिया काचित् दृश्यते नेह कर्हिचित्, इति मनुनैवाकामानां स्त्रीणां

विवाहाभावस्योक्तत्वात् । पराशरमाधवीये 'द्विविधाः स्त्रियः ब्रह्मवादिन्यस्सद्यो वध्वश्चेति' अविवाहितस्त्रीणामुक्तत्वात् । मार्कंडेयपुराणेपि द्विपञ्चाशेऽध्याये एवमुक्तत्वात् पापेऽस्ते नवमगतग्रहस्य तुल्यां प्रव्रज्यां युवतिरुपैत्यसंशयेनेति बृहज्जातकश्लोके तद्व्याख्यायां च स्त्रीणां सन्यासस्योक्तत्वात् । महाभारते अम्बोपाख्याने 'प्राव्राज्यमहमिच्छामि तपस्तप्स्यामि दुश्चरमिति अम्बया सन्यासस्वीकारस्योक्तत्वाच्चेति । तदसत् मृगयन्ती पतिं कामयानां अन्विच्छन्तीपति युक्तमित्यादिवचनैर्दमयन्तीदाक्षिणादिस्त्रीणां विवाहसमये युवतित्वस्योक्तत्वेपि सकामत्वमेव स्त्रीणां विवाहे प्रयोजकमित्यत्रैतेषां वचनानामप्रमाणत्वात् । नन्वेतानि वचनानि प्राचीनाचारबोधकानि आपन्नवयस्काया विवाहे प्रमाणानि भवन्त्विति चेन्न । सर्वेष्वपि भवदुदाहृतापन्नवयस्काविवाहबोधकवचनेषु आपन्नवयस्कानां क्षत्रियकुमारीणां सावित्रीकुन्तीशाकेमण्यम्बालिकोत्तराप्रभृतीनां विवाहस्योदितत्वेपि कुत्रापि ग्रन्थे आपन्नवस्काया विप्रकन्याया विवाहस्यानुदितत्वेनास्मदनभिमतापन्नवयस्क विप्र कन्याविवाहे भवदुदाहृतवचनानामप्रमाणत्वात् । नहि भवतइव सर्वासामपि त्रैवर्णिककन्यानां रजोदर्शनानन्तरमेव विवाहस्य मुख्यकाल. रजोदर्शनादर्वाक्कालस्त्वमुख्यकाल एवेत्यस्माकं मतं किन्तु विप्रकन्यानां कन्यात्वगौरीत्वरोहिणीत्वावच्छिन्न एव विवाहस्य मुख्यःकालः । कालातिक्रमे तु महान्प्रत्यवायः क्षत्रियवैश्यकन्यानां तु रजोदर्शनानन्तरमपि विवाहः शास्त्रीय इति । अतो भवदुदाहृतवचनानि आपन्नवयस्कक्षत्रियादिकन्याविवाहे प्रमाणानीति नास्मत्प्रतिपक्षभूतानि । एवं अकामस्य क्रियाकाचिदिति मनुवचन तु अकामस्य पुंस एव पुलिंगप्रयोगेन विवाहाभावं बोधयति । माधवाचार्योपि 'ब्रह्म-

वादिभ्यः सद्यो वध्वश्चेति विभागवाक्येन देहाभिमानरहिता-स्तत्सहिता एवाभिप्रेदिति नास्माकं विरोधः । एतेनैव मार्कण्डेयपुराणवचनमपि व्याख्यातं बृहज्जातके प्रव्रज्यां युवति-रुपैत्यसंशयेनेति युवत्याः संन्यासस्योदितत्वेऽपि तस्य सप्तमस्थपापग्रहफलत्वेन प्रत्यवायसंपादकतया ऽशास्त्रीयत्वात् । नच पापग्रहफलत्वमसिद्धम् । पापेऽस्ते नवमगतग्रहस्य तुल्यमिति पूर्ववचने सप्तमस्य पापग्रहफलतायाः स्पष्टमभिहितत्वात् अन्यथा प्राव्राज्यमहमिच्छामीति सूक्ते ऋषिभिः प्रव्रज्या हि सुदुःखयमित्युत्तरवचन एव स्त्रीणां संन्यासस्य दु:खसाधनताया उदितत्वात् । अस्तु वा देवतांशत्वेन प्रमितानां निषिद्धकर्मकरणेऽप्यपरोक्षज्ञानमहिम्ना पापलेपशून्यनां माधवीसुलभासत्यवतीकुन्ती दक्षिणाप्रभृतीनां कन्यानामाचारो यथा तथा । सत्वाचारो नास्मदयीनां विप्रकन्यानां विवाहाद्याचारे प्रमाणं ताभिर्धर्मबुद्धया ऽननुष्ठीयमानत्वात् तथा चाह बोधायनः । अनुष्ठितं च यद्देवैर्मुनिभिर्यदनुष्ठितम् । नानुष्ठयं मनुष्यैस्तदुक्तं कर्म समाचरेदिति । आपस्तम्बोऽपि । दृष्टो धर्मव्यतिक्रमस्साहसं च पूर्वेषां तेषां तेजोविशेषेण प्रत्यवायो न विद्यत इति । अन्यथा दक्षिणादेवीकर्तृकस्य भ्रातृविवाहाचारेण अधुनापि विप्रस्त्रियः स्वस्वभ्रातृनुद्वहन्तु अतो न देवताचारो ऽस्मदनुष्ठापकः । किन्तु तद्वचनमेव । एतेनैव शम्बरगृहस्थितचतुर्मुखशापग्रस्तमायावतीदृष्टान्तेन पुनर्विवाहोपपादनमपि परास्तं तस्या अपि मन्मथभार्यात्वेन देवतात्वात् । नच स्त्रीणां विवाहेनावश्यकत्वबोधकं किमपि वचनं दरीदृश्यते विवाहाकरणे स्त्रीणां प्रत्यवाय इति च वचनमुदितम् अतो विवाहस्य स्त्रीसंस्कारत्वादावश्यकत्वं सिद्धम् । यच्चैतदुपपादनाय विवाहविधेर्द्वयोस्समुच्चित्य प्राप्तौ इतरनिवृत्तिफलकविधित्वरूपं

परिसङ्ख्याविधित्वमुक्तं तदप्यसङ्गतं पञ्च पञ्चनखा भक्ष्या इत्यत्रेव अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेदिति विहितस्य अस्मद्रीत्या मन्त्रपूर्वकसप्तपद्यन्तक्रियाविशेषात्मकस्य भवद्रीत्या सप्तपद्युत्तरकालीनमैथुनात्मकस्य वा विवाहस्य विधिं विना ऽप्यनोऽप्राप्तत्वेन द्वयोस्समुच्चित्य प्राप्तेरभावात् । यच्च विवाहविधेः परिसंख्या समर्थनाय मनुवचन भागवतवचन-विज्ञानेश्वरवचनैः केवलव्यवायस्य रागतः प्राप्तत्वसमर्थ-नम् । तत्तु विभिन्नार्थकयो व्यवायविवाहशब्दयोरर्था-परिज्ञानमूलकम् । एका निशाद्वौ ननयं प्रसूते एको निशादस्तु कन्यायपायीत्याभाणकप्रसक्तञ्च । नहि व्यवाय एव विवाहः येन व्यवायस्य रागतः प्राप्ततया विवाहोऽपि रागतः प्राप्तः स्यात । अन्यथा ऊढाहिता तु या कन्या नचेत्सम्प्राप्तमैथुनेति वचनं व्याहतं स्यात् । ननु वृक्षशिंशुपयोरिव व्यवायविवाह-योस्सामान्यविशेषभावापन्नत्वेन सामान्यस्य व्यवायस्य रागतः प्राप्त्युपपादनं विशेषस्य विवाहस्य रागतः प्राप्तिमुपपादयतीति चेन्न । अलङ्कृतां कन्यामुदकपूर्वां दद्यादेष ब्राह्मो विवाह इत्याश्वलायनसूत्रे मन्त्रपूर्वकप्रदानस्यैव विवाहत्वोक्त्या मन्त्र-पूर्वकसप्तपद्युत्तरकालीनमैथुनस्य भवदभिमतस्य विवाहत्वे प्रमाणाभावेन च व्यवायविवाहयोस्सामान्यविशेषभावानापन्न-त्वात् । यच्चोक्तं विवाहस्यैच्छिकत्वात्कालक्लृप्तिरसम्भाविता स्यात् सत्यामपि कालक्लृप्तौ प्रबुद्धदशायामेव स्यात् । नापि प्राप्ते द्वादशमे वर्षे यः कन्यां न प्रयच्छति , मासि मासि रज-स्तस्याः,पिता पिबति शोणितमिति यमवचनेन माता चैव पिता चैव ज्येष्ठो भ्राता तथैव च । त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलामिति संवर्तवचनेन चैच्छिकत्वस्य बाधः । दृष्टावा-प्तापि मादीनां दानाभावप्रयुक्तदोषश्रवणान्न विवाहाभावप्रयुक्त-

दोषदर्शनपराणीति स्पष्टं ज्ञायते किञ्च कन्याया वोढुर्वा दोषलेशमपि नोक्तमिति च तन्न विवाहेच्छिकत्वोक्तेरविचाररमणीयत्वात् तथा हि किमिदं विवाहस्यैच्छिकत्वम् इच्छाप्रयोज्यत्वमितिचेन्न क्रियासामान्यस्येच्छाप्रयोज्यत्वेन नित्यस्य सन्ध्यावन्दनादेरप्यैच्छिकत्वापातात् नापि शास्त्राप्रयोज्येच्छाप्रयोज्यत्वमैच्छिकत्वम्। उद्वाहनाविवाहेच्छाया अपि शास्त्रप्रयोज्यत्वेन विवाहस्याप्यैच्छिकत्वाभावापातात्। नापि केवलव्यवाय एव विवाहः येन विवाहेच्छायाः शास्त्रप्रयोज्यत्वं स्यादित्यवादिष्म अतो ऽकरणे प्रत्यवायासम्पादकत्वमैच्छिकत्वं पारिभाषिकमभ्युपगन्तव्यं तत्तु स्त्रीणां विवाहे नास्ति इत्यवोचाम। अतः विप्राणां सन्ध्यावन्दनवत् स्त्रीणां विवाहस्य नित्यत्वेन विहितकालकल्प्तिरावश्यक्येव। यच्चोक्तं यमसंवर्त्तवचनयोर्दातृपित्रादिदोषप्रतिपादकत्वं न कन्यायास्तद्वोढुर्वा दोषलेशप्रतिपादकत्वमिति तदप्यसङ्गतं यस्यास्तु न भवेद्भ्राता पिता वा भरत र्षभ। नोपयच्छेत तां जातु पुत्रिका धर्मिणीहिसेति महाभारतानुशासनपर्वचश्चत्वारिंशदध्यायस्थवचनेन दातृशून्यकन्याया अविवाह्यत्वोक्त्या दातृदोषकथनेनैव तावत्पर्यन्तमदत्तकन्यायास्तत्स्वीकर्तुश्चदोषस्यार्थत एव प्राप्तत्वात् इति प्रथमप्रकरण खण्डनम्॥ यच्च पूर्वोक्तवचनैः स्त्रीणां रजोदर्शनानन्तरमपि दानं कुर्यादित्यवगम्यते अमुमेवार्थं मन्वादयोप्याहुरित्यारभ्य त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती। ऊर्ध्वंतु कालादेतस्माद्विन्देत सदृशं पतिम्। अदीयमाना भर्तारमधिगच्छेद्यदिस्वयम्। नैनः किञ्चिदवाप्नोति नच यं साधिगच्छति। इति मनुवचनोदाहरणम् ऋतुत्रयमुपास्यैव कन्या कुर्यात्स्वयम्वरम्। ऋतुत्रये व्यतीतेतु प्रभवत्यात्मनस्सदा। पितृवेश्मनि या कन्या रजः पश्यत्यसंस्कृता। सा कन्या वृषली ज्ञेया हरंस्तां न विदुष्यतीति विष्णु-

वचनेषु रजोदर्शनानन्तरं विवाहः सोमगन्धर्ववह्निभोगानन्तरं तदाश्रयामानुषकर्तृक—विवाहो वा प्रतिपादितः येन प्रकृतेऽपि युक्तास्यात् यच्च अक्षतयोनिः कन्या यथाविधि ब्राह्मादिविवाहेषु परिणीतामती श्रुद्धयोनिरिति स्मर्यते आभ्यामक्षतयोनि—शुद्धयोनि—शब्दाभ्यां युवत्येवेति गम्यत इति तत्तु दुराग्रहोन्मादेनप्रलपित तथाहि कन्याया एव ब्राह्मोविवाहउदितः सातु न युवतिः किन्तु भवन्मतेपि दशवर्षैव अतः कन्याया एव विवाहः अक्षतयोनि—शुद्धयोनिपदयोरदृष्टरजस्कैत्येव मुख्योर्थः । यच्च वैवाहिकमन्त्रा अपि युवत्येव कामुकीर्त्वा विवाह्येति संगिरते तानप्युदाहरिष्याम इति प्रतिज्ञाय ऋङ्मन्त्र—यजुर्मन्त्र साममन्त्रोदाहरणं तदपि प्रकृतानुपयुक्तं प्रयोगापरिज्ञानमूलं विरुद्धञ्च तथाहि उदीर्ष्वातो विश्वावसोनमसेळामहेत्वा । अन्यामिच्छ प्रपूर्व्यं सञ्जायांपत्यासृजेतिमन्त्रभाष्येसायनाचार्येण अत स्थानात् कन्यासमीपादुदीर्ष्वं उत्तिष्ठ एषा कन्यापतिमतीहि सजाता अत उदीर्ष्वेतिवाऽन. शङ्कायोज्य इति व्यक्तां अनूढतिपरिस्फुटां विगतांजनां वा स्तनोद्गमादिराहित्येनाप्रौढामित्यर्थ इति च । सखा सप्तपदी भवेति सामवेद मन्त्र ब्राह्मण भाष्यकारेण सप्तपदी सप्तपदाक्रान्ता त्व कन्येति । ममव्रतेते हृदय दधातु ममचित्तमनुचित्तं त अस्तु । ममवाचमेकमना जुषस्व बृहस्पतिस्त्वानियुनक्तुमह्यमिति साममन्त्रभाष्य-कन्येनेत्र वहृदयमिमि । सोमः प्रथमो विविद इति ऋङ्मन्त्रभाष्येसायणार्येण जातांकन्यामिति सोमोदददिति मन्त्रभाष्ये इमां कन्यामिति व्याख्यां कन्यापदप्रयोगस्यैव कृतत्वेन उदीर्ष्वातः तांपूषन्निति मन्त्रयोश्च विप्रकन्याविवाहप्रयोगेऽनुकल्पेनच भवदुदाहृतमन्त्रोक्त—शपथसल्लापाः कन्यातत्पाणिग्रहीत्रोरेवेति निश्चीयते नत्वेषु मन्त्रेषु युवति—बोधक किमपि पदमास्ति

अन्यथा सोमगन्धर्ववह्नीनां भोगः भवतु च तदनन्तरमेवा ष्टवर्षात्विवाहश्च नचाष्टवर्षान्तरेव रोमरजः कुचदर्शनानुपपत्तिः अस्माकं तद्दर्शनस्यानुपपन्नत्वेऽपि सूक्ष्मदर्शिनां देवानां तद्दर्श नस्योपपन्नत्वात् तत्रैतदनुपपन्नं पुरूरवसा ऽदृष्टायाऽपि जराया अश्विभ्यां दृष्टत्वस्य विष्णुधर्मोत्तरे कथितत्वात् अतो विनाप्रमाणं स्वाभिप्रायेण प्रजल्पनमसङ्गतमेव यत्तु प्राप्तवयस्काविवाहसाध कतया गौतमवसिष्ठपुराणिकानन्तकृष्णशास्त्रिणोचितं यौवनोत्थिता मितिवचनोदाहरणं तदपि रजस्वलात्वानपत्यबाधकप्रबलस्मृ त्यादिस्मृतिवचनानुरोधेन याप्राप्त्यमानस्त्रीचिह्नाया एव यौ वनाया दशवर्षाया गौर्या दानबाधकं ननु गयत्याः अन्यथोत्तर वाक्ये कस्मैदेयामप्राप्तेति बालादिशब्दप्रयोगानुपपत्त्यापातात् । अत्र ऽष्टवर्षाष्टवर्षां वा धर्मे सीदति सत्वरः इत्यष्टवर्षाया विवाहबाधकं मनुवचनस्य अत्र मन्वर्थमुक्तावल्यां त्वरायति गुण वद्वरेलब्धे ऽनाप्तवर्षाया अपि विवाहः कार्य इत्यर्थः अतो न मुख्यकाल इत्यनुमीयते इति भाष्यदर्शनेन तत्पामरजनमात्र मनोरञ्जकं तथाहि मन्वर्थ. ऽष्टवर्षः चतुर्विंशतिवर्षोवरः अष्ट वर्षं मुक्त्वेति मनुवचनेनाभिप्रेते ननु त्वराविति गुणवद्वरेलब्धे एवाप्तवर्षाया अपि विवाहः कार्य इति येनाष्टमवर्षस्यामुख्य कालता स्यात् अतो भवदुक्तमसङ्गतमेव किंचाप्राप्तवयस्काया विवाहाभ्युपगमे श्रीमहाभारतानुशासनपर्वस्थेन त्रिंशद्वर्षो दश वर्षां भार्यां विन्देत नग्निकां । एकविंशति वर्षो वा सप्तवर्षामवा प्नुयादिति वचनेन नीलकण्ठरचितेन नग्निकां एकवाससं अज्ञा तस्त्रीव्यञ्जनामिति यावत् नग्नः स्यादेकवासा इति स्मृतिः यद्यप्यादर्शमपि वर्षं कुचोद्भेदस्तत्प्रतिषेधार्थमेतद्विशेषणमिति इति तद्व्याख्यानेन 'मातिर्गता सर्वाङ्गूयोयोऽस्मिस्तीर्थे समा हितः । वसन्तरजनीमेकां सर्पयित्वा दिवौ कसः । चत्वारिंशतमष्टौ

च ह्यांचार्योसम्यगाचरेत् । यो ब्रह्मचर्यं वर्षाणि फलं तस्य लभेत स, इति गदापर्ववचनेन चत्वारिंशतमष्टौचेति प्रति वेद द्वादश-वर्षाणीतिवेदचतुष्टयाध्ययनायाष्टचत्वारिंशद्वर्षाणि ततोऽष्टौवत्सरो-स्नातकेन गुरोरानृण्यार्थमेवाकार्यो ततोऽष्टवर्षा कन्यां परिणीय तस्या यौवनावस्थाष्टवर्षाणीति अष्टपञ्चाशद्वर्षाणि ब्रह्मचर्यं सर्वस्येष्टमिति तद्व्याख्यानेन च विरोधोदुर्वारः अतो न रजोदर्श-नानन्तर विप्रकन्यानांविवाह इति सिद्धम् ॥ इति द्वितीय-प्रकरण-खण्डनम् ॥ यच्चोक्त पतिसंयोगात्पूर्वं विवाहानान्त गच्छतीति पतिसंयोगात् परमेव स्त्री पितृगोत्रं विहाय भर्तृगोत्रं लभत इति तत्र सम्भोगस्यैव विवाहपूरकत्व सम्भोगानन्तर मेव भर्तृगोत्रप्रा प्तिरित्यत्रप्रमाणाभावेन पाणिग्रहण मन्त्राणां निष्ठास्यात् सप्तमे पद इत्यनुशासनपर्ववचनेन कदानहिं तदुत्पद्यत तदाह पाणीति यत्र तु दानादूर्ध्वं सप्तपदात्प्राक् भर्तुर्मरणं सगोत्रत्वादि ज्ञान वा जात तत्रान्यस्मै दान मृषावाददोषोऽपि नास्तीत्यर्थः इति नीलकण्ठकृतेन तद्व्याख्यानेन च सप्तपद्या एव विवाह पूरकत्वोक्त्या च द्वितीयपरिच्छेदेऽपिाहृत—कन्यलापितृभ्यो यतीति मन्त्रे कन्याभावेनैव पतिगोत्रप्राप्तेश्चोक्तत्वेनासङ्गततर मेव । यत्राह कृष्णमतानुयायी प्रथमवादी न विवाहस्य सम्भोगान्तत्व प्रमाणाभाव । ऋग्वेद—यजुर्वेद—सामवेदीय विवाह—मन्त्रेषु आश्वलायनापस्तम्बगोभिलादिसूत्रेषु सायण-हरदत्तसुदर्शनसुधाविलोचनादिभाष्येषु च अथातश्चतुर्थीकर्म अग्नेनिपूर्वप्रकृतार्थं । अर्थाद्विवाहरात्र्यांचतुर्थीरात्रिस्तस्यां कर्म-चतुर्थीकर्मेत्युच्यत इति शेष इति-विवाहचतुर्थदिने-समावेशन वध्वामैथुनार्थशयनमिति । मैथुनाहेश्यकशयनत्वनोक्तसमावेशन-सङ्कल्पात्मक—चतुर्थीकर्मणउदितत्वात् । चतुर्थीकर्मणःविवाहपूर-कत्वे च वैक्षावतारानन्तर प्रवृत्तस्य पराशरस्मृत्यनुसारिण

कन्यादानं शचीयागो विवाहोऽथ चतुर्थिका । विवाहमेतत्कथितं नाम कर्म चतुष्टयमित्यग्निपुराणस्य प्रमाणत्वादिति तन्न । विवाहशेषहोमस्यैव चतुर्थीकर्मत्वस्य 'चतुर्थीहोममात्रेण त्वङ्मांसहृदयेन्द्रियैः । भर्त्रा संयुज्यते पत्नी तद्गोत्रा तेन सा भवेत् । विवाहे चैव निर्वृत्ते चतुर्थेऽहनि रात्रिषु । एकत्वमागता भर्तुः पिण्डे गोत्रे च सूतके, इतिवचनाभ्यां स्फुटमुदितत्वेन अनुक्रमणिकायां क्षत्रियविप्रकन्ययोर्विवाहानुष्ठाने प्रयोगभेदोऽवगन्तव्य इत्यभिप्रायेणैव तद्रात्रौ अन्यस्यां वा रात्रौ समावेशनं करिष्य इति सङ्कल्पस्यानुक्तत्वेन प्रयोगरत्नादिग्रन्थेषु गृह्यसूत्रतद्भाष्याद्युक्तार्थनिबन्धकारैर्बहुज्ञैर्नारायणभट्टादिभिश्चतुर्थीकर्ममध्ये समावेशनसङ्कल्पस्य आरोहोरुमित्यादिमन्त्रजपस्य वाऽनुक्तत्वेन गर्भाधानप्रयोगमध्य एव उदीर्ष्वात इति मन्त्रेणाश्वगन्धारससेचनस्य तां पूषञ्छिवतमामिति आरोहोरुमुपबर्हस्व बाहुमिति च मन्त्रजपस्योक्तत्वेन विवाहमन्त्रेषु कुत्रापि समावेशनस्यानुक्तत्वेन जनिष्यमाणगर्भसंस्कारात्मकगर्भाधानस्य स्त्रीसंस्काररूपविवाहेऽनन्तर्भावादस्यानुपपन्नत्वेन च विवाहस्य सम्भोगान्तत्वे प्रमाणाभावात् । ननु त्वङ्मांसहृदयेन्द्रियैः संयुज्यत इत्यनेन वचनेन विवाहचतुर्थीदिनएव साक्षात्परस्परेन्द्रियसंयोगस्योक्तत्वेन सम्भोगात्मकमस्मिन्नेव चतुर्थीकर्मनि चेन्न तत्रैव वचने चतुर्थीहोममात्रेणेति होमस्यैवाहष्टद्वारेन्द्रियसंयोजकत्वोक्त्या सम्भोगस्य तत्रानुक्तत्वात् । अन्यथा मात्रपदवैयर्थ्यापत्तेश्च अतश्चतुर्थीहोमान्तसप्तपद्या एव विवाहपूरकत्वं भर्तृगोत्रप्रापकत्वञ्चेति सिद्धम् ॥ इति तृतीयप्रकरणखण्डनं ॥ यच्चोक्तं सयोगान्तात्विवाहात्पूर्वं आपदि कन्याकामुकी चेदन्यं परिणयादित्यत्रोदाहरन्ति वसिष्ठनारदादय इत्यारभ्य वसिष्ठनारदमनुबोधायनयाज्ञवल्क्यशातातपकात्यायनपराशरवचनोदाहरणं अग्नि-

पुराणवचनोदाहरणं उदीर्ष्वनारीति यजुर्मन्त्रोदाहरणं यापूर्वं पतिंवित्वेत्याथर्वणमन्त्रोदाहरणं च स्वाभिमतपुनर्विवाहसाधकतया विधाय स्वमतानभ्युपगन्तॄनुद्दिश्य अपरञ्च गतानुमतिकन्यायेनैवमसारवाग्व्यापारव्यापृतमनस्कानां मुधैवायुःक्षयमन्तरा न कापि समीहितफलसिद्धिरिति दूषणं । तत्तुच्छं तथाहि । विवाहस्य संयोगान्तत्वमसिद्धं । प्रमाणाभावात् । कन्याकामुकीत्यपिव्याहतं । दशवर्षवत्त्वेन प्रमितायाः कन्यायाः व्यवायकामनाया एवासम्भवात् ननु व्यवायकामनाभावेपि विवाहकामनास्त्वितिचेन्न । पुरुषाणां भ्रष्टत्वनिवर्तकपुनरुपनयनेच्छावत् स्त्रीणां अप्रमितपुनर्विवाहेच्छाया एवानुदयात् ननु शास्त्रात् मृतभर्तृकाऽक्षतयोनिस्त्रीणां पुनर्विवाहेच्छोत्पद्यतइति चेन्न । आपदि पुनर्विवाहेच्छा कार्येतिशास्त्रस्यैवाभावात् अत्राह विध्युक्तवैवाहिकशास्त्रजिज्ञासाग्रन्थकारः । सर्वत्र विवाहप्रकरणे श्रूयमाणः कन्याशब्द आपन्नवयस्कापर एव ननु दशवर्षापर । 'यावच्च कन्यामृतवः स्पृशन्ति तुल्यैस्सकामामभियाच्यमानामिति वसिष्ठसंहितायां ॥१॥ कन्या चाक्षतयोनिः स्यात्कुलीना पितृमातृतः । ब्राह्मादिषु विवाहेषु परिणीतायथाविधि,। सा प्रशस्ता वरारोहा शुद्धयोनिः प्रशस्यत इति भगवद्वचनं॥२॥पितृवेश्मनि या कन्या रजः पश्यत्यसंस्कृता।ते विष्णुवचने ॥३॥ अप्रयच्छन्समाप्नोति भ्रूणहत्यामृतावृतौ । गम्यं त्वभावे दातॄणां कन्या कुर्यात्स्वयम्वरमिति याज्ञवल्क्यवचने ॥ ४ ॥ कन्यामृतुमतीं दृष्ट्वा कथं कुर्वन्ति याज्ञिका इति गृह्याग्निवचने ॥५॥ कीदृश्यः कन्याः आञ्जिभगं अञ्जाना अभिव्यक्तिं कुर्वाणा इति माध्यन्दिनी यवाजसनेयसंहितासप्तदशाध्यायीयऋग्व्याख्याने महीधरकृत-वेददीपे ॥ ६ ॥ कन्यासती देवमर्कमाजुहाव यशस्विनीति सातुनैच्छद्वरारोहा कन्याऽहमिति भारतेत्यादिपर्वंवचने ॥ ७ ॥ असंस्कृ

नायाः कन्यायाइति गदापर्वंवचने ॥ ८ ॥ कन्यायाः कनीनश्चेति सूत्रतत्वबोधिन्यां कौमुद्याञ्च ॥ ९ ॥ औरसः क्षेत्रजश्चैव दत्तकः कन्यकासुत इति पराशरधर्मशास्त्रे ॥ १० ॥ पौनर्भवश्च कानीन इति भारतीयपाण्डुवचने ॥ ११ ॥ उद्वाहिताऽपि या कन्या नचे-त्सम्प्राप्तमैथुनेति नारदवचने ॥ १२ ॥ सकृत्कन्या प्रदीयत इतिभार-तोक्त सावित्रीवचने ॥ १३ ॥ सावित्री नाम राजर्षे कन्येयं ममशो-भनेत्यश्वपतिराजवचने ॥ १४ ॥ समनुज्ञासिषं कन्यामम्बां ज्येष्ठां नराधिप । अनुज्ञाता ययौ सातु कन्या साल्वपतेः पुरमित्युद्योग पर्वस्थभीष्मवचने ॥ १५ ॥ कन्यैवानुभवीश्चिनेऽर्कतनये घूने जरां गच्छतीति बृहज्जातके ॥ १६ ॥ आपन्नवयस्कास्वेव कन्याशब्दप्रयो-गात् । नापि दशवर्षाभवेत्कन्येति पराशरवचनोदाहरणेऽसा-ङ्गत्यं । भवद्भिरनत्स्याष्टवर्षायाः कन्यात्वस्य बाधनार्थमस्माभिः पराशरवचनस्योदाहृतत्वात् । दशवर्षायाः कन्यात्वस्यास्मदनभि-मतत्वाच्च । अतः कन्याकामुकीत्रेदितिवचनं न व्याहतिरिति । तद-सङ्गतम् भवदुदाहृतवचनस्थकन्यापदस्य मुख्यवृत्तिबाधककल्पनम-स्यादिपदसमभिव्याहारेण अमुख्यवृत्त्याचित्रलिखितसिंहसिंहश-ब्दवदापन्नवयस्कास्वनूढासु रजस्वलासु प्रवृत्तत्वेऽपि बाधक-पदाघटितेषु विवाहार्थविधायकेषु स्थितस्य कन्यापदस्य मुख्यवृत्त्या अष्टवर्षादिबोधकत्वेबाधकाभावात् । आपन्नवयस्कानामपि क्षत्रिय कन्यानां विवाहस्यास्माभिरनुगतत्वेन तद्दृष्टान्तेन न विप्रकन्यानां रजोदर्शनानन्तर विवाहसिद्धिरित्यवादिष्म । ननु कन्याशब्दः मुख्यवृत्त्याऽऽपन्नवयस्कामवबोधयति नादृष्टरजस्कां मुख्यत्वा-मुख्यत्वयोर्वैपरीत्यस्यापिसुवचत्वादितिचेन्न । त्वयैव परमप्रमाण तयाऽभ्युपगते दशवर्षाभवेत्कन्येति पराशरवचने दशमे कन्यकाप्रोक्तेति संवर्तवचने दशवर्षातुकन्यकेति काश्यपवचने कन्याकुमारीत्यमरकोशे·कन्याकुमारीतिद्वयं प्रथमवयस्काया इति-

तद्व्याख्यानेच कन्याशब्दस्यादृष्टरजस्कायामेव मुख्यत्वस्य प्रति-
पादितत्वात् । शक्तिग्राहकप्रमाणानाममुख्यार्थबोधकताकल्प-
नस्यायुक्तत्वाच्च । मुख्यार्थबाधएवानूढापरत्वस्य कन्यायाः
कनीनचेतिसूत्रवृत्तौमुद्यां भट्टोजिदीक्षितादिभिः प्रतिपादितत्वाच्च ।
आपन्नवयस्कायां शब्दव्यवहारानभिज्ञैर्म्लेच्छैस्तत्प्रयोगानुकर्तृभिः
पुराणादिकारैश्च कन्याशब्दस्य प्रयुक्तत्वेपि विवाहविधिवाक्यस्थ-
कन्यापदस्य शब्दैकसमधिगम्यधर्माधर्माविप्लुत्युद्देशेन शब्दार्थ-
तत्त्वपरिपालनकार्यप्रसिद्ध्यनुसारेणैव—शास्त्रस्थाशातन्निमित्त—
त्वादिति न्यायेन शास्त्रप्रसिद्धादृष्टरजस्कापरत्वस्यैव न्याय्यत्वात् ।
तथाचोक्तं यववराहाधिकरणे माधवाचार्येण । यवादिशब्दाः किंद्व्-
यर्था वोतार्यम्लेच्छमारयत । दीर्घशूकप्रियङ्ग्वाद्याः द्वयेप्यर्था
विकल्पिताः । यत्रान्या इति शास्त्रस्थप्रसिद्धिस्तु बलीयसी ।
शास्त्रीयधर्मे तेनात्र प्रियङ्ग्वादि न गृह्यते । इति तेनैव यवाद्य-
र्थानिर्णयेन तद्वाक्यं न प्रमेतिचेत् । न। शास्त्रस्य बलित्वेन
तत्प्रसिद्ध्यार्थनिर्णयादितिच–भाट्टदीपिकाकारेणापि–नचनिगम-
नाविरहः । आर्यैरभिज्ञैरेव नियामकत्वादिति । अतो विवाहविधि
वाक्यस्थ कन्याशब्दस्याष्टवर्षादिपरत्वमेव न्याय्यम् नत्वापन्न-
वयस्कापरत्वमितिमुख्यो व्याघातः नतु विप्रकन्याविवाह—
प्रयोगनिबन्धकारैर्नारायणभट्टादिभिर्विवाहप्रयोगमध्ये 'विवाहे
वितते तन्त्रे होमकालउपस्थिते । कन्यामृतुमतीं दृष्ट्वा कथं
कुर्वन्ति याज्ञिकाः इतिवृद्धात्रिवचनोदाहरणपूर्वकं रजोदर्शन-
माशंक्य 'हविष्मत्या स्नापयित्वा त्वन्यवस्त्रैरलंकृतां । युञ्जा-
नामाहुतिं कृत्वा ततःकर्मप्रवर्तते इत्युत्तरवचनेनैव समाहित-
त्वात् आपन्नवयस्कानां विप्रकन्यानां विवाहः प्रयोगकारा-
भिमत इतिचेन्न । कन्यात्वाद्यवस्थायामेव रोगादिवशाद्रजो
दर्शनप्रसक्तौ किं कार्यमित्याशङ्क्य वृद्धात्रिणा समाहितत्वात् ।

आपदि अन्यं परिणुयादिति यदुक्तं तदप्यसङ्गतं । महापद्यपि सप्तपद्यनन्तरं पुनर्विवाहकरणे साधकमानाभावस्य श्रुतिस्मृत्यादिरूपबाधकमानानां च प्रथमद्वितीयपरिच्छेदयोस्सपरिकरमुपपादितत्वात् । कृते सप्तपदे भर्तुर्विभोगोयदि जायते । न देया पुनरन्यस्मै कलौ कन्यामनीषिभिरिति वा भव्यमहामुनिना च सप्तपद्यनन्तरं पुनर्दानस्य कलावपि निषिद्धत्वाच्च । ननु दानाभावेपि विवाहोस्त्विति चेन्न । ब्राह्मणस्य विहितानां चतुर्विधानामपि विवाहानां दानरूपत्वेन तन्निषेधे विवाहस्यापि निषिद्धत्वात् । नचात्र प्रमाणाभावः । ब्राह्मो दैवस्तथाचार्षः प्राजापत्यस्तथासुरः । गांधर्वो राक्षसश्चैव पैशाचश्चाष्टमो मतः । चत्वारो ब्राह्मणस्याद्या राज्ञां गान्धर्व राक्षसौ राक्षसश्चासुरो वैश्ये शूद्रे चांत्यस्तु गर्हित इति मनुवचनस्य अलंकृत्य कन्यामित्याद्याश्वलायनसूत्रादेश्चाविद्यमानत्वात् । नचास्मदुदाहृतभव्यवचनप्रामाण्ये विवदितव्यं । तत्पूर्ववचनस्य पञ्चत्वञ्चेद्वरइत्यस्य शास्त्रप्रदीपोद्धृतत्वेन सप्तपदात्परेति पाठसप्तपदात्परमिति विभ्राम्य भवद्भ्यामेव प्रमाणतयोदाहृतत्वात् । भवदुदाहृतवचनानां सप्तपद्याः पूर्वं मृतभर्तृकापरतायाः प्रथमपरिच्छेदे समर्थितत्वेन भवदभिमतपुनर्विवाहासाधकत्वात् । एतेनैव यापूर्वपतिं वित्त्वाऽथान्यं विन्दते पतिं पञ्चौदनं च नावजन्ददातो नवियोषितः । समानलोको भवति पुनर्भुवापरःपतिरित्याथर्वणमन्त्रोपि व्याख्यातः अस्य मन्त्रस्य सप्तपद्या अर्वागेव मृतभर्तृकायाः भर्त्रन्तरपरिग्रहे प्रायश्चित्तकथनपरत्वात् । उदीर्ष्वनारीतिश्रुतौ दिधिषुशब्दस्य पुनर्विवाहेच्छुपरत्वे प्रमाणोपन्यासं विना पुनर्विवाहासिद्धश्च । भवदुक्तश्रुत्यर्थाभ्युपगमे भट्टभास्करकृतव्याख्याविरोधस्य प्रथमपरिच्छेद उक्तत्वाच्च । नैकस्यै बहवः सहपतय इति श्रुत्या

कालत्रयेपि बहुपतिकतया निषिद्धत्वाच्च । ननु-एकस्यबह्व्यो विहिता महिष्यः कुरुनन्दन । नैकस्या बहवः पुंसः श्रूयन्ते पतयःक्वचित् । इत्यादिपर्वभारतवचनव्याख्याने नैकस्यैबहवस्स-हपतय इति श्रुत्या सहेति युगपद्बहुपतित्वनिषेधो विहितः नतु समयभेदेनेति नीलकण्ठेनोक्ततया एककालएव बहुपतित्वं निषिद्धं नतु कालभेदेनेतिचेन्न देवतारूपसोमादिपतीनामपि नैकदा कन्यापतित्वं किन्तु रोमरजः कुचदर्शनसमयभेदेनैवेत्येत-द्वाक्यतात्पर्यसम्भवेन तथा तात्पर्यवर्णनस्यैव तत्प्रकरणोपयुक्तत्वेन काल भेदेनापि मानुषबहुपतिकत्वस्य नीलकण्ठानभिप्रेतत्वात् । एवं 'पाणि ग्रहणिकाः मन्त्राः कन्यास्वेवप्रतिष्ठिताः । नाक-न्यासु क्वचिन्नृणां लुप्तधर्मक्रिया हि ता. । इति नोद्वा-हिकेषु मन्त्रेषु नियोगः कीर्त्यते क्वचित् । न विवाह-विधावुक्तं विधवावेदनं पुनरितिच मनुनैव पुनर्विवाहस्य निषि-द्धत्वाच्च । ननु एतद्वचन पूर्वं विधवानियोगं प्रतिपादयितु-र्मनोर्भ्रांत्यापादकमिति प्रक्षिप्तमेवाभ्युपगन्तव्यं अन्यच्च स्वगो-त्रोत्पत्स्यमानवेनराज्यकालीन— ब्राह्मणकृतविधवानियोगगर्हणं कथंवा मनुना ज्ञातं अतोप्येतद्वचनं प्रक्षिप्तं अस्य मनुवचन-त्वेपि यथा विवाहमन्त्रेषु नोक्तोपि विधवाविवाहोंगीक्रियते तथा नियोगोप्यंगीकार्य इत्यर्थः अतोनोद्वाहिकेति वचनविरोध इतिचेन्न । मनुना विधवानियोगं अमुख्यकल्पतया प्रथमत उक्त्वा मुख्यकल्पतया तदुत्तरमेवानियोगपक्षस्योक्तत्वेन त्रिकाल ज्ञानिनः सर्वज्ञर्षीणां धर्मोपदेष्टुर्मनोर्भारतादिग्रन्थकर्तुरिवानाग-तज्ञानित्वस्य न्याय्यत्वेन नोद्वाहिकेष्विति वचनस्य प्रक्षिप्त-त्वोक्तेर्दुराग्रहमूलकत्वात । मनुवचनत्वमभ्युपगम्य भवदभिम-तार्थांतरकल्पनस्य अंगीक्रियते अङ्गीकार्य इति अश्रुतपद-द्वयकल्पनादिदोषग्रस्तत्वाच्च । यथोक्तं प्रथमवादिना । कन्या-

दानं सकृदेवकर्तव्यमिति साधारणो नियमः। अस्यतु अपवादः भर्तुर्नाशादिपञ्चापत्प्राप्तौ पुनर्विवाहः कार्यः अय- न्तूत्सर्गापवादभावस्सर्वयुगसाधारणः। तथाचोक्तं श्रीमन्वनेन कन्यायां दत्तशुल्कायां म्रियेत यदि शुल्कदः। देवराय प्रदा- तव्या यदि कन्याऽनुमन्यते इति मनुवचनव्याख्यायां मनु- मत्यभावे अन्यस्मै देया सकृत्कन्या प्रदीयत इत्यस्यायमपवाद इति अग्निपुराणे मृते तु देवरे देया तदभावे यथेच्छयेति। चतुर्विंशतिमतव्याख्याने भट्टोजिदीक्षितेनापि पुनरुद्वाहमकृत्वा ब्रह्मचर्यव्रतानुष्ठाने श्रेयोतिशयं दर्शयति। मृतइति। नच कलियुग- निषिद्धस्यापि युगान्तरीयधर्मस्यैव नष्टेमृतेइत्यादिपराशरवाक्यं प्रतिपादकमितिवाच्यं। कलावनुष्ठेयान्धर्मानेव वक्ष्यामिति प्रतिज्ञाय तद्ग्रन्थप्रणयनादिति। माधवाचार्येणापि परिवेदनपर्याधानयोरिव स्त्रीणां पुनरुद्वाहस्यापि प्रसङ्गात्कश्चिदभ्यनुज्ञान्दर्शयति नष्ट- इतीति। तन्न। तत्तद्ग्रन्थकारभावानवबोधनिबन्धनं। तथाहि पाणिग्रहणमन्त्राणां निष्ठास्यात्सप्तमे पदइत्याद्युदाहृतवचनैः अनुमंत्रिता गुरुं गोत्रेणाभिवादयत इति गोभिलकृतगृह्यसूत्रभा ष्ये—सप्तमे पदे गतायां वध्वां पाणिग्रहणमन्त्राणां निष्ठां स्मर तीतिच—पाणिग्रहणसंस्काराग्नियतं पतिलक्षणं। तेषां निष्ठातु विज्ञेया विद्वद्भिस्सप्तमे पदे। इति पराशरधर्मशास्त्रेण च स्वगोत्राद्भ्रश्यते नारी उद्वाहात्सप्तमे पद इति लिखितसंहिता वचनेन च स्वगोत्राद्भ्रश्यते नारीविवाहात्सप्तमेपद इति यमवचनेन च विवाहस्य सप्तपद्यन्तताया प्रत्रोदितत्त्वेन सप्तपद्या अर्वाक् प्राप्त पञ्चापत्कभर्तृकायाः कन्यायाः मनसावाचा अद्भिश्च दत्तायाः पुनर्दानं कथं कार्यं कियत्कालपर्यन्तञ्च कार्यं अग्निपुराणादौ सकृत्कन्याप्रदीयत इति सकृत्कन्यादानस्यैवोदितत्वादिति संशये सप्तपद्या अर्वागापत्प्राप्तौ पुनर्दाने न दोषः पुनर्दानमपि रजो-

दर्शनात् प्रागेव कर्त्तव्यमिति श्रीनन्दनादीनामभिप्रायः भट्टोजिदीक्षितेन एतादृशपुनर्दानमपि कलियुगे निषिद्धमित्याशङ्क्य अनिषिद्धमिति समाहितं । अतो भवदभिप्रेत उत्सर्गापवादभावोऽप्रामाणिकः । यात्तु नष्टेमृते इति वचनस्य प्रमाणत्वसमर्थनाय भट्टदेवधृतत्वोक्तिः तथा तात्पर्यनिर्णयव्याख्यातृचेट्टकोनेर्याचार्योदाहृतत्वोक्तिः प्रथमवादिनः सा निष्फलैव । नष्ट इति वचनस्य सत्तां प्रामाण्यञ्चाभ्युपगम्य वास्माभिस्तावकाशत्वकल्पनात् । एतेनैव विध्युक्तवैवाहिकशास्त्रजिज्ञासाग्रन्थांतिमपत्रे पुनर्विवाहसाधकत्वेनोदाहृतानि पराशरात्रिगौतमविश्वामित्रनारदच्यवन-वैशम्पायनकाश्यपजाबालअगस्त्यव्याघ्रपाद्वसिष्टबृहस्पतिमृकण्ड--याज्ञवल्क्यशौनकवचनानि च व्याख्यातानि । पतिनाशे यथा पुंसो भर्तृनाशे तथा स्त्रियाः । पुनर्विवाहः कर्तव्यः कलावपि युगे नघेत्यादिभवद्वचनानां दानानन्तर सप्तपद्या अर्वाङ्मृतभर्तृका-विवाहपरत्वेन भवदभिमतसप्तपद्युत्तरकालीनपुनर्विवाहा--साधकत्वात् । अन्यथा सप्तपदीविधे पूर्वं आद्यानां तिसृणां मनोदत्तानां वाचादत्तानां अग्निपरिगतानां सङ्कटे अन्येन विवाहो भवतीति-ब्राह्मादिष्वपि कन्यादानोत्तरमपिसप्तपदी-विधेः पूर्वं वरस्य षण्ढत्वादिज्ञाने वरमृतौवा कन्या अन्यस्मै देयेति धर्मसिंधुवचनस्य 'सप्तपद्युत्तर भर्ता म्रियेत यदि योषितः । विधवेत्युच्यते सैव न संस्कार्येति गौतम इति स्मृतिमुक्ताफलवचनस्य । अर्वाक् सप्तपद्यास्या भर्ता प्राप्नोति चापदः । पुनर्विवाह्या सैव स्यात् यावत्सा स्यादृजस्वलेति वृद्धात्रिवचनस्य । सप्तपद्युत्तर नैव विवाहः शास्त्र-चोदितः । योषितां सर्वकालेपि कन्यानामिति सन्मत । इति विभांडकवचनस्य । पूर्वं सप्तपदी विधेरधिगते दोषे वरे वा मृते देयाऽन्यस्येति मुहूर्तमार्तण्डवचनस्य क्रान्तसप्तपदीं

कन्यां नोद्वहेच्च कलौ द्विज इति वायवीय-संहितावचनस्य । दत्तायाश्चैव कन्यायाः पुनर्दानं परस्य चेति बृहन्नारदीयवचनस्य दत्ता कन्या न दीयते इति क्रतुवचनस्य दत्तायाः कन्यायाः पुनर्दानं परस्य चेति हेमाद्रिस्थदेवलवचनस्य पुनर्विवाहकरणं यत्रोक्तं राजसत्तम ! तत्र सप्तपदात्पूर्वं स्त्रीणामुक्तं महापदि । पूर्वभर्तुरजोदृष्टे पूर्वं ब्राह्मणयोषितां यस्त्वन्यथा प्रमाणार्थं वदते स ब्रह्महा मतः इतिबृहन्नारदपुराणीययुधिष्ठिरनारदसम्वादस्थवचनस्य च व्याकोपापातात् । ननु भवदुदाहृतवचनान्यप्रमाणानीति चेन्न । हेतूपन्यासं विना प्रतिज्ञयैवार्थासिद्धेः । एतेनैव क्षतयोनीनामपि मृतभर्तृकाणां विवाहं वदन्पुनर्विवाहजिज्ञासाग्रन्थकारोऽपि अस्माभिश्चालके आषाढमासीयमहावाते प्रवाति शुष्कोच्छिन्नपर्णवच्चां चाल्यमवाप । सप्तपद्युत्तरं विवाहकरणस्य निषिद्धत्वे प्रमाणानामनुदाहृतत्वात् । क्षतयोनिविधवाविवाहस्य भवद्गुरुकृष्णमतानुयायिनामसम्मतत्वाच्च । त्वयैव क्षतयोनिपुनर्भूजातस्य निन्द्यत्वोक्तेश्च । यथोक्तं सप्तपद्युत्तरं मृतभर्तृका पुनरुद्वाहाकामुकी साध्वी तस्याः ब्रह्मचर्येण श्रेयोऽतिशयः । अतएव न द्वितीयश्च साध्वीनां क्वचिद्भर्तोपदिश्यते इत्युक्तं या तु कामुकी अक्षतयोनिः पुनरुद्वहति सा तु न श्रेष्ठा । किन्तु तस्याः पुनर्भूरिति नाम । तत्र जातः पौनर्भवः सोऽपि न सत्कारायोग्यः । पौनर्भवस्याप्यौरसवत् बन्धुदायादतया परिगणितत्वात् । अज्ञानात्तु द्विजो यस्तु विधवामुद्वहेद्यदि । परित्यज्य विधिवच्चैनां प्रायश्चित्तं समाचरेत् । अब्दमेकं द्विधायादावकीर्णिव्रतं चरेत् । पुत्रश्चेज्जायते तस्यां स तु गोलक उच्यते इति । क्षेत्रजो गर्हितः सद्भिस्तथा पौनर्भवः सुत इत्याश्वलायनबृहस्पतिवचनादिपौनर्भवनिन्दावचनानाञ्च क्षतयो-

निपुनर्भूज्ञानपरत्वात् । अस्य निन्द्यत्वेपि भूतकाध्यापकादिव-च्छ्राद्धानर्हत्वसम्भवेन पाङ्क्तेयत्वानपायादिति । तदसत् । पूर्वोक्तरीत्या वाग्दानाद्यनन्तरं सप्तपद्या अर्वागपि भर्तुर्मरणे या भर्त्रन्तरं न परिगृह्णाति सा साध्वी । तस्याः श्रेयोतिशयश्च । यातु परिगृह्णाति सा तु न दुष्टा । तत्सन्ततिरपि श्राद्धानर्हत्वेपि न संस्कारायोग्येत्येव मन्वादिभिरुक्तत्वात् । नचात्र प्रमाणाभावः । सप्तपद्युत्तरपुनर्विवाहनिषेधकवचनानामुदाहृतत्वात् यदुक्तं स्त्रीपुनर्विवाहजिज्ञासाग्रन्थकारेण । अद्यप्रभृति मर्यादा मया लोकेप्रतिष्ठिता । एक एव पतिर्नार्याः यावज्जीवं परायण । मृते जीवति वा तस्मिन्नापरं प्राप्नुयान्नरं । अभिगम्य परं नारी पतिष्यति न संशयइतिमहाभारतादिपर्वस्थदीर्घतमोवचनं पुरुषान्तरेण व्यभिचरन्ती भार्यां दृष्ट्वा प्रवृत्तमिति व्यभिचारनिषेधकमेव न पुनरुद्वाहनिवारकमिति तत्पूर्ववाक्यार्थाज्ञानविजृंभितं । नियत क्षत्रियकुले धनाधश्च भविष्यतीत्यादिपूर्ववाक्ये पत्न्याः व्यभिचारस्यानुक्तत्वाच्च । भारव्याख्याकारैरेवमनुक्तत्वाच्च । अतो भारतवचनं पुनर्विवाहनिषेधकमेव । यत्तुलोकहितार्थं पुनर्विवाहाभ्यनुज्ञा देया प्राचीनानां सर्वेषामपि लोकहितार्थमेव प्रवृत्तत्वात् परोपकारः पुण्याय पापाय परपीडनमिति तत्र तत्रोक्तत्वाच्चेति प्रजल्पनं । तदप्यसङ्गतमेव । म्लेच्छहितार्थं गोवधाभ्यनुज्ञावत् सर्वदेशसर्वकालनिषिद्धपुनर्विवाहाभ्यनुज्ञाया अदेयत्वात् । पुनर्विवाहाभ्युपगमे लोकोपकाराभावस्य स्वनाशादिमहापकारप्राप्तेश्च सपरिकरं द्वितीयपरिच्छेदान्ते समर्थितत्वाच्च । यच्चोक्तं विध्युक्तवैवाहिकशास्त्रजिज्ञासाग्रन्थकारेण ऊढायाः पुनरुद्वाहं दत्ता कन्या न दीयते । न यज्ञे गोवधः कार्यः कलौ नच कमण्डलुः निधवायां प्रजोमासिर्देवरस्य नियो

जन । वालिकाक्षतयोन्याश्च वरेणान्येन संस्कृतिः । दत्तौरसेतरेषां च पुत्रत्वेन परिग्रहः । अस्थिसञ्चयनादूर्ध्वमङ्गस्पर्शनमेव च । शिष्यस्य गुरुदारेषु गुरुवद् वृत्तिरीरिता । सवर्णानां तथा शूद्रैः संसर्गः शोधितैरपि । बलात्कारादिदुष्टस्त्रीसंग्रहो विधिचोदितः । नवोदकं दशाहं च दक्षिणा गुरुचोदिता । एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः । निवर्तितानि सर्वाणि व्यवस्थापूर्वकं बुधैः । इति क्रतुवचनं ऊढाया इतिस्मृत्यर्थसारोदाहृतमादित्यपुराणवचनं देवराच्चेति क्रतुवचनं समुद्रयातुः स्वीकारः कमण्डलुविधारणं । दत्ताक्षतायाः कन्यायाः पुनर्दानं परस्य च । दीर्घकालं ब्रह्मचर्यं वर्जयीत कलौयुगे । एतान्यस्तु द्विजो धर्मान्स द्विजो दोषभाग्भवेत् । तस्यैव निष्कृतिर्नास्ति तप्तकृच्छ्रशतैरपीति हेमाद्र्युदाहृतदेवलवचनं चावलम्ब्य पुनर्विवाहनिराकरणमसङ्गतं । क्रतोरसामान्यपुरुषत्वात् । तेनोक्तस्य नवीनऋषिकर्तृकप्राचीनधर्मनिवर्तनस्य दुःश्रवत्वात् । पराशरशास्त्रस्य कलिकालीयशास्त्रत्वेन तदुक्तपुनर्विवाहस्य केनापि निवर्तयितुमशक्यत्वात् । पुराणपर्यालोचने कृते सर्वेषां पुराणोपपुराणानां कलावुद्भूतत्वनिश्चयसम्भवेन तथैव द्वादशभागवते उक्तत्वेन उपपुराणान्तर्गताग्निपुराणस्य च बौद्धावतारानन्तरमुद्भूतताया: वक्ष्ये बुद्धावतारं चेति तदीयवचनावगतत्वेन तादृशाग्निपुराणे च पराशरस्मृतिवत्पुनर्विवाहस्योक्तत्वेन तादृशपुनर्विवाहनिवर्तनस्य क्रतुवचनेनासम्भवात् । तथा क्रतुवचनोक्तस्य सप्तभागान्तर्विवाहवत्या ऊढायाः पुनरुद्वाहस्य सर्वदाप्यनङ्गीकृतत्वेन सर्वदा निषिद्धस्य तस्य सकृत् दत्तायाः पुनर्दानस्य गोवधस्य च सर्वकालेपि निषिद्धस्य कलावेव निषेधकरणस्यासङ्गतत्वेन कमण्डलुधारणस्य रामानुजश्रीमत्पूर्णबोधशिष्यैरिदानीमपि क्रियमा-

णत्वेन विधवाप्रजोत्पादनस्य सर्वकालेपि अनुष्ठीयमानस्य कलावेव निषेधकरणे प्रयोजनाभावेन सप्तपद्या अर्वाग्बालिका स्वृतयोरस्याः पुनर्विवाहस्येदानीमपि क्रियमाणत्वेन उडुपीसंन्यासिभिः कमण्डलुधारणदीर्घब्रह्मचर्ययोरिदानीमपि क्रियमाणत्वेन अस्थिसञ्चयनानन्तरमंगस्पर्शस्य मत्स्यपुराणाग्निपुराणविष्णुपुराणे विहितत्वेन क्रतुवचनस्याप्रमाणत्वात् । आदित्यपुराणस्य आदिपुराणं वा आदित्यपुराण वेति नाम्न्येव विप्रतिपन्नत्वेन अष्टादशपुराणोपपुराणानन्तर्गतत्वेन चाप्रमाणत्वात् । अग्निहोत्र गवालम्भ सन्यास पलपैतृक । अश्वालम्भ गवालम्भं सन्यासं पलपैतृकं । देवरेण सुतोत्पत्तिः कलौ पञ्चविवर्जयेदितिवचनस्य कलौ निषिद्धतयोक्तस्याश्वमेधस्य कलावेव श्रीकृष्णेन पाण्डवैः कारितत्वेन अग्निहोत्रस्याधुनिकैः क्रियमाणत्वेन संन्यासस्याप्यधुनातनैरनुष्ठीयमानत्वेनाप्रमाणत्वात । अतः पुनर्विवाहस्यानिषिद्धत्वमिति । तदुन्मत्तप्रलापनतुल्यमेव । तथाहि । एतद्वचनकर्ताक्रतुः कलौ जातः कश्चित्सामान्यपुरुष इति भवदीयकल्पने प्रमाणाभावात् । नवीनैर्ऋषिभि प्राचीनऋष्युक्ताः धर्मा निवर्तिता इत्येकेनाप्यनुक्ततया प्रत्युत तैरेव महात्मभिर्मन्वादिभिः 'अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरे परे । अन्ये कलियुगे नृणां युगह्रासानुरूपत इति स्वोक्तधर्माणां कालभेदेन व्यवस्थितत्वमुक्तमित्युक्तत्वेन दुःभवत्वदूषणानवकाशात् । नच नष्टे इति वचनस्य कलिकालीयशास्त्रत्वमस्मास्विरोधि । नष्टे मृते इति वचनस्य कलिकालीयशास्त्रत्व पराशरोक्तत्वेन परमप्रामाण्यं चाभ्युपगम्यैव सप्तपद्युत्तर पुनर्विवाहनिषेधकोदाहृतप्रबल बहुस्मृतिवचनानुरोधाय सप्तपद्या अर्वाक् पतिरन्यो विधीयत इति अर्थस्य वर्णितत्वेन भवदभिमत पुनर्विवाहासाधकत्वात् । ननु नष्टेमृते इति पराशरवचनस्य सप्तपद्या अर्वा-

गिति भवदीयमर्थवर्णनं अश्रुतपदाध्याहारादिदोषग्रस्तमिति चेन्न । यथाश्रुतार्थवर्णनदीचाक्षता भवतापि द्वादश (अष्ट)वर्षपर्यंतं अज्ञातवृत्तान्ते पत्यौ नष्टे प्रदृष्टे सतीति पत्यौ जन्मतः क्लीबे नपुंसके सतीति चाश्रुतपदाध्याहारं कृत्वैवार्थस्य वर्णनीयत्वात् अन्यथा पत्यौ राजस्थानादिक गते सत्यपि तस्य नष्टत्वेन तदापि पुनर्विवाह कर्त्तव्यतापातात् । एव देशकालविशेषेण स्वपतौ क्लीबे सत्यपि पुनर्विवाहकरणापातश्च । अतः प्रबलवचनानुरोधायाध्याहारकरणाभ्यावोपन्वाङ्गीकारे अस्मदीयाध्याहारस्याप्यदोषत्वात् । मास्तु वा समपद्या अर्वागित्यध्याहारः । तथापि न भवदिष्टसिद्धि. पतिरन्यो विधीयत इत्यत्र अविधीयत इत्यपि पदच्छेदसम्भवात् ननु अ मा नो नाःप्रतिषेध इति निषेधार्थकस्य पत्यव्ययस्य विद्यमानत्वेपि तस्य कुत्राप्यप्रयुक्तत्वेन नञश्च तिङन्तेनसमासासम्भवेन चैव पदविभागोऽयुक्त इतिचेन्न । नलोपो नञस्तिङि क्षेपे इति वार्तिकेन अ पचसि त्वं जाल्मेत्यत्रेव नञस्तिङन्तेन समासस्य नलोपस्य च सम्भवेन अकारप्रश्लेषेण पदच्छेदकरणे बाधकाभावात् । नन्वेवं सति कोऽर्थ इतिचेत् ब्रूमः । पञ्चस्वापत्स्वपि रागप्राप्तं भर्त्रन्तरकरणं कुत्सितमिति अतः पराशरवचनस्य कलिकालानुग्राहकत्वं नास्मद्विरोधि । द्वापरे समनुप्राप्ते इत्यारभ्य ऋग्यजुस्सामाथर्वाख्या वेदाश्चत्वार उद्धृताः । इतिहासपुराणं च पञ्चमो वेद उच्यते इत्यादिना द्वापरयुग एव व्यासकृतपुराणोपपुराणप्रणयनस्य भागवतोक्तत्वेन न पुराणानां कलावुद्भूतत्वं । नाप्यग्निपुराणस्य बुद्धावतारानन्तरोत्पन्नत्वं । वक्ष्येबुद्धावतारमिति भवदुदाहृतवचने बुद्धावतारानन्तरोत्पन्नत्वबोधकपदाभावात् । नच शुद्धोदनसुतोऽभवदिति बुद्धावतारस्य भूतकालीनत्वोक्तिस्तद्बोधिकेति वाच्यं । ब्राह्मणोस्य मुखमासीदिति ब्राह्मणोत्पत्तेर्भूतकालीनत्वप्रतिपा-

दकभुनेरपि तत्पूर्वकालीनत्वाभावापातात् । विवाहस्य सम्भोगान्ततायाः प्रागेव खण्डितत्वेन पुनरुद्वाहनिषेधस्य भवदनभिमतत्वात् । क्रतुवचने कलावेवेत्यवधारणाभावेन अश्रुतावधारणां कल्पयित्वा दूषणकथनस्य देवानांप्रियैककर्तव्यत्वात् । गोमेधादौ रन्तिदेवप्रभृतिभिर्युगान्तरेगोवधस्य कृतत्वाच्च । कमण्डलुधारणंसन्यासपदाभ्यां प्रामैकरात्रचरणरूपसप्तमभागवत-मोक्षधर्माद्युक्तसंन्यासस्य विवक्षितत्वेन तस्यैव निषिद्धत्वाच्च । मातृनियोगेन विधवायां प्रजोत्पादनस्य युगान्तरे व्यासादिभिः कृतत्वेन सप्तपद्युत्तर बालिकाऽक्षतयोन्याः विवाहस्याकृतत्वेन यावज्जीवं ब्रह्मचर्याश्रमस्वीकरणरूपदीर्घकालब्रह्मचर्यस्योकुर्वीसन्यासिभिरकृतत्वेन अस्थिसञ्चयनानन्तरमङ्गस्पर्शनस्य कलौविहितताया अनुक्तत्वेनच भवदीयदूषणानवकाशः क्रतुवचनस्य प्रमाणतमत्वात् । कलौ पञ्च विवर्जयेदिति वचनस्थकलिशब्दस्याभिवृद्धकलियुगपरत्वेन दुर्योधनोत्पत्तिमारभ्य कलेःप्रवृत्तत्वेपि नन्दाभिषेकमारभ्यैव कलेरभिवृद्धतायाः द्वादशभागवतोक्तत्वेन नन्दाभिषेकानन्तरकलावश्वमधादेर्निषिद्धत्वेन न तत्पूर्वभाविपाण्डवजनमेजयशतानीककृताश्वमेधयोर्विरोधः । संन्यासपदं प्रामैकरात्रचरणरूपसप्तमभागवतोक्तसंन्यासपरमितिप्रागेवोक्तं । अग्निहोत्रपदन्तु सर्वाधानाग्निहोत्रपरमिति निर्णयसिन्धावुक्तं । अतो न भवदीयदूषणावकाशः । अतः पुनर्विवाहनिषेधकशास्त्रस्य प्रमाणतमत्वेन तद्विरोधात्सप्तपद्युत्तरकालीनपुनर्विवाहः सर्वयुगेष्वपि पञ्चापत्सु न कार्य इतिसिद्धं ननु एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः । निवर्त्तितानि सर्वाणीति क्रतुनैवोक्तत्वेन पुनरुद्वाहः पूर्वमासीदिति ज्ञायते अतो न सर्वयुगेषु निषिद्ध इति चेन्न । युगान्तरीयजनानां निषिद्धकर्मकरणेपि प्रायश्चित्तानुष्ठानसमर्थत्वेनैतद्युगीयजनानां

तद्वत्प्रायश्चित्तानुष्ठानासामर्थ्येन निषिद्धं पुनरुद्वाहकर्म इदानीं विशेषतो न कार्यमिति महात्मभिः पृथङ्निषेधस्य कृतत्वेन पूर्वमासीदित्यनभिप्रेतत्वात् एव विप्रतिपन्ननामकत्वं नादित्य-पुराणस्याप्रामाण्यसाधकं । तथासत्याग्निपुराणस्यापि वह्निपु-राण वेत्यादिविप्रतिपन्ननामकत्वेनाप्रामाण्यापातात् । स्मृति-सङ्ग्रहाद्युदाहृतत्वेनादित्यपुराणवचनस्य प्रामाण्यनिश्चयाच्च । अतः । पुनर्विवाहनिषेधकानि वचनानि प्रमाणानीतिसिद्धं ॥ इतिचतुर्थप्रकरणखण्डन ॥ श्री ॥ यच्चोक्तं शास्त्रविरुद्धाचारो दुराचारत्वाद्गर्हणीयएवेतिप्रतिज्ञाय भृगुगौतम मनु–गौतमव्या-सगर्गभिक्षतद्भाष्यकार-वायुपुराण-भागवत-देवीभागवत संस्कार–-मञ्जरी गौतम लौगाक्षि सङ्ग्रह वैद्यनाथदीक्षित स्मृतिसार चतु-र्विंशतिमत भगवद्गीता तद्भाष्यकारत्रय आनन्दगिरि श्रीधर संस्कारकौस्तुभ विज्ञानेश्वर वैदिकसार्वभौम हेमाद्रि नन्दिपुराणवचनान्युदाहृत्य श्रुतिस्मृतीनां शास्त्रत्वं तद्विरोधे आचारस्य दुराचारत्व । तदसङ्गतं । सप्तपद्युत्तरं पुनर्विवाह निषेधकेन केनापि श्रुतिस्मृत्यप्रामाण्यस्य तद्विरुद्धाचारे सदाचार-त्वस्य वा ऽनुक्तत्वात् । तथावादिनं प्रति श्रुतिस्मृतितदनुसा-रिग्रन्थैरेव तत्प्रामाण्यसाधनस्यासङ्गतत्वाच्च । अतः प्रकृता-नुपयुक्तोदाहृतवचनोदाहरण तथा तेऽवदन्प्रथमाब्रह्मकिल्बिषे इत्यादि ऋङ्मन्त्रतद्भाष्योदाहरणञ्च प्रथमवादिनः स्वधनव्य योपार्जितमुद्रितपुस्तकसमृद्धिसूचनार्थमेवेतिसेत्स्यति । यच्चोक्तं उद्वा-हितापि या कन्या नचेत्सम्प्राप्तमैथुना । पुनस्संस्कारमर्हेत यथा कन्या तथैव सेति नारदवचनं पुनर्विवाहे प्रमाणमिति तदप्ययुक्तं उद्वाहितेत्यस्य विवाहारम्भवतीत्यर्थकत्वात् । नचात्र मानाभावः आदिकर्मणिक्तः कर्तरिचेति पाणिनीयसूत्रस्य चात्कर्म-णीति तद्व्याख्यानस्य विवाहारम्भार्थे कर्मणिक्तप्रत्ययविधाय-

कस्य विद्यमानत्वात् । सम्प्राप्तमैथुनानन्त्वेदित्यस्य सम्पूर्णसप्त-पद्यन्तविवाहवर्ता नचदित्यर्थकत्वात् । ननु व्यवायार्थकस्य मैथुनशब्दस्य कथं विवाहार्थकत्वं प्रमाणाभावादितिचेन्न । द्वन्द्वाद्वुन्वैरमैथुनिकयोरिति सूत्रव्याख्याने कुत्सकुशिकिका अत्रि-भरद्वाजिका अत्रिभरद्वाजानां विवाह इत्यर्थः मैथुनं विवाह इति भट्टोजिदीक्षितेन तत्त्वबोधनीकारेण तत्त्वृन्दैयोनिकस्यत्रावैर-मैथुनिकादिवुञ् इत्यमरव्याख्यारेण चोतकत्वात् अन्यथा सम्प्राप्तमैथुनेत्यत्र समित्युपसर्गस्य वैयर्थ्यापातात् । अतो न नारदवचनमपि भवदभिमतपुनर्विवाहसाधकमितिसिद्धं । यच्च पुनर्विवाहस्य कर्तव्यत्वसमर्थनाय एकचत्वारिंशपत्रशेषे प्रथम-वादिना लिखितं परशुरामपन्तभाउनामा एको गृहस्थः पुण्य-पत्तने ऽभूत् ॥ तस्य कन्या वयाबायी नाम्नी बभूव तस्या अष्टमे वर्षे सा पाणिगृहीती अभूत् पाणिग्रहणात्पञ्चदशदि-नात्पूर्वं पाणिग्रहो ममार तदा सा पुनर्भवितुं योग्या वा न वेति महती जिज्ञासा ऽजनि पुण्यपत्तनवासिनः प्रसिद्धराम-शास्त्रिणः तस्याः पुनर्विवाहे प्रत्यवायो नास्तीत्यनिर्णयन् ॥ तथापि तस्याः पिता काशीवासिनां पण्डितानामस्मि न्विषये किं शास्त्रमित्यपृच्छत् । तेऽपि तस्याः पुनर्विवाह शास्त्रीयमित्यवदन् । वर्षशतात्पूर्वमेतदभूदिति । तत्तु अत्यन्ता-सङ्गतं । पाणिग्रहणात्पूर्वं पाणिग्रहो ममारेत्यस्य निर्नेन्हिर्वन्हि-मानिति वदूव्याहतत्वात् । नचैतद्वाक्यमशोधितमेव अन्यदेव-वाक्यं मदुक्तमिति वाच्यं । अस्य वाक्यस्य शोधपत्रिकाया-मशोधितत्वात् । भवदभिमतवाक्यस्य तत्रानुक्तत्वेनास्माभि र्ज्ञातुमशक्यत्वाच्च । किञ्चैतस्मिन्भवद्वाक्ये अनिर्णयन् पण्डिता नामपृच्छदित्यादिकं वर्तते । एवं भवदीयतात्पर्यसंग्राहकेण त्वर

[illegible] २६ पत्रे नहि विवाहमन्त्रेषु

नियोगो न कीर्त्यते इतिचेद्विधवाविवाहोपि मन्त्रेषु नोक्तोपि माचरित्यादिपूर्वोक्तमनुवचनेन यथापुनर्विवाहः अङ्गीक्रियते तथा नियोगोप्यंगीकार्य इति अमुमर्थं मनसि निधाय मनुरवददि- तियोजनं न सङ्गतामितिवदाम इति कामुकी अन्यमुद्वहेदि- त्यर्थं कामुकीअन्य परिणयादिति प्रमाणयुक्तिभ्यां विरहादिति दोषलेशमपि नोक्तमित्यादिकं च प्रयुक्तं वर्तते । एतत्सर्वं साधु ना नवेति त्वदन्तेवासिनमेव वैंकटेशाचार्यादिपण्डितजनं पृच्छ किञ्च भवदीयग्रन्थे त्वत्तात्पर्यसंग्राहकरचितग्रन्थेचस्थितान्य- सगतान्यनन्वितानि विपरीतार्थकानि विरुद्धलिङ्गवचनविभक्त्या दिकानि पदानि सहस्रमुखेन शेषेणाप्यसंख्येयानीति ग्रन्थ- विस्तरभीतैरस्माभिर्न तान्युदाहृतानि । किञ्च मृतभर्तृकाया विवाहकरणस्य शास्त्रीयत्वाभ्युपगमे बालवैधव्यादीनां तत्रतत्रो- च्यमानं तु गर्हनुत्वरूपं पापफलत्वमेव भज्येत । भर्त्रन्तरपरि ग्रहेण धर्म्यप्रजावृद्धिद्वारा सुखातिशयस्यैव सम्भवात् । नच बालवैधव्यादेः पापफलत्वमसिद्धमितिवाच्यं । ऋतुस्नाता तु या नारी भर्तारं नोपसर्पति । सामृता नरकं याति वैधव्यं च पुनः पुनरिति पराशरवचनस्य 'सामर्थ्ये सति या नारी पितृश्राद्धेषु पक्षिते । पाकक्रियां न कुरुते जामितां मोह- माश्रिता । सा जन्मजन्मनिनरां दुर्भगा पितृघातिनी । वन्ध्या दरिद्रा विधवा भवेदेव न संशयः । इति कपिलवचनस्य 'अदुष्टां विनतां भार्यां यौवने यः परित्यजेत् । सप्तजन्म भवेत्स्त्रीत्वं वैधव्यं च पुनः पुनरिति दक्षवचनस्य 'या भर्तारं न जानाति सा ऽज्ञाना कथ्यते बुधैः । अत्यन्तबाल्यसम्प्राप्त- वैधव्या ऽत्यन्तपापभूरिति कपिलवचनस्य । 'अष्टवर्षा तु विधवा विवाहात्परतो यदि । चित्यग्निसदृशी प्रोक्ता प्रथमेयं स्मृता किल । रोहिणी विधवा चेत्तु चितिधूमसमा ऽमिता ।

अवीरे त्युच्यते नाम्ना महापापैकसम्भवा । गौरी दशायां वैधव्यमापन्ना तापिता स्मृता । चित्यल्मुकेव सा ज्ञेया रज सोऽवीगितीवच । पुरोदिताभी रण्डाभिस्साकं भूयः परा· हताः । सन्तिनाश्च प्रवक्ष्यामि स्पष्टार्थं वै प्रसङ्गतः । दुर्भगा कुटिला काष्टा चरमा चटुला ऽवशा । वीररण्डा कुण्ठरण्डा बाधारण्डा तथा परा । दशानामपि चैतासां दशमाब्दात्परं तथा । एकादशाद्वप्रभृति वैधव्यं क्रमतो यदि । रजसः परतो भूयो भवेयुस्तानि शून्यतः । नामान्येतानि तुच्छानि चैतासां कर्ममात्रञ्च इति लोहितवचनस्य रण्डापञ्चविधं ज्ञात्वा प्रयत्नेन परित्यजेत् । श्मशाने चितिसंयुक्ते प्रज्वाल्योद्दीप्त काष्ठवत् । कन्या वैधव्यमापन्ना ऽवीरेत्याचक्ष्यते बुधैः । रोहिणी विधवा चेत्तु सारण्डेत्यभिधीयते । दुर्भगा दशवर्षा या साऽकन्या समुदीरिता । रजसः परतस्सा तु यातुकी विधवाभवेत् । असन्ततिश्च या नारी सारण्डेत्यभिधीयते । नानाभावैः प्रयत्नेन रण्डापाकं परित्यजेत् । वीरण्डा कुण्डरण्डा बालपुत्रा ह्यपुत्रिणी । तासां पाकां नभोक्तव्यो भुक्त्वा चान्द्रा· यणं चरेदिति विश्वामित्रवचनस्य च बालवैधव्यादेः पापफल· त्वे प्रमाणत्वात् । किञ्च वैधव्यस्य दुःखहेतुत्वानङ्गीकारे आरण्यपर्वभारतोक्तस्य 'एहि सावित्रि गच्छस्व अन्यंवरय शोभने सवत्सरेण सोल्पायुर्देहन्यासं करिष्यतीत्यश्वपतिराजवचनस्य अवैधव्याशिषस्ते तु सावित्र्यर्थं हिताः शुभा इति अवैधव्या· शीर्हिततावचनस्य ' तं दृष्ट्वासहसोत्थाय भर्तुर्न्यस्य शनैः शिरः । कृताञ्जलिरुवाचार्ता हृदयेन प्रवेपतीति वैधव्यप्रा· प्त्युत्तरक्षण एव सावित्र्याः महादुःखमभूदिति वचनस्य एव· मुद्योगपर्वोक्तस्य' सुपर्णस्य विघाते च प्रयतिष्यामि सत्तमेत्यादिकस्य गुणकेशीवैधव्यपरिहारकमातलिवचनस्य भविष्योत्तर पुराणान्त·

गेनसोमामावतोपाख्यानोक्तस्य विप्रकन्या कृतवैधव्यपरिहारो-द्देश्यकसोमाख्यरजकीगृहांगणसम्मार्जनादिसेवनस्य सोमादत्तपुण्यप्रभावेन मृतभर्तृरुज्जीवने कन्यातद्बन्धूनां च सन्तोषोऽभूदित्यादिवचनानां चासांगत्यापातात् । अतो वैधव्यस्य पापफलत्वेन प्रमितत्वात्तदुपपत्तये न विधवानां सतपद्युत्तरं विवाहस्सर्वयुगेष्वपि कार्य इतिसिद्धम् । किञ्च न स्त्रीपुनर्विवाहजिज्ञासया प्रयोजनमस्ति । विधिविहित प्रथम विवाह जिज्ञासेयत्र निषिद्ध पुनर्विवाह जिज्ञासया प्रयोजनासम्भवात् । ननुप्रथमविवाह जिज्ञासाप्यनुपपन्ना । विहितत्व ज्ञानेसति प्रथम विवाह जिज्ञासायां प्रवृत्तिः । प्रवृत्तौसत्यां विहितत्वज्ञानमित्यन्योन्याश्रयादितिचेन्न । पित्राद्याप्तवचनेनैव प्राथमिकविवाह-जिज्ञासायां प्रवृत्तिसम्भवेनान्योन्याश्रयानवकाशात् । किञ्च भवंदीयग्रन्थस्य विध्युक्तवैवाहिकशास्त्रजिज्ञासाग्रन्थ इति नाम यद्भवताऽस्थापितंत दपि दुष्टमेव । तथाहि । विधिवाक्योक्तविवाहप्रतिपादकशास्त्रविचारइत्यर्थः किलभवतोऽभिप्रेतः । तमर्थंत्विदं पदं बोधयितुं न शक्नोति । विध्युक्तविवाहपदात् ठक्प्रत्यये विधिपद पन्नादिवृद्धेर्न्याय्यत्वात् केवलविवाहपदात् ठक्प्रत्यये सविशेषणानां वृत्तिर्न वृत्तस्य विशेषणयोगोनास्तीति न्यायेन विध्युक्तपदार्थस्य विवाहपदार्थेऽन्वयासम्भवात् । अतोभवदीयग्रन्थनामापि दुष्टमेव । श्रीमत्कृष्णमतानुयायीरघुनाथगयइत्यत्र श्रीमत्कृष्णमत-शब्दस्य श्रीमत्विषयुक्त कृष्णमतं तमस्समतमितिअतिताम-समनपरत्वं अस्मत्कृते भवदीयकृष्णमतखंडनाख्ये सोपपत्तिकं उपपादितं तत्रैव द्रष्टव्यं । किञ्च 'उभावप्यश्रुतग्रन्थौ उभावपि जडात्मकौ । अहो मोहस्य माहात्म्यं तत्रैकः शिष्यतां गतइत्युक्तरीत्या 'अप्रमाणं वदिष्यन्ति नीतिं पण्डितमानिनः । शास्त्रोक्तस्याप्रवक्तारो भविष्यन्ति युगक्षये । सर्वे सर्वंहि

जानन्ति वृद्धाननुपसेव्य तु । इति हरिवंशोक्तरीत्या च अनाघ्रातकाव्यशास्त्रगन्धयोरनुपसेवितगुरुचरणयोरदृष्टविद्वन्मुखयोश्च भवतोरपूर्वप्रमेयव्यवस्थापनाय यद्ग्रन्थकरणं तद्बालैरपि हाहाक्रियमाणमेवेत्यलमतिविस्तरेण ॥ श्रीसत्यवीरश्रीपादवागग्न्यालहरीकणान् । संगृह्याकरवं ग्रन्थं तत्तुन्तव्यममत्सरैः । पुनर्विवाहदुर्वादखण्डनेन जगद्गुरुः । सत्यवीरगुरूपास्यः प्रीयतां बादरायणः ॥ २ ॥ कावेरीतटसम्प्रकाशितपुरी या कुम्भघोणाभिधा श्रीशार्ङ्ग्याद्यमरक्षमासुरयुता भूषायिता भूतले ॥ श्यामाख्येन बुधेन तत्र वसता श्रीजामदग्न्यान्वयप्रादुर्भूतेन कृतश्चिरं विलसतात् ग्रन्थः सुशब्दात्मकः ॥ ३ ॥ इति पञ्चमप्रकरणखण्डनं सम्पूर्णं ॥ इतिश्रीमद्भागवताचार्य—श्रीमदाद्यभागवतश्यामाचार्यविरचिते पुनर्विवाह खण्डने आधुनिकग्रन्थद्वयाग्राह्यत्वनिरूपण नाम तृतीयः परिच्छेदः सम्पूर्णः ॥



உ

ஶ்ரீவாஸுதேவ நம: ।

...ஷாஸணாவுடு: ...யம் ...யூ: ।

...ஷிகோணூரு

...மேடுஸாமேபெடு: விருவி... ।

...ந... கநஜநஜெந

...வைதிமணேஜாக நாட

உ... வேங்க... ஶ்ருதிஷ்:

...வெண ரு ஶ்ரீவித்யா... ஶ்ரூ...கஸூரஸாமாயாம்

உ...ஷிக: ஸந்து

விஜயதே

இதன் விலை அணா 6.

[illegible] ஸ்ரீராமஸாஹாயாமாவிவி [illegible]

[illegible] ஸெளமெகெள ।

[illegible]

[illegible] । [illegible] ॥

[illegible]

[illegible] ॥

[illegible] ॥ } [illegible]

[illegible]

ஸ்ரீ [illegible]

[illegible]

[illegible] ॥

[illegible] ॥

[illegible]

श्रीरस्तु ।

[illegible]

[illegible]

—— :(०) ——

[illegible]

நவயமவயயி ஶ்ருதி ॥ அலங்காரம் நாதிதிகவித்ரம் கந்யாவயா வரா । ஶாத்ரகம் ஹாத்ரநிதம்வாவேதநாதிதிதம் ஹரேஷு ॥ வி தேந தத்யாபாலதை கந்யாஶாதாமீம் ஹரது । வஹவிஶா ஶாதிதாவ்ஶ் தாதநிநம் வதிரோயராஜ ॥ இதி ஶாநவவ வேதஃ ஸ்ஶாஃ வரம் வஷ்ட்டதயவயத்தை ஸ்காஶித்யாஃ வ த்யாஃஷ்லாதிகம் விதாநா நிவதுதே । தஷாவஷ்டதயாத வதாக யமேஸகவேஸவிவராய வாதீம் விசாதாநம் வ ஸவதேவ யதி தவஷ்டதயஶவி விதேசாவேகூதே ததஃ வா தீவயவேவ ஸதாரஶாவ பேஷ் । நவ வஷ்டதயாநரம் வ யவேவ ஸதயிபேஃ விதாவைந ரபுவேஷாஃ வா த்யா ஹவதி । வேநவசாம் வாநாவசா வரவ்யாவி கஹி வஷாஃ கஸ்யம் விலஷாஃ ஸ்வமேவ ஸதாரம் ஶுத்த்யா வேததகாதிக ஶாஸாரணாதிகம் நீதிகவ்ய ஶாம் வாவ வகாவி வரேண சதீதே ஸாதா நயாதவ்யிதிதாதிக ஶாவ்ய தே । அதஃ ஸ்வேசாஃ வாஶவி வஷ்டதயாதவாகந்யா வதாநம் ஸாவஸ்யவேவ । அதஃ வேதாஷாவிவாஹோ யஶேப்யவேதி வே ஜ । வதாநம் வாஶாதவராவயது வேரவீதி ஸ்ரதவேந । அவயஸது வலீதேதி வேணதஸ்யாதீதசாவ தஶ இதி யா ஜ்ஞவல்க்ய ॥

வாவேத தா உரவேஸவவேடயஃ கந்யாம் நவயதி ।
ஶாவிஶாவி ரஜஸ்வஸ்யாஃ விவஷதி விசரஸ்யம் ॥
ஶாதாவேவ விசாவேவ ஜ்யேஷ்டாநாதா தவேயவ ।
த்யவேஸ்ய நரகம் யாதி த்ருஷ்டா கந்யாம் ரஜஸ்வலாம் ॥
இதி வராஹவேண ॥

ஶாதாவேவ விதாவேவ ஜ்யேஷ்டாநாதா தவேயவ ।
த்யவேஸ்ய நரகம் யாதி த்ருஷ்டா கந்யாம் ரஜஸ்வலாம் ॥
தஸ்மாத் விவாஹயேத்கந்யாம் யாவந்நர்துமதீ ஸ்வேத் ।
இதி ஸம்வர்த்தேந ॥

[illegible] ।
[illegible] ॥
[illegible] ।

[illegible]
[illegible]
[illegible] ॥

[illegible]
[illegible]
[illegible]
[illegible] ।
[illegible] ।
[illegible]
[illegible]
[illegible] ।
[illegible] ।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ।
[illegible]
[illegible]

[illegible]

[illegible]

க்ருஶாயீந ஸ்த்ரீணஹ க்ருஷிகர்மெளஷா வாஸ்யஜக்ருதெநாநா
வாநு ஃநாரவி வெ்ரஷாவிவாஹா வ்ருத்திஷெயதெவ்ய நவா
ருகாவஜ ஸ்யஸ்ய ட ௪ வ்ருக்ஷவஸ்ய கீர்த்திகாவெந்ரா வக்ஷ்யஃ।
சந்த்ரவெர்ய காவ்வாஸ்ய க ரு ரகாவ யபா கெநாவீ ஸாவெஸ்ணாந
வஸ்வெஃ। ரவசாமு ம ஸ்ய ஷாஙெபாவெந்ராஹவெ।
ஸ்த்ரீணஹஸ்த்ரா ர ெ ரதிதிண ஷவ ச்ரா நகாவா
திக்ருவெஷ ங்கவ்யஸாணா। வா க்ராஸாராதிஃ
வெ்ரஷ விட ஸ ஸாபா வெஷ்ஷுட தீபந்ஷ ஸவணவ ஹஃவ
காஸவஸ தீபக வெ்பாஹிஸாஷஃ। வாராஸாரா
திஃ ச்ராஷ ஸ வ க்ஷ்ரு வெஸ்ஷெரு விஸ்ஹஷாஸ்ரீணவெ
ண விஷெ ஸ்ர ரா க்ஷ ஸ்ர நுஷிஸ கந பஷநு। கஷ்ஷிரு
க வ ஸ் க ஃவீ வ ந்ஷஷ்ர வாஃரந்த்ரஸ்ரீணவெண।
ஸ வெஸுஃ க்ர ஸா ஹஜித் ஃநவாக்ர வ
ராஸாரஃவ க ரதி ப வராஸாராதிவஃவெநவவெஹகவா
க ஃாவரெம க வாரு ஷா வீசாவாஸ்ய ஜதி ஃாநவவவெ
நாவீ ஜஃ கஃ ரு கா ாகாண வீகவெந்ராஷவ
ஷாநுஃ ந வீ ஜ க மா நவீசா ஸாதிகா க்ருந்த்ராய
ட வீக திர வீ வ கா திய ந ஜ க்ருக்ஷா। கஃக
ர வீ ர வஹிஸ ஸ்த்ரீணஃநவதிந்ஷ்ஹ்ர கணவெதி
பதி வீ ர வ த்ரு க வெவீ விவாரய ஷாக வெஶஸஸ க
வ ருரா கரணவெ்ராக ஹக்ரு கயா ஸ்ராக ஹஹ்யா
வியவபவ ஹவீ கவ கி ஷிஷ்யாந வெந்ராவெஸ ஹஸ்நாது வ்ரா
ஷஹநஃ। தீர்ணவஷ்ராணீ க்ராதி சஸ்யவாயவஷ்ஃ ஷெத்ரூ
ப்ராஹ்ந்ரா। ராகாரணந ஸ்த்ரீணஹக்ரா ரஃவாநாதிவெக்ஷ
ஷவவெசாவீ வீகஃ க்ராவாஹிகா வாரா ந வ்ருஷவெஷெ
ஸ்ருநவஸ்யவாவ நிவக்ருதெ கிஷ ரவிஜாஷஸ்ருநஸார்யாஜ
க்ருயவயத்ஷஸ்வெஷ்யவ விகஃ க்ந்த்ராவாஹிகா ரவிஜாஷஸ்ரு
க்ரஸவக்ருவெவ்யதீவெக உஹிஷ்யெக விகஃ கந்த்ர ஷாஹிக
வீக்ருவஷகவஙு க்ந்த்ராயாஃ கந்ரவிஜாஷஸ்ருநஸார்யாஜவக்ருய

[illegible]

സാശേഷഷണ്ണവതി ദൈവജ്ഞഃ ശാസ്ത്രഗതോ നക്ഷത്രേ തഥാ ശാസ്ത്രഗതാദ്ധ്യായേ ഷഷ്ഠേ യദുക്തം ശാസ്ത്രഗതാശേഷേണ ദൈവജ്ഞായതേ ശാസ്ത്രം ചതുഷ്കൃത്വാപവാദ്യാഃ ഗതേ നക്ഷത്രേ ഷഷ്ഠാംശകാദിശ്രാവേണ ഏതാഃ പാപാഃ ഷഷ്ഠത്രയാണാം വിദ്യാഃ കന്യാ സ്വാമിസംജ്ഞയേന ഏതാഃ പാപാഃ വിജ്ഞാ കന്യാദാനദോഷേ ദത്താ പാപാ ന ച ഏതാഃ പാപാഃ സ്വീണാം സ്വയംവരദോഷേ ശാസ്ത്രദോഷേന താസാം ഏതാഃ പാപാഃ ദത്താ വൃഷലീത്വം ച പൂർണ്ണാ വൃഷലീ ഭവതി സംശയാഭാവാത് ഇതി വാക്യം । ശാസ്ത്രദോഷേ ന ഭാഗ്യപൂർണ്ണാദിശാസ്ത്രീയ സ്വയംവരതീനാം ദത്താ പൂർണ്ണാ വിവാഹ സംബന്ധ്യാ വിവാഹാഃ । ഏതേ ദോഷാഃ കന്യാദാനനിമിത്തകസ്യ വൃഷലീത്വസ്യ ശാസ്ത്ര സ്വീകാരനിമിത്തകസ്യാശംസാഷ്ട്യകാദേശ്ച സ്വയംവരസ്ത്രീ ശാസ്ത്രേണ നിവൃത്തിർന്ദ്ദേശഃ । ഏതദ്വിശേഷായാം വിവാഹേ ദോഷാ നിരവധിഃ സാവിത്രി കന്യാ ഏതദ്വിവാഹാദ്ധ്യ ഹത്സ്ഥ ദോഷാ നിരവധ്യേ വിവാഹേ ഭൂമേ തയാ കന്യാ രജസ്വലാ ദത്താ വിശ്വാസ്യതേ । ശ്രാദ്ധമന്ത്രാ വിവാഹസംസ്കാരാ കന്യാ വൃഷലീ സ്മൃതാ ॥ യസ്യാം സൗമ്യഗേഹ കന്യാം ബ്രാഹ്മണോ ദേവലോകിതഃ । സൗഭാഗ്യാഢ്യാ ഭവേദ്യ സുഭിക്ഷാ വൃഷലീ ഭവേത് ॥ ഇതി ബൃഹസ്പതിന ।

യസ്യാം സൗമ്യഗേഹ കന്യാം ബ്രാഹ്മണോ ദേവലോകിതഃ ।
സൗഭാഗ്യാഢ്യാ ഭവേദ്യ സുഭിക്ഷാ വൃഷലീ ഭവേത് ॥
ഇതി വരാഹവചനം ॥

ഉദ്വാഹേ യസ്യ താം കന്യാം ബ്രാഹ്മണോ ദേവലോകിതഃ ।
സൗഭാഗ്യാഢ്യാ ഭവേദ്യ സുഭിക്ഷാ വൃഷലീ ഭവേത് ॥
ഇത്യംഗിരസാ ച ।

ഏതൈഃ ബ്രാഹ്മണോഢായാഃ കന്യായാഃ വൃഷലീത്വഃ കഥ്യതേ വൃഷലീപതിത്വം പതിര്യസ്യ ദിശതി സംസ്കാരദോഷ്യാദ്യ വാക്യേഷു വിധീയതേ ॥

പിതൃവേശ്മനി യാ കന്യാ രജഃ പശ്യത്യസംസ്കൃതാ ।
സാ കന്യാ വൃഷലീ ജ്ഞേയാ ഹരംസ്താം ന വിദുഷ്യതി ॥

ഇതി വിഷ്ണുഃ ॥

പ്രയച്ഛേന്നഗ്നികാം കന്യാം ഋതുകാലഭയാത് പിതാ ।
ഋതുമത്യാം ഹി തിഷ്ഠന്ത്യാം ദോഷഃ പിതരമൃച്ഛതി ॥

ഇതി വസിഷ്ഠഃ ॥

പ്രദാനം പ്രാഗൃതോരപ്രയച്ഛന്ദോഷീതി ഗൗതമശ്ച । ഋതോഃ പ്രാക്പൂർവം കന്യാപ്രദാനസ്യ പ്രതിഷിദ്ധതയാ [illegible] നൈകവാക്യവിരോധേന [illegible] । [illegible] പ്രയച്ഛേത് [illegible] ॥ ഇതി [illegible] । [illegible] ഇതി । [illegible] । വിവാഹ [illegible] നൈകവാക്യത്വേ വാക്യ [illegible] രണവിരോധാഭാവാത് । വിവാഹദർപ്പണകാരൈസ്തു [illegible] । [illegible] ഇതി । [illegible] വിവാഹദർപ്പണകാരസ്യ [illegible]

ஸ்ய விவாஹப்ரகரணகாலேஷ்வபி ஜாதகர்மப்ரயுக்தாநாமாதிநிமித்த கஸ்ய ஜாதகர்மஸம்ஸ்காரகஸ்ய ப்ரணவஸ்யாஜாதாதிகஸ்ய கஸ்ய பஞ்சந்யஸாநேஷ்டிஸ் ப்ரணவஸ்யாதிகாலஸ்ய களா । வ்யாவேதகர்ம ஊர்த்வேஷ்வபி யதாகரணம் நப்ரயுஜ்யதே । ஶாஸ்த்ரேஷு ரஜஸ்வ ஸ்யாத் வ்யவஸ்திதி விசாரஸ்ய ॥ யஸ்ஸ்ய ஸகர்மணோ கர்தவ்யம் வ்யாஹாரிணா உதிதோஹிதி: । அஸம்ஸ்காரேஷ்வாஸ்ய வாஜேயஸ்ஸ வேத்ரஸ்ய வஷிஷ்டி: ॥ இதி யாஜ்ஞவல்க்ய வராஹராதிமிஶ்ரஸ் கஸ்ய தாத்பர்ய கத்யா விசாரிதேஷு தாத்பர்ய கத்யா ஸ ஷஷ்டேஷு தாவத் கீர்த்யயுக்தம் । ஸ்வகேந தீர்த்ய காலே யதா தந்நித்யம் பரிஜ்ஞாதா நித்யநேஷ்டஜ்ய வி த்யா நவரகாரிதி ஸர்வஸ்வ காலாயுக்த தர்மதீ தீர்த்தி வஷ்டிரண்ய வராஸ்திவாயுக்தி தீர்த்யாவஷ்டிமஸ்ய: வக்ஷ்ம வி ஜேஷ்டிமஸ்ய விஶிஷ்ட । தீர்த்திவஷ்டிரண்ய தர்மதீத்யாதி நா வ்யவஸ்தாவேஶ । ஏவம் வராவஸ்யா விவாஹகாலோ விஷ யக ஜத்ய வராவஸ்ய । ஶேஷம் தீர்த்திவஷ்டாணீத்யாதி ஸாந வஸ்த்ரதிவஸா நாயுக்வாஸ । அத ஸ்வவேதம் வஸிஷ்டேந வி தத: வாஸாஹாஸ்ய புஷ்ய கரணவய: வ்யஸாணம் ஸமிதீத்யேத ஸமாஹேதி ஸமாஸாதிரேகாதஶீ காலோ திதிகா ஶர்மாஷ்டி கஷ்ணே வ ஜதி க்ருஷ்ணபக்ஷே வியதி தீத்யாதி வ்யதிமிமித ஶர்மாஷ்டி கஷ்ணே வ்யவஸ்திதி காலாஸ்ஸத்யவ்யஷ தாஸ் தக்ஷிணாகாலாதி கஷ்டோ விஷ்ணோ வ்யாஸம் ஸமஸ்தி ஸமவஸ்தாந ஸவதி வ்யத்யக வ்யத்யாயகாரீஶ ஸ்வதி । ஏவம் ஜாதகாலாதிகஸ்ய வேணு தத்த வி கஸ்ய விசாரம் ஸமேத்ய । ராஜவதே ரஜஸ்வாதிதிநீத்யா நாக தஷ்டாவேத்யேதத்யயுக்த: ॥

யஷ்டவி உபாயநேஷ்டதகாலே ஸ்யோ வீணா ஶ்ரவணாய கரணீ ।
வீணா ஶ்ரவணபஞ்சாநே விவாஹம் ஶுத்தவ்யவஸ்திதி: ॥
விவாஹநேஷ்டபயநம் ஷீணஶோஹ விதாவேது: ।
தவாஸ ஶ்ரேஷ்ட ஶ்ரேஷ்டா ஜத்தாவாஷ்டவஷ்ட: ॥
இதி வ்யாஸ: ।

𑌸𑍍𑌤𑍍𑌰𑍀𑌣𑌾𑌂 𑌵𑌿𑌵𑌾𑌹𑌸𑍍𑌯𑍋𑌪𑌨𑌯𑌨𑌸𑍍𑌥𑌾𑌨𑌾𑌪𑌨𑍍𑌨𑌤𑍍𑌵𑌾𑌤𑍍 [illegible] 𑌉𑌪𑌨𑌯𑌸𑍍𑌯𑍇𑌵 𑌦𑍋𑌷𑌾𑌭𑌾𑌵𑌾𑌤𑍍 𑌬𑍍𑌰𑌾𑌹𑌮𑌣𑌾𑌦𑌿 [illegible] 𑌆𑌶𑍌𑌚𑌾𑌭𑌾𑌵 [illegible] । 𑌅𑌤𑌃 𑌸𑍍𑌤𑍍𑌰𑍀𑌣𑌾𑌂 𑌵𑌿𑌵𑌾𑌹𑌸𑍍𑌯𑌾𑌪𑌿 [illegible] 𑌆𑌶𑍌𑌚𑌾𑌭𑌾𑌵 [illegible] 𑌇𑌤𑌿 𑌨𑌿𑌶𑍍𑌚𑌿𑌤𑌮𑌿𑌤𑌿 [illegible] 𑌵𑌿𑌵𑌾𑌹𑌃 𑌉𑌪𑌨𑌯𑌨 [illegible] 𑌉𑌪𑌨𑌯𑌨𑌸𑍍𑌥𑌾𑌨𑌾𑌪𑌨𑍍𑌨𑌤𑍍𑌵𑌾𑌤𑍍 [illegible] । 𑌯𑌥𑌾 [illegible] 𑌇𑌤𑌿 [illegible]

𑌨𑍍𑌯𑍋𑌨𑌾𑌨𑌾𑌂 𑌤𑍍𑌰𑍀𑌣𑌿𑌵𑌰𑍍𑌷𑌾𑌣𑍀𑌤𑍍𑌯𑌾𑌦𑌿 𑌸𑍍𑌮𑍃𑌤𑍀𑌨𑌾𑌂 𑌵𑍃𑌷𑌲𑍀𑌤𑍍𑌵
𑌵𑍃𑌷𑌲𑍀𑌪𑌤𑌿𑌤𑍍𑌵𑌾 [illegible] 𑌪𑌙𑍍𑌕𑍍𑌤𑌿𑌵𑌿𑌷𑌯𑍇 𑌶𑌕𑍍𑌤𑌿𑌰𑍍
𑌉𑌕𑍍𑌤𑌾𑌸𑍍 𑌉𑌦𑌾𑌸𑍀𑌨𑌤𑍍𑌵𑌾𑌤𑍍 । 𑌕𑌨𑍍𑌯𑌾 𑌪𑌾𑌰𑌶𑌵𑌾𑌖𑍍𑌯𑌾 𑌇𑌤𑌿 । 𑌤𑌤𑍍𑌰
𑌤𑍍𑌵𑌾 । 𑌨 𑌪𑌾𑌰𑌶𑌵𑌾𑌖𑍍𑌯𑌸𑍍𑌯 [illegible] 𑌇𑌤𑌿 [illegible]
[illegible]
[illegible] 𑌪𑌾𑌰𑌶𑌵𑌸𑍍𑌯 [illegible]
[illegible] 𑌸𑌂𑌕𑍋𑌚𑌯𑌿
𑌤𑌂 𑌇𑌤𑍍𑌯𑌾𑌪𑌾𑌦𑌾 [illegible] ॥

𑌪𑌿𑌤𑌾 𑌤𑍍𑌰𑍀𑌣𑌿 𑌵𑌰𑍍𑌷𑌾𑌣𑌿 [illegible] 𑌕𑌨𑍍𑌯𑌾𑌂 𑌨 𑌪𑍍𑌰𑌯𑌚𑍍𑌛𑌤𑌿 ।
𑌸 [illegible] 𑌭𑍍𑌰𑍂𑌣𑌹𑌤𑍍𑌯𑌾 [illegible] 𑌸𑌂𑌶𑌯𑌃 ॥
[illegible] 𑌵𑍃𑌷𑌲𑍀 𑌵𑍃𑌷𑌲𑍀 ।
[illegible] 𑌵𑌾 [illegible] 𑌵𑍃𑌷𑌲𑍀𑌸𑍍 ॥

𑌇𑌤𑌿 𑌬𑍌𑌧𑌾𑌯𑌨𑌃 ॥

𑌪𑌿𑌤𑌾 𑌕𑌨𑍍𑌯𑌾𑌯𑌾 [illegible] 𑌵𑌰𑍍𑌷𑌤𑍍𑌰𑌯 [illegible]
[illegible] 𑌕𑌨𑍍𑌯𑌾𑌂 𑌨 𑌪𑍍𑌰𑌯𑌚𑍍𑌛
[illegible] 𑌯𑌦𑌿 [illegible] 𑌕𑌨𑍍𑌯𑌾𑌂 𑌕
[illegible] 𑌨 𑌪𑍍𑌰𑌯𑌚𑍍𑌛𑌤𑌿 । [illegible] 𑌭𑍍𑌰𑍂𑌣𑌹𑌤𑍍𑌯𑌾 𑌭𑌵𑌤𑌿 𑌯𑌦𑌿
[illegible] 𑌕𑌨𑍍𑌯𑌾 [illegible]
[illegible] 𑌕𑌨𑍍𑌯𑌾𑌯𑌾 𑌯𑌾𑌵𑌨𑍍𑌤𑌿 [illegible] 𑌤𑌾𑌵
[illegible] 𑌭𑍍𑌰𑍂𑌣𑌹𑌤𑍍𑌯𑌾𑌃 [illegible] 𑌇𑌤𑌿 ।
[illegible] 𑌭𑍍𑌰𑍂𑌣𑌹𑌤𑍍𑌯𑌾 [illegible]
[illegible] 𑌕𑌨𑍍𑌯𑌾𑌯𑌾 [illegible]
[illegible] 𑌭𑍍𑌰𑍂𑌣𑌹𑌤𑍍𑌯𑌾 𑌭𑌵𑌤𑍀𑌤𑌿 [illegible]
[illegible] 𑌤𑍃𑌤𑍀𑌯𑌵𑌰𑍍𑌷𑍇 [illegible]
[illegible] 𑌦𑍋𑌷𑌃 । [illegible] 𑌭𑍍𑌰𑍂
𑌣𑌹𑌤𑍍𑌯𑌾 𑌉𑌦𑌾𑌹𑍃𑌤 𑌬𑍌𑌧𑌾𑌯𑌨𑌸𑍍𑌮𑌰𑌣𑌾𑌨𑍍𑌤𑌰𑍋𑌦𑌯𑌾𑌸𑍍 [illegible]
[illegible] 𑌭𑍍𑌰𑍂𑌣𑌹𑌤𑍍𑌯𑌾 [illegible] 𑌤𑌤𑍍𑌤𑌤𑍍 [illegible]
[illegible] 𑌇𑌤𑌿 । [illegible]
[illegible] 𑌇𑌤𑍍𑌯𑌾𑌦𑌿 𑌪𑌾𑌰𑌶𑌵𑌸𑍍𑌮𑍃𑌤𑌿 [illegible]

ष्टुत्वेतरप्रोणखात् । अथावृत्तानायागमैः कन्यायां श
तश्चिन्त्र वदेत्कृत्य वारिधिनावधि स्त्रिणेहत्प्रारभ्येतेषा
षाणा बळयापत्तोकस्तगा वेदि वराणराः प्रमस्त
रजः वर्णनारभ्य सत्स्याद्य नववाः सेन वृश्चिराजा
पृथुरनिर्दिष्टं स यावृत्तानयावृत्तनका विशेषो वि
सेनव वि स्र्तु रजःवानदोषलेखाः ।

नन्व सिन्कोः वरं विवाहेऽन्तःदिवसयोरपि सकृत
प्रायश्चित्त क्लिष्टपःप्रायश्चित्त कव्यवत्कं विवाहकारणे
त तदोषः । तथाहि निर्णयसिन्धौ कृष्णभट्टाः ॥

कन्यात्रिकं तु शं शापं कन्यानिष्क्रीतभूतः ।
शतक्षण कारयेत्सर्वा सं तु तसेवपातु शवः ॥
वितागतनु शतेन तु ते वा स्फुट भोज्यं पतिःसहः ॥
पानाविष्टे मेयसत्तिः वाकुने रमेरवत्सं ॥
पुनर्भूः तिसृभि प्रोक्ता ब्राह्मणा सप्ता कन्या विज्ञा पतिः ।
पातवेदकावि निवेशन पाश्चे कन्या यथा विधि ॥
पुत्रा श्रुतिसहस्रेणैव सुपृष्टि निवेशसुकृतिणं ।
कन्या तत्र वेदपूर्वं वाय वेदिवाक्वेपसः ॥
उवोष्यत्र द्विबद्धः कन्या रत्नं कन्यानामि वलक्षः ॥
अपृष्टे रजसि पुत्रिकाः कृत्स्नेषु रत्नरमिश्च्वेषणं ॥
तानेतरद्दायाणं विस्मृत्य बृहस्पत्यपि गुनिःहदः

सङ्ख्यार भूतिकत्यां शङ्गरेकापि ।

कन्यात्रिकं तु शं शापं कन्या निष्क्रीतभूतः ।
वितागतनु शतं कन्यापि पुरोहित सवनं नः ॥
पानाविष्टे मेयसत्तिः वाकुने रमेवत् सं ।
पुनर्भूः तिसृभि शावस्यापि शास्त्रं कन्या वितापतिः ।
पातवेदकावि यशिथेन पावेन कन्या यथा विधि ॥
पुत्रा श्रुतिसहस्रेणैव सुपृष्टि निवेशसुकृतिणं ।
कन्या तत्र वेदपूर्वं वाय वेदिवाक्वेपसः ॥

உவொஷ்ரு த்ரிஷிநம் கந்யா ராத்ரௌ வீக்ஷ ஶவாம் வயஃ ।
அஷ்டாஷ்ட ராஜவொ ஷஷ்டாஃ கந்யாவெ ராத்ரஹ்ரெஷணா ॥
சாத்ரஉஹ ந ரஶ்மாவி கஷ்மாவெணஜ்ரஹ்மயாத்ரகம் ।
இதிய ஸ்ம்ருதி ॥

தஷாக் வாத்ரா ராஜொதஶஜ்நெஷதி தத்த்ர வா
த்ரு ராஜொதஶநதிதக ஷொஷதிஷஜ்ரணாயஜம் கந்யா ரா
ஜொதஶஜ்ந வலோவரக ஶ்ரரந்யா நம் வணகமெராதாநம்வர வ
ஷ்யா திரிதகவிக்வ ஷ்ட வலோவராக த்ராஹணவொஜநம் வத்ர
யஶ்மிக த கஜ்வ்ய கர்ணபாஷ்டவெவாஷ த்ர கயம் காரயிக்வா
கரவெதவ வபஃவா யயிக்வா விஶகாஶ்ரவெயஜ ரஹ்ரெஷ
ணாதி கந்யா ரவமெய ஜ்ராவா ஶாஜாவதி காத்ரஉ
ஹநு வரஶ்மாவி கஷ்மாணவெஹஜெஷவாத்கா காத்ரஉஹநு
வஷு ரஜொஷ்டீ ஷஷதீதி தெஷ । ததா யா கந்யா விதஶ்வெஷ
ஷயதி வ ஷஷதீ ஶவெக

கவா வர்ண வரி ரஜந ஷவெஷ்ஷ்ர கஷாஷந ।
விவாவெஹஷ நவெயாஷ்டக வொகஷய விஶஹிரகா ॥
வணதா வரிணபநு விவெத்ர நவெபவெரா ஹவ்யகவ்யயொஃ ।
ந கஷ்ய ஜநவெக வ த்ரக நீ த ஜதி கஷ்யெக ॥
த கா விதா வ த்ரஷ்ட த்ரவெஷு வ்ருஷலாஷ்டகாஃ ।
யடி வஷவதீ கந்யா தவெஷவ த்ரஹ்ணாஹரதி ॥
நகத்ர ஷொஷ்டி ஷலஷ்யஷ்டி ஷஹவாவெகஷ வஷொஷலாக ।
ஜதி வஹஷ்ராத்ரஹ்யஹ்ருத ஶாகஜ்வேய வஷவெநஃ ॥

யடாரஹஃ வஷ்டவதீ ஆஜவா த்ரஉவெஹஷ்டி ।
காஶாஜெரெ யடாஷ்டா கடா தாம் வஷவரித்ரவெஜக ॥
யத்வெஹடா தஜஷ்டஹம் தடா வாஷ்டாயணம் உரொக ।
காஶாதஷ்ரவஷ்டாவஷெகக வஷ்ணாஷ வஷொஷவெக ॥
வஷவெத்ர தஷ்டிய்தி ஷவெக தடா வதிதஷவ வஷ ।
இதி வெதஹெவொதாஹ்ருத் ஶததவஷவெநஶ்ஷ விவாஹ
க வஷ்ணம் ஷ்ருஷ்ராஷவஃக்ருத் ப்ராயஶ்சித்தாயா அத்ர அயிஷ்

[illegible]

[illegible]

[illegible]

[illegible]

க்ருதா கத்வா ஆதிபரவதிபூர்ணம் யா ... [illegible]

[illegible] ... இதி ... [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

𑌤𑍇 । 𑌏𑌵𑌂 𑌹𑌿𑌰𑌣𑍍𑌯𑌕𑍇𑌶 [illegible]
[illegible]
𑌣𑌃 । 𑌇𑌤𑌿 𑌬𑍋𑌧𑌾𑌯𑌨 [illegible] । [illegible]
[illegible] 𑌇𑌤𑌿 𑌨𑌿𑌰𑍍𑌣𑍀𑌤𑌮𑍍 ॥

𑌯𑌤𑍍𑌤𑍁 𑌆𑌪𑌸𑍍𑌤𑌮𑍍𑌬𑌸𑍂𑌤𑍍𑌰 𑌟𑍀𑌕𑌾𑌯𑌾𑌂 [illegible]
[illegible]
[illegible] 𑌇𑌤𑌿 [illegible]
[illegible] 𑌵𑌿𑌵𑌾𑌹 [illegible]
[illegible] 𑌇𑌤𑌿 [illegible]
[illegible]

யஸ்ய ... நாயுக்தோ த்ரவஸம்ஹதைவ ராமக: ப்ராத்
வஸ்ரோவதஸ்ரீக்த்ய க்ருதவயோவியாரதிக்ருத்யவ்யவ:। வி
த்ராயிசரணவிரோயாவஹே: சக்ஷு வித்யாமேத வஸா
காரு: இத்யுத்ராஷ்டேஷாபி யபோத்தேயோதவிதத்வ வஸ்தெவி
யஸ்பேதே இதி வஹவவதேஷ்வ்ராவேத்வ ப்ராத்க்ஷுநாவா
தெவி த்ருவ வஸ்த்வாஹிவ ... ணவியாதே வாக்யமேவாக
வித்ரவாஜ்ஞக இஷ்டிவிஶேஷ: வஸா ரஹ்வ ஹமோத்தேஶேந
விபமே இதி ஸஜ்ஞாஜ்ஞிகா ஹ பூர்விகாபா ।

ப்ராக்தே க... நிதாதேந கோவியா த ... ஶாக்யே த கண: ।
சப்ராக்தே த விபதே வஹவாவேக்ய யத்த: ॥

இதி வாதிசோக்தா ॥

... த்தேஷ்ட... தத்ர ... ஜதிநிஷ்யாதி தத்ரா
த்ர்க்ஷா த ॥

நக்ஷாக்ஷவே ... ... நமேவ: ॥

இதி ஸ்ய ... ... ஸ்ஞாபிநா ஷித்
உஸ்... ... வ ... வ்யவஸ்யா வதி । தயா
உ ... ... யநிபாஹா ... ஹிநிவஸ்த
இதி நிஸ்பே இதி தேவேவா । சஷ்ட்வஷ்ட்ராமவே: மணி
ஷஸ்வஷ்டிரா தேதா இதி ஸ்யாணேந ப்ராஷ்டஶவஷ்ட்ரா
பா நக்ஷாவஸ்ஞாபிநா ப்ரவேவ ஷஸ்ஷஷ்டிராஸ வஸ்ரந க்ஷ
சாவஹ்வ்யவஸ்யா வதி । வஹிவேஷ்ட நக்ஷாக்ஷவிக்ஷ
தேநத ஜத்ஷஸ்யேநாத்ர ஶநக்ஷாவஷ்வ்யவஸ்யதி க்ஷ
தே । தயாவ விஶேஷ சா நக்ஷாஜ்ஜி ஜோதிபவதே ஹதா நக்ஷ
காவஹஸ்ய நக்ஷாஷவத்ஷித்ர்யாதி ஸ்யத்ந்யநாரோயேதஜ
த்தீவாயு:। கஷ்ட்வஷ்ட்ராமவேதி ஸ்யதந்யநாரோயேநா
ஷ்ஷஸ்வஷ்ட்ராவாயு: இதி வேத: । ஜத்ஷத்த்யஷ்
வ்யஷ்டீம் ப்ராமஷ்யதாநித்யர்த்யேத ஸாவஷ்விவேயா

காயாம் வ்ருயோபஸ்லேவேதாயா வ்ருத்திரேவ ஸம்ஸ்வத்ஸரம் ஸ்தேரா
ணாம் வ்ருயோஜநம் ஸம்ஸ்வத்ஸரம் காலம் ஸவதாந்த்ரஷ்டம் வ்ரு
யோஜநமிதி । [illegible] நிரூபவிஷ
[illegible] விவாஹ்யாயாஃ [illegible]
[illegible]
[illegible] விவாஹஸ்ய [illegible]
[illegible]
[illegible]
[illegible] விவாஹமவிஷேஃ
[illegible] விவாஹகாலவவ [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] விவாஹகாலே [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] விவாஹமவிஷேஃ ॥

யதிவ ஸ்தோராமணாம் விவாஹகாலவவ வயாஸ்தியவவ
[illegible] ஸ்தோராமணமிதி [illegible]
[illegible]
[illegible] இதி । [illegible] இதி । [illegible]

[illegible]

ஸாராஜ்ஞீ ஶ்வஶுரே ப⁴வ ஸாராஜ்ஞீ ஶ்வஶ்ர்வாம் ப⁴வ நநாந்த³ரி

[illegible]

[illegible]

ரஜஸ்வலாஸஞ்ஜாரம் ச வியதே ஈதவைவ கந்யா க்ஷீரோ ஸ்ரீ மௌஸீ நா இத்யோரவி மோக்ஷ்ரவி ஸம்ஹுமதே । கந்யாஶுல்கஸ்ய மேயாநத்யயா தமோவா ஸவசா ஈதகந்யாஶுல்கஸ்யாநந்தர்ஷே தேத்யாயத்ஸூவாஷிதாயகுகமேவ வாணிஹுஷணிகேத்யாஷை: விவாஹஶ்ஞா: ஸ்வமௌயமு காஸாபமதநாவிவாஹிதாயாம் கவ திஷ்ஜேஇத்யமேயாஸவதி ஈயஞ்ஞாமூ: உபநபாசஹ்ஞா ஈநா வநீமேதஹு திஷ்டா திவஸவசாஹேரணாவி ஸாபோயத டாஶுல்கம் கா ஸ்கூவ்: தத்தாவாபரஹேத்ரணாஹேவாவதத்தம் ஸாராஜநஹ் திஷ்டா ஸ்வநிபரோஸஹ் பாஜநஹேவிகிம்ஸிஜோவஸஹ் வச ஈநத காஷீத்யமூகமேவ கா விவாஹஶ்ஞா ஈநத கா்ஷீத்யம் ஹு திஷ்டா இத்யமேயா ஸவதி ஈயம் வாயமூ: ந ஶுல்கஷ்ஞமேர ணஜ்ஞா ஈ ஷீஹமூ: ஈநத க்ஷீத்யம் விவாஹஶ்ஞெஹு திஷ்டாஜ்ஞா ரநஷீ காஷீத்யாஸா ஶூஹேஷ்ஞவஷீவாஹாநஹமூகஜ்ஞாநாஷு வஹ்மேபாஜநஹேவ்யஸி க்ஷீ கந்யாஶுல்கஸ்யாஷிவாஹிதாயமூ ஈக்வ ஷீயஹ்கூடா ஷி கா இத்யத தமயஶூஹீதா ஈகந்யா: விவாஹிதயமூகா வாந: காஷ வஷீயஹ்கீதய கவஹேஸ்வஷி தம் ஈஷ்ஞஹமா தாஷ்யாஷககஹாயிகாராஸ கந்யா ஶுல்கஸ்ய ஈநதகாஷீத்யமூகமேவ ச ந தமஷோகா: ஈகந்யா: ஷீகாஷீ மேத்யா ஸமேவபாஷீ காஸம் ச ஷீவயஹ்கீயஷீதா ஹுகாமேநகஸ்ய திஷ்டஸ்ய ஸாஸஸாவிதம் தஸாஷத கந்யா ஶுல்க: ஈநத காஷீ ஷீஸாவமேதி ஷிஷம் தஸ்யமேஷவாஹிகஹ் மேஜ்ஞ ஷீதாஷீ விவாஹநி வ்யாஷீக்ஷுத இதி ஷிஷாஷ: ।

ஈய ஷாதமூஶுஷீமேஷிக ஶிம்ஹயோ: வ்யாஹ்யம் விஷ ஶுமேத யஷ்யஷி மேஷவாஹிகஹ்மேஜ்ஞஷீ ஷீதாஷீ ஹிம்ஹம் மேஷ வாஷீதி ஷஷ்ஷீஷமேஷீ தஷிதீ ஷாதமூஷீமேஷிக ஶிம்ஹமேயோ வ்யாஹ்யஷிஷமேஶு நாரஷ்யஷ்யவைவ தயாஷி யஷிஷ் ஷஷி ஷிஷிஷேப யத்ர தஷிஷ ஷாதமூஶுஷீமேஷிக ஶிம்ஹமேயா மோயஸ்ய ஷஸாஷ்யஷிநதயா தத்ர வ்யாஷஹ்யஷிஷேக ஷா தமூஶுஷீ மேஷிக ஶிம்ஹமேயாநத்ரவ்யாஹ்யம் விஷாஷமே

யத்ரா வாத்ருப்ருத்யைகூயா வைவதிக [illegible] வ்ரை
ஷகாஸ் வைவாஹிகஶ்ச [illegible] வைவதிகவ்ம [illegible]
ஶதீவிவாஹவிஷிர்மிதி [illegible]
[illegible] இதி [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] இதி [illegible]
[illegible]
[illegible] । [illegible]
[illegible] இதி வைவதிககவி [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] । [illegible]
[illegible] । [illegible] ।
[illegible] । [illegible]
[illegible] ।
இதி [illegible] । [illegible]
[illegible]
[illegible]

[illegible]

[illegible]

வ்யூ வ்யக்தௌவ ப்ராணகவாக் ஈரிதா ரெவெதிகஂழஹாதூ
ஶ்ரூதெத்யாவிரோராரெரஹாதூஶ்ரூதிரரவெகூணீரெரபவெதி
வாழ்யஂ ரெவெதிகஶ்ரூதரி கஹாதஃஶ்ரூப்ராணோ்யக்கெவலி ரெவெதி
கஂழஹூ தடமாவாக் ரெவெதிகஂழஹூ ஹாதூஶ்ரூதெதாரிவ
விப்ரக்ஷூப்ராணோரெஹூவலகவாக் உக்தா ஹி ஆவாயதூஶ
வாரஹாதிஸ்ஃ (யதெ சக்கரணா ஂஶஂ உ உஹமரெ்ெதஶ
க்ஷஂ நவாதிக்ராஜதெப்ரக்ஷவிஷவெ வாஹா வகூணகெ்ெ
ஶரெ்ஜரோண வாரிதெரூரூவகவெ ரெக ஈரிசா உநூநரெஹ வி
ப்ரக்ஷூ ஶ்ரூக்யஹா ஶிஂஶிதி) (ஶ வாஂஷாயதூ விப்ரக
ஷதூஃ ப்ரய ஶாவஂஜூநா சசஹாஉயதூ்ஜூரைநாயஃ
ரெதூாஹஹி ா ஶ்வதி சஂ நரூ நீபிராெெநாவகூ ரெச)
இதி உக்தஂ ஹரீயயாவஹுதிஶ்ரஶ்ரூாவி ராஂநீாஂ ।
ஹஜூாநஂ வரோராபா ந ஶ்ரூ ரசவிதூநிரிாக்க்சா । ஶ்ரூ
ஸிஜூாநஂ வரோராபா ஶிஂ சீரி ஂீ இதி சவெ
ரெஹாதஶிஂஹஸி நஹாதூநூதிரஃ ஶ்வதி ஶிஸ்ஃ ।

ஸிஂஹ ஈஹஂ ரமூதூஷயாஃ க்ராதிவொாஂவஶ ஜூரெய்பூ ஹஜூ
ஶிஂஹ தஃ ஶசதூஜரெ்ரகவலி கரோர ரெவராஹ்ஷ்ரூயத இதி
ஹாதூஶ்ரூ ஹா ஜீஹஹிரொஜாஹ்ஃஉணா க தூவரிரெக்ஷ
ஶிஂஹவிரோராரெயவலி ஶ்ரூ ரெசதூ யஹாதிதி ரெநூரிரெவ
திதி வசதூயகாவாரெக்ரோாத்வ வணஂ சரவலி ரநூாதா
ஶாவெகபா ஹாதூஶ்ரூதிவெதூூமவலிதி ஶரூரெ த ।

யக்தஂ ஜெூஷிதியாஜகஶ்ரூதரெ சா ஜாரூ க்ராக்விஷிதியா
ஹஹூர ரெஹாஂஷிகஃ இதி ஜீக்ஷஹி காநஶரெணஹ தரெெவாஹிக
ஜெூஹாஷெ்வாயநாஷாரெபதூஃ ஹாஷிதசயா ஶ்ரூதூரெவெக
யா ஶிஂஶஂ ப்ரபஜிதி சஜ யதூ ஶ்ரூதிஶிஂரெ விரரெபுரெச
தரெதூரெவகதாவஶ்ரூ ப்ரபவகா ஜூாதஂ ஶக்யா ரொகெலி
ஜெயாதூயொஃ வாகதாப்ராவரூவஶ்ரூ வாரஹாரவிராயஂ
வஷிதஂ ஹாதரோண த்ரெஜூதூயகாக் ।

[illegible]

யொக்ஷூஷிம்ஶாநாம் வ ப்ராஹ்மாஹிக்ருத உத்தரீத்ருதாந்யா
நெயகூய ந வெதஜதந்த்ரீவிவாஹவஸிஸ்ஃ ।

வெய்ஸாவிவாஹ ஸிம்ஹவாதிநவ்யெபாநெகவார்ஷவிவா
ஹாதிஸிம்ஹவார்ஷவ்யாநெகவாதுவத்ரீவிவாஹாதிஸிம்ஹம் வ
கர்த உவெக்ஷஜதி ந ஜாநீத்ஃ ।

வாராணெஷவி கந்ருதத்ரீவிவாஹஸிம்ஹாதி ஹரிணி
த்ருஶ்யநெ ஸ்ரீஹாஸவநெ கட்டக

விவ்ருஷ்ஹாயபூர்வெய்ஸாகமெ ஜஹதி ஶால்தா ।
விஷஜூராஹ்ரஷ்டாவமெஷ்யஷ்ணாவாஸிஸ்ஸ்ஃ ॥

வாராணாதெய உ ।

கஷாஷவஷபூர்வ ஸ்பாகந்ருஜாமொக்ஷ வ ஜிஜஃ ।
கஹெஷ ஷெயா ஜமெயஷெதி வஹவிதாவஜநிதஃ ॥
ஶ்ருஹாகஶுஷ்டிஃ கஷ்டிக ப்ருஹஹாரீய ருயா ।
தவெஷ ஷாத நிஷ்டிகாய கந்ருக வர்ஹாரவிமெ ॥
ததஃ கடாஷிஷிகக்ஷாயபூ ப்ருஹட்டிரீ ர வ ஷமெரஃ ।
ரஜத்ரமெஷரவரந வஜஞாதாயம் ரஹ்ருஹ ரதஃ ॥
ஜிஜஷ கம் நிரீக்ஷ்யாய ரவாயுயநமெஜஹிதஃ ।
கவ்ருஷ்டா காஷமெத்ரா ஜீந்து கந்ருகா வொஷாகம் ஷ்ஷ ॥

கிம்வ கவிந்து ஷெமெஶ ப்ரஹணஜாதர வ்ராமெஹவ ரஜெர.
ஶபூதாகவிவாஹஃ க்ருயகஜதி வவபூஷாவ்ர திவஞஃ வஷாஜாரஃ
ஜஜம் வ வதம்ஜபூவஜாரஸ்யாவிவ்ர திவஜஜத்ருஞாஷரம் உ வ.
வெபூரவி பிஷணபிஷமெஞஃ வரிவபூமெகஃ வரமெஷஃ
கதஷ்டீயஜாதம் வவவஜம் உ ரவஜரவம் த கொவி ஶ்ரு
திஷ்ருதிவஷாஜாரதஜஃ கந்ருயாகதம் யமெத । யஷ்டிந்து
ஷெமெ ய ஞுஜாரஃ வாரவயபூக்ருஜாஹதஃ । ஶ்ருஷ்ட்ருத்ருவி
ரொமெயந வஷாஜாரஃ வ உபெத ॥ இதி ஷ்ருதஷ்ய வஷாஜா
ரஷ்ய ஜதஷ்ரா ஷாதிவிவாஹாதிர்ரவஷ்ய வாரித்ராமெ
ஷ்டெஷாயஷ்டிஶ்ருஜாராஜ வதிதஃ வொஹிஷ்பக । இதி

सदाचारत्यागिनः पतितत्वोक्तिः ।

सदाचारेण देवत्वमृषित्वं च तथैव च ।
प्राप्नुवन्ति कुयोनित्वं भ्रष्टास्तु विपर्यये ॥ इति

सदाचारवर्णिताश्रयस्य देवत्वाद्यापादकस्य त्यागिनः श्वादिकुयोनिप्राप्तेश्च स्मरणात् ।

वेदो वा हरिभक्तिर्वा भक्तिर्वापि महेश्वरे ।
आचारात् पतितं मूढं न पुनाति द्विजोत्तमम् ॥ इति

सदाचारविहीनं प्रति वेदादीनामप्यकिञ्चित्करत्वोक्तेश्च [illegible] विवाहे [illegible] शिष्टाचारस्य [illegible] विवाहस्य [illegible]

[illegible] विवाहमाहारण्यम् ।
[illegible] ॥

प्रायेण [illegible] विवाहमाहारण्यम् ।
[illegible] ॥

[illegible] ।
[illegible] ॥

इति विवाहमाहारण्ये तृतीयस्स्तबकः ॥

श्रीमत्परमहंसपरिव्राजकाचार्य [illegible] विरचितं विवाहमाहारण्यं समाप्तम् ॥

பக்கம்.	வரி.	அசுத்தம்.	சுத்தம்.
க	க௬	[illegible]	[illegible]
க	௨௨	தி	தீ
௨	௨	[illegible]	[illegible]
௨	[illegible]	[illegible]	[illegible]
௩	கந	[illegible]	[illegible]
௩	௨௩	[illegible]	[illegible]
௬	௨அ	[illegible]	[illegible]
எ	அ	[illegible]	[illegible]
எ	[illegible]	[illegible]	[illegible]
எ	கக	[illegible]	[illegible]
எ	௨அ	[illegible]	[illegible]
அ	௩	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]
அ	[illegible]	[illegible]	[illegible]
அ	[illegible]	[illegible]	[illegible]
[illegible]	௩	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]
கக	[illegible]	[illegible]	[illegible]
[illegible]	௨அ	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	௩	[illegible]	[illegible]
[illegible]	அ	[illegible]	[illegible]
[illegible]	எ	[illegible]	[illegible]
[illegible]	௨௬	[illegible]	[illegible]
[illegible]	அ	[illegible]	[illegible]
[illegible]	௨எ	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]

பக்கம்.	வரி.	பிழை.	திருத்தம்.
[illegible]	[illegible]	[illegible]	[illegible]

॥ श्री ॥

॥ विचारिता विषयास्त्विमे ॥

---

१ **प्रश्नः** श्रीमन्म[illegible] प्रवाहतोनादिरिति कस्मिन् ग्रंथे उक्तं.

उत्तरं-मन्नारगुडि रामचंद्राचार्याः उपाधिखंडनटीकायां अनाद्यविद्या कामकर्मणामस्त्यागं परमार्थ एव अन्यथाकारो-दुःखाद्यनर्थ इत्येतद्वा[illegible] मपादाय मदागमं[illegible] व्याख्यातं ॥ अविद्याया स्वरूपतो अनादि[illegible] कामकर्मणोस्तु प्रवाहत इति [illegible] गीतायां द्वितीयाध्याये उक्तं ॥ आवृतं-ज्ञानमेतेन ज्ञानिनो नित्य[illegible] [illegible]णा ॥ भाग[illegible], तथा काम [illegible] [illegible] ॥ बुद्धियाग[illegible]यापार्थ [illegible] गीतायामुक्त ब्रह्मसूत्रभाष्ये द्वितीयाध्याय [illegible] दृशमानि[illegible], न कर्माविभागादितिचेन्नाना-[illegible] भाष्य[illegible] नतत्कर्म-[illegible] मैकाग्यता[illegible] [illegible]र्नाविमित्वादिति चेन्न [illegible] कर्मण ॥ पुण्यपापादिकं [illegible] ॥ अनादि[illegible] कर्मणश्च न विरोधः [illegible] अनादित्वा-[illegible] कर्मण[illegible]नादित्वमिति ॥

[illegible]शामण्णाचार्याः सृष्टि[illegible]सारो मुक्ति-[illegible] च ॥ [illegible]र्पिप्रभृतयोलोका लोकाभृगादयस्तथा ॥ अनाद्यनंतका[illegible]नाम्नवेदकप्रकारका ॥ जगत्प्रवाह स्सत्योयं नर्वा[illegible]कदाचन ॥ तृतीयतात्पर्यं

[illegible]चार्द[illegible]नाद्यनन्तका[illegible]नत्वमुच्यते ॥ तत्त्वस्वरूप-[illegible] न सम्भवति ॥ प्रत्यक्षबाधितत्वात् ॥ प्रमाणांतरविरुद्ध-त्वाच्च ॥ किन्तु प्रवाहतइति निरुक्तमसारगाव्य बंधस्य प्रवा-हतोऽनादित्व सिद्धिः ॥ अतएवाग्रे-जगत्प्रवाह इत्युक्तं ॥ जगत्पदेनपूर्वोक्तानामेवग्रहण मिति न कश्चित्क्षुद्रोपद्रवः ॥

.10 Krishnaswami Sastri

कूटाकूलशामाचार्याः अनाद्यविद्याकामकर्मात्मत्वाद्धव-
स्याप्यनादित्वं अत्रानादित्वं अविद्यायाः स्वरूपतः काम-
कर्मणोस्तुप्रवाहतः विवक्षितं.

अत्रप्रमाणं उपाधिखंडनमंदारमंजर्यां ॥

एकप्रवाहमध्यपतितानेकप्रवाहिप्रतियोगिप्रागभावावच्छिन्नका-
लावृत्तित्वानधिकरणप्रध्वंसप्रतियोगित्वमिति प्रवाहतोनादित्व
निरूपकश्रीमच्चंद्रिकाकारीयं वाक्यं ॥ अत्र कारिकापि ॥
प्रवाह इति गीयंते सजातीयाः प्रवाहिणः ॥ कालेनोपाधिना
ग्रम्ना नानावृक्षा वनं यथेति ॥ न कर्माविभागादिति सूत्रं तद्भा-
ष्य तट्टीका च ॥

कौलगी मरार्याचार्याः उपाधिखंडनस्य मंदार मंजार्यां अ-
विद्यया स्वरूपेण अनादित्वं इतरयोस्तु प्रवाहतइति द्रष्टव्य
इति बंधस्य प्रवाहतो अनादित्वं चंद्रिकाकारैरुक्त न कर्मा-
विभागादिति चेन्नानादित्वादिति ब्रह्मसूत्रश्चात्र प्रमाण.

एवमेव **अध्वर्यु कृष्णाचार्याः**

मन्या० कृष्णाचार्याः. उपाधिखंडन टीकाया अनाद्य-
विद्या कामकर्म निमित्तः अय परमार्थ एव अन्यथाकारो दु
खाद्यनर्थ इत्यत्र मंदार मंजर्यां काम कर्मणोस्तु प्रवाहतो
नादित्वमिति । तथातत्वप्रकाशिका द्वितीयाध्याय प्रथमपाद
दशमाधिकरणे. न कर्माविभागादिति सूत्रव्याख्यानावसरे अनादित्वा-
दित्यस्य कर्मपरंपरायाः अनादित्वादिति व्याख्यातं । तँत्रदीपि-
कायां कर्मणां प्रवाहतोऽनादित्वात् इत्युक्त ।

तु० रंगेशाचार्याः तँत्रदीपिकायां २ अध्याय. १ पाद. १०
अधिकरणे ॥ न कर्माविभागादितिचेन्नानादित्वात् ॥ इति

सूत्रे कर्मणां प्रवाहतो अनादित्वेन पूर्वं पूर्वं तत्तदीय कर्मापेक्षयोत्तरोत्तर सुकृतादि कर्मकारयित्वा फलंददाती-त्यंगीकारेणेति ॥ तत्वप्रकाशिकायां ॥ अनादित्वात् कर्म परंपराया इति भावः इतिच ॥ उपाधिखंडनमंदारमं-जर्यामपि ॥ विष्णुरहस्ये ॥ १४ अ० कर्मणां हि प्रवा-होय एवमेवादि कालत ॥ एवंत कर्मणां बंधप्रकारः कथितोविधेति ॥ ३९ ॥ १४अ– ॥ सुमतुः ॥ कर्मा-नुमारिफलद. सर्वस्यजगदीश्वरः ॥ तर्हियत्नोन्नर्थंवास्यकि-मर्थंयत्न्यतेनरैः । १ सूत. ॥ अदृष्टाज्जायतेयत्नः यत्ना-त्कर्मकरोत्यय ॥ जायतेकर्माणाबन्धप्रवाहोऽनादिरेवहीति ॥ २ प्रवाहतोनादित्वंच-पूर्वपूर्वकर्मणा उत्पत्तिविनाशेपि-पुनःपुनः कर्मांतराणां उत्पादे-प्रवाहतः विच्छेदाभावान्नकोपिदोष इति भावः इति मध्वसिद्धांतसारे ॥

मन्या ० रामाचार्याः ॥ ओं नकर्माविभागादितिचेन्नाना-दित्वात् ओं । इति ब्रह्मसूत्रे । विद्यंते हि तदाजीवाः काल कर्मादिकंनथा । क्वान्यथाहिपुन.सृष्टिःपूर्वकर्मानुसारिणीति भागवततात्पर्यभूतब्रह्मतर्कवाक्ये च । तथा । सर्वदास्थूलेन सूक्ष्मेणवापुरेण युक्तोननुजीव. । चतुर्दशोर्ध्वंजीवीनिसंसारश्चा-दिवर्जित । यदिमादिः स्यात्समारःपूर्वकर्माभावादतःप्राप्तिः इति गीता भाष्ये च कर्मबंधस्यानादित्वमुक्तं । स्वरूपानादि-त्व तु नास्ति । अतः अर्थापत्याप्रवाहतोऽनादित्वं सिध्यति ॥ उपाधिखंडनमंदारमंजर्यां कंठतोपि निर्वचनपूर्वकं कर्मण प्रवाहतोऽनादित्वमुक्तं ।

स्वापे रामचन्द्राचार्याः बंधोद्विविधः स्वरूपतोऽनादिः प्रवाहतोऽ नादिश्चेति. बंधोनाम. लिंगशरीरादि संबंधः तत्रलिंग–

शरीरस्यस्वरूपतो नादित्वात्. तत्संबंधोपि स्वरूपतोनादिरेव-कामकर्मादीनां प्रवाहतोनादित्वात्. तत्सबंधरूपोबंधः प्रवाहतोनादिः. बध्यतेनेनेति बंधइति व्युत्पत्या अविद्याकामकर्मादीनां बंधशब्दवाच्यत्वं. तत्र अविद्यायाः स्वरूपतोनादित्वं-कामकर्मणोस्तु प्रवाहतोनादित्वं. इति उपाधिखंडनमंदार मंजार्यां, श्रीनिवासतीर्थीये च. न कर्माविभागादिति सूत्र-व्याख्या तंत्रदीपिकायां कर्मणां प्रवाहतोनादित्वमुक्तं.

अथान्ये प्रकृतौदृष्ट नृषु प्रातिस्विकंस्थिते + + + अजेद्वे अपितेप्रोक्तेइति श्रुतिगीतातात्पर्ये जीवाछादिकापरमाछादिकयोरनादित्वमुच्यते ॥

याद्वेंद्राचार्याः द्वैतिनांमध्ये केचित् चेतनस्य बंधः अनादिमांत इति, केचित् प्रवाहतो अनादिः सांत इति वदंति, द्वैतमत भाष्यकारास्तु बंधः अनादिरिति कुत्रापिस्पष्टतया न अवोचन् प्रत्युत प्रवाहतो अनादिरिति तत्र तत्र सूचयंति, अनादिमायया सुप्त इत्यत्र अनादेः विष्णोः मायया इति वदंति ॥ अद्वैतिविशिष्टाद्वैतिनोपि एवमेव वदंति

कृष्णमतीयास्तु बधः सादिरितिस्पष्टतया वदंति भगवदिच्छया जीवानांबधः भवति इति अत्र प्रमाण ॥ यदधातुमतोब्रह्मन् देहारंभोस्य धातुभिः ॥ यदृच्छयाहेतुनावा भवंतो जानंते यथा ॥ भाग. २–८–७ शुकउवाच ॥ आत्ममायामृते राजन् परस्यानु भवात्मनः ॥ नघटेनार्थसंबधः स्वप्नद्रष्टुरिवांजसा ॥ भाग. २—९—१.

द्वितीयःप्रश्नः. अविद्योच्छेदोपलक्षितः पूर्णानंदरूप आत्मा मोक्ष इति अद्वैतिनोवदंति. मोक्षस्तुकाचित्स्थितिः सा जडात्मिका आत्मातु चेतनः एतयोः कथं समन्वयः.

उत्तरं. मो० शामण्णाचार्याः प्रकृतस्थितिर्जडात्मिका नैं भवति ॥ प्रकृतस्थितेः आत्मस्वरूपत्वांगिकारात् ॥ भेद-व्यवहारस्तु तन्मतेजीवब्रह्मणोरैक्यमिति व्यवहारवदुपपद्यते ॥

कूटा० शामाचार्याः अविद्यास्तमयोमोक्ष इत्यंगीकारान्मोक्षस्य ब्रह्मस्वरूपत्वांगीकाराच्च समन्वयः ॥ **अत्र प्रमाणं.** माया-वादखंडनाख्य प्रकरणे परमतदूषणायोपन्यस्तातन्मतीया 'यथाह' आत्मैवा ज्ञानहानिः, वृत्त्युपलक्षित आत्मामोक्ष-इत्यंगीकारे जीवन्मुक्तौ प्रसंगइत्येषादिगिति आत्मैवाज्ञान-हानिरिति पक्षांगीकृत इत्याद्युक्तयः ॥

मन्यारगुडि रामाचार्याः. अविद्यास्तमयोमोक्षःसासंसार उदाहृतः इत्युक्तेः अविद्योच्छेदोपलक्षितात्मत्वावस्थामुक्तिः तदुपलक्षित आत्मामुक्तः.

यादवेन्द्राचार्याः. अद्वैतिनः अविद्योच्छेदोपलक्षितः पूर्णानंद रूप आत्मामोक्ष इति वदंति किं च मोक्षः काचित् स्थितिः न किं च द्वित्वरहित आत्मैवेति च वदंति. विशिष्टाद्वैतिनस्तु बंधनाशपूर्वक सारूप्य सालोक्य सामीप्य सायुज्य प्राप्तिर्मोक्ष इति वदंति. द्वैतिनस्तु तत्तत्स्वरूपयोग्यतानुसारेण जीवानां स्वरूपात्मकानंदसंसारनित्यदुःखानां अनुभवं मोक्ष इति वदंति. कृष्णमतीयास्तु बंधनाशपूर्वकः सुखानुभवः मोक्ष इति वदंति.

३. प्रश्नः तमोयोग्याः मोक्ष कांक्षिणो भवन्तीति केचित्. न भवन्तीत्यन्ये. तत्प्राप्तयेयतंतीत्यपरे, न यतन्तीत्यन्ये द्वैतिनः अवदन्. अस्मिन्नर्थे किं प्रमाणं?

उत्तरं मक्का० रामचंद्राचार्याः तमोयोग्याः मोक्षकांक्षिणोभवन्ति यतन्ते च ॥ तदुक्तं महाभारततात्पर्यनिर्णयेनवमे 'तेतम-

स्सुमहदास्थिताविमुं पद्मसंभवमवेक्ष्य चोचिरे । भूरि पापकृति नोऽपि निश्चयान्मुक्तिमाप्नुम उदारसद्गुण । साधनोपचय-कांक्षिणो हरौ शासतिक्षितिमशेषतोभवन् ॥ तथादशमे ' भवे-द्धिमोक्षोनियतंसुराणां नैवासुराणां स कथं च न स्यात् ॥ उत्साहयुक्तस्य च तत्प्रतीपं भवेद्धि राहोरिवदुःखरूपम् ॥

एवमेव **मन्ना०कृष्णाचार्याः**

तोरवी शामण्णाचार्याः. तमोयोग्यामोक्षाकांक्षिणएवभवन्ति तदुक्तं महाभारततात्पर्यनिर्णये १७ अध्याये ॥ अथप्रहस्य सौभराट्वचोजगाद्मागधम् ॥ + + + स्वधर्मएष नःसदा दृढप्रतीपता हरौ ॥ स्वधर्मिणोहताअपि प्रयामसद्गतिंध्रव-मिति ॥ अत्रप्रयामइत्यनेनेच्छाकार. दर्शित. ॥ हरिप्र-तीपताया यत्नमपि चक्रुरिनिस्पष्टमित्युपरम्यते ॥

कृ० शामाचार्याः. भूरिपापकृतिनोपीति तात्पर्यनिर्णयनवमा-ध्यायात्तमोयोग्यानां मोक्षेछा यत्नश्चास्ति ॥

अध्वर्यु कृष्णाचा० तमोयोग्या· मोक्षकांक्षिणो भव-न्ति तत्प्राप्तयेयततिच मोक्षस्यसुखरूपत्वात् सुखमेवमेस्या दुःखंमनागपिमाभूदितिनिखिलापेक्षितत्वाच्च अस्मिन्नर्थे ॥ श्रीमहाभारततात्पर्यनिर्णयःप्रमाणं ॥ तेसुराणकाः अंधनमो-योग्या इत्यस्य तेनचांधनमईयरासुराइत्युत्तरवाक्यं प्रमाणम्.

एवमेव. **कौ. मुरार्याचार्याः.**

तु. रंगेशाचार्याः तात्पर्यनिर्णये- ९. अ. ॥ अथकेचिदिति.

मन्या०रामाचार्याः अथकेचिदिति भारततात्पर्य निर्णयो क्त्या इच्छायत्नश्चास्तीति ज्ञायते ॥ दुःखरूपमोक्षापेक्षातुनास्त्यव अर्थत्वाभावात् सत्साधनंतु दुःख साधनत्वा ज्ञानादनुतिष्ठंति ॥

स्वा०रामचंद्राचार्याः तमोयोग्याः मोक्षकांक्षिणः तदर्थयतंते च मुगणका इत्यादि निर्णये ९ अध्या० तमोयोग्याःस्वसाधनं हरिप्रीति विरोधीनि ज्ञात्वैवानुतिष्टंति स्वधर्मएषनः सदा- दृष्टप्रतापनाहरौ स्वधर्मिणो ॥ हताअपि प्रयाम सद्गतिं ध्रुवं ॥ इति निर्णये.

यादवेंद्राचार्याः सर्वमतानुसारिणः सर्वेजीवाः मोक्षंप्राप्तुं यतंते. बंधनिवर्तने प्रयत्न सर्वेषा रागत भवत्येव. न तु दुःखा- विभावार्थं.

४ **प्रश्नः**. भगवान् विश्वस्य उपादानं, तथापि अविकारीति वि- शिष्टाद्वैतिनोवदन्ति. एवंविधोपादानत्वेन भगवतः विकारित्वं नेति च भाति इदंतथैववा ? अत्र किं प्रमाणम् ?

उत्तरं. एम्. आर. श्रीनिवासाचार्याः. ब्रह्म उपादानमप्यविकार्येव परस्य ब्रह्मणस्सर्वज्ञस्य सर्वशक्तेः कार्यकारणोभयावस्थायामपि स्वशरीरभूतचिदचित्प्रकारतया- वस्थितस्य एकस्यैव निमित्तत्वमुपादानत्वञ्चाविरुद्धमशरीरभूता चिद्वस्तु गतो विकार इति कार्यावस्थावस्थितस्यापि शरीरिणः परमात्मनोऽविकारित्वं सिद्धमेवचिदचिद्वस्तु शरीरिणा ब्रह्मण- एवोपादानत्वेपि ब्रह्मण्यपुरुषार्थ विकारास्पर्शप्रतिपादनाय हि ' अस्मान्मायीसृजते विश्वमेतत्तस्मिंश्चान्योमाययासन्निरुद्ध ' इति व्यपदेश. इति वेदान्तदीपेप्रकृत्यधिकरणे श्रीभाष्य- कार. ॥

कृटा०शास्त्राचार्याः प्रागविद्यमानायाः अवस्थायाः परमात्मन्यं- गीकारे मृदिप्रागविद्यमानायाः घटावस्थायाः अंगीकारेमृदः यथाविकारित्वं एवं परमात्मनोपीति निर्विकारोक्षरः शुद्ध इत्यादि प्रमाणविरोधश्च.

यादवेंद्राचार्याः भगवान् अविकारीति सर्वे वदंति. विशिष्टाद्वैतिनः भगवान् विश्वस्य उपादानकारणमिति च वदंति. भगवदुपादानत्वं तस्य अविकारित्वं न विरोधयतीति उपादान शब्दस्य विशेषलक्षणकल्पनद्वारा वदंति.

तोरवी० शामण्णाचार्याः उपादानत्वं नाम विकारि कारणत्वमेवनान्यत् ॥ यतींद्रमतदीपिकाप्रामाण्यात् ॥ यत्तु श्रुतप्रकाशभाव्यवस्था समानाधि करण प्रागवस्थावत्वमुपादानत्वमुक्तं तत्तु विकारित्वभिन्नमेव ॥ विकारोनामपूर्वावस्था समानाधिकरणोत्तरावस्थैव ॥ नान्यथा ॥ यथामृदः विकारो घटएव ॥ पूर्वावस्था मृदावस्था ॥ उत्तरावस्था घटावस्था ॥ तद्विशिष्ठत्व सामाधानाधिकरण्य संबंधेनेति ॥ एतदभिप्रेत्यैव यतींद्रमतदीपिकायां विकारयोग्यं वस्तूपादानमित्युक्तं ॥ नतस्य श्रुतप्रकाशविरोधः ॥ उपादानत्वलक्षण घटकदलाना पौर्वापर्येपिशब्दभेदेपि च प्रमेयवैलक्षण्याभावादिति सूक्ष्मदर्शिभिर्विभावनीयमिति प्रार्थये ॥ एवं विधोपादानत्वेपिनेश्वरस्य विकारित्व ॥ निरुक्तावस्था रूपस्य विकारस्य विष्णु शरीरभूतचिदचिद्वस्तुधर्मत्वादिति नात्राग्रहः ॥

मन्ना० रामाचार्योः ब्रह्मणोविकारित्वं नास्तीति विशिष्टाद्वैतिनां सिद्धांत. तदुक्त सुधायां ॥ केचित्तु गतानुगतिकनया ॥ एतानि सूत्राणि ब्रह्मणो जगदुपादानत्वपरतया व्याख्यायोक्त दूषणगणाद्भीताः सूत्रतात्पर्यं वर्णयंति ॥ परमसूक्ष्माच्चिच्छरीर ब्रह्मयोऽव्यक्तोतिष्ठन्नित्यादि श्रुतिसिद्धमितीत्यादिना ॥ विकारित्वानंगीकारे कुतस्तन्निराकरण मित्याशंक्य भास्करमतनिराकरणमित्यप्युक्तं ॥

५ प्रश्नः. क्रतवः द्विविधाः नित्याअनित्याश्चेति केचिदवोचन् अस्मिन्विषये किं प्रमाणं श्रुतिः स्मृतिः पुराणं वा?

उत्तरं. कां० मुरार्याचार्याः ज्योतिष्टोमात्यग्निष्टोमोक्थ्यषोळश्यतिरात्रवाजपेयाप्तोर्यामानित्याः ॥ अन्ये अनित्याः ॥ वसते वसंते ज्योतिषायजेतेत्यादिश्रुतयः अत्रप्रमाणं.

न्यापेरामचन्द्राचार्याः मतमंस्थांतर्भूताग्निष्टोमादिक्रतूनां नित्य कर्मांतर्भूतत्व – पौंडरीकादीनां अनित्यत्वं – गर्भाधानपुंसवनेत्यादि गौतमसूत्रे अ० ७ पत्र १०. चत्वारिंशत्संस्कारेषु अग्निष्टोमादीनापरिगणनेन नित्यत्वावगमात् – पौंडरीकादीनां तद्बहिर्भूतत्वेनाानित्यत्वमुच्यते.

तु० रंगेशाचार्याः. आपस्तंभ सूत्रे - प्र. ख ॥ सर्वक्रतूना अग्नयः सकृदाहिता ॥ क्रतव. क्रियंत इति आहवनीयसाध्यानि अग्निकर्माण्युच्यते ॥ क्रतुपदेन अग्निसाध्यं कर्म अभिधीयत इति ॥ गी० भा० ९ अ० अहक्रतुरहंयज्ञ इत्यत्र क्रतवो अग्निष्टोमादय इत्युक्तेश्च ॥ दीक्षाद्यात्मकःक्रतुरनित्यः ॥ अकरणे प्रत्यवाया श्रवणात् ॥ गी० ९. ज्योतिष्टोमेन स्वर्गकामोयजेतेति श्रुतिः त्रैविद्यामांसोमपाःपूतपापाः यज्ञैरिष्ट्वास्वर्गतिं प्रार्थयंते ॥ ते पुण्यमासाद्य सुरेंद्र लोक अश्नंति दिव्यान्दिविदेवभोगान् ॥ २० ॥ ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्य लोकं विशंति ॥ एवं त्रयी धर्ममनुप्रपन्नागतागतं काम कामालभंन्ते ॥ २१ ॥ भा० ३ अ० १ पा० ८ अ०. कृतात्ययेनुशयवान्दृष्टस्मृतिभ्यां ॥ तत·शेषेणसं लोकमायातपुन कर्मकुरुते पुनर्गच्छति पुनरागच्छतीति श्रुतेः ॥ भुक्तशेषानुशयवानिमां प्राप्य भुव पन· ॥ कर्मकृत्वा पुनर्गच्छत्यनरायाति नित्यश इति स्मृतेश्च ॥

कृ० शामाचार्याः फलकामनयाकृताः अनित्याः निष्कामाः नित्याः अत्रप्रमाणं कृष्णामृतमहार्णवे ॥ निष्कामंकामपूर्वंतु निवृ-

त्तमिह चोच्यते ॥ निवृत्तंसेवमानन्तु ब्रह्माभ्येति सनातनं ॥ अतीतानागतज्ञानी त्रैलोक्योद्धरणक्षमः ॥ एतादृशोपिनाचार श्रौतं स्मार्तं परित्यजेत् ॥ अग्निहोत्रादेःकर्तव्यत्वे प्रमाणं अग्निहोत्रादितु तत्कार्यायैव तद्दर्शनादिति सूत्रं ॥ अग्निहोत्राद्यपि मोक्षानुभावार्येवेतिभाष्यं च ॥ स एनमविदित. । यदिहवा अप्यनेवं विन् ।॥ ज्ञानी च कर्माणि ।। कुर्वन्नेवेह-कर्माणि ।। यस्याग्निहोत्रमदर्शपू ।। अपामसोम ।। अमृतावा-वसोमपा भवति ।। अथामृतानि कर्माणि ।॥ प्रातरुत्थायाथ संध्यामुपासीत यत्संध्यामुपासते ब्रह्मैव तदुपासतेऽथ देवान्न-मेज्जुहुयाद्दद्यानावर्तयीतनान्यत्किचिदाचरेन्नसुरांपिबेन्नपलांडु-भक्षयेन्नभृशवदेन्नविस्मरेदात्मानं सोमं पिबेज्जुनशेषेण वर्तयेदिति नित्यत्व बोधक श्रुतिसमुदायः ॥ यज्ञदानतपःकर्म यस्य वेदश्चेत्यादयः स्मृतयश्च ॥

अध्वर्यु कृष्णाचार्याः यथा अहरहःसंध्यामुपासीत पाणिग्रह-णादि गृह्यं परिचरेत् इत्यादि प्रमाण मित्थाना संध्यावदनो-पासनादीनां नित्यत्वं तथावसते वसंते ज्योतिषायजेतेत्यादि प्रमाणबलातज्योतिष्टोमोग्निष्टोम उक्थ्यःषोडशी वाजपेयोति रात्रो अप्तोर्यामश्चेति सप्त संस्था. नित्याः अन्ये सर्वतोमुखा-दयोनित्याः.

मन्या० रामाचार्याः ज्योतिष्टोमादयः नित्याः वसंते वसंते ज्योतिषायजेतेति निमित्त विशेष मनभिधाय काल विशेष कर्तव्यत्वोक्तेः एतदेवहि नित्यत्व यत्कारण विशेषमनपेक्ष्य सर्वान्प्रत्यपि एकस्मिन्नेव काले कर्तव्यत्वेन प्राप्तिः । कारीर्यादयः अनित्याः फलकामनामपेक्ष्य यस्य तत्कामना तस्यैव अनियतकाले कर्तव्यत्वेनवृष्टिकामः कारीर्यायजेतेति वाक्येन विधानात् । एतच्च नित्यानित्य लक्षणं निर्णय सिंध्वादौज्ञायते ।

मन्ना० रामचन्द्राचार्याः क्रतुषु सोमसंस्थाःसप्तैव नित्याः अग्निष्टोमो अत्यग्निष्टोमो उक्थ्यःषोडशी वाजपेयो अतिरात्रः अप्तोर्याम इति ॥ तत्र प्रमाणं जायमानोवै ब्राह्मण स्त्रिभिरृण वान्जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य इति ॥ अनया श्रुत्या जन्मारभ्य विद्यमान ऋण परिहार प्रतिपादनात् नैत्यमिकंहानदणत्रयं संस्तुतमिति वशिष्ठवचनेन सायं प्रातरत ऊर्ध्वं यावज्जीवमग्निहोत्रं जुहोति इत्यापस्तम्भगृह्यवचनेन वसंते वसंते ज्योतिषायजेत ॥ अग्निहोत्र्यपविध्याग्नीन्ब्राह्मण कामकारत. ॥ चांद्रायण चरेन्मासमवीरहत्यासमहित दितिमनुवचनेऽनित्यत्वं अभ्यतेक्षामवन्यादयोनैमित्तिका अनित्या ॥ एवमेव **मन्या० कृष्णाचार्याः.**

यादवेंद्राचार्याः. क्रतवा नित्यानित्यत्व विषये द्वैताद्वैत विशिष्टाद्वैतिन एको न भवंति. भिन्न भिन्न तया वदंति. निरवकाश प्रमाणानि नोदाहरंति. कृष्णमतीयास्तु क्रतवः अनित्या साम अनश्नता निषिद्धमितिच वदंति. भृगुसंहिता भागवतादिपुराणानिच अस्मिन्नर्थे प्रमाणमितिच वदंति. तथाहि,

मनुस्मृतौ ५ अ० वर्षे वर्षेश्वमेधेन यो यजेत शतं समाः ॥ मांसानिच नखादेद्य नयोः पुण्यफलं सम ॥ ५३ ॥ फलमूलाशनैर्मेध्येर्मुन्यन्नाना च भोजनैः ॥ न तत्फलमवाप्नोति यन्मांसपरिवर्जनात् ॥ ५४ ॥ मामभक्षयितामुत्र यस्य मांसमिहाद्म्यहं ॥ एतन्मांसस्य मासत्व प्रवदंति मनीषिणः ॥ ५५ ॥

भागवते ११ स्क० अ० ५ श्लो० ११. लोके व्यवायामिषमद्यसेवानित्यास्तुजंतोर्नहितत्रचोदना ॥ व्यवस्थितिस्तेषु विवाह यज्ञ सुराग्रहैरासु निवृत्तिरिष्टा ॥

मनुस्मृ० ११ अ० पुण्यान्यन्यानि कुर्वीत श्रद्दधानो जितेंद्रियः ॥
नत्वल्प दक्षिणैर्यज्ञैर्यजेतह कथंचन ॥ ३९ ॥ इंद्रियाणि
यशः स्वर्ग आयुःकीर्तिं प्रजाःपशून् ॥ हंत्यल्पदक्षिणो
यज्ञस्तस्मान्नाल्पधनोयजेत् ॥ ४० ॥

भागवते १ स्कं० १८ अ० कर्मण्यस्मिन्ननाश्वासे धूम धूम्रात्मनां
भवान् ॥ आपाययतिगोविंदपाद पद्मासवं मधु ॥ १२ ॥
३ स्कं० ३२ अ० अथ यो गृहमेधीयान् धर्मानेवावसन्गृहे ॥
काममर्थंच धर्मांश्च दोग्धिभूय पिपर्तितान् ॥ १ ॥ सचापि
भगवद्धर्मात्काममूढः पराङ्मुख. ॥ यजतेक्रतुभिर्देवान् पितॄंश्च
श्रद्धयान्वित. ॥ २ ॥ तच्छ्रद्धयाक्रांतमतिः पितृदेवव्रत
पुमान ॥ गत्वाचांद्रमसं लोक सोमपाः पुनरेष्यति ॥ ३ ॥
यदाचाहींद्रशय्याया शेतेऽनंतासनो हरिः ॥ तदा लोकालयं-
यान्तित एते गृहमेधिना ॥ ४ ॥ येत्विहासक्त मनस कर्मसु
श्रद्धयान्विता ॥ कुर्वन्त्यप्रतिषिद्धानि नित्यान्यपि च
कृत्स्नश ॥ १६ ॥ रजसाकुंठमनस कामात्मानो जितेंद्रिया
पितॄन्यजंत्यनुदिन गृहेष्वभिरताशया ॥ १७ ॥ त्रैवर्गिकास्ते
पुरुषा. विमुखाहरिमेधस ॥ कथायां कथनीयोरुविक्रमस्य
मधुद्विप ॥ १८ ॥ दक्षिणेनपथार्यम्ण पितृलोक व्रजन्ति
ते ॥ प्रजामनुप्रजायन्ते स्मशानान्तक्रियाकृतः ॥ २० ॥
ततस्तेक्षीण सुकृता. पुनर्लोकमिमंसति ॥ पतति विवशादेवै
सद्योविभ्रशितोदया. ॥ २१ ॥ ४ स्कं० १९ अ० अलंत-
क्रतुभिःस्विष्टैर्यद्भवान् मोक्षधर्मवित् ॥ ३२ अ० २०
श्रीभगवानुवाच एषतेकार्षीद्भंक्तुंहयमेधशतस्यह ॥ क्षमापयत
आत्मानममुष्यक्षतुमर्हसि ॥ २ ॥ सुधियस्साधवो लोके
नरदेव नरोत्तमाः ॥ नाभिद्रुह्यंति भूतेभ्यो यर्हिनात्मा

कळेवरं ॥ ३ ॥ पुरुषायदिमुह्यंतित्वाद्वशादेव मायया ॥
श्रम एव परंजातो दीर्घया वृत्यसेवया ॥ ४ ॥ समाः
ममानोत्तम मध्यमा धमः सुखेच दुःखेच जितेन्द्रिया शयः ॥
मयोपक्रमाखिलल्लोक संयुतो विषत्स्व वीराखिल लोक
रक्षण ॥ १३ ॥ श्रेयःप्रजा पालन मेव राज्ञो यत्सां
परायेसुकृतात् षष्टमंशं ॥ हर्तान्यथा हत पुण्यः प्रजानाम-
रक्षिता करहागेत्रमत्ति ॥ १४ ॥ अ० २७ ईजेचक्रतु-
भिर्घोरैर्दीक्षित पशुमारकैः ॥ ११ ॥ अ० २८ तं यज्ञ
पशवोनेन मंत्रता ये दयालुना ॥ कुठारैश्छिछि दुःकुद्धाश्चरं-
तोमीव मन्यनत् ॥ २६ ॥ अनंतपारेतमसिमग्नो नष्टस्मृतः
समाः ॥ शाश्वतीरनुभूयार्तिप्रमदा संगदूषितः ॥ २७ ॥
तामेव मनसा गृण्हन् बभूव प्रमदोत्तमा ॥

६. प्रश्न. उपनयनात्मककर्माणिकानि अत्र कान्यंगानि किमङ्गी ?

उत्तरं गं आर. श्रीनिवासाचार्याः स्मृतिषुअष्टवर्षं ब्राह्मणं
उपनयीत - गर्भाष्टमेषु ब्राह्मणमुपनयीत गर्भाष्टमेष्टमेवाब्दे
ब्राह्मणस्योपनायनमित्यादिभिः उपनयनस्यविधानादेवस्यत्वा
सवितुः प्रसव उपनयेसाविति एकाग्निकाण्डमन्त्रेणानीय-
क्रियमाण कर्मप्रधानम् - इतराणि वपनादीन्यङ्गानि --
उपनयनार्थतया विधानात् - उपनयनस्य प्रधानस्यापि उपा-
कर्मापेक्षयाङ्गत्वमस्त्येव ॥

मत्ता० रामचन्द्राचार्याः गायत्र्युपदेशो आचार्यसमीपे
नयनहोमः मेधाजननं एतानि उपनयनसंज्ञानि तत्र
गायत्र्युपदेशः प्रधानं अन्यान्यंगानीति धर्मसिंधावुक्तं.

एवमेव मन्या ० कृष्णाचार्याः.

कूटा० शामाचार्याः गायत्र्युपदेशः अंगी इतराण्यंगानि अत्र ॥

धर्मामिश्रौ । उपनयनंनाम आचार्यसमीपनयनांगकः गायत्र्युपदेश प्रधानः कर्मविशेषः ॥ उपनयनपदस्य योगरूढत्वात् ।

कौ०मुरार्याचार्याः संकल्पपूर्वकब्राह्मणसमाराधन देवताप्रतिष्ठा-विहितहोमः शिरःकुशलीकरणं यज्ञोपवीताजिनमेखलादंडा-दिधारणं ब्रह्मोपदेशः देवतोत्थापन मेधाजननांतानि कर्माणि उपनयनात्मककर्माणि तत्रब्रह्मोपदेशः अंगी अन्यान्यंगानि अस्मिन्नर्थे आश्वलायनसूत्रं तद्वृत्तिश्च प्रमाणं बहुविधैश्चरितैरि-ति चारुभिरित्यादि. इति गुरोस्त्रिजगद्गुरुशिक्षणइत्यंता, पण्डिताचार्योक्तिश्च प्रमाणम्. एवं **अध्वर्यु कृष्णाचार्याः**

मन्या ० रामाचार्याः. मात्राभोजन क्षौरवस्त्र यज्ञोपवीतधारण होमांजल्यवक्षारण गायत्र्युपदेशाद्यात्मकं उपनयनं । तत्र गायत्र्युपदेशः प्रधानं तदर्थत्वादितरेषां । अन्यान्यंगानि । अत्र चोपनयनं व्याख्यास्याम इत्याद्यापस्तब सूत्रं तद्व्याख्या-नादिकं च प्रमाणम् ।

तु० रंगेशाचार्याः गुरोस्समीपनयनकर्मकः— गायत्र्युपदेश-प्रधानकः उपनयनाख्यः कश्चन संस्कारः ॥ ऋग्भाष्ये ॥ जप्येनैवतुसंसिद्ध्येद्ब्राह्मणोनात्र संशयः । कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मणउच्यत इत्युक्तेः ॥ सअंगी ॥ कुशली-कृतशिरसमिति क्षुरकर्म-होमः-मौंजीत्रिवृत्समाश्लक्ष्णेत्यारभ्य भवत्पूर्वंचरे द्भैक्षमित्यन्त — द्वितीयाध्यायेमनूक्तानि मेधा-जननान्तानि च अंगानि ॥ एषप्रोक्तोद्विजातीनामौपनायनिको विधिरिति मनुस्मृतेः ॥

तोरवी शामण्णाचार्याः अग्निसाक्षिक गुरुसमीपनयनमंगि मंत्रपूर्वकाजिनदंडकमंडलुधारणादीन्यंगानि ॥

खा० रामचं० क्षौर वस्त्रधारण मेखला दंडग्रहण अंजल्यवक्षा-

लन मूर्यप्रदर्शन होम गाय,युपदेश मेधाजननांत कर्मणि उपनयनशब्दः । अत्र गाय,युपदेशोद्देश्यक गुरुसमीपगमनसाधन गृह्योक्तव्यापारः उपनयनशब्दार्थोमुख्यतः गाय,युपदेशः अगी तदितराण्यंगानि ॥ गृह्योक्तकर्मणायेनसमीपं नीयते गुरोः । बालोवेदायतद्योगाद्बालस्योपनयं विदुरिति गोभिलभाष्यं प्रमाणम् —

अलंकृतकुमार कृशलीकृतशिरसमित्याद्याश्वलायनसूत्रेण च होमाद्यननरगाय,युपदेशप्रतिपादनात् - उपदेशस्य अंगित्व सूच्यते - सूत्र १–१९–८ आरम्य १–२२–२१ पर्यतम्.

यादवेंद्राचार्याः. गुरुणाकर्तव्योपदेशः उपनयनात्मककर्मणां मध्ये अगी ॥ वटोस्स्वसमीपे प्रापणं तदर्थकर्तव्यकर्माणि अंगानि ॥ अंगित्व तु यस्य अकरणे कृतं अन्यत्सर्वे अनुपयुक्तभवति तदेव.

७ **प्रश्न.** उपाकर्मात्मककर्माणि कानि तत्र कान्यंगानि किमगी ?

एम्. आर. श्रीनिवासाचार्याः. उपाकर्म - उपाकरणं - इत्यभिन्नार्थं तच्च श्रावण्यादिषु विहितकालेषु यथाशास्त्रमुपक्रम. अधीतस्यपठनं वा - तच्चोपनयन काण्डऋषितर्पण होमपूर्वकम् संस्कारपूर्वंग्रहणस्यादुपाकरणं श्रुतेरित्यमरात् - संस्कारपूर्वमुपनयनपूर्वकमिति तद्व्याख्यानाच्च - एतस्याङ्गान्युपनयन क्षौरकाण्डर्षितर्पणादीनि अष्टवर्षब्राह्मणमुपनयीत तमध्यपयेदिति स्मृतेः - वेदाध्ययनमङ्गि ॥

मन्ना० रामचन्द्राचार्याः तत्तच्छाखाप्रवर्तकऋषिहोमः वेदादि होमः वेदारंभणंचेत्यादीनि उपाकर्मात्मकानि ॥ तत्र वेदारंभणं अंगिअन्यान्यंगानि ॥ श्रावण्यां प्रोष्ठपद्यांवाप्युपाकृत्य यथाविधि ॥ युक्तःच्छंदांस्यधीयीतमासान्विप्रोर्धपंचमानिति गार्ग्यो

के: ॥ उपाकरणे समापने च ऋषिर्यः प्रज्ञायते इत्यापस्तंभ सूत्रीय सुदर्शनभाष्ये उपाकरणं श्रावण्यां पौर्णमास्यां विहित होमपूर्वकमध्ययनारंभ इति प्रतिपादितत्वात ॥ अत्रांगत्व प्रधानापूर्वसाधनापूर्वजनकत्वमिति भाट्टदीपिकायामुक्तं ॥

एवमेव **मन्ना०कृष्णाचार्याः**

कूटा० शामाचार्याः अथातः श्रावणेमासि श्रवणर्क्षयुतेदिने श्रावण्यां श्रावणेमासि पंचम्यां हस्तसंयुते दिवसेविदधीतैतदु-पाकर्मयथोदितम् ॥ अध्यायोपाकृतिकर्यात् ० ॥

सूत्रं च अथातोध्यायोपाकरणमोषधीनांप्रादुर्भवे श्रवणेन श्रा-वण्यां पंचम्यां हस्तेनवा ॥

धनिष्टासंयुतंकुर्याच्छ्रावण्यां कर्मयद्भवेत् तत्कर्मसकलंज्ञेयमुपा-करणसंज्ञितमिति कानीत्यस्योत्तरं ॥ अत्र वेदोपक्रमः अंगी ॥ इतराण्यगानि ॥

कौ० मुरार्याचार्याः पुण्याहवाचनं संकल्पपूर्वकमण्डलकाण्डादी-नां ऋषि देवता ध्यानावाहनादि षोडशोपचारपूजनं तत्र विहितहोमः यज्ञोपवीतधारणं वेदारंभणंचेत्येतानि उपाकर्मा-त्मककर्माणि तत्रवेदारंभणमगी अन्यान्यंगानि अत्रआश्वला-यनापस्तंबसूत्राणि तद्वृत्तय श्चप्रमाणानि ॥ उत्सर्जनात्मक कर्माण्यपिप्रश्नाभिप्राय:श्चेत् तत्राप्येवमेव अधीतानां वेदाना-मुत्सर्जनमंगी अन्यानि गणस्नानतर्पणान्तानि अंगानि अत्रापि पूर्वोक्तान्येव प्रमाणानि कोशानानुकूल्यात् स्पष्टं न लिखितानि. **एवमेव अध्वर्यु कृष्णाचार्याः** ॥

अन्या० रामाचार्यः ऋषिपूजन तर्पण होम वेदारंभ-रूपाणि कर्माणि उपाकर्मात्मकानि तत्र वेदारंभः अंगि । अन्यान्यंगानि । अत्रप्रमाणं अन्येषां तदर्थत्वरूपं अनुमान ।

उपाकरणे समापने च ऋषिर्यः प्रज्ञायते इत्याद्यापस्तंब-सूत्रादिकं च ।

मोरवी शामण्णाचार्याः अग्निसाक्षिकवेदस्वीकारएव उपाकर्म तदेवांगि ॥ तदुक्तमाश्वलायनसूत्रेतृतीयाध्याये ॥ अथाध्यायोपाकरणमित्यादिना ॥ होमादीनि अंगानि ॥ तदुक्तं तत्रैव ॥ श्रावणेन श्रावणस्यपंचम्यां हस्तेनवाज्यभागौहुत्वा न्याहुतीर्जुहुयादित्यादिना ॥

स्वा० रामचन्द्राचार्योः महानद्यांस्नान ऋषितर्पण मण्डल देवताहोम दधिसक्तुप्राशनमार्जनवेदारंभणादीनां उपाकर्म-शद्ववाच्यत्वं-तत्रवेदारमणमंगी-मंडलदेवताहोमादीन्यंगानि । तत्रप्रमाणं-आश्वलायनसूत्रे ३-५-१

अथानोध्यायोपाकरणं १-आरम्य-१२ पर्यंतभाष्यं अध्ययन-मध्यायस्तस्योपाकरण प्रारंभोयेनकर्मणा तदध्यायोपाकरणं । इति अत्र अध्ययनस्यप्रारंभः येनकर्मणेत्यनेन प्रारंभस्य अंगित्वं कर्मणां साधनत्वेन अंगत्वंचसूच्यते.

यादवेंद्राचार्याः. उपाकर्मात्मककर्माणि वेदद्रष्टृ पूजनपूर्वक प्रतिसांवत्सरिक वेदारंभः अयमारंभएव अंगी अन्यान्यंगानि आश्वलायनगृह्यसूत्रं भाष्यंच उपाकर्मकर्मणि प्रयुक्तानिवा-क्यानिच अत्रप्रमाणं—तथाहि आश्व०गृ०सू० ३—५—१ अथातोध्यायोपाकरणं ॥ १ ॥ भाष्यं-अध्ययनं अध्यायः तस्य उपाकरणं प्रारंभोयेनकर्मणा तदध्यायोपाकरणं ॥ उपाकर्मप्रयोगे उपाकर्मांगऋषिपूजनं उपाकर्मांगविहितहोमे विनियोगः

प्रश्न. ८. "वर्जनीयाप्रयत्नेन सप्तमीसहिताष्टमी" इति ब्रह्म-वैवर्तपुराणवाक्यबाधः केन विशेषप्रमाणेन भवति ?

उत्तरं. मन्या०रामचन्द्राचार्याः निशीथव्यापिनीयास्यात्मोपोष्याह्यष्टमीव्रते ॥ दिनद्वयेनिशीथे च व्यापिनीस्याद्यदाष्टमी । पूर्वामुपोष्य कुर्वीत परेद्युःपारणं निशि ॥ रोहिण्यावाथसोमेन बुधेनाप्युत्तरातिथिः ॥ युक्तातदापरादिने प्रशस्तमुपवासनं ॥ इति सामान्यतः प्रोक्तस्तिथीनां निर्णयंबुधैः ॥ अलाभेतु-विशेषस्य सामान्यं बलवत्तरं ॥ कर्मणोय स्ययःकालस्तत्काल-व्यापिनीतिथिः ॥ ग्राह्यासाहिविशेषेण तत्राधिक्येन निर्णयः ॥ दिनद्वयाष्टमीतत्र क्वचिदाधिक्य योगतः ॥ पूर्वापरव्यवस्था-स्यात्साम्ये पूर्वैवशस्यते ॥ इति वाराह विशेषवचनेनकार्या-विद्धापि सप्तम्या रोहिणीसहिताष्टमीतिछलारीयोक्तवचनेन च सावकाशस्य ब्रह्मवैवर्तवचनस्य बाधः ॥ तस्य सावकाशत्वं-तुपरादिने निशीथव्याप्तिवारनक्षत्रयोगसमाहार विषयेज्ञेयं ॥

एवमेव **मन्या०कृष्णाचार्याः**

कूठा०शामाचार्याः कार्याविद्धापि सप्तम्या रोहिणीसाहिताष्टमी तिपाद्मवचनं इति निर्णयसिंधौ.

सप्तमीसाहिताष्टम्यां निशीथे रोहिणीयदि । भावितासाष्टमी-पुण्यायावच्चन्द्रदिवाकरावित्यादि प्रमाणाविशेषैर्बाधः : ॥
अष्टम्याः अर्धरात्र व्याप्तिर्मुख्याऽतः सप्तमीवेधेपिग्राह्या-वाष्टमी ॥ वेधनिषेधस्तु अर्धरात्रव्याप्त्यभावविषयं ॥

मन्या०रामाचार्याः ग्राह्यासाहिविशेषेण तत्राधिक्येन निर्णयः । द्विनाडीसंमितं प्रोक्तं मध्यरात्रादध.परं ॥ दिनद्वयेष्टमीतत्र क्वचिदाधिक्य योगतः ॥ पुर्वापरव्यवस्थास्यात्साम्ये पूर्वैव-शस्यते ॥ रोहिण्या बुधसोमाभ्यां युक्तास्वल्पापि गृह्यते ॥ तदोत्तराप्रकर्तव्या निशीथ व्यापिनीयतः ॥ वारनक्षत्रयोगेन नक्षत्रं बलवत्तरं ॥ निशीथ व्यापिनीपूर्वापरस्मिन्दिवसेयदि ॥

रोहिणी बुधसोमाभ्यां युज्यमाना निशीथगा ॥ तस्यां कृष्णं-मुसंपूज्यनिशीथे विधिवन्नरः इति ॥ छलारियेप्प्येवमेवोक्तं ॥

कौ०मुरार्याचार्यो: योगीश्वर: अर्धरात्रादधश्चोर्ध्वं एकार्ध-घटिकान्विता ॥ रोहिणीचाष्टमीग्राह्याह्युपवासव्रतादिष्विति ॥ येकार्धघटिकान्वितत्वं नाम एकघटिकान्विता अर्धघटिकान्विता-चेत्यर्थं अधःपदेन सप्तमीयुक्तानां रात्रिपूर्वार्धावसानं ऊर्ध्वपदेन नवमीयुक्ताना रात्र्युत्तरार्धस्य आदिग्राह्यो तथाच सप्तमी संयुक्त रात्रि पूर्वार्धावसाने अष्टम्या अर्धघटिका घटिकाव्याप्ति वा नवमीयुक्ताया उत्तरार्धस्य आदौ अष्टम्या अर्ध घटिका घटिकाव्याप्तिर्वा निशीथव्याप्तिरित्युक्तं भवति एतादृशव्याप्ति-विधायक विष्णुधर्मोत्तरवचनेन ब्रह्मवैवर्त पुराण वचन बाधो-वक्तव्य इतिभाति दिनद्वयेपि निशीथव्याप्तौ अव्याप्तौ परदिने एव व्याप्तौवा ब्रह्मवैवर्तपुराण वचनोक्तारित्या पूर्वविद्धां परि-त्यज्य परातिथैवग्राह्या संकल्पप्रदोष कालव्याप्त्यो:सत्वात् अस्मिन्नर्थे वराहपुराणे त्रिकांडमंडन सागर संहितादीनि प्रमाणानिद्रष्टव्यानि.

एवमेव **अध्वर्यु०कृष्णाचार्या:**.

नोरवी०शामण्णाचार्या:वर्जनीयाप्रयत्नेनसप्तमी सहिताष्टमीति वचन निराबाधमेव ॥ ननुकार्या विद्धापि सप्तम्या रोहिणी सहिताष्टमीति वचनेनबाधइतिचेन्न ॥ भिन्नविषयत्वात् तथाहि॥ अष्टमीकृष्णसंयुक्ता राज्यर्धेयदिदृश्यते स एव मुख्यकालश्च तत्र जातःस्वयं हरिरित्यनेनार्ध रात्रिव्याप्ता रोहिणीयुक्ताऽष्टमी मुख्येति प्रतिज्ञातं ॥ एवं सति—उभयदिनेऽर्ध रात्रि निरुक्त मुख्यकालप्राप्तौ कथं व्रताचरणमित्या शंकायामाह ॥ वर्जनीया प्रयत्नेन सप्तमी सहिताष्टमीति ॥ तथा च पूर्वदिने मुख्यकाल सत्वेपि सप्तमी विद्धत्वा तत्कालं परित्यज्य परदिनेऽर्ध रात्र

व्याप्तकाल एव मुख्यतया ग्राह्य इति भावः ॥ अथैवं सति पूर्वदिने सप्तम्युपारितना रोहिणीयुक्ताचाष्टमी तद्दिने एवार्ध रात्रं व्याप्यपरादिने सायंकालादर्वाक् यदावर्तते तदा कथमाचरणं पूर्वदिने मुख्यकालस्य सप्तमीविध्दत्वात् परदिनेचार्धरात्रव्याप्त्यभावात् इत्याशंकायामिदं वचनं ॥ कार्याविद्धापि सप्तम्या रोहिणी संहिताष्टमीति ॥ तथाच पूर्वदिने रोहिणी योगार्ध रात्रव्याप्त्योस्सत्वात्परदिने तदभावात्सएव ग्राह्य इति भावः ॥ न च सप्तमीवेधदोषः ॥ तस्य दोषानापादकत्वात् ॥

खापे॰रामचंद्राचार्याः अर्धरात्रस्पर्शिनीस्यादष्टमीतु दिनद्वये ॥ नवमी संयुताकार्या प्रदोषत्व विशेषणात् ॥ दिनद्वयेर्धरात्रेतु यदाकृष्णाष्टमी भवेत् ॥ प्रदोष व्यापिनीग्राह्याकृष्णजन्मव्रेती परे ॥ इत्यादिवचनात् ॥ वर्जनीयाप्रयत्नेन सप्तमीसाहिताष्टमतिवचनं ॥ दिनद्वये निशीथ योगेपरदिने उपवास विधायकमिति. श्रीविद्याधीश श्रीपादप्रणीत जन्माष्टमी निर्णयेनाव गम्यते ॥

यादवेंद्राचार्याः गोकुलाष्टम्यनुष्ठानविषये ब्रह्मवैवर्तपुराणे निरवकाश प्रमाणानि संति तैः विद्धाष्टमी प्रयत्नेन वैष्णवैः वर्जनीया इति विहिता अस्य विधेः कुत्रापिस्पष्टबाधः न दृश्यते - वाराहपुराणोत्धृतचातुर्मास माहात्म्ये बाधः अस्तीति द्वैतिनो वदंति. वराहपुराणे एवं न दृश्यते. बहूनिमासस्थळपुराणाने ऋषिप्रोक्तानिनेति च भाति कुत्रापि निरवकाशतया विध्दाष्टमी ग्राह्या इति न दृश्यते.

मन्या॰रामचंद्राचार्याः वाराहवचनैः ब्रह्मवैवर्त वचनस्य साव काशस्य पूर्वदिने निशीथव्याप्त्यभावे. उभयत्र निशीथव्याप्त्य भावेउत्तरत्राधिक व्याप्तौ उत्तरत्र बुधसोम रोहिणीनामन्यत-

मयोगेवा पूर्वनिषेधपरतयामंकोचन रूपोबाधः ॥ तथा च वाराह वचनानि ॥ निशीथव्यापिनीयास्यात्सावोपोष्याष्टमी व्रते. दिनद्वये निशीथे च व्यापिनीस्याद्यदाष्टमी ॥ पूर्वामुपोष्यकुर्वीतपरेद्यु पारणं निशि । नहिदोषस्तदाप्रोक्तो निशीथोत्तरभोजने ॥ रोहिण्यावाथसोमेन बुधेनाप्युत्तरातिथिः ॥ युक्तातदापरदिने प्रशस्तमुपवासनं ॥ दिनद्वये यदानस्या न्निशीथ व्यापिनीतिथिः ॥ तदोत्तरामुपवसेद्यतस्सूर्योदय स्पृशा ॥ यां तिथिंसमनुप्राप्य उदयंयाति भास्करः ॥ सातिथि सकलाज्ञेया- दानाध्ययनकर्मसु ॥ इति सामान्यत प्रोक्तास्तिथीनां निर्णयोबुधैः ॥ अलाभेतुविशेपस्य सामान्यं बलवत्स्मृतं ॥ कर्मणो यस्यय: कालस्तत्कालव्यापिनीतिथिः ॥

प्रश्नः. ९. आततायी हन्तव्य इति यो विधिः सः अस्मिन् कलियुगे अविधित्वं प्राप्त इति केचित् महात्मानः बुधाः वदन्ति, हन्तव्य इति श्रीकृष्णः कलियुगे अवदत्. एतदेव श्रुतिस्मृतीतिहासेष्वपि उक्तं भवति न हन्तव्य इत्यस्मिन्नर्थे महात्मना किं प्रमाणम् ?

उत्तरं. **मन्ना० रामचन्द्राचार्याः** आततायिनमायांतं हन्यादेवा विचारयन्निति मनुस्मृत्युक्तो विधिः कलावपि प्रवर्त्तन एवनेत्यत्र प्रमाणा भावात् कलाव प्रवृत्तिं वदतामयमाशयः ॥ सामान्य विधेःकलौ ब्राह्मणोत्तम विषये प्रवृत्तौ सत्यां आततायि द्विजाग्र्याणां धर्मयुद्धेन हिंसनं ॥ एतान्धर्मान्कलियुगे वर्ज्यानाहुर्मनीषिण इति निर्णयसिंधू दाहृत आदित्य पुराण वचनेन संकोचः इति ॥ सामान्यतः प्रवृत्तविधेः कश्चित्संकोच मात्रेण नाविधित्वं तथा सति न हिंस्यात्सर्वाभूतानीति निषेधस्य विशेषशास्त्रेणाग्नीषोमीयपशौसंकोचेनानिषेधत्वा पातात् ॥ बंधनं द्रविणा दानं स्थानात्रिर्यातनं तथा ॥

एषहि ब्रम्ह बन्धूनां वधोनान्योस्ति दैहिक इति निषेधम्न् सार्वकालीन वधार्हापराधि ब्राह्मण विषयः नतु धर्मयुत्धहनन निषेधपरः तथा सति भारत युत्धे द्रोणाश्वत्थाम कृपैःसह युत्धस्याधर्मत्वापातात् ॥ परशुरामेण सह कृत भीष्मयुत्धस्याप्यधर्मत्वापाताच्च

कू० शामाचार्याः. आततायी वधार्हण इति प्रमाणाद्वध्य एव ॥ अवध्य इति महात्ममतंतु अततायिद्विजानान्नोधर्मयुद्धेपि हिंसनमितिप्रमाण प्रमितं ॥

मन्या० रामाचार्याः आततायि वधव्यतिरिक्त स्ववधपरिहारोपायाभावे आततायिद्विजवरः हन्तव्यः तत्सत्वेतु न हन्तव्य' इति आततायिनमायांतं हन्यादेवेति मनुवाक्य व्याख्याने उक्तं। आननायिद्विजाग्र्येण अन्यस्य वधकरणानंतरंतु तस्य वधप्रतिनिधिरेवकर्तव्यः अन्यथा प्रतिनिध्युक्ति वैयर्थ्यापत्तेः । इति वधतत्प्रतिनिधिवाक्य पर्यालोचनया गम्यते ।

कौ० मुरार्याचार्याः आततायिनमायान्तं हन्यादेवाविचारयन्निति विधिःकलियुगे श्रीकृष्णवाकयं श्रुतिस्मृतीतिहासोक्तिश्चयुक्त्यैव न हन्तव्य इति वक्तृणां महात्मनां अभिप्रायस्तु एतादृश गोब्राह्मणादि विषये दैहिक वधविवक्षया वधापरपर्याय निर्यापणादिरूप हननं तेषामपि इष्टमेवेति भाति बन्धनं द्रविणादानं स्थानान्निर्यापणंतथा ॥ एषहिब्रह्मबंधूनां वधोनान्योस्तिदैहिक- इत्युक्तत्वात् अन्यथा भगवद्वाक्यादि विरोधेन महात्मत्व विरोधात् ॥

एवमेव **अध्वर्यु० कृष्णाचार्याः**

मन्या० कृष्णाचार्याः आततायिवधः कलियुगे वर्ज्यइति निर्णय सिंधौ आदित्यपुराण वचनमुदाहृतं आततायि द्विजाग्र्याणां

धर्मयुद्धेनहिंसन ॥ दत्ताक्षतायाः कन्यायाः पुनर्दानं परस्य च ॥ एतान्धर्मान्कलियुगे वर्ज्यानाहुर्मनीषिण इति बन्धनं द्रविणादानस्थानान्निर्यापनं तथा ॥ एषहि ब्रह्मबंधूनां वधोनान्योस्ति दैहिक इति भागवत वचनने च पारिभाषिकवधः ब्राह्मण विषयेकार्यः ॥ मुख्यवधस्तुनकार्यः ब्रह्मबंधुः नहंतव्यः आततायी वधार्हणः ॥ मयैवोभयमाम्नातं इति भागवतोक्तेः ॥

नु० रंगशाचार्याः निर्णयसिंधौ उ.प. ॥ आततायि द्विजाग्र्याणां धर्मयुद्धेन हिंसन न युक्तमिति कलिनिषेध प्रकरणे उक्त वर्तते ॥ भा० १ स्क० ७ अ. सैनंपार्थार्हसित्रातुं ब्रह्मबंधुमिमजहीति-हनेत्युक्त्वा—ब्रह्मबंधुर्नहन्तव्य इति उत्तरत्र - नहनेत्युक्त - कृष्णाभिप्रायस्तु विप्राणा शारीरदंडोनास्तीति ज्ञात्वैव - अर्जुनेन मण्यपहार एव कृतो भासते ॥ दशमे ॥ विप्रकृतागसमपिनैव द्रुह्यतमामका ॥ घ्नन्त बहुशपत वा नमस्कुरुत नित्यश इति भगवद्वचनाच्च ॥ बंधनद्रविणादान स्थानान्निर्यापण तथा ॥ एष हि ब्रह्मबधूना वधोनान्योस्ति दैहिक इत्युक्तेश्च ॥ अन्यच्च ॥ विष्णुरहस्ये ३६. अ० शारीरदण्डोविप्राणा नार्हस्तस्मात्ततोन्यथा ॥ दंडयेद्विप्रजातीस्तु मानहान्यादिनानृपः ॥ भा. पा. रा१६ अ. एवञ्चैवनरश्रेष्ठरक्ष्या एव द्विजातयः ॥ सापराधानपिहितान्विषयान्ते विसर्जन ॥ विधीयते न शारीरं दंडमेषा कदाचनेति ॥ ब्राह्मणो न हंतव्य इति श्रुतेश्च ॥

म्हापे० रामचंद्राचार्याः आततायिनमायांतं हन्यादेवा विचारयन् इतिमनुवचनात्. आततायीहतव्य एव. ब्राह्मणश्चेन्न हन्तव्यः ब्रह्मबंधुर्नहंतव्य इति भागवत वचनात् ॥

यादवेंद्राचार्याः कलियुगे वेदादिभिः विहितानि कानिचित्कर्माणि निषिद्धानीति इदानींतनद्वैताद्वैतविशिष्टाद्वैतिनः वदंति. ते केचनश्लोकाः आद्यादि पुराणोत्धृताः इतिउदाहरंति. तेषुकेचः

आदौमहात्मभिः बुधैः एतानि निवर्तितानीत्युक्तं भवति. कलौ-जनिष्य माणानां आचारार्थमिति संकल्प्य व्यासेन प्रसिद्धी-कृताष्टादशपुराणानां मध्येकेष्वपि एतानि न दृश्यंते. एतानि वाक्यानि विज्ञानेश्वरयातिकालपर्यंतं नासन्निति दृश्यते. तेन कृतमिताक्षरादिग्रंथे एतानि न दृश्यंते. तत्कालानंतरं पुरुषै रचिताः श्लोकाइति स्पष्टमवगम्यते. अतः ते वेदादि प्रमाणानि निरोद्धुं अशक्ता एव. तान् प्रमाणतया कृष्णमनीषिणः न गृण्हंति. अतः आततायी सदा, कलिकालेपि हंतव्यएव.

प्रश्नः १०. प्रत्यक्षविषये प्रत्यक्षविरोधि शास्त्रं प्रमाणं वा न वा. अत्र किं प्रमाणम् ?

उत्तरं. मन्ना० रामचन्द्राचार्याः प्रत्यक्षविषये प्रत्यक्षविरोधिशास्त्रं शक्यार्थेनप्रमाणं तथाचोक्तमनुव्याख्याने ॥ यजमानप्रस्थरत्व यथानार्यः श्रुतेर्भवेत् ॥ पूर्वमीमांसायामपि आदित्योयूप इति वाक्यस्य प्रत्यक्षविरोधादेव लाक्षणिकत्वं स्वीकृतं ॥ न च चन्द्रप्रादेशत्वादिप्रत्यक्षमागमबाध्यंदृष्टमिति वाच्यं ॥ तस्यदूरस्थत्वादिदोषयुक्तत्वेन स्वार्थासाधकत्वात्त-दुक्तं तत्वोद्योते चन्द्रप्रादेशत्वादिप्रत्यक्षंदूरस्थत्वादिदोषयुक्त-त्वादपाद्विति ॥

कृ० शामाचार्याः प्रत्यक्षं द्विविधं आगमोपजीवकं आगमानुप-जीवकंचेति ॥ तत्रागमोपजीवकं प्रत्यक्षमुपजीव्यागमबाधेन अप्रमाणमेव ॥ यथा रामकृष्णादिरूपः भगवान् जननमरणा-दिदोषवानिति ॥ आगमेन रामकृष्णादिरूपाणामीश्वरत्वंगृ-हीत्वैवैतादृश प्रत्यक्षं जायत इत्यागमोपजीवकमेव तत्प्रत्यक्षं तद्विरुद्धत्वादप्रमाणं च । अनुपजीवकं तु प्रत्यक्षं जगत्सत्य-त्वग्राहितद्विरोधेन मिथ्यात्वप्रतिपादकागमानां प्रतीतार्थप्रच्या-वनलक्षणमप्रामाण्यंमृदब्रवीदित्यादिवचनानामिवांगीकार्यं ॥

मन्यारगुडी रामाचार्याः प्रत्यक्षविषये प्रत्यक्षविरोधिशास्त्रं न प्रमाणं । अतएव मीमांसकैः यजमानः प्रस्तरइत्यादौ यजमानादिशब्दानां तत्कार्यकार्यादौ लक्षणाश्रिता । अद्वैतिभिश्च तत्त्वमसीत्यत्रभागत्यागलक्षणाश्रिता ।। आचार्यैरपि न च प्रत्यक्षसिद्धमन्येनकेनापिबाध्यंदृष्टमित्यादिना । तत्वोद्योतेनतदुपपादनकृत ।

तारवीशामण्णाचार्याः प्रत्यक्षविषये प्रत्यक्षविरोधिशास्त्र म-प्रमाणमित्युत्सर्गः ।। यथा सत्यत्वेनाबाधित प्रत्यक्षसिद्धस्य जगत मिथ्यात्व प्रतिपादक सूतसंहितादिशास्त्रं ।। दूरस्थत्वादिबाधकमति तद्विरोधिशास्त्रम् प्रमाण यथा प्रादेशमात्र-परिमितिश्चन्द्रमा इति प्रत्यक्षबाधक चन्द्रमंडलपरिमाणाधिक्य-प्रतिकागम ।।

कां० मुगार्याचार्याः. मृदब्रवीत् आपोब्रुवन् यजमानःप्रस्तर इत्यादि शास्त्र प्रतीतार्थे अप्रमाण अर्थान्तरे प्रमाणं अस्मिन्नर्थे अभिमानिव्यपदेशस्तु विशेषानुगतिभ्यामित्यादि ब्रह्मसूत्रादीनि प्रमाणानि.

एवमेव अध्वर्यु कृष्णाचार्याः.

मान्नार० कृष्णाचार्याः. प्रत्यक्षविषये प्रत्यक्ष विरोधिशास्त्र मुख्यार्थेन प्रमाणं ।। तथाचोक्त मनुव्याख्याने ।। यजमान प्रस्तरत्वं यथानार्थं श्रुतेर्भवेत् ।। पूर्वमीमांसायामपि आदित्योयूप इत्यत्र गौणार्थकत्वं मृदब्रवीत् आपोब्रुवन् इत्यादे प्रत्यक्षमूलक जडत्वादि युक्ति विरोधादेव अभिमानि देवता परत्वं तथा तत्वमसीत्यादौ नाहं सर्वज्ञ इति प्रत्यक्ष विरोधा

देव विशेष्यमात्रपरत्वे परैरंगीकृतं अस्माभिश्चस्थानैक्यादिपर त्वं अंगीकृतं तदुक्तंमनुव्याख्याने ॥ स्वातंत्रेच विशिष्टत्वे स्थानमत्यैक्ययोरपि इति ॥

तु० रङ्गेशाचार्याः. मृदादीनां जडत्वेन वचनक्रियायाः चेतन धर्मत्वेन अनुभवासिद्धत्वात् ॥ एतादृशे प्रत्यक्षविरोधि मृदब्रवीत् आपोब्रुवन् तत्तेज ऐक्षत ओषधयः संव दन्तेत्यादि वचनानां प्रामाण्यन्तु कथमितिचेदुच्यते ॥ भाष्ये २ अ० १ पा० ३ अ- अभिमानिव्यपदेशस्तु विशेषानुगतिभ्यां मृदाद्यभिमानिदेवता तत्र व्यपदिश्यतेति ॥ विरोधोवाक्ययोर्यत्र नाप्रामाण्यं तदेष्यते ॥ यथाऽविरुद्धताचस्यात्तथार्थः कल्प्य एतयोरिति ॥ जिज्ञा-सु-अनुव्याख्यानयोः ॥ प्रत्यक्षादि विरोधतो गौणार्थस्यापि सम्भवात् ॥ अतात्पर्य पदार्थेपि न कल्प्यमविरोधत इति ॥ ६४ प्रतीतार्थस्य प्रत्यक्षादिविरोधादेव अग्निर्माणवक इत्यादेरिव अमुख्यार्थ कल्पनोपपत्तेऽरिति अभिमान्यभिमन्यमानयो ऐक्यव्यपदेशात् ॥ अन्यथामृन्नवक्री जडत्वादिति युक्ति विरुद्धेव न मृदादिवचनादेरमत्वापत्तेः ॥ असदभिधायकत्वे वेदस्याऽप्रामाण्यं प्रसज्येतेति ॥ पुत्रेतितन्मयतया तरवोपि नेदुस्तं सर्वभूतहृदयं मुनिमानतोस्मीतिच.

स्वा० रामचन्द्राचा० प्रत्यक्षविषये प्रत्यक्षविरोधिशास्त्रं न प्रमाणं नच प्रत्यक्षसिद्धमन्येनकेनापि बाध्यन्दृष्टमितितत्वोद्योतोक्तेः प्राबल्यमागमस्यैव जात्यातेषुत्रिषुस्मृतं उपजीव्यविरोधेतु न प्रामाण्यममुष्यहीति विष्णुतत्वनिर्णय धृत ब्रह्मतर्कवाक्यात् प्रत्यक्षविरुद्धार्थ प्रतिपादकस्य वेदत्वे अर्थांतर कल्पनं। पौरुषेयंत्वप्रमाणं

या॰ दवेंद्राचार्याः. प्रत्यक्षविषये यदि शास्त्रवाक्यं विरुद्धं भवेत् तर्हि तस्य शक्यार्थः न प्रमाणं तस्य लक्षणार्थो ग्राह्यः —

ऎं आर॰ श्रीनिवासाचार्याः प्रत्यक्षविषये प्रत्यक्षविरोधि न श्शास्त्रस्य प्रामाण्यं भवत्येव विधीयमानार्थस्तावक तया — दूषक तया वा — तथाहि — प्रजापतिः प्रजाअसृजतसाऽत्मन इत्यादीनां — स एतम्प्राजापत्यमजन्तूपरमालभेतेत्यादिना प्रजापशुकामस्य यज्ञेविधीयमानस्य तुपरस्यस्तावकतया - सोरोदीदित्यादिनाभि धीयमानस्य रोदनस्य रजतदक्षिणा यादुषक तया च प्राभाण्यमस्त्येव - एवमेवहिजैमिनिराह - विधीनांत्वेकवाक्यत्वात् स्तुत्यर्थेविधीनां स्युरिति। **माधवाचार्योपि**— विध्यर्थवादौ साकाङ्क्षौ प्राशस्त्यपुरुषार्थयोः। तेनैक वाक्यता तस्माद्वादानां धर्म मानता इति॥

प्रश्न. ११. भूतप्रियहितेहा सर्वेषां वर्णानां धर्मो वा किं प्रमाणम्.

उत्तरं. मन्नारगुडी रामचंद्राचार्याः सर्वभूत प्रियहितेहा सर्वेषा वर्णाना धर्मो न॥ किन्तु योम्या सर्वभूत प्रियहितेहा॥ "भगवन्निंद्या वेनो द्विजैस्तमपि पातित" इति भागवत वचनात्. "ये भूता विघ्नकर्त्तारस्तेनश्यन्तु शिवाज्ञया"॥ "गोब्राह्मणेभ्यो शिवंभव" त्विति प्रार्थनायाम्सर्वै क्रियमाणत्वाच्च॥ "क्षमा सर्वत्र धर्मोन पापहेतुश्च दुर्जन" इति निर्णय वचनमप्यत्र प्रमाण.

मन्ना॰ कृष्णाचार्याः सर्वभूत प्रियहितेहा सर्वेषां वर्णानां धर्मोन किंतुयोग्या सर्वभूतप्रियहितेहा ये भूता विघ्नकर्त्तारस्तेनश्यंतु शिवाज्ञया॥ गोब्राह्मणेभ्यः शिवंभवत्विति

प्रार्थनायाम्सर्वैः क्रियमाणत्वात् ॥ ताएता आपोवज्रीभूत्वा-
तानिरक्षांसिमदेहारुणर्द्वीपे प्रक्षिपति तेन पाप्मानमत्र-
घ्नुवंति इतिश्रुते. भगवन्निदयांवनो द्विजैर्स्तमसिपातित इति
भागवतवचनाच्च ॥ अहिंसा सत्यमस्तेयं अकामक्रोधलोभता
भूतप्रियहितेहाच धर्मोयं सार्ववर्णिकः ॥ इति भागवतोक्ते
अयमेवाभिप्रायः अन्यथा उक्तप्रमाणविरोधात्

कूडा० शामाचार्याः भूतानि द्विविधानि दुष्टान्यदुष्टानिच्च
दुष्टप्रियहितेहाअधर्मएव. अदुष्टप्रियहितेहाधर्म एव, यथा
व्याघ्र प्रियहितेहा ॥ ऋष्यादि प्रियहितेहा ॥ तत्रापि
व्याघ्रप्रियहितं यदिगोवधादिकम्स्यात् तदा अधर्मः, यदाभूत-
द्रोहि प्राणिविषयंस्यात्तदाधर्मः ॥

मन्या०रामाचार्याः. अहिंसा सत्यमस्तेयमकामक्रोधलोभता ॥
भूतप्रियहितेहा च धर्मोय सार्ववर्णिक. इति भागवतोक्ते
सर्वेषां वर्णाना धर्म एव ॥ सर्वेष्वित्यत्रयोग्य परतयासंकोच
कार्यः

तु ० रंगशाचार्याः श्री. भागवते. स्कं. भूतप्रियहितेहा च
धर्मोंयं सार्ववर्णिक इत्युक्तः ॥ भारते. आश्वमेधिके ३८. अ०
सर्वभूतहितं लोके सताधर्ममनिंदितमिति वचनात्

अध्वर्यु० कृष्णाचार्याः भूतप्रियहितेहासर्वेषांधर्मएव नतुसर्व
विषयिका किंतु सज्जनविषयिकैव अभिन्नर्थेम्वस्त्यम्तुमना
सकलसन्मंगलानिसंत्विनिसर्वपौराणिकरूढे. मत्वाद्बहुशिष्टा
कय प्रमाणं

एवं कौ०सुरायाचार्याः

लापे०रामचंद्राचार्याः भूत प्रियहितेहाच धर्मोयं सार्ववर्णिक.
इति भागवते स्कं ११। अ० १७। श्लो० २१ वचनात् सर्वे-
षां धर्म एव.

मोरवी० शामण्णाचार्याः भूत प्रियहितेहाच सर्ववर्णानां धर्मः ॥

यादवेंद्राचार्याः भूत प्रियहितेहा सर्वेषां वर्णानां धर्मएव. अस्मिन्नर्थे प्रमाण भाग० ११ स्कं० १७ अध्याये भूतप्रियहितेहाच धर्मोयं सार्ववर्णिकः इति ॥ २१ ॥

१२ प्रश्नः. भगवान् चेतनस्य सखा इति वेदे उक्तं, तत्सखित्वं किं रूपम् ?

उत्तरं. मन्नारगुडि रामचन्द्राचार्याः. यथावत्तयोपास्य मोचकरूपं सखित्व, इयं श्रुति सज्जीव विषयेति राघवेंद्र स्वामि कृत खण्डार्थे उक्तत्वात् तत्र नियामकं वाक्यशेषे, समाने वृक्षे पुरुषो निमग्नो अनीशयाशोचतिमुह्यमानः जुष्टं यदा पश्यत्यन्यमीशमस्य महिमान मिति वीतशोक इत्यत्र सेव्यत्वमोचकत्वयोरेव प्रतिपादनात् संदिग्धेतुवाक्यशेषादिति तयोरेव ग्राह्यत्वात्.

कूठा० शामाचार्याः उपकार्योपकारक भाव एव

मन्या० कृष्णाचार्याः यथा वत्तयोपास्यत्व मोचकत्वं रूपं सखित्वं इय श्रुति. सज्जीवविषयेति खंडार्थे उक्तत्वात् ॥ अनिष्टपरिहारकत्वाच तस्य सखित्वं । इदमपि सज्जीवविषयं

मोरवी शामण्णाचार्याः वैषम्य नैर्घृण्य प्रयुक्तं यत्फलदातृत्व तदभाव एव सर्वचेतन सखित्वं भगवतः ॥

मन्या० रामाचार्याः भगवत जीवान् प्रतिसखित्वमनेकविधं-द्वासुपर्णासयुजा इत्यत्र जीवेश्वरयोःपरस्पर सखित्वोक्तेः तत्र एकस्थानवासकर्तृत्वं सर्व जीवसाधारणं. सुपर्णावेतौ सयुजौ सखायौ इति भागवत श्लोक व्याख्यावसरे विजयध्वजीये तथैवोक्ते । योरायां३वनिर्महान्त्सुपारःसुन्वतःसखा । इत्यत्र

सुखदत्वं सखित्वं । एतत् सज्जीवसाधारणं सुखदःसंमृतःपार इति तद्भाष्योक्तेः । सर्वजीव साधारणं अन्यदपि । ईश्वर निष्ठं सखित्वंतु चेतनस्वरूपरक्षकत्वमेव, द्रव्यं कर्मच कालश्च स्वभावो जीव एवच यदनुग्रहतः संति न संति यदुपेक्षया । इत्यनुव्याख्यानोक्तेः ।

अध्वर्युकृष्णाचार्याः वृक्षसमान धर्मदेहाख्य एकस्थानस्थितत्वमेव भगवतः चेतनसखित्वं ॥ अत्रार्थेद्वासुपर्णेतिव्याख्यानरूप सुपर्णावेतौ सदृशौ सखायौ इति भागवत एकादशस्कंध गत श्लोक एव प्रमाणं ॥ तट्टीका विजयध्वजीये वृक्षसमानधर्मे देहेस्थितत्वात् सखायौ इति एकस्थानस्थितत्वरूप सखित्वस्य उक्तत्वात्.

एवं कौ० मुरार्याचार्याः.

गु० रंगेशाचार्याः. द्वासुपर्णा सयुजासखायाविति श्रुतौ श्रूयते ॥ तत्सखित्वंच ॥ तत्तत्कर्म निर्मित शरीरेस्थित्वा तत्तज्जीव कर्म स्वरूपयोग्यतानुसारेण फलदातृत्वं ॥ तथाहि ॥ लक्ष्मी सूक्त ऋ. सं. ८. २४. २४. यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागोस्ति ॥ यदीशृणोत्यलकं शृणोति नहि प्रवेदसुकृतस्यपंथां ॥ श्रुत्यर्थस्तु ॥ यो जीवः-सचिः-कर्म-संचयः-तंवेत्तीति-सचिवित् ॥ तंकर्मसंचयवेत्तारं-सखायं-प्रीत्यै-कदेशेन देहेस्थितत्वात्परमात्मानं-तित्याज तत्याज त्यजेत् । परमात्मनि भक्त्यादिमान्नभवेदिति यावत् ॥ श्रुतंच नरकावहं भवतीति ॥ ऐतरेयभाष्ये ॥ कर्मसंचयवेत्तारं-त्यजेन्नारायणंहि-यः ॥ प्रीत्यैक देशसंस्थत्वात्सखायमितिचोदितं ॥ न विद्यायाः फलं तस्य श्रुतंच नरकावहं ॥ नैवप्राप्नोति सुकृत सन्त्यागात्परमात्मन इति ॥

स्वा० रामचं० भगवतः चेतनंप्रतिसखित्वंनाम उपकारकत्वं जीवस्य सखित्वं च उपकार्यत्वं-उपकार्योपकारकभावस्सखित्वमिति आथर्वण खण्डार्थे व्याख्यातत्वात् सयुजौ सखायाविति द्विवचनेन जीवे ईश्वरेच सखित्वं वर्तते तच्च एकरूपतया निर्वक्तुमशक्यं । अनुगतधर्मानंगीकारात् ॥

यादवेंद्राचार्याः चेतनेषु भगवता सदा क्रियमाणं उपकार कारणं तस्य सखित्वं, अत्र वेदादयः प्रमाणं तथाहि.

ऋग्वेदे १ मं. १६४ सू० मं. ९. उरुक्रमस्य सहिबन्धुः
८ —— १०० —— ११. सखेविष्णो
तै० आ० ३—११—३ देवानां बन्धुर्निहितं
१—१—४ सनोबन्धुर्जनिता-
वाजसनेयि मं. ३२ अ० १० मं. सनोबन्धुः
भाग. ६ स्कं. ९ अ० ३९ सर्वभूतप्रियसुहृदि-
११ — ७ — १८ नारायणं नरसखं
११ — १६ — ९- भूतानां सुहृत्.
विजय० टी० सुहृत् अनुपकृत बन्धुः

प्रश्नः १३. चेतनस्वरूपेषु लिङ्गविवक्षा अस्ति वा न वा ? "सदा पश्यन्ति सूरयः" इति सूरयः पुरुषाः वा स्त्रियोऽपि वा ? स्त्रियोऽपीति चेत् वैकुंठेऽपि स्त्रीत्वादिलिङ्गभेदः नित्यो वा न वा ?

उत्तरं. मन्वा० रामचन्द्राचार्याः वैकुंठचेतनस्वरूपेषु लिङ्गविवक्षा अस्ति "स तत्रपर्यैतिजक्षन् क्रीडन्नममाणः स्त्रीभिर्वायानैर्वाज्ञातिभिर्वेति छन्दोगश्रुतिः" स्त्रीणां नैवहि पुंस्त्वंस्याद्बलवत्कारगैरपीति महाभारततात्पर्यनिर्णय वचनं च प्रमाणं. एतेन सदा पश्यंति सूरय इत्यत्र सूरिशब्देन स्त्रीणामपि ग्रहणं संभवति ॥ तेषां ज्ञानित्वा भावे. वैकुंठादि

विष्णुलोके गमना संभवात् न च पुल्लिंग सूरिशब्देन कथं स्त्रीणांग्रहणमिति वाच्यं. सूरयश्च सूर्यश्च सूरय इति एकशेष-द्वंद्व समासाश्रयणेन तदुपपत्तेः उक्तानिर्णय वचनेन स्त्रीत्वस्य नित्यत्वावगमात् चितिमात्रात्मकत्वादित्यौडुलोमिरिति सूत्रेण मुक्त सर्वदेहानां चितिमात्रात्मकत्वं अतएव नित्यत्वं च मित्स्यति.

?० शामाचार्याः चेतनस्य स्वरूपेषु लिंगाविवाक्षास्ति सदा-पश्यंतीत्यत्र सूरिशब्दः ज्ञानिपरः । अत्र विवक्षानास्ति स्त्रीभिर्वाज्ञातिभिर्वाज्ञाति भिर्वेति श्रुत्या वैकुंठेलिंगभेद नित्यएव ।

?रवी शामण्णाचार्याः. चेतनस्वरूपेषु लिंगाविवक्षाऽस्त्येव ॥ यद्यपि सूरिशब्द पुरुषवाचक तथाप्यत्र पण्डित जनत्वेन स्त्रीबोधको भवतीत्यगीकारे बाधकाभावः ॥ पण्डितजनत्व-म्यपण्डित स्त्रीपुरुष साधारणत्वात् ॥ स्त्रीत्वादिर्लिंगोऽपि वैकुंठे नित्यएवेति मध्वसिद्धान्तः ॥ तदुक्तं सूत्रभाष्ये ॥ परंज्योतिरुपसंपद्य स्वेनरूपेणाभिनिष्पद्यते स तत्र पर्येति-जक्षन् क्रीडन् रममाणः स्त्रीभिर्वायानैर्वेत्यादि ॥

?न्या० कृष्णाचार्याः. लिंगविवक्षा अस्तिचेतनस्वरूपेषु वैकुं-ठेऽपि, सतत्रपर्येतिजक्षन् क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिर्भिर्वा ज्ञातिभिर्वेति छंदोगश्रुतिः स्त्रीणांनैव हि पुंस्त्व-स्याब्दलवत्कारणैरपीति निर्णय वचनं प्रमाणं ॥

?न्या० रामाचार्याः. चेतनस्वरूपेषु लिंगविवक्षा अस्त्येव । सदापश्यंति सूरय इत्यत्र स्त्रियोपि सूरिशब्देन गृह्यते । स्त्रीत्वादि लिंगभेदःनित्यःमोक्षेप्यस्त्येव । अत्रप्रमाणं. यांति स्त्रीत्वं पुमांसोपि पापतः कामतोपिवा । न स्त्रियो यांति पुं

स्त्वंतु स्वभावादेवया स्त्रिय । पुमा संहेव पुंदेहे ।स्थितिःस्या-
द्वरदानन. । तज्जन्मनिवराः पापजाताभ्यांनिजस्त्रियः ।
सर्वेषामपि जीवानां अन्त्यदेहोयथानिजः । मुक्तौतु निजभाव
स्यात् कर्मभोगांततोपिच । इति भविष्यत्पर्वणि । अत्र लिंग-
भेदस्यस्वाभाविकत्वोक्त्याचेतनस्वरूपेषु लिंगविवक्षामोक्षेपि
लिंगभेदश्चास्तीति गम्यते । श्रुतिश्चस्त्रीभिर्वायानैर्वेत्यादिः ।

कां० मुरार्याचार्याः सुखसंविदात्मकतया वपुषां सुरभित्वमेव
बहिरन्तरपि ॥ हरिशास्त्रिदंपतिगणस्यनतो ननुमान्यतेपि
मुनिभिः मुरन इति पण्डिताचार्योक्त्या मुक्त दंपत्योः वैकुंठ
रमणस्योक्तत्वात् चेतनस्वरूपेषु लिंग विवक्षा स्त्रीणामपि
वैकुंठवासिनीनां मूरित्व वैकुंठेपि स्त्रीत्वादिलिंग भेदस्य नित्यत्व
वर्तते इति भाति. अस्मिन्नर्थे स्त्रीभिर्वायानैर्वेति श्रुति. आदावु-
क्तपण्डिताचार्योक्तिश्च प्रमाणम्

एवंमत **अध्वर्यु कृष्णाचार्याः**.

तुलशी रंगेशाचार्याः ॥ भाष्ये ॥ मनत्रपर्येति - जक्षन्
क्रीडन् रममाण स्त्रीभिर्वा - यानैर्वाति श्रुतेः ॥ नृ - ता - पशु-
वृक्षादिभेदेन जीवा एव स्वत स्थिता. ॥ संसृतौ व्यत्ययस्तेषां
मुक्तौ तत्तत्स्वरूपता ॥ ता. नि. १२ अ. स्वभर्तृभिर्विमुक्ति
गा महेवना भर्तानिहि, विष्णु. २ अ. ॥ कतिचित्पुरुषाकारा.
कानिचित्स्त्रिय रूपिणः ॥ सिंहव्याघ्रमृगादीनांगजगोजा
विपाक्षिणा ॥ वृक्षगुल्मलतादीनां आकारंबिभ्रतोपरं ॥
स्वरूपेणैव ते जीवाः तादृशानंत संज्ञका इति ॥ सत्तत्वरत्न
मालाया ॥ सर्वे देवास्सभार्याश्च ॥ मुक्तास्संसारसागरात् ॥
स्त्रीपुमात्मपृथक्त्वतः ॥ प्रसादाद्वासुदेवस्य भोगैःस्त्रीपुंस्वरूपिण
इति च ॥ गी. ता. यांति स्त्रीत्वं पुमांसोपि पापतःकामतोपि-

वा, न स्त्रियो यांति पुस्त्वंतु स्वभावादेवयाः स्त्रियः ॥ निर्ण. ११ अ. स्त्रीणां नैवाहि पुंस्त्वस्याद्बलवत्कारणैरपि इति ॥

व्या० रामचं० वैकुंठेपि स्त्रीत्वादिलिंगभेदः नित्य एव, स्त्रीभिर्वा यानैर्वाज्ञानिभिर्वाज्ञातिभिर्वेति श्रुतिः स्वभर्तृभिर्विमुक्तिगा-स्सहैवता भवंति हीति निर्णयवाक्याच्च.

चेतनस्वरूपेषु लिंगविवक्षा अस्ति । यांति स्त्रीत्वं पुमांसोपि पापतःकामतोपिवा । न स्त्रियोयांति पुंस्त्वंतुस्वभावादेवयाः-स्त्रियः । इति गीतातात्पर्ये । पुंसां स्त्रीत्वं भवेत्क्वापि तथा-प्यंते पुमान्भवेत् स्त्रीणां नैवहि पुंस्त्वस्याद्बलवत्कारणैरपीति निर्णये - सदा पश्यंति सूरय इत्यत्र स्त्रियोपि स्युः मुक्तौ स्त्रीमद्भावप्रतिपादकप्रमाणोदाहरणात्.

यादवेंद्राचार्याः चेतनस्वरूपेषु लिंगविवक्षा नास्त्येवेति भाति. वेदादिषु तस्याः नोक्तत्वात् . यथा भगवति लिंगविवक्षा नास्ति. तथैव चेतनेष्वपि नास्तीति भाति. प्रायशः सर्वै एतत् अंगीकृतमिति भाति.

१४ प्रश्नः. वैकुण्ठ ब्रह्माण्डात् बहिर्वर्तते वा अन्तर्वर्तते वा ? अत्र किं प्रमाणम् ?

उत्तरं भक्ता ० रामचन्द्राचार्याः वैकुण्ठः ब्रह्माण्डांतर्वर्तते-तदुक्तं वाराहे चातुर्मास्यमाहात्म्ये " निधानं सर्वजीवानां ब्रह्माण्डमिति कीर्तितं " मित्यारभ्य " वैकुण्ठस्य च विस्तारो यावदंडकटाहकः ॥ अष्टाविंशत्कोटयस्युर्यो जगतां समतत " इति.

कू० शामाचार्याः वैकुण्ठः ब्रह्मांडांतर्गतः ॥ अत्र प्रमाणं तात्पर्य निर्णय २१ अध्याये अंतरिक्षंत्वया प्रोक्त मित्यारभ्य ततश्च

द्विगुण. प्रोक्त इत्यनंश्लोक चतुष्टयं ॥ अत्र पाद्मसंमतिः वाचस्पत्ये. उपरिष्टात्क्षितेरष्टौकोटयः सत्यमीरितं ॥ सत्या दुपरि वैकुंठोयोजनानां प्रमाणतः ॥ भर्लोकात्परिसंख्यातः कोटिरष्टादशप्रभो ॥ यत्रास्ते श्रीपति साक्षात्सर्वेषामभयप्रद भूमिः स्वांडकटाहेन पचाशत्कोटिविस्तरा ॥

मन्या० कृष्णाचार्याः वैकुंठ. ब्रह्मांडानवर्तते तदुक्तं वाराहे चातुर्मास्य माहात्म्ये निधान सर्व जीवानां ब्रह्माडमितिकीर्तितं इत्यारभ्य वैकुंठस्यतु विस्तारो यावदंडकटाहकः अष्टाविंश-त्कोटय स्युः योजनाना समंतत तत्र वैकुंठलोके श्रीभागस्य नित्यत्वाद्ब्रह्मांडनाशानंतरमपि वर्तते ॥

मारवी० शामण्णाचार्याः. वैकुंठः ब्रह्माडांतः वर्तते । तदुक्तं पाद्मे ॥ उपरिष्टात्क्षितेरष्टौ कोटयस्सत्यमीरितं ॥ सत्या-दुपरिवैकुंठो योजनाना प्रमाणतः ॥ भूलोकात्परिसंख्यातः कोटिरष्टादशप्रभो ॥ यत्रास्ते श्रीपतिस्साक्षात्सर्वेषामभयप्रदः प्रकाश संहितायाच १९ अ.

सत्यात्कोटि द्वादशोर्ध्वे लोको वैकुंठनामकः ॥ भुवनानि यथा भागत्रयं वैकुंठमय अजाडस्वपरस्पृष्टाः मध्ये प्राकार-सप्तका ॥

मन्या० रामाचार्याः वैकुंठः ब्रह्मांडांतरेव वर्तते चातुर्मा-वाराहे सत्यलोकमुक्त्वा अनंतरं । ततऊर्ध्वंतुमहालोको वैकुंठा-ख्योहिवर्तते । षड्विंशल्लक्षहीनास्तु कोटयोनवतास्मितिः । वैकुंठस्यतु विस्तारो यावदंडकटाहतः । अष्टत्रिंशत्कोटयस्तु योजनानां समंततः । इत्युक्तत्वात् । त्रिपादस्यामृतंदिवीति

त्रिपाच्छब्दवाच्यरूपत्रयस्य द्युस्थत्वमुच्यते। भागवततात्पर्ये अनतासनवैकुंठक्षीराब्धिस्थो हरि स्त्रिपादिति वैकुंठस्थस्यापि द्युलोकस्थ रूपत्रयांतर्भाव उच्यते । द्युलोकस्तु ब्रह्मांडांतर्गत एव अतो पि वैकुंठः ब्रम्हांण्डांतर्गतः ।

तु० रंगेशाचार्याः 'ना. नि. २१. पंचाशत्कोटि विस्तारो योजनानां समन्ततः ॥ यावत एतेमिलिताः तत्प्रमाण उदीरित ॥ ९८ ॥ सत्याख्यो ब्रह्मलोकस्तु यत्र ब्रह्मा विराजते ॥ ततश्च द्विगुण प्रोक्तः विष्णुलोकस्सनातन. ॥ उत्तरोत्तरतस्सर्वेति ॥ विष्णुर. ३९. अ. गालवः ॥ अनतासनवैकुंठनारायणपुराणितु ॥ त्रीणिधामानिवै विष्णोःकृत्रम नीति तद्वद ॥ उत्त. महर्जनस्तपश्चैव सत्यलोकस्तदूर्ध्वत' । भूलोकात्तु ततो यावत्. वैकुंठस्सत्यतः परः ॥ ४२ ॥ यावदंडकटाहन्तु ऊर्ध्वमूर्ध्वंव्यवस्थित ॥ मध्यभाग' श्रियस्तत्रसत लोकस्सनातन इति ॥

स्वापे० रामचन्द्राचार्याः. वैकुंठ ब्रह्मांडान्तर्गतएव तत्र प्रमाणं. अर्थाविवेश ब्रह्मांडं....स्यामहमहेश्वरः ॥ वैकुंठमाविशल्लोक तत्रापश्यन्निजाकृती ॥ इति विष्णुरहस्य वचनं. ततऊर्ध्वंतुमल्लोकःवैकुंठाख्यो हि वर्तते. यावदंडकटाहंतु वैकुंठस्यत विस्तृतिरिति चातुर्मास्य माहात्म्य वचनं च ॥

यादवेंद्राचार्याः. वैकुंठ अथवा मोक्षानतरं भगवतामहमालोक्य यत्र वर्तते सः लोकः ब्रह्मांडाना बहिरेव. ब्रह्मांडानां सृज्यत्वात्. तस्य लोकस्य नित्यत्वात्. ब्रह्मांडांतर्वर्तिलोकाना वर्णने एतादृशलोकस्य वर्णनाभावात् च, ब्रह्मांडानां बहिरेव. किंच प्रसिद्धपुराणेषु एवं वर्णितत्वात् च.

ब्रह्मवैवर्ते कृष्णजन्मखंडे. अ. ४–९०–९१.

वेदेषु परमब्रह्म जगन्मूर्त्युहरं परं वायुनाधार्यमाणं च ब्रह्मांडानि उक्तेमुत्तमं इति.

प्रश्नः १५. ब्रह्मांडाणि अनेकानि वा एकमेव वा ? अत्र किं प्रमाणम् ?

उत्तरं. मन्ना० रामचन्द्राचार्याः. ब्रह्मांड एकमेव. तदुक्तं तृतीयस्कंधे भागवत तात्पर्ये. एकमंडपृथक्केन प्रत्येकं रोमकूपगं ब्रह्मापश्यत्तथात्मानं हरेर्भेनु पृथक् पृथगिति ब्रह्मांडपुराणे बृहदंडमभूदेकमिति तात्पर्योदाहृतभागवतवचनाच्च एकमेव. ब्रह्मांड.

कृष्टा ० शामाचार्याः अण्डमेकमेव ॥ एकमंडं बहुत्वेन प्रत्येकं रोमकूपग ॥ ब्रह्मापश्यत्तथात्मानं हरेर्भेनु पृथक् पृथक् ॥ विष्णुसामर्थ्यतोद्वाना बहुत्वनान्यथा भवेत् ॥ प्रकाशसंहितायां तृतीये पादे ॥ एकस्मिन्परकाले तु एकमंड जगद्गुरु ॥ उत्पादयत्ययुक्त सृजन्यवतिहन्त्यज ॥ नैकदाजाद्यबहुत्वहु मिदं नेदशेव । ब्रह्माण्ड गरुड शेषादिप्राणा सर्वमुरान् । एकमेक हरिर्मुक्त परकाले करोत्यज ॥ तथाप्यनाद्यननाना नियतान्याश्रुतवान् हरिस्माद्धलाहारूपाननानंतानि हरेः । रोमाकूपेष्वनंतेष सवसतीति हि श्रुति ॥

मन्या ० कृष्णाचार्याः एकमंडं पृथक्केन प्रत्येकं रोमकूपगं॥ ब्रह्मापश्य तथात्मानं हरेर्भेषु पृथक् पृथगिति तृतीयस्कंधे तात्पर्यभूतब्रह्मांडवचनेन बृहदंडमभूदेकमिति भागवतात्पर्य वचनेन च ब्रह्मांड एकमेव ॥

तोरवी० शामण्णाचार्याः. ब्रह्मांडमेकमेव ॥ तदुक्तं तृतीयस्कंधे १२ अध्याये ॥ अण्डकोशोबहिरयं पंचाशत्कोटि विस्तृत इति ॥ अत्रैकवचनेन प्रयोगादेकत्वंलभ्यते ॥ तृतीयतात्पर्येपि ॥ एकमंडंबहुत्वेन प्रत्येकं रोमकूपगमिति ॥

प्रकाशसंहितायां च प्रथमपरिच्छेदे तृतीयाध्याये ॥ एकस्मि-न्परकालेतु एकमंडं जगद्गुरुः ॥ दशा वरणसंयुक्तं सृजत्यव-तिहंत्यजः ॥ नैकदाजांडबहुलं स्रष्टुमिच्छति केशवः ॥

तु. रंगेशाचार्याः. भा. तृ. २७ अ. एतदंडं विशेषाख्यं तृ. ता० अण्डंतुविकृतंज्ञेयमिति भा. २. वर्षपूगमहस्रान्ते तदण्डमुदके शयम् । भाष्ये तदण्डमभवद्धैमंमिति, सर्वत्र एकवचन-श्रवणात् ॥ ननु तृ १२ अ. दशोत्तराधिकैर्यत्र प्रविष्ठं परमाणुवत् ॥ लक्ष्यतेंतर्गताश्चान्ये कोटिशोह्यडराशय इति ब्रह्माडस्य बहुको टिसंख्याकत्वोक्तेश्च कथमेकमेवेत्यवधारण-मिति चे दुच्यते ॥ एकमेवाड परमत्मानासृष्टतच्च परमात्मना धृत ॥ तस्य बहवो रोमकूपाः तेषां परमात्मना सहाऽ भेदाद्बहुत्वेन दृश्यंते न त्वने कानि ब्रह्मांडानि भगवता सृष्टानि ॥ अतोनविरोधः । तत्र प्रमाण ॥ तृ. ता. एकमडं बहुत्वेन प्रत्येक रोमकूपग ॥ ब्रह्मापश्यत्तथात्मान हरेस्तेषु पृथक् पृथक् ॥ विष्णुसामर्थ्यतोंडाना बहुत्वन्नान्यथा भवेदिति यद्वा ॥ भागवते अनेक ब्रह्माडकथन अतीतानागत वर्तमान-कालापेक्षया न त्वेक ब्रह्म कल्पापेक्षया प्रमाण तृ. ता. शरीराणा बहुत्वेन अतीतानागतम्तथा ॥ अस्यैवदेवकार्येषु प्रति प्रति च दर्शनादिति चेति ॥

यादवेंद्राचार्याः. ब्रह्माडानि अनेकान्येव. तथाहि भागवत ३ स्कंधे ११ अ० दशोत्तराधिकैर्यत्र प्रविष्टः परमाणुवत् ॥ लक्ष्यंतेंतर्गताश्चान्ये कोटिशोह्यडराशयः ॥ ४० ॥

६ स्कंध १६. अ० क्षित्यादिभिरेषकिलावृत. सप्तभिर्दशगुणो त्तरैरण्डकोशः ॥ यत्रपतत्यणुकल्पः सहाडकोटिभिस्तदनतः ॥ ३७ ॥

१० स्कंध० १४. अ० काहंतमोमहदहंखचराग्निवार्भूसंवे-

ष्टिनांडघटमसाविनस्तिकायः केदृग्विधाविगणितांडपराणुच-
र्यावातास्वरोम विवरस्यचतेमहित्वं ॥ ११ ॥ ८७. अ० ॥
द्युपतयएवतेनययुरन्तमनंततयात्वमपियदंतरांडनिचयाननुसाव -
रणाः ॥ ४१ ॥

११ स्कंधे ० १६ अ० संख्यानं परमाणूनां कालेन क्रियते
मया ॥ न तथा मेविभूतीनां सृजतोंडानि कोटिशः ॥ ३९ ॥

मन्या० रामाचार्याः. ब्रह्मांडं एकमेव. तत्र प्रमाणं भागवत
तात्पर्ये, शरीरगणा बहुत्वेन अतीतानागतैस्तथा ॥ अस्यैव देव
कार्येषु प्रति प्रतिच दर्शनात् ॥ विष्णु सामर्थ्य तोंडानां बहुत्वं
नान्यथा भवेदिति ब्रह्मतर्के ॥ एकमंडं पृथक्केन प्रत्येकंरोम-
कूपग ॥ ब्रह्मापरस्य तथात्मानं हरेस्तेषु पृथक् पृथक् । इति
ब्रम्हांडं ॥ बृहदंडमभूदेकमिति भारते ॥

श्रीनिवासाचार्याः यामुनाचार्यप्रणीतस्य स्तोत्ररत्नस्य :—

" यदण्डमण्डान्तरगोचरश्च यत्
दशोत्तराण्यावरणानि यानि च ।
गुण प्रधान पुरुष परम्पदम्
परात्पर ब्रह्म च ते विभूतयः ॥ "

इति सप्तदशस्य श्लोकस्य श्रीमद्वेदान्ताचार्यकृतस्तोत्रभाष्ये :—

" अण्डानान्तु सहस्राणि प्रयुतान्यर्बुदानि च
ईदृशाना तथा तत्र कोटिकोट्ययुतानि च ॥ " इत्युदाहृत
विष्णुपुराणवचनादनन्तान्येव ब्रह्माण्डानि ॥

स्वा० रामचं० एकमंडं बहुत्वे न प्रत्येकं रोमकूपगं ॥ ब्रह्मापरस्य-
तथात्मानं हरेस्तेषु पृथक् पृथक्. विष्णुसामर्थ्यतोंडानां बहुत्वं
नान्यथा भवेत् + अतीतानागतैस्सह अस्यैव देवकार्येषु प्रति
प्रति च दर्शनात इति तृतीयतात्पर्ये - - बृहदंडमभूदेकमिति
भारते. प्रकाशसंहितायां एकस्मिन्परकालेतु एकमंडं जगद्गुरि-

त्यादि- अत्र भारतवाक्येन प्रकाशसंहितावाक्येनच ब्रह्मांड एकमित्युच्यते. कौर्मे ब्रह्मांडानां बहुत्वंच एकमंड ब्रह्मा बहुत्वेनापश्यदिति तात्पर्येन च चतुर्मुखज्ञानस्य मिथ्यात्वं तस्य जगद्गुरुत्वात् अत इदं विरुद्ध एकस्य अनेकत्वेन दर्शनायोगादित्यतो विष्णुसामर्थ्यतं इत्युक्तं. अत्र एकमेव ब्रह्मांडं स्फटिकसदृशभगवद्रोमकूपेषु प्रतिफलितं ब्रह्मानेकत्वेनापश्यत् नचानेकत्वमप्रामाणिकं सिद्धांते बिंबप्रतिबिंबयोर्भेदस्य सत्त्वेन प्रति बिंबभूतस्य ब्रम्हांडस्यानेकत्वोपपत्तेः । ब्रह्मांडमेकमित्यस्य तात्पर्यंतु आदौ परमात्मनासृष्ट बिंबभूतं ब्रह्मांडमेकमिति-- यद्वा ब्रह्मणः अतीतादिज्ञानवत्वात् अतीतादिभिस्सहानेकत्वेनापश्यत् अथवा एकमपि ईशशक्त्या अनेकमासीत् यथा स्वरूपभेदशून्यस्य ईश्वरस्य रूपद्वित्वादि । एकस्यैव सीताभरणस्य द्विधा भवन तात्पर्यनिर्णयोक्त एकस्यैव चमसपात्रस्य ऋभुसामर्थ्येनः चतुर्धा भवनं ऋग्भाष्य उक्त एकस्यैव भगवत्किरीटस्य गरुडेन गोमंतस्थितकृष्णशिरसिस्थापने तदिच्छया क्षीरवारिधिस्थितनारायणशिरस्यपि किरीटभवन इत्यादि ॥ अत्रप्रमाण द्वित्वंचैकस्य युज्यते इत्यनुव्याख्यान सीतायाया- निचैवासन्नाकृतेस्तानि सर्वश । भूषणानिद्विधाभूत्वानान्य- वामंस्तथैवचेति निर्णयवचन. तपूर्वकृतमेकंचमसं चतुरोकृतेति ऋग्भाष्यं.

तदिच्छयाचैव नारायणस्य शीर्ष्ण्यप्यासीद्युगपद्दुग्धवार्धाविति निर्णयवाक्यं प्रमाणम् ॥

कूर्मपुराणे ४२६. अंडानामीदृशानां तु कोट्यो ज्ञेयास्सहस्रशः । सर्वगत्वात्प्रधानस्य कारणस्याव्ययात्मनः ॥ अंडेष्वेतेषुसर्वेषु भुवनानि चतुर्दशेत्यादि ॥

प्रश्नः १६. किं सन्यासाश्रमस्य लक्षणम् ?

उत्तरं. मन्नारगुडी रामचन्द्राचार्याः. अनग्निरनिकेतस्स्या द्ग्राममन्नार्थमाश्रयेत् । उपेक्षकोसंकुशको मुनिर्भावसमाहितः ॥ कपालं वृक्षमूलं वा कुचैलमसहायता ॥ समतांचैवसर्वस्मिन्नेतन्मुक्तस्यलक्षणमितिमनूक्तेः. ॥ मौनानीहानिलायामादण्डोवाग्देहचेतसां । एते यस्य न सन्त्यङ्गवेणुभि र्नभवेद्यतिरिति भागवतवचनाच्च मौनादिमत्वे सति काषायादिमत्वं लक्षणमेवगम्यते ॥

कृ० श्यामाचार्याः. कपालं वृक्षमूलानि कुचैलमसहायता । उपेक्षा सर्वभूतानामेतावद्भिक्षुलक्षणमिति भारते मोक्षधर्मे २४६. वैराग्यादिकं ॥ भिक्षाटनं जपः स्नानमित्यादि च तल्लक्षणम् ॥ निर्णयसिन्धौ सन्यासे चानित्यमस्ति तल्लक्षणं ग्रन्थान्तरेष्वनित्यम् ।

मन्ना० कृष्णाचार्याः. मौनप्राणायामादिमत्वं काषायादि बाह्यचिन्हवत्त्व च सन्यासस्य लक्षणम् ॥ अनग्निरिति भागवतोक्तेश्च.

समतांचैव सर्वस्मिन् एतन्मुक्तस्यलक्षणमिति मनूक्तेः । मौनानीहानिलायामादण्डोवाग्देहचेतसां ॥

तोरवी श्यामण्णाचार्याः. भारते मोक्षधर्मे २४६. अध्याय एक एवचरेद्धर्मासिद्ध्यर्थमसहायवान् एकश्चरति यः पश्यन् न जहाति न हीयते ॥ अनग्निरनिकेतश्च ग्राममन्नार्थमाश्रयेत् ॥ + + + कपालंवृक्षमूलानि कुचैलमसहायता ॥ उपेक्षा सर्वभूतानामेतावद्भिक्षुलक्षणम् ॥

मन्या० रामाचार्यः.

मौनानीहानिलायामा दंडा वाग्देहचेतसां ।
नह्येते यस्य सन्त्यङ्ग वेणुभिर्नभवेद्यतिः । इति भागवतोक्तमौ-

नादिकं सन्यासाश्रमस्य लक्षणं । काषायदंडकमंडल्वा-
दिकं च.

तु० रंगेशाचार्याः गीतायां. यदृच्छालाभसंतुष्ट इति सन्यासलक्ष-
णमुक्तं ॥ काम्यानां कर्मणां न्यासं सन्यासं कवयोविदुरि-
ति ॥ सर्वकर्मणां भगवति समर्पणं-कर्मणि कर्तृत्वाभिमान
त्यागोवा ॥ गी. भा. ९ अ० सन्यासशब्दार्थं भगवानेव
वक्ष्यीत ॥ नायं सन्यासो यत्याश्रमः ॥ द्वंद्वत्यागात्तु
सन्यासान्मत्पूजैव गरीयसीति वचनादिति ॥ तानिवा एता-
न्यवराणिनपासि-न्यासएवात्यरेचयदितिच ॥

श्रीनिवासाचार्याः. मनुस्मृत्याः षष्टेध्याये एकचत्वारिंशं
श्लोकमारभ्यो न षष्टपर्यन्तैः श्लोकैः उक्ता एक संचरणान-
ग्नित्वानिकेतत्वादयोऽहिंमान्ताधर्माः सन्न्यासिनो लक्षणानि
लक्षणं वा—एतैस्सहिताःकाषायदण्डाश्च—नतु काषायदण्डादय
एव लक्षणानि—शैलूषस्यापि तथात्वापत्तेः.
यथाहमनुः— ६—४१ आरभ्य ६० पर्यन्तम्.

खा० रामचन्द्राचार्याः.

सन्न्यासाश्रमलक्षणम् ॥ श्रीमद्भागवत ७ स्कंधे अ० १३.

कल्पस्त्वेव परिव्रज्य देहमात्रावशेषितः
ग्रामैकरात्रविधिना निरपेक्षश्चरेन्महीं ॥ १ ॥
बिभृयाद्यद्यसौ वासः कौपीनाछादनं परं
त्यक्तं न दंडलिंगादेरन्यत्किंचिदनापदि ॥ २ ॥
एकएव चरेद्भिक्षुरात्मारामोनपाश्रयः ।
सर्वभूतसुहृच्छान्तो नारायणपरायणः ॥३॥
नासच्छास्त्रेषुसज्जेत नोपजीवेत जीविकां
अतिवादांस्त्यजेत्तर्कान्पक्षंकं च न संश्रयेत् ॥ ७ ॥

न शिष्यानननुबध्नीत ग्रंथान्नैवाभ्यसद्बहून्
न व्याख्यामुपयुंजीतनारंभा नारभेत्क्वचित् 'इत्यादि--

११ स्कंधे १८ अ०

मौनानीहानिलायामाः दंडोवाग्देहचेतसां
न ह्येते यस्य सत्यंगवेणुभिर्नभवेद्यतिरित्यादि ॥

मार्कंडेयपुराणे अ० २८ सर्व संग परित्यागो ब्रह्म-
चर्यमकोपिना । यतेंद्रियत्वमवासे नैकस्मिन्वसतिश्चि-
रं । अनारंभस्तथाहारो भैक्षान्नेनैक कालिनेत्यादि—

गौतमसूत्रे ३ अध्याये अनिचयोभिक्षु । ऊर्ध्वरेताः । ध्रुवशी-
लोवर्षासु । भिक्षार्थीग्राममियात् । वाक्चक्षुःकर्मसंयत
इत्यादिकंच ।

यादवेंद्राचार्याः स्मृतिषु भागवते सप्तमे एकादशस्कंधे च
सन्न्यासाश्रमं एव वर्णितं भवति. तथाहि.

मनु स्मृ० ६ अ०

यो दत्वा सर्वभूतेभ्यः प्रव्रजत्यभयंगृहात् ॥ ३९ ॥
अगारादभि निष्क्रांतः पवित्रोपचितोमुनिः ॥
समुपोढेषु कामेषु निरपेक्षः परिव्रजेत् ॥ ४१ ॥
अतिवादांस्तितिक्षेत नावमन्येतकंचन ॥
न चेमं देहमाश्रित्य वैरकुर्वीत केनचित् ॥ ४७ ॥
क्रुद्ध्यतं नप्रति क्रुद्ध्येदाक्रुष्टः कुशलं वदेत् ॥
इंद्रियाणां निरोधेन रागद्वेष क्षयेन च ॥
अहिंसयाचभूतानाममृतत्वाय कल्पते ॥ ६० ॥

भागवते ७ स्कं० १३ अ० १ आरभ्य ८ पर्यन्तं.

प्रश्न १७. सन्न्यासाश्रमः कलौ निषिद्धो वा न वा?

मन्नारगुडी रामचन्द्राचार्याः. यावद्वर्णविभागोऽस्ति यावद्वेदः प्रवर्तते ॥ सन्न्यासं पशुबंधं च तावत्कुर्यात्कलौयुगे इति निर्णयसिंधूदाहृत देवलवचनात्कलौ वेदप्रवृत्तिवर्णविभागावस्थानपर्यंतं संन्यासो न निषिद्धः ॥ न च निर्णयसिंधूदाहृत अंगीकारानर्हमिति वाच्यं ॥ चत्वार्यब्दसहस्राणि चत्वार्यब्दशतानि च ॥ कलेर्यदागमिष्यन्ति तदा त्रेता परिग्रहः ॥ सन्न्यासश्च न कर्तव्यः ब्राह्मणेन विजानतेति निर्णयसिंधूदाहृत व्यासवचनं कृष्णाचार्यस्मृतावुदाहृतं उक्त देवलवचनं नोदाहृतं तथापि देवलवचनानुसारेण महतामाचारदर्शनेन च तत्प्रामाण्यांगीकारे बाधकाभाव अन्यथा कृष्णाचार्यस्मृत्युदाहृत व्यासवचनानुसारेण महदाचरितसन्न्यासस्याधर्मत्वापानात् अस्मदभिमतार्थाविरुद्धार्थ परोक्तार्थस्य स्वीकारदर्शनाच्च.

मन्नार॰ रामाचार्याः. चत्वार्यब्दसहस्राणि चत्वार्यब्दशतानिच । कल्येर्यदागमिष्यति तदात्रेतापरिग्रहः । सन्न्यासश्च न कर्तव्यो ब्राह्मणेन विजानता । यावद्वर्ण विभागोस्ति यावद्वेदः-प्रवर्तते । सन्न्यासंचाग्निहोत्रञ्च तावत्कुर्यात्कलौयुग । इति विधि निषेधोभयवचन बलात् । त्रिदंडसंन्यासादिर्निषिद्ध । इत्युक्तं निर्णयसिंधौ । धर्मसिंधौ तृतीयपरिच्छेदोत्तरार्धे ३२९ पृष्ठे विभाग पूर्वं लक्षणान्युक्तानि ।

भागवत तृतीयस्कंध त्रयोदशाध्याये व्यासेकुटीचकः पूर्वमिति श्लोकव्याने विजयध्वजीय कुत्र्यां स्वगृह एव पुत्रादि दत्तान्नादिना चकते तृप्यतीति कुटीचकः चकतृप्ता विति धातुः द्वितीयो बहूदः सवनत्रयस्नानं विनात्वकाले तीर्थे जलदर्शने

तत्र स्नानं कृत्वं त्रिदण्डी तृतीयचतुर्थौहंस एकदण्डी यज्ञोपवीतांच्च निष्क्रिय एक दण्डीहिंसादिक्रियारहितः परम हंस इति ।

कृ० शामाचार्याः धर्मसिंधौ. चत्वार्यब्द सहस्राणि चत्वार्यब्द शतानिच । कलेर्यदा गमिष्यंति तदात्रेतापरिग्रहः ॥ सन्न्यास श्च न कर्तव्यो ब्राह्मणेन विजानता ॥ अर्थाधानं स्मृतं स्मार्ताग्न्यो तु पृथक्कृति ॥ सर्वाधान तयोरैक्य कृति· पूर्वयुगाश्रया ॥

अस्यापवादः . यावद्वर्णविभागोस्ति यावद्वेद.प्रवर्तते ॥ सन्न्यासश्चाग्निहोत्रश्च तावत्कुर्यात्कलौयुगे ॥

सन्या० कृष्णाचार्याः. यावद्वर्ण विभागोस्ति यावद्वेद प्रवर्तते । सन्न्याससमाग्निहोत्रश्च तावत्कुर्वीत मानव इति निर्णयसिंधृदाहृत वचनात्कलौ न निषिद्ध ॥

मोरवी शामण्णाचार्याः. सन्न्यासाश्रम कलौ निषिद्धो न भवति ॥ अत्र प्रमाण ॥ यावद्वर्णविभागोस्ति यावद्वेद प्रवर्तते सन्न्यासश्चाग्निहोत्र च तावत्कुर्या त्कलौयुगे ॥

खापे०रामचंद्राचार्याः. यदहरेव विरजेत्तदहरेव प्रव्रजेदिति विजयध्वजीयव्याख्याधृतश्रुते· । भाष्यकारटीका कार प्रभृतिभिस्सन्न्यासाश्रम ग्रहणाच्च न निषिद्ध इति भाति ॥

तु० रंगशाचार्याः. निर्णयसिंधौ ३ परिच्छेदे · कलिवर्ज्य प्रक. रणे ॥ अश्वालंभो गवालभः सन्न्यासं पलपैतृकं ॥ देवरेणसुतोत्पत्तिः कलौपंच विवर्जयेत् ॥ सन्न्यासश्च न कर्तव्यो ब्राह्मणेन विजानतेति व्यासवचन मिति निषेधःश्रूयते ॥

यादवेंद्राचार्याः. सन्न्यासाश्रमस्य नित्यत्वात्, कलावपि न निषिद्धः निषेधद्योतक प्रमाणाभावात्. केचित् कानिचित् कलिनिषेध वाचकानि वाक्यानि उदाहरन्ति तानि प्रक्षिप्तानि. तानि विज्ञानेश्वरैर्नोदाहृतानि. अर्वाचीनानि न प्रमाणानि.

प्रश्नः १८. भगवता कर्तव्यानीति उक्तानि यज्ञदानतपांसि कानि? एतानि सर्वेषां वर्णानां आश्रमाणां धर्मो वा? अस्मिन् विषये किं प्रमाणम्?

उत्तरं. मन्नारगुडी रामचन्द्राचार्याः. ज्ञान यज्ञ विद्या भयदान तपर्मोहिते ॥ अयं शूद्र व्यतिरिक्त सर्व वर्णाश्रमाणां धर्मः ॥ तदुक्त गीता भाष्ये यज्ञभेद उक्तोद्रव्य यज्ञ इत्यादिना दानेत्वभयदानमंतर्भवति एतेषां मध्ये यत्किंचिद्यज्ञादिकं कर्त्तव्यमेवेत्यर्थः ॥ अन्यथा ॥ ब्रह्मचारी गृहस्थोवा वानप्रस्थोथवायतिः ॥ यदीछेन्मोक्षमास्थातमृत्तमाश्रममाश्रयेदिति व्यासस्मृत्यादि विरोधः ॥ ब्राह्मणाविविदिषन्ति यज्ञेन दानेन तपसा नाशकेनेति श्रुत्या ज्ञानागत्वावगमाच्चावश्य कर्त्तव्यत्वमवगम्यते ॥ नाग्निर्नयज्ञो न व्रतानि शूद्रस्येति सूत्रभाष्योदाहर्तपिगिश्रुत्यानाग्निर्नयज्ञश्शूद्रस्य तथैवाध्ययन कुतः ॥ केवलेवतुशुश्रूषा त्रिवर्णानां विधीयत इति स्मृत्याच निषेधादुक्तेषु शूद्रस्य नाधिकारः ॥

मन्यार० रामाचार्याः. यज्ञःज्योतिष्टोमादिः । शुश्रूषादिश्च । दानं भूसुवर्णादेः विद्याभयादेश्च । तपःचांद्रायणादि सत्योपवासादिकश्च । इति भगवदुक्तानि यज्ञदानतपांसि । एतानि सर्वेषां वर्णानामाश्रमाणां च धर्मा एव । उक्तमेतद्गीतातात्पर्ये । द्रव्य यज्ञादीनां मध्ये स्वोचितो यज्ञो विद्या दानादिषु स्वोचितं दानं तपश्च सर्वैर्वर्णाश्रमिभिः अन्यैश्च कार्यमेवेत्यर्थः

विष्णुनामस्वाध्यायोत्थानां सत्योपवासादितपश्च ॥ वानप्रस्थस्य यज्ञोन्यामिनां विशेषत । वनस्थस्याक्रतुर्यज्ञःकृत्वा-दिर्गृहिणोखिलः । शुश्रूषाद्यात्मको यज्ञो विहितो ब्रह्मचारिणः । विद्याभयादि दानञ्च सर्वेषामपि सम्मतं । गृहिणो वित्तदानंतु वनस्थस्यान्नपूर्वक । सर्वै कार्यं तपोघोरं इति सर्वैत्रिकर्मिण इति नारदीये ।

कौ० मुरार्याचार्याः. यज्ञ दान तपांसिनाम, यज्ञो अग्नि-ष्टोमादिः, दान स्व स्वत्व-ध्वंसपूर्वक परस्वत्वापादनं, तपःकृच्छ्र चान्द्रायणादिः, एते त्रिवर्णाना धर्माः, अस्मिन्नर्थे इज्या-ध्ययन दानानि सर्वेषाञ्च द्विजन्मना ॥ प्रति ग्रहोध्यापनञ्च ब्राह्मणस्यैव याजनमिति एकादशस्कध भागवतश्लोक प्रमाणं. तट्टीका विजयध्वजीये द्विजन्मना ब्राह्मण क्षत्रिय वैश्याना-मिति व्याख्यातत्वात् न शूद्रस्य नाग्निर्नयज्ञो न क्रिया न संस्कारो न व्रतानि शूद्रस्येति पैगिश्रुतावचनद्धर्माभिलापात अथ शूद्रतपश्चर्यानिहत विप्रपुत्रकमिति श्रीमन्महाभारत तात्पर्य निर्णय अनर्थ श्रवणाञ्च.

एवमेव **अध्वर्यु कृष्णाचार्याः**.

तु० रंगशाचार्याः. गी० ४ अ० स्वाध्याय ज्ञान यज्ञाश्च यतयः शंसित व्रताः ॥ २८ ॥ नाय लोकोस्त्ययज्ञस्य ॥ श्रेयान्द्रव्यमयाद्यज्ञात् ज्ञान यज्ञः परंतप ॥ सर्वं कर्माखिल पार्थ ज्ञाने परिसमाप्यते ॥ यज्ञ दान तपः कर्म न त्याज्यं कार्यमेवतत् ॥ यज्ञो दानं तपश्चैव पावनानि मनीषिणां ॥५॥ टी० मनीषिणां—ज्ञानिनां—मुक्तौ—आनंदातिशय कराणि ॥ अतस्सर्वैरपि वर्णाश्रमोचित कर्माणि कार्याण्येवेति ॥ यतीना-मपि—ज्ञानयज्ञ—विद्याभयदान—ब्रह्मचर्यादि—तपांसि सन्त्येव. स्त्री शूद्रादीनामपि-विष्णुनामाध्ययन रूपो यज्ञः-सत्यवचनं-

उत्तमामादि ब्रनश्चास्त्येवेति ॥ (गी० ना० वाचिकोनानतो यज्ञान्यामिनांतु विशेषनः ॥) गी० भा० १६ अ० तपो ब्रह्मचर्यादि ॥ ब्रह्मचर्यादिकं तप इत्यभिधानमिति तल्लक्षणोक्तेः ॥ एतेन—सर्वेषां वर्णानां—सर्वेषामाश्रमाणाश्च धर्म एवेति भाति ॥)

स्वा० रामचं०. यज्ञदानतपांसि सर्वेषां आश्रमिणां वर्णानांच धर्मा एव, यज्ञदान तपांसिच भिन्नभिन्नानि वर्तते. यतीनां ज्ञान यज्ञविद्याऽभयदान ब्रह्मचर्यादि तपांसि सन्ति स्त्री. शूद्रादीनां विष्णुनामाध्ययन रूपो यज्ञ. सत्यवचनमुपवासादि तपः एवं तत्तद्योग्यतानुसारेण यज्ञदानतपांसि संति. अत्र प्रमाणं यज्ञदानतपःकर्म न त्याज्यं कार्य मेव तत्. यज्ञोदानन्तपश्चैव पावनानि मनीषिणां । एतान्यपितु कर्माणि सङ्गन्त्यक्त्का फलानिच । कर्तव्यानीतिमे पार्थ निश्चित मतमुत्तम इति—श्री रामचंद्रस्वामि कृत गीता विवृतौ स्वयज्ञादी-परित्यज्यनिरयत्य सशयं इति स्वपद प्रयोगात्-यति स्त्री शूद्रयोग्य यज्ञ दान तपसां विवेचनात्-इतरयोग्य यज्ञादीनि सति ॥ स्पष्टत्वान्नविवेचनानीति ज्ञायते—गीता तात्पर्यंच ।

यादवेंद्राचार्याः. श्री कृष्णेनगीतादिषु उक्तानि यज्ञदानतप. कर्माणि वक्ष्यमाणानि. यज्ञं भगव पूजा. दान च दण्डन्यसन. तप ध्यानादिआलोचनं. एते सर्वेषा धर्मा . अस्यप्रपचन कृष्णेनैव कृतं गीतादिषु.

श्रीमद्भगवद्गीतायां १८ अध्याये यज्ञदानतपःकर्मनत्याज्यकार्यमेव तत् ॥ यज्ञोदानं तपश्चैव पावनानि मनीषिणा ॥ एतान्यपितुकर्माणि सगंत्यक्त्का फलानि च ॥ कर्तव्यानीतिमे पार्थनिश्चितं मतमुत्तमं ॥ भागवते ११ स्कधे १९ अध्याये

इडन्याम परंदानं कामत्यागम्तपः स्मृतं ॥ ३७ ॥ यज्ञोहं भगवत्तम ३९ अकामः सर्व कामो वा मोक्षकाम उदारधीः" तीव्रेग भक्तियोगेन यजेत पुरुषपरं भाग. २ — ३ — १० अहं सर्वेषु भूतेषु भूतात्मावस्थितः सदा ॥ अथमांसर्वभूतेषु भूतात्मानं कृतालयं ' अर्हयेद्दानमानाभ्यां मैत्र्याभिन्नेन-चक्षुषा भाग. ३ २९.

नोरवी शामण्णाचार्या यज्ञाना बहुरूपत्व शांति पर्वणि ६०. अ० ॥ बहूनि यज्ञ रूपाणि नानाकर्मफलानि च ॥ तानिय संप्रजानाति ज्ञाननिश्चय निश्चित) (दानं नाम प्रकृत स्वस्वत्वध्वंस पूर्वक परस्वत्वानुकूल प्रयत्न विशेष भा० शा० तपो नाम अहिंसासत्य वचन मानृशंस्य-दमोघृणा ॥ एततपोविदुर्धीरानशरीरस्य शोषणं ॥ (गी. भा. देवतोद्देशेनद्रव्यत्याग रूपयज्ञः) त्रिवर्णानां आश्रमत्रयाणा च धर्म ॥ ननु शूद्राणा संन्यासिनां च ॥ श्रद्धायज्ञस्तु सर्वेषा वर्णाना आश्रमाणा च धर्म ।) तदुक्तं शांतिपर्वणि ६० अ० ॥ सर्वोहिमनं वर्णाना यज्ञस्तस्यैव भारत ॥ अग्रे सर्वेषु वर्णेषु श्रद्धायज्ञो विधीयते । (दान त्रिवर्णानामेव ॥ सर्वेषामाश्रमिणा च धर्म ॥ निरुक्तंतपस्तु सर्वपांवर्णानामाश्रमिणां च धर्मः॥ शूद्राणा तदेनिष १वचनंतु ब्रह्मणि अखंडाकारचित्तधारणा-रूप तपो विषयमिति माति ॥)

मन्या० कृष्णाचार्या द्रव्ययज्ञज्ञानयज्ञाः, द्रव्यदान विद्या-भयदानानि ब्रह्मचर्यकृच्छ्रचांद्रायणादितपांसि ॥ एतानि च गृहस्थनिरिक्तवर्णानां धर्मः ॥ सर्वाश्रमाणां च धर्मः ॥ मूत्र भा. नाग्निर्नयज्ञःशूद्रस्यतथैवाध्ययनं कुत इति शूद्राणां निषेधात् (द्रव्ययज्ञा स्तपोयज्ञा इत्यारभ्य एवं बहुविधा-

R Krishnaswami Sastri

यज्ञा इत्यंतंगीतावाक्यं यज्ञभेदे प्रमाणं) ज्ञानयज्ञ विद्याभय दानतपसोहिते इत्यादिना गीता भाष्ये च उक्तमेनन् प्रसंगं ॥

कूटा० शामाचार्याः यज्ञ दानतपांसि यथा संभवं सर्ववर्ग धर्मः ॥ अत्र प्रमाणं ॥ यज्ञदानतपःकर्मन त्याज्यं कार्यमेव तत् इति गीता.

प्रश्न. १९. सर्वथाऽदोनं वेदोक्त विधिः ॥ पंच अनृतानि अपातकानीति च शास्त्रेषु उक्तं भवतीति केचित् वदन्ति, अस्मिन् विषये कः सिद्धान्तः ? तस्य किंप्रमाणम् ?

उत्तरं० मन्नारगुडी रामचन्द्राचार्याः. सत्यंवदेत्युत्सर्गः विशेषप्रमाणवशात् विषयविशेषे अनृतं पातकं न ॥ तथा चोक्तं मनुस्मृतावष्टमाध्याये ॥ कामिनीषु विवाहेषु गवांभक्ष्ये तथेंधने । ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकम् ॥ कुल्लूकभट्टीये वशिष्टः ॥ सुरतलाभार्थं कामिनीविषये विवाहविषये गवार्थं घासाद्युपहारे च अग्नौ होमार्थमिन्धनाद्युपहारे ब्राह्मणरक्षणार्थमंगीकृत धनादौ वृथा शपथे पाप न भवतीति.

मन्ना० कृष्णाचार्याः. सत्यंवदेति सामान्यविधिः ॥ कामिनीषुविवाहेषु गवांभक्ष्ये तथेंधने । ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकम् ॥ इति मनुवचनेन तथा सुरतलाभार्थं कामिनीविषये विवाहविषये गवामर्थे घासाद्युपहारे अग्नौ होमार्थं इंधनाद्युपहारे च ब्राह्मणरक्षणार्थं अंगीकृतधनादौ वृथा शपथे च पापं न भवतीति वशिष्टवचनेन च कचिद्विषये पातकं न भवतीति अनृतवचनं मन्वादिवाक्यस्य विशेषवचनत्वेन बलवत्वात्सामान्यस्य संकोचः भारततात्पर्यनिर्णये च सत्यस्यवचन श्रेयः सत्यज्ञानं तु दुर्लभम् ॥ इत्यादिना इदमेवोक्तं ॥

कृ० शामाचार्याः. सत्यस्य वचनं श्रेयः सत्यज्ञानं तु दुष्करं ॥ यत्सतां हितमत्यन्तं तत्सत्यमिति निश्चय इत्येत त्सत्यशब्दार्थः सत्यवदेति वेदार्थोऽपि सएव सिद्धान्तश्च पंचानृतान्यपि सकटादिविषदकत्वादपातकानीत्येव सिद्धान्तः अत्र भारत भागवतादि सम्मतिः ॥

मन्या० रामाचार्याः. पंचानृतान्यपातकान्येवेति सिद्धान्तः । स्त्रीपुनर्मेविवाहेच वृत्यर्थे प्राणसंकटे । गोब्राह्मणार्थेहिंसायां नानृतस्याज्जुगुप्सितं ॥ इति भागवतोक्तेः । भारतेपि पचानृतान्याहुरपातकानीति ॥

मोरवी शामण्णाचार्याः. विवाहकाले रतिसंप्रयोगे प्राणात्यये सर्वधनापहारे ॥ विप्रस्यचार्थे ह्यनृतंवदेत पंचानृतान्याहुरपातकानि ॥ कर्णपर्वणि ६९ अध्याये.

कौ० मुरार्याचार्याः. सद्धितार्थकसत्यत्वविशिष्ट सत्यंवदेति वेदोक्तविधिः सद्धितार्थकानृतत्वविशिष्टपंचानृतानीति शास्त्रेण एककण्ठोभवतीति विधिः शास्त्रंचेति उभयमपि युक्तमेवेति सिद्धान्त इति भाति अस्मिन्नर्थे यत्सतां हितमत्यन्तं तत्सत्यमिति निश्चय इति श्रीमन्महाभारततात्पर्यनिर्णयोक्तिः प्रमाणं तत्र सज्जनहितार्थकानृतस्यापि सत्यत्वनिर्वचनात्.

नृ० रंगेशाचार्याः. विष्णुरहस्ये ॥ ११ अ० ॥ येनसत्येनजायेत सज्जनानांनिरागसां ॥ अहितंचैन्नतत्सत्यं ॥ येनानृतेनजायेत परेषामुपकारिता ॥ अनृतं नैवतत्प्रोक्त पुण्य वाचिकमेव तत् ॥ १९ ॥ भा० आनु० २३ अ० गुर्वर्थमभयार्थं वा वर्जयित्वा युधिष्टिर । येनृतं कथयन्तिस्म ते वै निरयगामिनः ॥ ६० ॥ भा० शान्ति० १९ अ० युधिष्ठिर ॥ किंस्वित्सत्यंकिमनृतं किंस्विद्धर्म्यं सनातनं ॥ कस्मिन्काले वदेत्सत्यं कस्मिन्कालेऽनृतं वदेत ॥३॥ प्रा-

णात्यये विवाहे च वक्तव्यमनृतं भवेत् ॥ ता० नि० २७ अ. यत्सतांहितमत्यंतं तत्सत्यमितिनिश्चयः॥ मनः ॥ ८. अ. १०४. श्लो. ॥ शूद्रविट्क्षत्रविप्राणां यत्रर्तोक्तांभवेद्वधः॥ तत्रवक्तव्यमनृतंतद्धिसत्या द्विशिष्यते ॥ विवाहकाले ऋतु संप्रयोगे प्राणात्ययेसर्वधनापहारे ॥ विप्रस्यचार्थेह्य नृतंवदेत· पंचानृतान्याहुरपातकानि ॥ (पूर्वोक्त विषये अनृतभाषणे· दोषोनास्तीतिसिद्धांतः ॥)

आपे ० रामर्ष० भारतवनपर्व. अ. २०८. धर्मव्याधः । श्रुति प्रमाणोधर्मोयं इति वृद्धानुशासनं । सूक्ष्मागति हिं धर्मस्य बहुशाखाह्यनन्तिका । प्राणांतिके विवाहेचवक्तव्यम· नृतंभवेत् । अनृतेन भवेत्सत्यं सत्येनैवानृतभवेत् । यद्भूतहि तमत्यंतं तत्सत्यमितिधारण ।

नानृतवचने दोषाजीवनचेत्तदधीनमिति गौतम सूत्र १३. अ. भागवते ८. स्कधे. १८. अध्याये स्त्रीषुनर्मेविवाहे च वृत्यर्थे प्राणसंकटे । गोब्राह्मणार्थे हिंसायां नानृतंस्याज्जु गुप्सित· मिति च – ४३.

तात्पर्यनिर्णये अ. २७. श्लो. ११९ सत्यस्यवचनंश्रेयः सत्य ज्ञानंतुदुष्करं । यत्सतां हितमत्यंतं तत्सत्यमिति निश्चय. ॥ कौशिकाख्यो ब्राह्मणो हि छीनंग्रामजन क्वचित् । तस्करेष्व· भिधायैवानिरयं प्रत्यपद्यतेति ॥

भारते आदिपर्वणि अ. श्लोक. १६.

ननर्मयुक्तं वचनं हिनस्ति न स्त्रीषु राजन्न विवाहकाले । प्राणांतिके सर्वधनापहारे पचानृतान्या हुरपातकानि इति.

उदाहृतवचनैः समय विशेषे अनृतस्य पापजनकत्वाभावउक्तः अतःवेदोक्तविधिः उत्सर्गः स्यादिति भाति ॥

यादवेंद्राचार्याः. सत्यं वदेति विधिः नित्या वक्तव्यं सर्वं सत्य

मेव भवितव्यं नान्यत् असत्यं कैतवानां धर्मः अस्मिन्नर्थे ऐतरेय ब्राह्मणं भागवते अष्टमस्कंधे १९ अध्याये श्लोकाश्च प्रमाणं तथाहि. बलिरुवाच ॥ स चाहं वित्तलोभेन प्रत्याचक्षेकथंद्विज ॥ प्रतिश्रुत्य ददामीति प्राह्लादिः कितवो यथा ॥ ३ ॥

नह्यसत्यात्परोधर्म इतिहोवाच भूरियं ॥ सर्वसोढुमलं मन्ये ऋतेलीक परंनरं ॥ ४ ॥

ऐतरेय ब्राह्मणं.

ओमिति सत्यन्नेत्यनृतं तदेतत्पुष्पं फलं वाचो यत्सत्यंसहेश्वरो यशस्वी कल्याणकीर्तिर्भवितोः पुष्पं हि फलं वाचः सत्यं वदति अथैतन्मूलं वाचो यदनृतं तद्यथा वृक्ष आविर्मूलः शुष्यति स उद्वर्त्तत एवमेवानृतं वदन्नाविर्मूलमात्मानं करोति स शुष्यति स उद्वर्त्तते तस्मादनृतन्नवदेद्दयेतत्वेनेन पराग्वाएतद्रिक्तमक्षरं यदेतदो३मिति तद्यत् किञ्चोमित्याहात्रैवास्मै तद्रिच्यते स यत्सर्वमोङ्कुर्याद्रिञ्चयादात्मानं स कामेभ्योनालंस्यात् अथैतत्पूर्णमभ्यात्मंयन्नेति स यत्सर्वन्नेतिब्रूयात्पापिकास्य कीर्तिर्जायेत सैनं तत्रैव हन्यात् तस्मात् कालएवदद्यात्काले न दद्यात्तत्सत्यानृते मिथुनीकरोतितयोर्मिथुनात्प्रजायते भूयान्भवति.

अत्र सायन भाष्यं.

ओमित्येतद्रूपं यत्सत्यं तदेतत्वाग्रूपस्य वृक्षस्य पुष्पफलस्थानीयं काण्डद्वय प्रतिपाद्यकमज्ञानञ्च शब्दसम्बन्धित्वात्तवाग्वृक्षस्य पुष्परूपन्तदुभयसाध्यं देवताजन्म मुक्तिश्चेत्युभयं तस्य वृक्षस्य फलरूपं. तयोः पुष्पफलयोर्हेतुत्वादोङ्कारस्तद्रूपत्वेनोपचर्यते एवन्व्यातापुमान्यस्मात्वाचःसम्बन्धी पुष्पं फलं च वदति तस्मादयं लौकिकवचनसम्पत्त्यादियशोयुक्तो वैदिकपुण्यानुगुणकीर्तियुक्तश्च भवितुंसमर्थः॥प्रसङ्गात्बुद्धिस्थमनृतवदनमिषेधंपुरु-

चार्यतया दर्शयति, अथैतन्मूलं वाचो यदनृतं तद्यथा वृक्षआविर्मूलःशुष्यति स उद्वर्त्तते एवमेवानृतं वदन्नाविर्मूलमात्मानङ्करोति स शुष्यति स उद्वर्त्तते तस्मादनृतं न वदेद्दयेतत्वेनेन इति. प्रकृतादुपासनात्ततप्रशंसारूपाद्वाक्यादर्थान्तरकथनार्थः अथ शब्दः न प्रकृतमुपासनाङ्गमुच्यते किन्त्वन्यः कश्चित्प्रासङ्गिकोऽनृतनिषेध इत्यर्थःयत् अनृतं मिथ्याभाषणं अस्तितत् एतत् वाग्वृक्षस्य मूलस्थानीयसत्यस्य पुष्पफलस्थानीयत्वेसति तद्विपरीतस्यानृतस्य मूलत्वं युक्तं तथामूलत्वेसति लोके यथा कश्चित्वृक्षः भूमेरुत्खातःसन् आविर्भूतमूलो भूत्वा प्रथमं शुष्यतिपश्चात्उद्वर्त्तते विनश्यति च एवमेवानृतंवदन्पुरुषो वाग्वृक्षरूपंआत्मानं आविर्मूलङ्करोति मूलभूतानृतवदनस्य परेषामग्रे प्रकटीकृतत्वात्तेनपापेनसः पुरुषःशुष्यति सर्वैस्तिरस्कार्यत्वमेवास्यशोषःअयमनृतवादीनतु प्रामाणिक इत्येवं सर्वैतिरस्कुर्वन्तिसः तादृशः पुरुष उद्वर्त्ततेविनश्यति नरकं प्राप्नोतीत्यर्थः''

प्रश्न. २०. क्रतुषु पशुहिंसनम् पापजनकं वा न वा ?

उत्तरं. टोणपे. शार्ङ्गपाणिः. मनुस्मृतौ पंचमाध्याये यज्ञार्थं पशवस्सृष्टाः स्वयमेवस्वयंभुवा। यज्ञस्यभूत्यै सर्वस्य तस्माद्यज्ञे वधोऽवधः । अग्नीषोमीयं पशुमालभेतेति श्रुतेस्सद्भावाच्च-याज्ञीयपशुहिंसनं पापजनकं नेति भाति ।

शा० रामचं० क्रतुषुपशुहिंसनं पापजनकं न. अग्नीषोमीयं पशुमालभेतेति श्रुतिविहितत्वात् । श्रुतिविहिता हिंसा अहिंसैव-उक्तं च मनुना-अ० ९ श्लोक ४४. यावेदविहिता हिंसा नियतास्मिंश्चराचरे । अहिंसामेवतां विद्याद्वेदाद्धर्मोहि निर्बभौ इति - किञ्चमनुः पशुवधस्य यज्ञेकर्तव्यत्वमभ्युपैति - यज्ञार्थं पशवःसृष्टाः स्वयमेव स्वयंभुवा - यज्ञस्य भूत्यै सर्वस्य तस्माद्यज्ञेवधोऽवधः । ओषध्यः पशवोवृक्षास्तिर्यञ्चः पक्षिणस्तथा

यज्ञार्थे निधनं प्राप्ताः प्राप्नुवंत्युच्छ्रितीः पुनः ॥ मधुपर्के च यज्ञे च पितृदैवत कर्मणि ॥ अत्रैव पशवोहिंस्यानान्यत्रे-त्यब्रवीन्मनुः ॥ एष्वर्थेषु पशून्हिंसन्वेदतत्वार्थविद्द्विजः ॥ आत्मा नंच पशुंचैवगमयत्युत्तमा गतिं इति अ० ५– श्लो० ३९ – ४० – ४१–४२–.

कौ० मुरार्याचार्याः. क्रतुषु पशुहिंसनं पापजनकं न भवति न हिंस्यात्सर्वा भूतानीत्युत्सर्गस्याग्नीषोमीयं पशुमालभेतेत्यप-वादात् अस्मिन्नर्थे ॥ हिंसात्वैवैदिकीयातुनयानर्थोध्रुवं भवेत् ॥ वेदोक्तया हिंसयातु नैवानर्थः कथंचनेति वाराहवचनं प्रमाणं यज्ञार्थपशुहिंसनमहिंसाप्रायामित्यर्थक मनूक्तिश्चात्र प्रमाणं.

तु० रङ्गेशाचार्याः. मनुः ॥ ५ अ० ॥ यज्ञार्थे ब्राह्मणैर्वध्याः प्रशस्ता मृगपक्षिणः ॥ २२ ॥ यज्ञार्थं पशवःसृष्टाः तस्माद्यज्ञेवधोऽवध. ॥ या वेदविहिता हिंसानियतास्मिंश्चरा-चरे ॥ अहिंसामेवतां विद्यादिति ॥ यजुर्वेदे नाहिंस्यात्सर्वाभूता-नीत्युत्सर्गस्य-अग्नीषोमीयं पशुमालभेतेति-अपवादेन बाधदर्श-नात् ॥ उत्सर्गापवादयोर्मध्ये अपवादस्यैव प्राबल्यमितिन्या-यात् ॥ सू० भा० तृ० अ० १८ अ० वेदोक्तया हिंसयातु नैवानर्थः कथंचनेति वचनात् ॥ (वैधी हिंसा न पापसाधन-मित्यनुमानाच्च ॥)

मोरबी शामण्णाचार्याः. क्रतुषु पशुहिंसनं पापजनकं न भवति ॥ तदुक्तमेकादश तात्पर्ये ॥ यज्ञेष्वालंभनं प्रोक्तं देव-तोद्देशनः पशो. ॥ हिंसानामतदन्यत्र तस्मात्तांनाचरेद्बुधः ॥ यतो यज्ञे मृताऊर्ध्वंयांति दैवेच पैतृके ॥ अतोलाभादालभनं स्वर्गस्य न तु मारणमिति ॥

मन्या० रामचन्द्राचार्याः क्रतुषु पशुहिंसनं पापजनकं

न भवति तथोक्तं भगवता सूत्रकारेण अशुद्धमिति चेन्नशब्दा-
दितिसूत्रभाष्ये वाराहेहिंसात्व वैदिकीयातु तयानर्थोध्रुवंभवेत् ।
वेदोक्तया हिंसयातु नैवानर्थः कथंचनेति

एवं **मन्या० कृष्णाचार्याः**

कृ० शामाचार्याः हिंसात्ववैदिकीयातु तयानर्थोध्रुवं भवेत् ॥
वेदोक्तया हिंसयातु नैवानर्थः कथंचन ॥ अत्रभागवत तात्प-
र्यादिसंमतिः ॥

अग्नीषोमीयं पशुमालभेतेतिश्रुतिः

मन्या० रामाचार्याः क्रतुषुपशुहिंसनं पापजनकंन अग्नीषो-
मीयंपशुमालभेतेति श्रुतेः । अशुद्धमितिचेन्नशब्दात् । इति
ब्रह्मसूत्रात् । हिंसात्ववैदिकीयात्, तयानर्थोभवेत्ध्रुवं । वेदो-
क्तया हिंसयातुनैवानर्थः कथचन इति भाष्योदाहृतवाराह
वचनाच्च

एतच्चक्षात्रियादिपरं ब्राह्मणानांतु पापजनकमेव एकादशतात्पर्ये
तथैवोक्तेः । भारतेप्यस्मिन्विषये उपाख्यानमस्ति

यादवेन्द्राचार्याः. पशुहिंसनं क्रतुष्वपि पापजनकमेव.
तथाहि श्रीमद्भागवते स्कं० १ अ. १८. श्लो. १२.
कर्मण्यस्मिन्ननाश्वासेधूमधूम्रात्मनां भवान् ॥
आपाययति गोविंद पाद पद्मा सवंमधु ॥

४ स्कं० २९ अ० नारद उवाच ॥ भोभो प्रजापते
राजन् पशून्पश्यत्वयाध्वरे ॥ संज्ञापितान्जीवसंघान्निर्घृणेन
सहस्रशः ॥ ७ ॥ एतेत्वासंप्रतीक्षंते स्मरन्तो वैशसं तव ॥
संपरेतमयः कूटैः छिंदंत्युत्थितमन्यवः ॥ ८ ॥
२७-२८. ईजे च क्रतु भिर्घोरदीक्षितैः पशुभिर्मारैर्के: ॥ देवान्
पितॄन् भूतपतीन् नानाकामो यथाभवान् ॥ अ० २८. ते

यज्ञपराबोऽनेन संज्ञमायेऽद्दयालुना ॥ कुठारैः चिच्छिदुः क्रुद्धाः स्मरंतोमीव मन्यवन् ॥ २६ ॥

अ. २९. श्लो. ४७—५१.

स्क. ७ अ. ७ श्लो. ४०

एव हि लोका क्रतुभि कृता अमी क्षयिष्णवः सातिशया न निर्मलाः ॥

तस्माद् दृष्टश्रुत दूषणंपरं भक्त्यैकयेशं भजतात्मलब्धये ॥

अ. १४. नह्यग्निमुखतोयवै भगवान् सर्वयज्ञ भुक् ॥

इज्यते हविषा राजन् यथा विप्रमुखेहुत ॥ १७ ॥

अ. १५. श्ली. ८—११, ४०—५१.

स्कंध. ११. अ. ५. श्लो. १४.

येत्वनेवं विदोसंत. स्तब्धा. सदभिमानिनः ॥

पशून् द्रुह्यति विस्रब्धा प्रेत्यखादति तेच तान् ।

११. अ. १०. श्लो. २२—२६.

अ. २१. श्लो. २७, ९०.

कामिनः कृपणालुब्धाः पुष्पेषु फलबुद्धयः ॥ अग्निमुग्धा धूमतांता स्वलोकं न विदंति ॥ २७ ॥ नतेमामंगजानंति हृदिस्थ य इद यतः ॥ उक्थशस्त्राह्यसुतृपोयथानीहार चक्षुप ॥ २८ ॥

प्रश्न २१ – याचयित्वा क्रतुकरणं पापजनकं वा न वा ?

उत्तरं मशा० रामचन्द्राचार्याः याच्ञा लब्धद्रव्येण क्रतुकरणं पापजनकमेव ॥ तदुक्तं मनुस्मृतावेकादशाध्याये ॥ यस्य त्रैवार्षिकं भक्तं पर्याप्तं भृत्यवृत्तये ॥ अधिकं वापि विद्येतससोमंपातुमर्हति ॥ अतस्स्वल्पीयसि द्रव्ये यस्सोमं पिबतिद्विजः ॥ स पीत सोमपूर्वोपि न तस्याप्नोति तत्फल ॥ यं शूद्रादपि

गम्यार्थं अग्निहोत्रमुपासते ॥ ऋत्विजस्तेहि शूद्राणां ब्रह्मवादिषु गर्हिताः ॥ हंत्यल्पदक्षिणो यज्ञस्तस्मान्नाल्पधनोयजेदिति च ॥

एवमेव **मन्या० कृष्णाचार्याः.**

तु० रंगेशाचार्याः. मनुः ॥ न यज्ञार्थं धनं शूद्राद्विप्रोभिक्षेत कर्हिचित् ॥ यजमानोहिभिक्षित्वा चंडालःप्रेत्यजायतेइति स्मृतौ शूद्रान्नाभिक्षेतेत्युक्त्या. द्विजेभ्योयाचयित्वा क्रतुकरणेदोषोनास्तीति भाति ॥ भा. शां. १३० अ योवैश्यःस्याद्बहुपशुः हीनक्रतुरसोमपः ॥ कुटुंबात्तस्य तद्द्रव्यमाहरेद्यज्ञसिद्धय इति वचनं ॥ मनुरपि ११ अ. योवैश्यःस्याद्बहु पशुरिति च ॥

कूठा० शामाचार्याः. तात्पर्य निर्णये यज्ञेश्वरेणाभियुतेषु भक्त्यामहीं प्रशासत्सु पृथासुतेषु ॥ यियक्षुरागान्निशिविप्रवर्योयुधिष्ठिरं वित्तमभीप्समानः ॥ प्रातर्ददानीति नृपस्य वाक्यं निशाम्य विप्रस्त्वरितोमखार्थे ॥ भीमंययाचे स नृपोक्तमाशु निशम्य चादान्निजहस्तभूषणं ॥ इत्यादिना विप्रस्यक्रत्वर्थयाचनामुख्यैव ॥ बलाद्ग्रहण क्षत्रियस्य आपस्तंबसूत्रं च । देव यजनंयाचये दित्यादि । रविग्रहे कुरुक्षेत्रे अजामुभयतोमुखीं ॥ चंडाला दपिसंगृह्ययजेतावश्यकैर्मखैः ॥

कौ० मुरार्याचार्याः.

दरिद्रस्य द्रव्ययाञ्चया क्रत्वनुष्टानं पापजनक न भवेदिति भाति अत्रार्थे प्रमाणं, चडालादपिसगृह्य यजेतावश्यकैर्मखैरिति ।

मन्या० रामाचार्याः. प्र० र० द्विजेभ्योयाचनां कृत्वा यज्ञकरणं न पापजनकं । न यज्ञार्थं धनं शुद्राद्विप्रोभिक्षेतकर्हिचित् । यजमानोहि भिक्षित्वा चंडालः प्रेत्यजायते । इति

मनवाक्ये शूद्रयाचनानिषेधात् । विशेष निषेधः शेषे विधिं गमयति । धनार्जनं कृत्वायज्ञकरणापेक्षया अनार्जनं वर भाति. धर्मार्थं यस्य वित्तेहा वरंतस्यनिरीहता । प्रक्षालनाद्धिपङ्कस्य दूरादस्पर्शनं वरं ॥ इति भारतोक्तेः । भागवते च । धर्मार्थमपि नेहेत यात्रार्थं वाऽधनो धनम् । अनीहानीहमानस्य महाहेरिव वृत्तिदा ॥ इति.

स्वापे रामचन्द्राचार्याः. मनुः अ० ११. श्लो० १९. आदाननित्याच्चादातुराहरेदप्रयच्छतः । तथा यशोऽस्यप्रथते धर्मश्चैव प्रवर्धते ॥ इति श्लोकस्य व्याख्यायां याचनायां कृतायां अददतो बलेन चौर्येण वा हरेत् – इत्युक्तत्वात् महा० तात्पर्यनिर्णये – प्रातर्ददामीति नृपस्य वाक्यं निशम्य विप्रस्त्वरितो मखार्थे । भीमं ययाचे सनृपोक्तमाशु निशम्य चादान्निजहस्तभूषण मिति - ब्राह्मणेन यज्ञार्थं याचनस्य भीमेन हस्तभूषणदानस्य कथितत्वाच्च द्रव्यंयाचयित्वा क्रतु करणं न पापजनकमिति भाति.

शूद्राद्याचितेन द्रव्येण क्रतुकरणं मनुना एकादशाध्याये सम्यग्दूपितमिति पापजनकमेव.

पादवंद्राचार्याः . याचयित्वा क्रतुकरणं पापजनकमेव.

७२ प्रश्नः. ब्राह्मणार्थे कूटसाक्ष्यं अपातकं वा ?

उत्तरं. मण्णारगुडी रामचन्द्राचार्याः. विषय विशेषे अपातकं ॥ तथाचोक्तं मनुस्मृतावष्टमाध्याये ॥ तद्वदन्धर्मतोर्थेषु जानन्नप्यन्यथा नरः ॥ न स्वर्गाच्च्यवते लोकाद्दैवींवाचं वदंतितां ॥ शूद्रविट्क्षत्र विप्राणां यत्रर्तोक्तौ भवेद्वधः ॥ तत्र वक्तव्यमनृतं तद्धिसत्याद्विशिष्यते ॥ व्याख्यातं कुल्लूकभट्टीये ॥ प्रमाद-स्खलिताधर्मविषयत्वेन त्वत्यंताधार्मिकसंधिकारस्तेनादि विष-

यत्वे तथाचगौतमः नानृतवचने दोषो यज्जीवनंचेत्तदधीनं न तु पापीयसो जीवनमिति ॥

श्रीनिवासाचार्याः. कूटसाक्ष्यं कस्यचिन्मरणान्निवृत्तेर्हेतुश्चे-न्नदोषः—नानृत वचनेदोषो यत्जीवनञ्चेत्तदधीनमिति गौतम स्मरणात्.

तु० रंगेशाचार्याः. विप्रस्यचार्थेत्वनृतं वदेनेत्यनेनैव दत्तोत्तरमे-तत्.

कू० शामाचार्याः. तात्पर्येनि. कौशिकाख्यो ब्राह्मणोहि लीनं ग्रामजनं कचित् ॥ तस्करेष्वभिप्रायैव निरयं प्रत्यपद्यतेति अनर्थ श्रवणादपातकमेव ॥

मन्या० कृष्णाचार्याः. क्वचिद्विषये अपातकं ॥ तदुक्तंमनु-स्मृतौ ॥ शूद्रविट्क्षत्र विप्राणां यत्रर्तोक्तो भवेद्वधः ॥ तत्र वक्तव्यमनृतं तद्धिसत्याद्विशिष्यते इति ॥ कुल्लूकः ॥ तथा गौतमोऽपि नानृतवचने दोषो यज्जीवनंचेत्तदधीनं न तु पापी-यसो जीवनमिति ॥

कौ० मुरार्याचार्याः. आपदिसद्ब्राह्मणार्थे कूटसाक्ष्यं अपातक-मिति भाति अस्मिन्नर्थे ॥ यत्सताहितमत्यंतं तत्सत्यमिति निश्चयः ॥ इति श्रीमन्महाभारत तात्पर्य निर्णय प्रमाण पंचानृतानीति शास्त्रंच प्रमाणं ॥

तोरवी शामण्णाचार्याः. ब्राह्मणार्थे कूटसाक्ष्यं पातकमिति न निश्चिनुमः किंत्वपातकमिति भाति । तथाहि ॥ प्रकृते कौट-साक्ष्यं नाम ब्राह्मणेषु प्रमादादकृत्य संभवे तस्य तेन राज-कीयनिर्णयप्रसक्तौ विवादे वा तन्निर्णयार्थं साक्ष्यपेक्षायां ब्राह्मणं तत्कृतदोषे प्रच्छाद्य तन्निवर्तनानुकूलवचनमेव ॥

तच्चापानकं पचानृतांतर्भूतं ॥ तच्चपूर्वं प्रश्नोत्तरलेखेन चरितार्थं ॥ यद्यपि कौटसाक्ष्यं सुहृद्वध एतौ सुरापानसमौ - इति निषेधः विष्णुस्मृतौ श्रूयते ॥ तत्सामान्यमिति न विरोधः ॥

मन्या० रामाचार्याः. आपद्यपानकं । शूद्रविट्क्षत्रविप्राणां यत्रर्तोक्तौ भवेद्वधः । तत्र वक्तव्यमनृतं तद्धिसत्याद्विशिष्यते । इति मनूक्तेः ।

२३. **प्रश्न** संध्यावंदनाख्य कर्मणि किमंगि कान्यंगानि ?

उत्तरं. मन्नारगुडी रामचन्द्राचार्याः. संध्यायां संध्याकाले वंदनं देवतात्रयवंदनं संध्यावंदन शब्दार्थः ॥ ताश्च-देवताः गायत्रीसावित्रीसरस्वत्यः ॥ तथा चोक्तंछलारीये ॥ मौंजीबंधनमारभ्य सायं प्रातश्च कालयोः ॥ मध्यान्हेपिच कर्त्तव्यं संध्यावंदनमिष्टद । गायत्रीचैव सावित्री तथैवच सरस्वती ॥ सध्यात्रयेच विज्ञेयादेवता विष्ण्वधिष्ठिता इति उक्तदेवता त्रयवंदनमगि अन्यदंगं । अथवा संध्याभाष्ये ॥ उपास्तिस्सन्ध्यौ सूर्यस्य निशायां दिवसेपुवा ॥ तामेवसंध्यां तस्माद्धि प्रवदंति महर्षय इति व्यासवचनात् गायत्रीजपः अंगि अन्यदंग ॥

एवमेव **मन्यारगुडी कृष्णाचार्याः**

श्रीनिवासाचार्याः. तदुहवाएते ब्रह्मवादिनः पूर्वाभिमुखास्सन्ध्यायाङ्गायत्रियाभिमन्त्रिता आप ऊर्ध्वं विक्षिपन्ति ता एता आपो वज्रीभूत्वा तानिरक्षांसि मन्देहारुणेद्वीपे प्रक्षिपन्ति यत्प्रदाक्षिणं प्रक्रमन्ति तेन पाप्मानमवधून्वन्त्युद्यन्तमस्तं यन्तमादित्यमभिध्यायन् कुर्वन् ब्राह्मणो विद्वान् सकलं भद्रमश्नुतेऽसावादित्यो ब्रह्मेति ब्रह्मैवसन्ब्रह्माप्येति य एवं वेदेति वेदेन अर्घ्यदानादेः- ॥ उत्थायावश्यकं कृत्वा कृत

शौचस्समाहितः ॥ पूर्वां सन्ध्यां जपंस्तिष्ठेदिति मनुनाजपस्य च संन्ध्या वन्दनत्वेन प्रतिपादनात् - महाभारतेन उपस्थानस्य विधानाच्च एतानि त्रीणि प्रधानानि - अन्यान्यङ्गानि ॥

कुडा० शामाचार्याः. अर्घ्यजपरूपांगिद्वयात्मकं कर्म संध्या वंदनाख्यं प्राणायामादिपापपुरुषाविसर्जनांतान्यंगानि अर्घ्यमंगि ॥ भूतोच्चाटनादि ध्यानांतान्यंगानि ॥ जपः अंगी ॥

कौ० मुरार्याचार्याः संध्यावंदनाख्य कर्मणि गायत्रीजपः अंगी अन्यान्यंगानि अंगेष्वपि प्रधानांगं अर्घ्यप्रदानं अत्रार्थे कुर्यादन्यन्नवाकुर्यान्मैत्रो ब्राह्मण उच्यत इति प्रमाणं.

मन्या० रामाचार्याः. अर्घ्यदानमंगि. अन्यदंगं. अतएवाशौचेतन्मात्रानुष्ठानं इति छलारीये । क्वचिदर्घ्यप्रदानजपोपस्थानानांत्रयाणामप्यंगित्वमुक्तं. स ग्रंथो न स्मर्यते । अतएव अर्घ्य प्रदानानंतरं ब्रह्मयज्ञकरणेपि. "न कर्मणि कर्मारंभ" इति निषेधोपि इति तत्रैवोक्तं । एतत् बृहच्छलारीये प्रायशः स्यात । वंदनमुपस्थानांतर्गतं. अथवा तदपि पृथक् प्रधानं । अनन्यार्थत्वात् अनन्यार्थत्वयुक्त्याप्येषामंगित्व ज्ञायते ।

टोणपे शार्ङ्गपाण्याचार्याः. मनुस्मृतौ द्वितीयाध्याये चतुःषष्टि पृष्टे ॥ पूर्वां सध्यां जपं स्तिष्ठेत्सावित्रीमार्क दर्शनात् ॥ पश्चिमांतुसमासीनः सम्यगृक्षविभावनात् मनु. व्याख्या०प्रथम संध्यायां सूर्य दर्शनपर्यंतं सावित्रीं जपंस्तिष्ठेत् ॥ आसनादुत्थाय निवृत्तगतिरेकत्र देशे कुर्यात् ॥ पश्चिमायांतु संध्यायां सावित्रीं जपन्सम्यङ्नक्षत्र दर्शन पर्यंतमुपविष्टःस्यात् ॥ अत्रच फलवत्वाज्जपः प्रधानमंगि ॥ स्थानासनेत्वंगे फलवत्सन्निधावफलं तदंगमितिन्यायात् ॥ संध्ययोर्वेदविद्विप्रो वेदपुण्येन युज्यते ॥ सहस्त्रकृत्वस्त्वभ्यस्य इतिच उपस्थानादिकं तदंगमिति प्रतिभाति.

स्वापे रामचन्द्राचार्याः. अर्घ्यप्रदानं गायत्रीजपपूर्वकध्यानं-चेत्येतदुभयमंगि तदितराण्यंगानि ॥ रक्षा सिहवापुरोनुवाके इति खंडे अर्घ्यदानस्योक्तत्वात्. सूर्यांतर्गत भगवत्ध्यानस्यैव संध्या शब्दार्थत्वेन–संध्या भाष्यादावुक्तत्वात् आशौचादौ-तावन्मात्रस्यैव कर्तव्यत्वविधानाच्चेति भाति.

तोरवी शामणाचार्याः. स्मृत्यर्थ सागरे अथवाऽर्घ्यांत एव प्रधानं संध्या ॥ जपोपस्थानादिकं तदंगं ॥ अतएव सूतकादौ अर्घ्यांतमेव संध्यावंदनं क्रियते ॥

यादवेंद्राचार्याः. संध्यायां गायत्रीजपपूर्वकं स्वांतर्यामिणः वंदनपूर्वकं ध्यानं अंगि अन्यत्सर्वं अगं अयं अर्थः मंत्रलिंगात् लभ्यते.

प्रश्नः २४. हिमवत्पर्वतात् उत्तरतः मनुष्यैः गंतव्यप्रदेशोस्ति वा.

उत्तरं. मळारगुडी रामचन्द्राचार्याः. नास्ति । तथाचोक्तं भागवते पञ्चमस्कन्धे ॥ स्वर्गिणां पुण्यशेषोपभोगस्थानानि भौमस्वर्गपदानि व्यपदिशन्तीति ॥

एवमेव **मन्या० रामाचार्याः. मन्यार० कृष्णाचार्याः.**

कूटा० शामाचार्याः. गन्तव्यः प्रदेशोस्ति न तु केवलमानुषैः ॥ अत्र भारतसंमतिः ॥ अत्रप्रमाणम् मोक्षधर्मे १९२. भृगुरुवाच उत्तरेहिमवत्पार्श्वे पुण्येसर्वगुणान्विते । पुण्यःक्षेम्यश्च काम्यश्च सपरो लोकउच्यते ॥ तत्रह्यपापकर्माणः शुचयोत्यन्त निर्मलाः ॥ लोभमोहपरित्यक्ताः मानवा निरुपद्रवाः ॥

कौ० मुरार्याचार्याः. हिमवत्पर्वतात् उत्तरतः मनुष्यैः गंतव्यप्रदेशोनेति भाति.

नु० रंगेशाचार्याः. मध्वविजये ७ स० अथहैमवतेतटान्तर-इत्यत्र ॥ व्याख्याने अन्यत्तटं तटान्तरं हिमवदुत्तरेपार्श्वे

इत्युक्तंवर्तते ॥ उत्तरश्लोके ॥ श्रवणामृतगीर्गणैर्द्विजैरिति च ॥ एतेन मनुष्यैर्गतव्यप्रदेश एवेति भाति ॥

तोरवी शामण्णाचार्याः. भृगुरुवाच ॥ हिमवदुत्तरेपार्श्वे इत्यादा, मानवा इत्यनेन मनुष्यचारो ज्ञायते ॥ शान्ति-पर्वणि.

खापेरामचन्द्राचार्याः. हिमवत्पर्वतादुत्तरतोविद्यमान इळा-वृतखण्डाख्य स्थलविशेषे सुद्युम्नगमनस्य नवमस्कंधे ॥ मुकु-मारवनं मेरोरधस्तात्प्रविवेशह - इत्यादिनोक्तत्वात् गतव्य. प्रदेशोस्तीति ज्ञायते ॥ मोक्षधर्मे च अ० १९२.
उत्तरोहिमवत्पार्श्वे पुण्ये सर्वगुणान्विते । पुण्यः क्षेम्यश्च काम्यश्च स परोलोकउच्यते ॥ तत्रह्यपापकर्माणः शुचयो त्यंतनिर्मलाः इत्यादि.

यादवेन्द्राचार्याः. हिमवत्पर्वतात् उत्तरतः मनुष्यै गतव्य प्रदेशः उत्तरसमुद्रपर्यन्तं अस्त्येव. अत्र प्रत्यक्षं आगम अस्ति च प्रमाणं – भागवते पंचमस्कन्धे १६. अध्याये. भारतेच मोक्षधर्मे १९२. अ० उत्तरे इत्यादि.

प्रश्नः २५. चन्द्रोपरागः भूच्छायया संभवतीति केचित्. त त्सत्यंवा अस्मिन्नर्थे किं प्रमाणम्.

श्रीनिवासाचार्याः.

समकलकाले भूभा लगति मृगाङ्के यतस्तया म्लानम् ।
सर्वे पश्यन्ति समं समकक्षत्वा न्नलम्बनावनती ॥
पुर्वाभिमुखो गच्छन्कुच्छायान्तर्यतः शशीविशाति ।
तेन प्राक्प्रग्रहणं पश्चान्मोक्षोऽस्य निस्सरतः ॥
राहुःकुभामण्डलगःशशाङ्कं शशाङ्कमाच्छादयती न बिम्बम् ।

तमोमयः शम्भुवरप्रदानात्सर्वागमानामविरुद्धमेतत् ॥

इति भास्कराचार्यैः गोलाध्याये चन्द्रग्रहणं भूच्छायाया श्चन्द्रच्छादकत्वमुक्तम् – तथात्वएव ग्रासमोक्षयोः दिग्व्यवस्था चोपपद्यते – एवमेवाचार्यभट्टोऽपि 'च्छादयति शशी सूर्यं शशिनम्महतीहि भूच्छाया' इत्यभ्यधात् ॥

ग्वापे रामचन्द्राचार्याः. यस्तुपर्वणि चद्रार्कावभिधावति वैरधीरिति – भागवते ८. स्कंधे ९. स्कंधे च, सूर्याचन्द्रमसावभिधावति × + तदुपराग इति वदन्ति लोकाः इति ॥ एतत्केवलराहुणा न भवति किंतु भूच्छायाप्रविष्टेन, तदुक्तं मात्स्ये १२७. ध्याये 'तुल्योभूत्वातुस्वर्भानुस्तदधस्तात्प्रसर्पति' उत्धृत्य ॥

यादवेन्द्राचार्याः. चन्द्रोपरागः भूच्छाययैव भवति अस्मिन्नर्थे ज्योतिषशास्त्रं पुराणानि च प्रमाणं तथाहि. सिन्द्धांतशिरोमणौ – राहुः कुभामण्डलगः शशांकं शशांकगःच्छादयती न बिंबं ॥ तमोमयः शंभुवरप्रदानात् सर्वागमानामविरुद्धमेतत् ॥

श्रीपतिः। भूच्छायायां प्रविष्टः स्थगयतिशशिनं शुक्लपक्षावसाने राहुः । मात्स्ये-अ-१२७ च.

मन्नारगुडी रामचन्द्राचार्याः. सैंहिकेयो यदा सूर्यं ग्रसते पर्वसन्धिषु ॥ गजच्छाया च साप्रोक्ता तस्यां श्राद्धंप्रकल्पयेदिति सर्वेषामपि वर्णानां सूतक राहुदर्शने, इति छलारीय देवी पुराण वचनाच्च भूच्छायेत्यप्रामाणिकं ॥

एवमेव **मन्नार० कृष्णाचार्याः.**

कूटा० शामाचार्याः. 'राहुमुक्तःशशीयथेति' अनेकस्थलेषूक्तत्वात्केवलभूच्छायया न संभवति ॥ अत्र मत्स्यपुराणे १२७

अध्याये " तुल्योभूत्वातु स्वर्भानुस्तदधस्तात्प्रसर्पति ॥ उत्धृत्य पार्थिवीं च्छायां निर्मितां मण्डलाकृतिं । ब्रह्मणा निर्मितं स्थानं तृतीयं तु तमोमयम् ॥ आदित्यात्सतु निष्क्रम्य सोमं गच्छति पर्वसु । आदित्यमेति सोमाच्च पुनः सौरेषु-पर्वसु । स्वर्भासा तुदते यस्मात्स्वर्भानुरिति सस्मृतः " ॥ ज्योतिःशास्त्रेऽपि – राहुः कुभामण्डलगः शशांकं शशांकग छादयती न बिंबं । तमोमयः शंभु वरप्रसादा त्सर्वागमानामविरुद्धमेतत् ॥ भूच्छायांतःप्रविष्टःस्थगयति शशिनं शुक्लपक्षावसाने राहुर्ब्रह्मप्रसादात्समधिगतवरस्तत्तमोव्यासतुल्यः ॥ ऊर्ध्वं भानुबिंबं सलिलमयतनोरप्यधोवर्ति बिंबं स सत्यैवं च मासव्युपरति समये स्वस्य साहित्य हेतोः ॥२५॥

कौ० मुरार्याचार्याः इंदौपूर्ण्णि च राहुणाग्रस्तेसति सोमोपरागः सूर्योपराग इति शिष्टवार्ता श्रवणात्, कोशे च तथैव दृष्टत्वात राहुग्रहणमेव उपरागः भूच्छायेत्युक्तिर्मतांतर विषयेति भाति उक्तार्थे "उपरागो ग्रहो राहुग्रस्ते त्विंदौ च पूष्णिचेति " कोश एव प्रमाणं

मन्या० रामाचार्याः चंद्रोपरागः भूच्छाययासंभवतीत्येतन्न सत्यं ॥ यददस्तरणेर्मंडलं प्रतपति, तद्विस्तारतो योजनायुतमाचक्षते द्वादशसहस्त्रं सोमस्य त्रयोदशसहस्त्रं राहोर्यःपर्वाणि-तव्यवधान कृत् वैरानुबंधात्सूर्या चंद्रमसावभिधावति ॥ तदुपराग इति वदंति लोकाः ॥ इति भागवतोक्तेः ॥

प्रश्नः २६. कन्यायाः दानं, कन्यायाः विवाहं, कन्याशरीरस्य निषेकः केनक्रियते.

कूटाकूल शाखाचार्याः. कन्यादानादि सर्वं पित्रैव क्रियते.

कौ० मुरार्याचार्याः. कन्यायाः दानं कन्यायाः विवाहः

कन्याशरीरस्य निषेकः पित्रैव क्रियते अस्मिन्नर्थे आश्वलायन सूत्रं प्रमाणं.

मन्या० रामाचार्योः. कन्या दाता । पित्रादिः । पिता पितामहोभ्रातेत्यादि याज्ञवल्क्य वचनात्. विवाह शब्दस्य दानार्थकत्वे कन्याविवाहकर्ता पित्रादिः । पाणिग्रहणार्थकत्वे वरः । उभयथा प्रयोगदर्शनात् । कन्याशरीरस्य निषेकाख्य संस्कार कर्तापिता । निषेको नाम गर्भाधानं । याज्ञवल्क्य स्मृतौ 'निषेकाद्याःश्मशानांताः' इत्युक्त्वा अनंतरोक्ते निषेकाद्या इत्यस्य विवरणरूपे गर्भाधानं पुंसवनमिति श्लोके गर्भाधानस्य प्रथममुक्तत्वात्.

मन्नारगुडी रामचन्द्राचार्योः. नारायणभट्टीये कन्यादातारमाह याज्ञवल्क्यः ॥ पिता पितामहो भ्राता सकुल्यो जननी तथा ॥ कन्याप्रदःपूर्वनाशेप्रकृतिस्थःपरःपरः ॥ अप्रयच्छन्समाप्नोति भ्रूणहत्या मृता वृताविति ॥ नारदोपि ॥ पिता दद्यात्स्वयं कन्यां भ्राताचानुमते पितुः ॥ मातामहो मातुळश्च सकुल्या बांधवास्तथा ॥ मातात्वभावे सर्वेषां प्रकृतौ यदि वर्त्तते ॥ तस्यामप्रकृतिस्थायां कन्यां दद्युः स्वजातयः ॥ यदातुनैव कश्चित्स्यात्कन्याराजानमा व्रजेत् ॥ इति वचनाभ्यां पूर्वोक्ताः दातारः ॥ अविप्लुत ब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेदिति याज्ञवल्क्य वचनेन ॥ बन्धुशील लक्षण संपन्नामुपयच्छेतेति आपस्तंभ गृह्य सूत्राद्वरेणैव विवाहः क्रियते ॥ एतन्मनुष्य विषयं ॥ दातारोगृहीतारश्च देवा अपि भवंति ॥ तथाच श्रुतिः ॥ सोमः प्रथमो विविदे गंधर्वो विविद उत्तरः ॥ तृतीयो अग्निष्टेपतिः तुरीयस्ते मनुष्यजा इति ॥ निषेक कर्त्ता प्रजापत्याख्यःप्रद्युम्नः ॥ आसिंचतु प्रजापातीरिति श्रुतेः ॥

मन्या० कृष्णाचार्योः. कन्यादातारः पित्रादयः "पिता पितामहो भ्राता" इति याज्ञवल्क्योक्तेः ॥ बंधुशील लक्षण-संपन्नामरोगामुपयच्छेत इति आपस्तंबसूत्रोक्तेः 'अविप्लुत ब्रह्म-चर्यो लक्षण्यां स्त्रियमुद्वहेत्' इति याज्ञवल्क्योक्तेः वरः विवाह कर्ता विवाह शब्दस्य प्रदानार्थत्वमादाय पित्रादिकर्तृकत्वं ॥ पाणिग्रहणाद्यर्थत्वमादाय वरकर्तृकत्वं **नारायण भट्टीये** पुत्रोद्वाहान्नैव पुत्री विवाहोपि ऋतुत्रये ॥ इति उद्वहेदिति च उभयत्रापि प्रयोगात् । निषेक शब्दस्य गर्भाधान संस्का रार्थत्वात् शरीर जनकएवंकर्ता ॥ तदुक्तं संस्कारायद्य-विच्छिन्ना, इति भागवत ७-१२-१३. व्याख्यानावसरे-विजयध्वजीये कृष्णाचार्यस्मृतौ च ॥

टाणपे० शार्ङ्गपाणि आचार्योः. कन्यादानं पित्रा क्रियते तत्र याज्ञवल्क्यः ॥ पिता इति.

नोर्वी० शामण्णाचार्योः. कन्यादानं स्व पित्रा क्रियते ॥ श्रुतिस्मृतीति हास पुराणादौ - कन्यां दद्यात् ददौ देहीत्या-दिना पितृसमवेत क्रियाया एव श्रवणात् ॥ विवाहं पत्या (- वरण) क्रियते ॥ कन्यामुवाह अवहदित्यादिनावर समवेत्त क्रियायाः श्रवणात् ॥ विवाहित कन्या शरीर निषेकः पत्या क्रियते । तत्र प्रमाणं उत्तरप्रश्नोत्तर पत्रे स्पष्टं.

तु० रंगेशाचार्योः. नि. उप. नारदः ॥ पितादद्यात्स्वयं कन्यां भ्रातावानुमते पितुः ॥ मातामहो मातुलश्च - सकुल्यो बान्धवस्तथा ॥ मातात्वभावे सर्वेषां प्रकृतौ यदि वर्तते ॥ तस्यामप्रकृतिस्थायां कन्यांदद्युः स्वजातयः ॥ सकुल्यः पितृपक्षीयो बान्धवोमातृवंशजः ॥ इति पूर्व पूर्वाद्यधिकारि-णामभावे एते अधिकारिणः ॥

निषेकादि स्मशानांतमिति - संस्कारेषु मध्ये निषेकाख्यः – प्रथमः। गर्भस्यस्पष्ठता ज्ञाने-निषेक इति विष्णुस्मृतौ विधानात. मनु २. अ. ॥ वैदिकै. कर्मभिः पुण्यै निषेकादि द्विजन्मनां ॥ कार्यः शरीर संस्कारः पावनः प्रेत्य चेह च ॥ २६ ॥

आश्वलायन गृह्यसूत्रे ॥ गर्भलंभन संस्कारः ॥ गर्भोलम्यते येन कर्मणा निषिक्तं वीर्यममोघ भवतीति च ॥ गर्भगत कन्या जीवस्य अय संस्कारः पित्रा क्रियत इति भाति ॥

खापे० रामचंद्राचार्याः. कन्यादानं पित्रादिभिः क्रियते ॥ विष्णुस्मृतिः अ. २४. पिता इति मनुः अ. ९. श्लोकः १९१. यस्मैदद्यात्पितात्वेनां भ्रातात्वानुमते पितुः । तंशुश्रूषेत जीवंतं संस्थितंच न लंघयेत् ॥ याज्ञवल्क्यः अ० १० ९३ श्लोके पिता पितामहो भ्राता सकुल्यो जननी तथेत्यादि॥ बृहत्पराशरः । अ० ४ पिता पितामहो भ्राता माता मातामहोपि वेत्यादि व्यास स्मृ० अ० २ श्लोक ९ पितृ तत्पितृ भ्रातृषु पितृव्यज्ञाति मातृषु (नारदः प्रकर० १२ पितादद्यात्स्वयं कन्यां भ्राता वानुमतेपितुरित्यादि कन्या विवाहः पित्रादिभिः वधूवराभ्यांच क्रियते ॥ विवाह मिति कर्म चतुष्टयस्य नाम कन्यादानं शचीयागः विवाहोथ चतुर्थिका॥ विवाह मेतत्कथितं नाम कर्मचतुष्टयं इत्यग्नि पुराणे अ० १९४ अत्र कन्या दानं पित्रादिभिः । शचीयागः वध्वा विवाहः दानानंतरं चतुर्थीहोमात्प्राग्भवितव्य कर्मकलापः तद्वधूवराभ्यां अनया वध्वा सह विवाह प्रधान होमं करिष्ये इति प्रयोग रत्ने विद्यमानत्वात् ॥ (चतुर्थी, शेषहोमादिकं तदप्युभाभ्यां- कन्याशरीरस्य निषेकः पित्रादिभिः) । आवाभ्यां कर्माणि

कर्तव्यानीति अनुक्रमणिकायामुक्तत्वात् । निषेको नाम गर्भस्यस्पष्टताज्ञानेक्रियमाणकर्म विशेषः (गर्भस्यस्पष्टताज्ञाने निषेकः परिकीर्तित इति शंखस्मृतौ अ. २. श्लोक. १. गर्भस्य स्पष्टताज्ञाने निषेक कर्म ॥ विष्णुस्मृतौ अ. २७. मनुः अ. २. श्लोकः २७. गार्भैर्होमैर्जातकर्म चौडमौंजीनिबंधनैः (नंदनः) पित्रादिना कार्यैः गार्भैः निषेकादिभिरित्युक्तेः ॥

यादवेंद्राचार्याः कन्यादानं पित्रादि बांधवैः तस्याः विवाहं भर्त्रा- तस्याः निषेकाख्यसंस्कारः पित्रादिना भवति - अत्रप्रमाणं . विष्णु स्मृ. २४. अ. पिता इति.

अत्र - अग्निपुराणे - अ. प्रमाणं - निषेकः पित्रादिभिः अत्र विष्णुः गर्भस्यस्पष्टता ज्ञाने निषेकः ॥

प्रश्नः २७. पुत्रस्य शरीरस्य निषेकात्मसंस्कारः केन क्रियते.

अन्या० रामचंद्राचार्याः. योनिक्लृप्तिर्वासुदेवाद्रूपंसंकर्षणा. द्भवेत् ॥ आसेक कर्म प्रद्युम्नादनिरुद्धाच्चधारणमिति छांदो- ग्यमाष्योक्तेश्च विष्ण्वादि देवतास्मरण पूर्वकं कन्याशरीरस्य सप्तविंश प्रश्न विषय पुत्रशरीरस्य च निषेकाख्य गर्भाधान संस्कारः पित्राक्रियते ॥

कू० शामाचार्याः पित्रैव ॥

कौ० मुरार्याचार्याः पित्रैव अत्रार्थे आश्वलायनसूत्रं प्रमाणम्

अन्या० रामाचार्याः पुत्रशरीरस्यापि पितैव निषेककर्ता.

टोणपे० शार्ङ्गपाण्याचार्याः कन्याशरीरस्य पुत्रशरीरस्यच निषेकः पित्रा तत्प्रार्थित विष्ण्वादि देवताभिश्च क्रियते इति भाति तत्र विष्णुर्योनिं कल्पयत्विति श्रुतिः मनस्मातिश्च

प्रमाणं ॥ वैदिकैः कर्मभि पुण्यैः निषेकादि द्विजन्मनाम् ॥ कार्यः शरीरसंस्कारः पावन प्रेत्यचेह च ॥

त्वापे० रामचन्द्राचार्याः. पुत्रशरीरस्य निषेकात्मक संस्कारः । पित्रादिना क्रियते - पूर्वोक्त मनुव्याख्यानात् ॥

मोरवी०शामण्णाचार्याः कृतपादादि शौचश्च भुक्त्वा सायं ततोगृही ॥ गच्छेदस्फुटितां शय्यामपिदारुमयीं नृप +++ स्नातः स्रग्गंधधृक्स्फीतोनाश्रांतः क्षुधितोपिवा सकामः सानुरागश्चव्यवायं पुरुषोव्रजेत् + + गच्छेव्द्यवायमतिमानित्यादि विष्णु पुराण ३. अंशेच ॥ एतेन पुरुषकर्तृकत्वमेव निषेकस्य प्रतीयते ॥

यादवेंद्राचार्याः. सर्वेषां शरीराणां निषेकात्मकसंस्कारः पित्रादिनैवभवति. विष्णु स्मृ. २७. अ. गर्भस्य स्पष्टताज्ञाने निषेक कर्म ॥ शंख संहितायां ३ अ. गर्भस्य स्पष्टताज्ञाने निषेकः परिकीर्तितः ॥ मनुस्मृ. २ अ. २६. श्लोकेः निषेकादि द्विजन्मनां ॥ सर्वज्ञ नारायणव्याख्या० निषेकः पित्रैवकार्यः. भाग०१० स्कं. पूर्वार्धे १० अ. २१. श्लो. निषेकः श्रीधरः पितुः—

प्रश्नः २८. पूर्णाऽपूर्णावतारयोः किं लक्षणम् ?

उत्तरं. मन्नारगुडि रामचन्द्राचार्याः. भगवतः अपूर्णावतार एवनास्ति ॥ सर्वं एवैतेपूर्णा अजरा अमृताः परमाः परानंदा इति सूत्रभाष्योदाहृत श्रुतेः ॥ एतेस्वांश कलाः पुंसः कृष्णस्तु भगवान्स्वयमिति भागवत वचनाच्च, नच भागवत वचनं भवदुक्तार्थस्य विरोधि मत्स्यादीनामंशकलात्वं प्रतिपाद्य कृष्णस्य स्वयमित्यनेन पूर्णत्व प्रतिपादनादिति

वाच्यं ॥ विजयध्वजीय टीकायां ॥ एतेवराहाद्याःस्वयं भगवान्कृष्णस्तु. मूलरूप्येवेति विधेय समर्पकतयाव्याख्यातत्वेनाविरोधित्वात् प्रत्युत अस्मदुक्तार्थस्य साधकत्वाच्च ॥ पूर्णमद पूर्णमिदमिति बृहदारण्यक श्रुत्या ज्ञानानंदादि पूर्णत्वमवताराणां मूलरूपि भगवतश्च लक्षण ॥

नोरवी शामणाचार्याः. पूर्णावतारस्य स्वतंत्रत्त्व अनंतानतिशय+ज्ञानानंदादि स्वरूपत्वं लक्षणं ॥ अपूर्णावतारस्य विशेषेण अस्वतंत्र सामानाधिकरण्यं लक्षण ॥

नु० रंगेशाचार्याः. अवताराः त्रिविधाः ॥ पूर्णः-अंशः-आवेश इति ॥ भाष्ये ॥ वासुदेव. संकर्षण इत्यारभ्य-सर्व एते पूर्णा इति श्रुति. श्रूयते ॥ अनुव्याख्याने ॥ अंशिनो यत्तुसामर्थ्यं यत्स्वरूपं यथा स्थितिः ॥ स एव चेत्स्वरूपांशः प्रादुर्भावा हरेर्यथा ॥ सर्वे सर्वगुणात्मन सर्वकर्तारएवचेतिच ॥ पूर्णमदः पूर्णमिदमिति श्रुतिश्च ॥ सर्वावतार रूपाणामपि चित्सुखरूपता ॥ अवताराहिविष्णोश्च सर्वेपूर्णाः प्रकीर्तिताः ॥ पूर्णचतत्परं रूपं पूर्णात्पूर्णा समुद्गताः ॥ इति बृहद्भाष्येक्तिः ॥ १. स्कं. ता. सर्वे सर्वगुणैः पूर्णाः सर्व भेद विवर्जिताः ॥ अन्यूनानधिकाश्चैव गुणैस्सर्वैश्च सर्वत इति च ॥

यादवेंद्राचार्याः. नश्वर शरीर चेतनेन सह सदा अथवा किंचित्काले वर्तमाना विशेष भगवद्विभूतिः अथवा आविर्भावः अपूर्णावतारः शाश्वत रूप सहिते यस्मिन् जीव सान्निध्यं न भवति स आविर्भावः पूर्णावतारः—

मन्या० कृष्णाचार्याः. भगवतः अपूर्णावतार एव नास्ति ॥ सर्व एवैते पूर्णाः अजराः अमृताः परमाः पूर्णानंदा इति श्रुतेः ॥

प्रश्नः. २९. श्री गोपालकृष्णस्य गो गोप गोपिकाभिः दृष्टं स्पृष्टं अनुभूतं रूपं अथवा देहः विनाशी वा न वा ?

उत्तरं. मन्या० रामचंद्राचार्याः. गोपादिभिर्दृष्टं रूपं विनाशिनभवति तथाहि भागवते तात्पर्ये ११. स्कंधे ३१. अध्याये ॥ नैछत्प्रणेतुंवपुरत्रशेषितं मर्त्येनकिंस्वच्छगार्ति प्रदर्शयन्नित्यनशेषितं वपुर्बलभद्रादीनां ॥ जगतोमोहनार्थाय भगवान्पुरुषोत्तमः ॥ दर्शयन्मानुषीं चेष्टां तथा मृतकवद्विभुः ॥ प्रकाशयेददेहोपि मोहाय च दुरात्मनां ॥ मायया मृतकं देवः तदासृष्ट्वा प्रदर्शयत् ॥ कुतोहि मृतकं तस्य मृत्यभावात्परात्मन इति ब्रह्मांडवचनाद विनाश्येव ॥

एवमेव **मन्या० कृष्णाचार्याः.**

यादवेंद्राचार्याः. गोपालस्य रूपं अविनाश्येव. सत्यज्ञानानंदमूर्तिरेव.

कूटा० शामाचार्याः. अविनाश्येव । स्वर्गारोहणकाले दुर्जनमोहनाय "सृष्ट्वास्वदेहोपमितं शयानं भुव्यगाद्दिवामिति" अजीवदेहवत्ससर्ज नतावता विना.

कौ० मुरार्याचार्याः श्रीगोपालकृष्णस्य गोगोपिकाभिः दृष्टं स्पृष्टं अनुभूतं रूपंचिदानंदात्मकदेहश्च अविनाश्येव अस्मिन्नर्थे 'भगवानपिता वीक्ष्य विभूतीरात्मनो विभुरिति एकादशस्कंध भागवत श्लोक अत्र प्रमाणं तट्टीकाविजयध्वजीये आग्नेय्यायोगधारणया जातेनाग्निनातनुमदग्ध्वापरं पदं स्वकंधामाविशत् इत्युक्तत्वात्.

एवमेव अध्वर्यु कृष्णाचार्याः.

मन्त्रा० रामाचार्याः. भगवतः गोपिकाभिः दृष्टस्पृष्टानुभूत-देहः अविनाशी । तदुक्तं भागवत तात्पर्ये । यदात्यागादि-रुच्येत पृथिव्याद्यंगकल्पना । तदाज्ञेयानहिस्वांग कदाचि-द्विष्णुरुत्सृजेत् । इति ब्रह्मतर्के । पृथिवीलोक संत्यागो-देहत्यागो हरेःस्मृतः ॥ नित्यानंद स्वरूपत्वात् अन्यन्नैवो-पलभ्यते । दर्शयन्नरमोहाय सदृशांमृतकाकृतिं । नटवद्भग वान्विष्णुः परज्ञानाकृतिः स्वयं इति स्कांदे । राजन्परस्य तनुभृज्जननाप्ययेहामाया विडंबनमवेहि परात्परस्य इति.

तु० रंगेशाचार्याः. भा. तृ. ४. अ. निधनमुपगतेषु वृष्णिभो-जेष्वधिरथयूथपयूथपेषु मुख्यः ॥ सतुकथमवाशिष्ट उद्धवो-यद्धरिरपि तत्यज आकृतिंत्र्यधीशः ॥ तात्प. आकृतिं-पृथिवीं ॥ पृथिवीन्नैवोपलभ्यते ॥ यस्य पृथिवी शरीरमिति श्रुतेः ॥ गी. भाष्ये. नतस्यप्राकृतामूर्तिर्मांसमेदोस्थिसंभवा ॥ ऐतरे० भाष्ये ॥ कृष्णोह्यत्यक्त देहोपि त्यक्तदेहवदेवच ॥ लोकानां दर्शयामास स्वरूप सदृशाकृतिं ॥ येनरूपेणकं सादीन्जघ्नेतद्रूपमेवहि ॥ पूज्यतेऽद्यापि शर्वाद्यैर्निर्मितायादवा कृतिरिति ॥

तोरवी० शामण्णाचार्याः. दृष्ट कृष्णरूपमविनाशि स्पृष्टमपि तथा.

जापे० रामचंद्राचार्याः. कृष्णस्य भगवतः गोपालादिभि-र्दृष्टं शरीरं अविनाश्येव ॥ ऐतरेय भाष्ये । कृष्णोह्यत्यक्त-देहोपित्यक्तदेहवदेव च ॥ लोकानां दर्शयामास स्वरूपसदृशा-कृतिं ॥ येनरूपेणकंसादीन्जघ्नेतद्रूपमेवहि ॥ पूज्यतेद्यापिशर्वाद्यै-र्निर्मितायादवाकृतिः ॥ [illegible]

मोहिता इति ॥ राजन्परस्यतनुभृज्जननाप्ययेहा मायाविडंब-
नमवेहि यथा नटस्येत्यादि भागवते ॥

प्रश्नः. ३०. स्त्रीणां अनेक विवाहाः संति वा न वा ? शास्त्रे ते विहिताः वा ?

उत्तरं. मन्यारगुडि कृष्णाचार्याः. स्त्रीणामष्टविधो विवाहः ॥ तथा चोक्तं मनुस्मृतौ तृतीयाध्याये । ब्राह्मो दैवस्तथैवार्षः प्रजापत्यस्तथासुरः ॥ गांधर्वो राक्षसश्चैव पैशाचश्चाष्टमो धमः ॥ अष्टाविमान्समासेन स्त्रीविवाहान्नि बोधतेति ॥

एवं. कूटा० शामाचार्याः.

कौ० मुरार्याचार्याः. स्त्रीणां पाणिग्रहणानंतरं विवाह एव नास्ति एतावत्कालपर्यंतं शिष्टेषु कुत्राप्यननुष्ठानात् शास्त्रेऽविहित इत्यपि भाति.

मन्या० रामाचार्याः. अनेके विवाहाः नसंति प्रमाणभावात् ॥

टोणपे. शार्ङ्गपाण्या०. न संतीति तत्रप्रयोगस्त्नो दाज्ञवल्क्य स्मृतिः प्रमाणं ॥ अनन्य पूर्विकां कांतामस पिंडांयवीयसीं ॥ अरोगिणीं भ्रातृमती मसमानार्ष गोत्रजा मिति ॥

तु० रंगेशाचार्याः. ता. निर्णय, व्याख्याने अहिपतौ हि शेतइत्यत्र ॥ पतावितिप्रयोग साधुत्वार्थ-नष्टेमृते प्रव्रजिते क्लीवेच पतितेपतौ ॥ पंचस्वापत्सुनारीणां पतिरन्यो विधीयत इति - स्मृति वचनं उदाहृतं वर्तते ॥ प्रयोगपारिजाते ॥ वसिष्ठः यत्तुनारदः ॥ उद्वाहितापि सा कन्या न चेत्संप्राप्तमैथना ॥ पुनःसंस्कारमर्हेत यथा कन्या तथैवसा ॥ नोदकेन

न वा वाचा कन्यायाः पति रुच्यते ॥ पाणिग्रहण संस्कारा-त्पतित्वंसप्तमेपदे इतिवत्सः ॥ मदन पारिजाते ॥ नारदः ॥ स्त्री पुंसयोस्तु संबंधाद्वरणं प्राग्विधीयते ॥ वरणात् ग्रहणं पाणेः संबंधोयंत्रिलक्षणः ॥ तयोरनियतं प्रोक्तं वरणा द्दोष-दर्शनात् ॥ पाणि ग्रहणिका मंत्रा नियतं दार लक्षण ॥ तेषां निष्ठा च विज्ञेया विद्वद्भिः सप्तमेपदे इति-एवं च सप्तम-पदादर्वाक् परिणेतृमरणेन विधवात्वमव गम्यते इति ॥ एते न शास्त्रीय एवेति भाति ॥

कूटा० शामाचार्याः. अष्टौ विवाहाः आदि पर्व ७३. अ. अष्टावेव समासेन विवाहाधर्मतः स्मृताः

१ २ ३ ४ ५ ६ ७

ब्राह्मो दैवस्तथैवार्षः प्राजापत्य स्तथासुरः ॥ गांधर्वो राक्षसश्चैव ८ पैशाचश्चाष्टमःस्मृताः ।

खापे० रामचंद्राचार्याः. गतेमृते प्रव्रजिते क्लीबेच पतिते पतौ ॥ पंचस्वापत्सु नारीणां पतिरन्यो विधीयते ॥ इति पराशरस्मृतौ अ. २. श्लोक. ३१. वचनात् शास्त्रेताः विहिता एव.

यादवेन्द्राचार्याः. स्त्रीणां अनेक विवाहाः कालभेदेन संत्येव ॥ ताः शास्त्रेषु विहिताः ॥ तासां उपपतियुक्तत्वं अशास्त्रीयं ॥ ऐतरेय ब्राह्मणा दयः अत्र प्रमाणं —
ऐतरेयब्राम्हणे तृतीयपंचिकायां अ. १२. खंड. १२. तस्मादेकस्य बहव्योजाया भवंति नैकस्यै बहवः सहपतयः ॥ नीलकंठव्याख्या ॥ सहेति युगपद्बहुपतित्व निषेधः विहितः नतु समय भेदेन.

प्रश्नः ३१. स्त्रीणां सहपतित्वं वर्ततेवा नवा ? अस्मिन्विषये वेदे किं उक्तं ?

उत्तरं. मन्या० रामचंद्राचार्याः स्त्रीणां सहपतित्वं नास्ति नैकस्यैवहवस्सहपतय इति श्रुतौनिषेधात् ॥

एवमेव **मन्या० रामाचार्याः**

कू० शामाचार्याः देवस्त्रीणां सहपतित्वनियमः अत्र प्रमाणं तात्पर्यनिर्णये ॥ कृतेपुरा सुरास्तथा सुरांगनाश्चकेवलं ॥ निमित्ततोपिताःक्वचिन्नतान्विहायरेमिरे ॥ मनोवचः शरीरतो यतोहिताः पतिव्रताः ॥ अनादिकालतो भवंस्ततःसभर्तृकाः सदा ॥ स्वभर्तृभिर्विमुक्तिगाः सहैवता भवंतिहि ॥ सोमो ददद्गंधर्वायेति श्रुत्या सहपतित्वाभावः प्रतिपाद्यते सचस्त्र्यंतर विषयः ॥

टोणपे० शार्ङ्गपाण्या०. स्त्रीणां सहपतित्वं नास्तीति भाति यथा एकयूपस्य अनेक रशनावत्वं तथा एकस्य पुरुषस्यबव्ह्यः स्त्रियो भवंति नैकस्यै बहवः पुरुषा भवंति ॥ अस्मिन्नर्थे तस्मादेकस्य बहव्योजाया भवंति ॥ नैकस्यै बहव इति ऋग्वेद ब्राह्मणखंडः प्रमाणं ॥

कौ०मुरार्याचार्याः. ऐतरेयब्राह्मणे सायनभाष्ये ३-१२-१२. तस्मात्लोकेपि एकस्य पुरुषस्य सामस्थानीयस्य बव्ह्यो ऋक्स्थानीया भवन्ति नतु विपर्ययेण एकस्याः बहवः पतयः परस्परैकमत्येनसह वर्तमानादृश्यंते ॥

मन्या० कृष्णाचार्याः. स्त्रीणां सहपतित्वं नास्ति ॥ नैकस्यै बहवः सहपतय इति श्रुतौ निषेधात् ॥

खा० रामचं०. स्त्रीणांसहपतित्वं नाम एककाले भर्तृद्वयविशिष्टत्वं तन्नास्ति अत्र प्रमाणं ऐतरेय ब्राह्मण तृतीय पंचिकायां 'तस्मादेकस्य बहव्यो जाया भवन्ति नैकस्यै बहवस्सह पतय' इति ॥

प्रश्न १९: भगवत्पूजासु उत्तमा का?

उत्तरं महा० रामचं०. सालग्रामपूजा उत्तमा, तदुक्तं शेषधर्मे– 'सालग्रामशिला यत्र तत्तीर्थं तत्तपोवनं । तत्रैव मुक्तिं यास्यन्ति मदर्चनपरायणाः' ॥ सूत्रभाष्ये– 'प्रतिमा स्वप्रबुद्धानां सर्वत्र विदितात्मनाम्' ॥ इत्युक्तत्वेन प्रतिमापूजा कार्या ॥ प्रतिमा एकादशविधा भागवते प्रतिपादिता– सूर्योऽग्निर्ब्राह्मणो गावः वैष्णवः खं मरुज्जलम् । भूरात्मा सर्वभूतानि भद्रपूजापदानि मे ॥ इति ॥ तत्रापि भूपदोक्त सालग्रामपूजा उत्तमा ॥ शैली दारुमयी लौही लेख्या लेप्या च सैकतीत्यत्र शिलाप्रतिमायाः प्राथम्येनोक्तत्वात् ॥

अध्वर्यु कृष्णाचा०. भगवत्पूजाया अनेकविधायाः सत्वेऽपि स्वाध्यायप्रवचनरूपा पूजा उत्तमेति भाति 'ऋतं च स्वाध्यायप्रवचने च । सत्यं च स्वाध्याय प्रवचनेच । स्वाध्याय-प्रवचनाभ्यां न प्रमदितव्यमिति ऋतादिषु सर्वत्र स्वाध्यायप्रवचनयोरनुवृत्तिदर्शनात्. एवमेव– **कौ० मुरार्याचार्याः.**

कू० शामाचा०. वाङ्मनःकायकृता उत्तमा द्वितीयकृता मध्यमा एककृताधमा, तत्रापि त्रैविध्यं मनःकृतोत्तमा वाचनिकामध्यमा कायिकाऽधमा.

महा० कृष्णाचा०. अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयानघे ॥ नैवतुष्येर्चितोर्चायां भूतग्रामावमानिनः ॥ अर्चादावर्चयेत्तावदीश्वरं मां स्वकर्मकृत् ॥ यावन्नवेद स्वहृदि सर्वभूतेष्ववस्थितं ॥ अथ मां सर्वभूतेषु भूतात्मानं कृतालयम् ॥ अर्हये दानमानाभ्यां मै,त्र्याभिन्नेनचक्षुषा ॥ इति भागवतोक्तेः ॥ येनकेनापि विधिना यस्यकस्यापि देहिनः 'संतोषं जनयेत्प्राज्ञ'

तदेवेश्वरपूजनमित्युक्तेश्च ॥ सर्वप्राणिनां संतोषजननम् सर्वत्र स्थितरूपाणामैक्यज्ञानं च ॥ उत्तमापूजा ॥ श्रेयान्द्रव्यमयाद्यज्ञाद्ध्यानयज्ञः परंतप इत्युक्तेः भगवद्गुणोत्कर्षज्ञानरूपा मानसीपूजाप्युत्तमा.

मज्ञा० रामाचा०. यथायोग्यं सर्वभूतसमानात्मिका भगवत्पूजा उत्तमा । तत्र प्रमाणम् । अहं सर्वेषुभूतेषु भूतात्मावस्थितस्सदा । तमवज्ञाय मां मर्त्यः कुरुतेर्चाविडंबनं । यो मां सर्वेषुभूतेषु संतमात्मानमीश्वरं ॥ हित्वार्चां भजतेमौढ्याद्भस्मन्येवजुहोति सः । द्विषतः परकायेमां मानिनो भिन्नदर्शिनः । भूतेषु बद्धवैरस्य नमनःशान्तिमृच्छति । अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयानघे । नैवतुष्येर्चितोर्चायां भूत ग्रामावमानिनः । अर्चादावर्चयेत्तावदीश्वरं मां स्वकर्म कृत् । यावन्नवेदस्वहृदि सर्वभूतेष्ववस्थितं । अथ मां सर्वभूतेषु भूतात्मानं कृतालयं । अर्हयेद्दानमानाभ्यांमैत्र्याभिन्नेन चक्षुषा । इत्यादि भागवते ।

टोणपे शार्ङ्गपाण्या०. ब्रह्मसूत्र भाष्ये प्रथमाध्यायप्रथमपादे ॥ अग्नौ क्रियावतां विष्णुर्योगिनां हृदये हरिः ॥ प्रतिमास्वप्रबुद्धानां सर्वत्र विदितात्मनामिति ॥ शालग्राम शिलास्पर्शं येकुर्वन्ति दिने दिने ॥ वांछन्ति करसंस्पर्शं तेषां देवाः सवासवाः ॥ प्रतिमाशालग्राम पूजा उत्तमेति भाति.

अर्चनं संप्रवक्ष्यामि विष्णोरमिततेजसः ॥ यत्कृत्वामुनयः सर्वे परं निर्वाणमाप्नुयुः ॥ पौरुषेण प्रकर्तव्यं नित्यंतु हरिपूजनं ॥ आसनाद्युपचारैस्तु यथा शक्त्यानुसारतः ॥ चत्वारो ब्राह्मणैः पूज्यास्त्रयो राजन्यजातिभिः ॥ वैश्यैर्द्वावेव संपूज्या तथैकः शूद्रजातिभिरिति ॥ स्कांदे च ॥ कामासक्तोथवाक्रुद्धः शालग्रामशिलार्चनात् ॥ भक्त्या वायदिवा भक्त्याकलौ मुक्तिमवाप्नुयात् ॥ वैवस्वत भयं नास्ति तथा

च कलिकालजं ॥ यः कथां कुरुते विष्णोः शालग्रामाशिलाग्रतः ॥ शालग्रामशिलायास्तु प्रतिष्ठा नैव विद्यते ॥ माहापूजांतु कृत्वादौ पूजयेत्तां ततो बुध इति ॥ आग्नेय वचनैः स्कांदवचनैश्च शिष्टाचाराच्च भगवत्पूजासुप्रतिदिनं क्रियमाण शाालग्रामश्रौतपूजा उत्तमेति प्रति भाति ॥

तु० रंगेशाचार्याः. पूजातुद्विविधा ॥ मानसी - बाह्याचेति ॥ तत्र मानसी उत्तमा ॥ मध्वविजये १४ स० ॥ तमरुणमणिवर्णं दिव्य देहाख्यगेहे स्नपितमति पृथु श्रद्धानदीचित्तवार्भिः ननु सयजति नित्यं हृत्सरोजासनस्तं नतुसकृदिति पुष्पैरष्टभिर्भावपुष्पैः ॥ ३७ ॥ मध्व० व्या० मानसै रुपचारैश्च भोगैरर्घ्यादिभिः क्रमादिति च ॥ विष्णुरहस्ये ॥ १० अ. ब्रह्मा ॥ कस्यां मूर्तौप्रकर्तव्यं पूजनंतववैष्णवैः ॥ हयग्रीवः॥ सालग्राम शिलायांतु पूजनं सर्व संमतं ॥ तस्याः सहजमूर्तित्वा छ्वपाकस्पर्शनादिना ॥ सान्निध्यं मम नापैति सर्वदा मम सन्निधिः ॥ सौवर्णा राजती ताम्रीयाकाचिद्वाशिलामया ॥ द्विजैरेवहिपूज्यासान स्त्रीभिर्नैवपादजैः ॥ भा. तृ. ३०.अ.॥ अर्चादावर्चयेत्तावदीश्वरं मांस्वकर्मकृत् ॥ यावन्नवेदस्वहृदि सर्वभूतेष्व वस्थितं ॥ २९ ॥ एतेन बाह्याद्वितीयेति भाति ॥

खापे० रामचंद्राचार्याः. अग्नौ क्रियावतां त्रिष्णुर्योगिनां हृदये हरिः ॥ प्रतिमास्व प्रबुद्धानां सर्वत्र विदितात्मना, मिति भाष्यो दाहृत प्रमाणात् तत्तदाधिकारिणां तत्तदाराधनं उत्तम मिति भाति ॥

अथवा - तृतीय स्कंधे. अ. ३. श्लो. २९.

आचादार्वचेयतावदीश्वरं मां स्वकर्मकृत् ।
यावन्नवेद स्वहृदि सर्वभूतेष्व वस्थितं ।

अथ मां सर्वभूतेषु भूतात्मानं कृतालयं ॥
अर्हये दानमानाभ्यां मैत्र्याऽभिन्नेन चक्षुषा ।
इत्यनेन सर्वत्र भगवानवस्थित इति ज्ञानपूर्वकाराधनं उत्तम मिति भाति ॥

यादवेंद्राचार्याः. अहिंसा भूतप्रियाहितेहाच भगवत्पूजासु उत्तमा. अत्र प्रमाणं
भूत प्रियहितेहाच धर्मोयं सार्व वर्णिकः भाग ७८.

प्रश्न ३३. अन्यदेवस्य नैवेद्यं भुक्त्वा चान्द्रायणं चरेत् । अयं श्लोकः श्रुतिस्मृतीतिहासपुराणादिमध्ये कस्मिन्ग्रन्थेस्ति । अस्य द्वैतिमतरीत्या को वा अर्थः ; ?

उत्तरं. मन्नारगुडी रामचन्द्राचा० स्कांदपुराणस्थोऽयं श्लोकः ॥ तथाहि शंकर उवाच— साधु साधु महाभाग साधु दानवनाशन । यन्मां पृच्छसि धर्मज्ञ केशवाराधनंप्रति ॥ इत्यारम्य— यावत्प्रलपते जंतुः लोकवार्तादिभिः सदा । तावच्चेत्स्मरतेविष्णुः को न शुध्येत पातकादित्यन्तं स्कन्द महेश्वरसंवादरूप एकप्रकरणमध्यपतित्वादयं श्लोकः स्कान्द पुराणस्थ इत्यवगम्यते ॥ अस्यायमर्थः ॥ पावनं विष्णु· नैवेद्यं सुभोज्यमृषिभिःस्मृतमिति पूर्वार्धे विष्णुनैवेद्यं पावनत्वात्सुष्टु भक्तिपूर्वकं भोज्यमिति ऋषिभिस्स्मृतिकर्तृभिरुक्तं यद्वा सुभोज्यं सम्यग्भोज्यमेव न तत्रासम्यक्त्वचिंताकार्येत्यर्थः ॥ विष्णुरिति विशिष्यग्रहणे कोहेतुरित्यत आह अन्येति चांद्रायणं चरेदितिच ऋषिभिस्स्मृतमित्यपि योज्यं एवं विठ्ठल· तीर्थीय व्याख्यातम् ॥ अथ प्राणमेवोद्गीथमुपासांचक्रिरे इति श्रुत्या ॥ वायौ मुख्यधियेति भागवतवाक्येनच वाय्वधिष्ठाने मुख्यतः उपास्य छंदोगत्वेन भगवतः वायु-

नैवेद्यत्वस्य भगवन्नैवेद्यत्वाविनाभूतत्वाद्वायुनैवेद्येनायं निषेधः प्रसरतीत्यातिमंगळंसर्वम् ॥

खापे रामचंद्राचार्याः. अन्यदेवस्येति श्लोकः ॥ पुराणादुत्धृत्य कृष्णामृतमहार्णवाख्ये ग्रंथे भाष्यकारैरुदाहृतः अस्यार्थः । ताम्रपर्णीयव्याख्याने– विष्णुनैवेद्यस्य पावनत्वात्सुष्टुभक्तिपूर्वभोज्यं इति ऋषिभिः स्मृतं । यद्वा सुभोज्यं सम्यग्भोज्यमेव न तत्रासम्यक्त्वचिंता कार्या । विष्णिवाति विशिष्यग्रहणे को हेतुरित्यत आह । अन्येति । चान्द्रायणंचरेदिति ऋषिभिः स्मृतम्.

नारायणार्यकृतव्याख्याने– विष्णुनैवेद्यस्येव रमादीनां नैवेद्यस्यापि स्वकीयत्वेनेत्याह । अन्येति । रमादेरित्यर्थः । रमाब्रह्मादिदेवानां भक्तानां पुरुषोत्तमे । निवेदितं न भुंजीत बुभूषुर्नृपसत्तमे त्यादि ब्रह्माण्डवचनेन रमादिभुक्तस्य भगवद्भुक्तत्वेपि तद्ग्रहणेदोषश्रवणादितिभावः ।

मन्ना० कृष्णाचार्याः अन्यदेवस्येत्येतद्ववचनं कृष्णामृतमहार्णवे शंकर उवाच इत्यारभ्य उदाहृतं ॥ अस्यार्थः पावनं विष्णुनैवेद्यं सुभोज्यं ऋषिभिःस्मृतं इति पूर्ववाक्यं ॥ पावनत्वात् विष्णुनैवेद्यं सुभोज्यं सुष्टुभक्त्याभोज्यं यद्वासुसम्यक्भोज्यं नत्वसम्यक् ॥ विष्णुग्रहणस्य उपयोगमाह अन्येति॥

ढोणपे शार्ङ्गपाण्या०. पावनं विष्णुनैवेद्यं सुभोज्यमृषिभिःस्मृतं
अन्यदेवस्य नैवेद्यं भुक्त्वा चांद्रायणं चरेत् ॥
इदंवचनं श्रीमदाचार्यकृत कृष्णामृतमहार्णवस्थं ॥

मन्वा० रामाचार्याः पावनं विष्णुनैवेद्यमितिप्रमाणं कृष्णामृ-

तमहार्णवे शंकरवचनत्वेनोक्तं । मूलस्थलंतु न ज्ञायते । पावनत्वाद्विष्णुनैवेद्यं सुभोज्यं इति ऋषिभिःस्मृतं स्मृतौप्रतिपादितं । पावनत्वाभावादन्यदेवस्य नैवेद्यं भुक्त्वाचांद्रायणंचरेत् । इत्यर्थः

यादवेन्द्राचार्याः. विष्णोः अन्यस्य नैवेद्यं न भोजनीयं मनुष्यैः द्वैतिनः वायोः नैवेद्यं भोजनीयमिति वदंति स्वबिंबेतर कृष्ण-रूपाणां नैवेद्यमपि न भोक्तव्यं इति मन्वते.

कू० शामाचार्याः. सिद्धांत मार्तंडे । देवतांतर नैवेद्यं भोजनं प्रतिषिध्यते ॥ सौरशाक्तादि नैवेद्यभुक्तौ कामादकामतः ॥ तत्र तत्र निबंधेषु प्रायश्चित्तं प्रपंच्यते ॥ शिव निर्माल्यसंसर्ग निषेधःसुतरांमतः । क्वचिद्विधिस्तुतद्भक्ते पंचदेवार्चकेथवा ॥ प्रवर्तते तदन्नादेः शालग्रामेण शोधनात् ॥ धर्मप्रवृत्तौ ॥ पावित्रं विष्णु नैवेद्यं सुरसिद्धर्षिभिःस्मृतं ॥ अन्यदेवस्य नैवेद्यं भुक्त्वा चांद्रायणं चरेत् ॥ ध० धृत पाद्मे । विष्णोर्नैवेद्यकं शुद्धं मुनिभिःपरिकीर्तितं ॥ अन्यदेवस्य नैवेद्यं भुक्त्वाचांद्रायणं चरेत् ॥ मार्गशीर्षमाहात्म्ये स्कांदे १४ अ० २९ श्लो० भोक्तव्यं ममचोच्छिष्टमित्यादिना विष्णुः स्वप्रसादस्यावश्य भोक्तव्यत्वमुक्त्वा ३१ श्लो० अन्येषां देवतानांतु न गृण्हीयाच्च भक्षितं ॥

कौ० मुरार्याचार्याः पावनं विष्णुनैवेद्यं सुभोज्यमृषिभिः स्मृतं॥ अन्य देवस्य नैवेद्यं भुक्त्वा चांद्रायणं चरेदिति श्लोकः श्रीमदाचार्यकृत कृष्णामृतमहार्णवाख्य ग्रंथे वर्तते विष्णु नैवेद्यं यतः पावनं अतः ज्ञानिभिः सुभोज्यं स्मृतं अन्य देव-स्य नैवेद्यं भुक्त्वा चांद्रायणं चरेदिति श्लोकार्थः ॥

पु० रंगेशाचार्याः. कृष्णामृतमहार्णवे ॥ पावनं विष्णुनैवेद्यं

पवित्र मृषिभिःस्मृतं ॥ अन्यदेवस्य नैवेद्यं भुक्त्वा चांद्रायण चरेदिति आचार्यैरुपपादितं वर्तत ॥ एतद्वचनं स्कांदे शिव नैवेद्य भक्षण निषेध प्रकरणे धर्मप्रवृत्तौ पाद्मेच वर्तते ॥ अस्यार्थस्तु ॥ अन्यदेवस्य शिवादिदेवस्य नैवेद्यभक्षणे चांद्रायणरूप प्रायश्चित्तं चरेदिति ॥ अत्र केषांचित्पक्षः ॥ विष्णुनैवेद्यं पावनं पवनसंबंधी नैवेद्यश्च पवित्रं ॥ सर्वसपूत-मश्नाति स्वदितं मातरिश्वनेति श्रुतेः । मातरिश्वा वायुः ॥ गुरुत्वेन तन्नैवेद्य भक्षणं न देवतात्वेनेति दोषो नास्तीति ॥ नच शिवाद्यंतर्यामि भगवद्रूपमूलरूपयोरैक्यात्तदनुसन्धानपूर्वकं तन्नैवेद्य भक्षणे दोषोनास्तीतिचेन्न ॥ गारुडे ब्रह्मकांडे ॥

१ अ० निवेदयित्वा परदेवतायां विष्णौ हरौ श्रीपुरुषादि वंदिते ॥ इह परेदुःख बहूंश्च दत्वा पश्चाद्दुस्तेह्यधरंतमश्चेति॥ दोष श्रवणात् ॥ इत्यशेष मतिमंगळं ॥

॥ श्री ॥

श्रीकुंभघोणे यागशालावीथिकायां श्रीलक्ष्मीनारायणस्य ६९ तमे आविर्भावोत्सवे मन्मथश्रावणकृष्ण २ बुधवासरमारभ्य ४ शुक्रवासरपर्यन्तं प्रातस्सायंच प्रवृत्तायां सभायां मिलिता विद्वज्जनाः ॥

पंडिताः

पाण्डुरङ्गी आनंदाचार्याः

कौलगी व्यासराजाचार्याः.

नदीतीर साम्याचार्याः.

धर्मशास्त्री रामाचार्याः.

अ० श्रीनिवासाचार्याः.

खापे वासुदेवाचार्याः.

राघवेंद्राचार्याः

पांडुरङ्गी श्रीनिवासाचार्याः.

खापे रामचंद्राचार्याः.

अ० वेंकटेशाचार्याः.

यल्लनूर गुरुराजाचार्याः.

कूटाकूल शेषाचार्याः.

कौलगी चक्रराजाचार्याः.

अध्वर्यु कृष्णाचार्याः.

काळहस्ती सोमयाजिनः.

कौ० रंगनाथाचार्याः.

जोशी अनंताचार्याः.

उमर्जी कृष्णाचार्याः.

कू० राघवेंद्राचार्याः

कौळगी [illegible]चार्याः.

[illegible]चार्याः.

मन्नारगुडी कृष्णाचार्याः.

तम्माचार्याः

पांडुरंगी व्यासाचार्याः.

तुळशी रंगेशाचार्याः.

[illegible] रंगाचार्याः.

कौलगी मुरार्याचार्याः.

मन्नारगुडी गोपालाचार्याः.

कल्याणी श्रीनिवासाचार्याः.

कू० कूळ श्यामाचार्याः.

शठकोपाचार्याः.

मन्नारगुडी रामचंद्राचार्याः.

प्रयागाचार्याः.

टोणपे कृष्णाचार्याः.

म. रा. रा. अय्यासामिशास्त्रिणः

,, कृ. रंगरायः.

,, रामचंद्ररायः

,, हरीरायः

,, कर्नूल जयरामरायः

,, कृ. रामचंद्ररायः

,, रंगनाथरायः

,, [illegible]रायः

विमोचनमिति भाष्योदाहृतस्मृतेः समनाचासृत्युपक्रमादमृतत्वं चानुपोष्येति सूत्रव्याख्यानावसरे लक्ष्म्यास्ससारोपक्रमाभावाद मृतत्व अनुपास्येति भाष्यस्वारस्यात् । जीवानां ससारोपक्रमो स्तीत्यवगमाच्च ॥

पाटराचार्यरंगाचार्याः ॥ बंधोनाम कर्मसंबंधः कर्मच पुण्यपापरूप. तच्च अनादि, अनादित्वच उत्तरोत्तरपुण्यपापकारणभूत पूर्वपूर्व पुण्यपापानामविश्रान्तिः । एवच कर्मसबधरूपबधस्य जन्यत्वात् तत्कर्तृत्वं ब्रह्मणो युज्यते कार्यसामान्यप्रति कर्तृत्वात् तच्चाद्वि- तीयमिति श्रुतिसिद्ध ॥

तुळसीरंगेशाचार्याः ॥ बधोनाम अनादिभूतत्रिगुणात्मकलिंगशरीर- संबंधः । सच नित्यस्य जीवस्य प्रकृत्युपचयकाले स्पष्टो भवति ॥ तादृशबंधदातृत्वमेव तत्कर्तृत्वं । जीवस्य बधाश्रितत्वेन करणवा तदधीनसत्ताकत्वंवा ॥

जन्माद्यस्ययतइतिसूत्रे भाष्ये बंधकर्तृत्वलक्षणमभिहित ॥ त्वमु क्तिदो बधदोतोमतोनइति शांडिल्यश्रुतोच ॥ मांडूकेत ॥ अन दिमायया सुप्तइतिच

मांडूकभाष्ये ॥ अनादेर्मायया विष्णोर्माययेतिच ॥ प्रकृतिर्वासनेत्येव तवेच्छानंतकथ्यतइति वचनात् ॥ माया प्रकृतिः ॥ तया सुप्तो बद्धइतिवा ॥ तत्रैव भाष्ये अतस्स विद्यतइतिह्यंगीकारोभवेद्यदि । तथापि भगवद्दानात्सनिवर्तेदसंशयमिति ॥ सुधायां सादिरय निगडादिबंधः राज्ञा निवर्त्यतानाम ॥ अनादिरयं कथं निवर्त्यत इति तत्रोक्तं भगवानिति ॥ भागवते स्कं० ११ अ० ११ श्लो ४ **एकस्यैव ममांशस्य जीवस्यैवं महामते ॥ बंधोस्या विद्ययाना दिर्विद्यया च तथेतरत ॥**

टीकायां । एवमुक्तविधस्य जीवस्या विद्यपानादि बंधः ॥ तथा विद्यया इतरत् मोक्षलक्षण श्रेयश्चस्तः ॥

विष्णुरहस्ये अ० ५ अनादिकर्मणाबद्धा जीवा नित्याद्यनेकशः ॥ लिंग देह युतास्सर्वे पतिता मूर्छिताइव ॥ **अ० १२** अनादिकर्मणा बद्धान् लिंगमात्र शरीरिणः ॥ वीक्ष्य तद्बंधमोक्षाय सिसृक्षुर्भगवानभूत् ॥अ० १६ अथोपचयमापन्ना प्रकृतिस्त्रिविधा भवत् ॥ सत्वादिगुणयोगेन ॥ अ० १७ लिंगदेहोपि तत्रापि कला स्सूक्ष्मास्तु षोडश ॥ अनादिर्लिंगदेहोय स्याद्दर्शनतो मम ॥ प्रारब्धाना क्षयः ॥ अ० २५ अनादिनातु लिंगेन सूक्ष्ममात्रेंद्रियात्मना ॥ लिंगदेहयुतास्सर्वे ब्रह्माद्या जीवराशयः ॥ विरजायां त्यक्तलिंगाः ॥ अ० ३७ लिंगमुक्तः शुद्धरूपः स्वरूप निजमश्नुते ब्रह्मणासह भुंजानस्ततोनावर्तते पुनः ॥

पांडुरंगीव्यामाचार्याः ॥ बंधस्यानादित्वेपि ईश्वरकर्तृत्व नविरुद्ध तथा हि ईश्वरस्य विष्णोस्तावत् सर्वकर्तृत्वमभ्युपगतव्यं तदभावे गुणपूर्त्य सिध्या जीवभेदकाभावेन जिज्ञास्यतानुपपत्तेः । अतः श्रुतिसिद्धसर्वकर्तृत्वांगीकृतौ नित्येष्वव्याकृताकाशादिषु तद्घटयितव्य । तत्र नित्यत्वेन श्रुतिसिद्धेषु प्रमेयेषु तत्कर्तृत्वंच तन्नियामकत्वमिति यथा अभ्युपगम्यते तथा बंधस्यानादित्वेन श्रुतिसिद्धत्वेपि ईश्वरस्य बधकर्तृत्वंच बंधनियामकत्वमेवेत्यर्थपर्यवसानात् नपरस्परविरोधइति भाति । प्रबलीभूतबाधकसद्भावे प्रतीतार्थं परित्यज्यार्थांतरकल्पनायाः सर्वतंत्रासिद्धत्वात् ॥ अथवा ईश्वरस्य बधकर्तृत्वोक्तिस्सूक्ष्मरूपेणानादेर्बंधस्य प्राकृताद्यंशैरुपचितत्वाभिप्रायेण संगच्छते । अतः परस्परं नविरुध्यते इतिभावः । बंधस्यानादित्वे प्रमाणं भागवते स्पष्टं भागवततात्पर्येचोक्तं ॥

मन्नारगुडीरामाचार्याः ॥ कामकर्म सुखदुःख बुद्धींद्रियविषयशरीरतद्धर्मलक्षणो बंधः । तत्र केषांचित्प्रवाहतोऽनादित्वं केषांचित्तु प्रवाहतोपि सादित्वमेव अतईश्वरस्य तत्कर्तृत्वोक्तिरुपपन्नैव ॥

पेरियकोळं मध्वरायाचार्याः ॥ बंधोद्विविधः दुःखात्मको अविद्याद्यात्मकश्चेति तत्र आद्यः सादिः । तत्कर्तृत्वंच तज्जनिकर्तृत्वमेव द्वितीयएव अनादिरिति यथा सर्वकर्तेत्यत्र अव्याकृताकाशादीनां नित्यानां सर्वांतर्गतत्वेन तन्निरूपितकर्तृत्वंच तन्नियामकत्वमित्यर्थः ॥ तथात्रापि बंधकर्तृत्वं बंधनियामकत्वमित्यर्थकरणेन न परस्परं विरोधः बंधस्य अनादित्वे प्रमाणंतु ॥ एकस्यैव ममांशस्य जीवस्यैवं महामते ॥ बंधोस्या विद्ययानादिर्विद्ययाच्च तथेतरादीति भागवते ११ स्कधे ११ अध्याये ४ श्लोके द्रष्टव्यं ॥

मन्नारगुडीगोपालाचार्याः ॥ बंधस्तावद्विविधः अनादिस्सादिश्चेति आद्योपि द्विविधः । स्वरूपतः प्रवाहतश्चेति ॥ आद्यस्तु अविद्या प्रकृतिलिंगदेहमनआदिरूपः । द्वितीयस्तु कामकर्मरूपः ॥ तृतीयस्तु देहेंद्रियविषयतद्धर्मसुखदुःखादिरूपः । तत्राद्यस्य कर्तृत्व नाम वियदधिकरणोक्तन्यायेन पराधीनविशेषापादकत्वं द्वितीयतृतीययोस्तु स्वरूपं प्रतिनिमित्तत्वमेवातोनविरोधः ॥

मन्नारगुडीकृष्णाचार्याः ॥ बंधस्य प्रवाहतोनादित्वात् ईश्वरस्य तत्कर्तृत्वानुपपत्तिर्नास्ति ॥

तोरवीश्यामण्णाचार्याः ॥ बंधस्यानादित्वेपि तत्कार्यभूतनानायोनिप्राप्तिसुखदुःखादिजननशक्तिकर्तृत्वं परमात्मनः संभवत्येव । तदुक्तं प्रकाशसंहितायां प्रथमपरिच्छेदे प्रथमाध्याये ॥ समस्तलिंगदेहानां तत्तत्कर्मानुसारतः ॥ नानायोनिप्रापिकास्तिशक्तिः सृष्टौ लये नहि । सुखदुःखप्रदा शक्तिः समस्तकृतकर्मणां । सृष्टौ लयेन सा विष्णोरिति ॥ एतेन बंधस्यानादित्वे ईश्वरस्य तत्कर्तृत्वासंभवः स्यात्

तत्कर्तृत्वान्यथानुपपत्त्या बंधस्य सादित्वमुररीकरणीयमिति परा-स्तं ॥ यद्यप्येतद्वचने अनादि बंधस्य सृष्टिः श्रूयते नपृथग्बंध कर्तृत्वं तथापि अनादित्वाद्बंधस्य कर्ता कथं संभवतीति प्रश्नस्य समाधानमेतद्वचनोदाहरणं ॥ तथाच तादृशबंधशक्तेः जीवोद्दे शेन कर्तृत्वादीश्वरस्य नाष्टकर्तृत्वहानिः ॥ अथवा सृष्टिकाले लिंगदेहस्य जीवोद्देशेन उपचयलाभाद्बंधकर्तृत्वमिति ॥

कूटाकूळशामाचार्याः ॥ प्रश्नवाक्यस्यैवं तात्पर्यं वक्तव्यं अनादित्वमु-त्पत्तिशून्यत्वं कर्तृत्वंचोत्पत्त्यनुकूलोव्यापारः । स्वोपादानगोचराप रोक्षज्ञानचिकीर्षाकृतिमत्वंवा तथाच ईश्वरस्य बंधकर्तृत्वांगीकारे बंधस्योत्पत्तिमत्वप्राप्त्या स्वोपादानत्वप्राप्त्याच अनादित्वोत्पत्तिम त्वयोः परस्परं विरोधइति ॥ तदुत्पत्त्यनुकूलव्यापाररूपकर्तृत्वं तदु पादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वंवा नसंभवतीति विरो-धइतिवाच्यं । तच्च नसंभवति । बंधस्य भूतसूक्ष्मादिरूपप्रकृत्यादि रूपत्वेनानादित्वेपि अनाद्यविद्याकामकर्मादिघटितत्वेन तत्रावि-द्यायाः स्वरूपतोनादित्वेपि कामकर्मणोः प्रवाहतोनादित्वात् स्व-रूपेणच सादित्वात् तत्कर्तृत्वं भगवतः संभवत्येव । वस्तुतः कर्तृ त्वंनाम स्वतंत्रः कर्तेति सूत्रोक्तं स्वातंत्र्यमेव तच्च यथोत्पत्त्यादिवि षये तथा बंधविषयेपि भगवतः संभवतीति नकश्चिद्विरोधः । अतएव उत्पत्तिस्थित्यादिप्रमाणभाष्यव्याख्यानावसरे टीकाया मेकराट् स्वतंत्रइति व्याख्यातं ॥ तथाच प्रमाणभाष्यस्यायमर्थः । उत्पत्त्यादयः यस्मात्पुरुषाद्भवंतीत्यध्याहारः । भूधातुः सत्तार्थकः नपुनरुत्पत्त्यर्थकः तथा सत्युत्पत्त्यादेरनन्वयापत्तेः ॥ सत्तार्थत्वेतु पंचम्यर्थाधीनत्वस्य धात्वर्थसत्तायामन्वये यदधीनसत्ताकाः उत्पत्त्या दयः सहरिः एकराट् इत्यर्थकरणे नकश्चिद्विरोधः । प्रियदीप-

करणरीत्या भगवदतिरिक्तसर्वस्याप्यनादेरूपत्यंगीकारेणोत्पत्तिघटितकर्तृत्वांगीकारे नकश्चिद्विरोधइतिभाति उत्पत्तिश्चानेकधेति वियदधिकरणएव स्पष्टं ॥

कुत्तालवासुदेवाचार्याः ॥ प्रवाहतोनादित्वान्नविरोधः ॥

कौलगीमाधवाचार्याः ॥ प्रवाहतो अनादेः बंधस्य ईश्वरकर्तृत्वेनानुपपत्तिः ॥ उपाधिखंडन श्रीनिवासतीर्थीयटिप्पण्यां " अविद्यायाः अनादित्वं स्वरूपेण ॥ कामादेस्तु प्रवाहत " इतिद्रष्टव्यं ॥ " अविद्यायाः स्वरूपेणानादित्वं इतरयोस्तु प्रवाहतइति " मंदारमंजर्यां, द्रष्टव्यं ॥ भागवते एकादशस्कंधे एकादशाध्याये चतुर्थश्लोकं द्रष्टव्यं ॥ एकस्यैव ममांशस्य जीवस्यैवं महामते ॥ बंधोस्याविद्ययानादिः विद्ययाच तथेतरत् ॥

यादवेंद्राचार्याः—श्रीमन्न्यायसुधायां अ० १ पा० १ अधिकरण १ नच जडस्य किंचित्करत्वं युक्तं. * * अतः परमेश्वरएव सत्वादिगुणमय्या विद्याविरोधित्वेनाविद्यया स्वाधीनया प्रकृत्या अचिंत्याद्भुतया स्वशक्त्याच जीवस्य स्वप्रकाशमपि स्वरूपचैतन्यमाच्छादयतीति युक्तं. सएवच स्वाधिष्ठानलब्धपरिणाममहदहंकारादिप्रकृत्यंशैः संयोज्यकर्तृत्व भोक्तृत्व स्वातंत्र्यं कारक फलस्वाम्यंचास्याविद्यमानमेवोपदर्श्य रागाद्युत्पादनद्वारा दुःखमनुभावयति ॥ तदेवं बंधस्य ईश्वराधीनत्वात् । प्रसन्नएवासौ स्वकीयां मायां व्यावर्तयतीति तत्प्रसादार्थं सर्वोप्ययं साधनसंदर्भइत्युक्तं ॥

प्रश्नः २. " अविद्योच्छेदोपलक्षितः पूर्णानन्दरूपआत्मा मोक्ष " इति अद्वैतिनो वदंति, मोक्षस्तु काचित् स्थितिः, सा जडात्मिका आत्मातु चेतनः, एतयोः कथं समन्वयः ?

उत्तरं. कल्याणी श्रीनिवासाचार्याः ॥ अविद्योच्छेदोपलक्षितः पूर्णानन्दरूपआत्मैव मोक्षइत्यद्वैतिनो वदंति. नतु जडरूपास्थितिः तत्अद्वैतिनंप्रति द्वितीयप्रश्नएव नकार्यः ॥

तुळसीरंगेशाचार्याः ॥ अद्वैतिनां मते 'अविद्यास्तमयो मोक्षस्सा संसारउदाहृत' इति उक्तं. अविद्या निवृत्तिरूपएव मोक्षः ॥ तन्निवृत्यनंतरं पूर्णानन्दरूपेण आत्मैव उर्वरितो भवति. ननित्यपदार्थांतर यदि जडात्मिकास्थितिरिति पदार्थांतरमंगीक्रियते तर्हि अद्वैतहानिः तेषां मते ब्रह्मव्यतिरिक्तस्य सर्वस्य मिथ्यात्वात् ॥

पांडुरंगीव्यासाचार्याः ॥ अद्वैतिनां मते आत्मा मोक्षइति आत्ममोक्षयोस्सामानाधिकरण्यं युज्यतएव तथाहि अनंतकालीन ब्रह्ममीमासाशास्त्राध्ययनेन स्वप्रकाशत्वेन नित्यजीवस्यावरणभूतविद्यायां निवृत्तायां मोक्षस्तु जायमानः सच मोक्षः नित्यः जीवस्वरूपभूतः तात्कालीनास्थितिरपि जीवस्वरूपभूता नित्याच अतः अविद्याग्रस्तत्वदशायां विद्यमाना नित्यजडात्मक बाल्ययौवनावस्थानां यथा जडात्मकत्वं तथा अविद्या निवृत्यनंतरमभिव्यंग्य नित्यस्वरूपेण स्थितिरूपमोक्षस्य जडात्मकत्वाभावात् आत्मसामानाधिकरण्यं युक्तं भवतीत्यर्थः ॥

मन्नारगुडीरामाचार्याः ॥ यैर्मोक्षस्यात्मस्वरूपत्वं अंगीकृतं तैस्तस्य जडरूपत्वं नांगीकृतमेव एवमेव **मन्नारगुडी कृष्णाचार्याः**.

पेरियकोळं मध्वरायाचार्याः ॥ अद्वैतिनां मते आत्मातिरिक्तस्य कस्याप्यभावेनावस्थितेरप्यात्मस्वरूपत्वेनांगीकाराज्जडात्मकत्वं नास्ति.

मन्नारगुडीगोपालाचार्याः ॥ वृत्तिनिवृत्त्युपलक्षितः पूर्णानंदरूपआत्मा मोक्षइति यैरुच्यते तैर्मोक्षस्य जडात्मकस्थितिरूपत्वं नांगीक्रियतएव परंतु तन्मते निरुक्तं मोक्षस्वरूपं न युक्तं कर्मोपि मुक्तिस्व

मिति स्यादित्युक्त्वा सुखानुभवमेवापेक्षते नतु सुखं स्यामिति यथा धनीस्यामित्येवापेक्षते लोके नतु धनं स्यामिति ॥

तोरवीरामण्णाचार्याः ॥ अद्वैतिनाम यमाशयः ॥ मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिरि ति वचनप्रामाण्यात्पूर्णानंदस्वरूपेणावस्थिते: मोक्षत्वोक्तौ अवस्थितस्वरूपस्य मुक्तित्वमुक्तं भवति ॥ तच्च पूर्णानन्दरूपमेवेति ॥ अत्रेदमालोचनीयं ॥ अद्वैतिनामते अविद्यास्तमयो मोक्षः सासंसारउदाहृत: ॥ इति तदीयवचनप्रामाण्यादविद्या निवृत्तरेव मोक्षत्वमुक्तमिति भाति ॥ सैवा विद्योच्छेदरूपेति निर्विवादं ॥ निवृत्त्युच्छेदयोरेकार्थत्वात् एवंचा विद्योच्छेदापरनामका विद्या निवृत्तेरेवात्मस्वरूपत्वं श्रूयते ॥ आत्मैवाज्ञानहानिरिति तदीयवचनप्रामाण्यात् ॥ नच वाच्यं आत्मन: अज्ञानहानित्वाभावइति ॥ अद्वैतिनां अभावस्याधिकरणात्मकत्वांगीकर्तृमतानुसारित्वात् ॥ इदंच मत इष्टसिद्धौ तत्प्रदीपिकायांच तदीयग्रंथे स्पष्टमुक्त भवति ॥ प्रकाशितं मायावादखंडने श्रीमदानंदतीर्थभगवत्पादैः स्वरूपत्वान्मोक्षस्य पूर्वमेवास्ति द्धत्वात् इति ॥ व्याख्यातंच तट्टीकाकृत्पादैः ॥

अज्ञाननिवृत्तिलक्षणोहि मोक्षः परेणात्मस्वरूपतयेष्टः यथाह आत्मैवाज्ञानहानिरिति ॥ ज्ञातआत्मैवाज्ञानहानिर्नात्ममात्रमिति कश्चित् इति इत्थंचाविद्योच्छेदापरपर्यायाज्ञाननिवृत्तिरूपात्मा मोक्षइति फलितं एवंसति अविद्योच्छेदोपलक्षितात्मनः मोक्षत्वमगीकृत्य तत्कथमिति प्रश्नः मादृशां विद्यार्थिनां विप्रलंभकएवेति संक्षेपः ॥

कुप्पकुब्जाचार्याः ॥ आत्मैवाज्ञानहानिरिति मोक्षस्यात्मस्वरूपत्वां गीकारान्नास्माकमविरोधः ॥.

कुप्प० वासुदेवाचार्याः ॥ सम्मतमिदं ॥

यादवेंद्राचार्याः ॥ ब्रह्मेतरपदार्थस्य अभावात् मोक्षः आनंदत्वेन वर्णितइति भाति ॥

प्रश्नः ३. अनंतनित्यदुःखानुभवः तमोयोग्यानां मोक्षइति द्वैतिनो वदंति तथासति ते मोक्षकांक्षिणः कथं भवेयुः, कथं तत्प्राप्तये यतेरन्? ते यतंतेवा नवा?

उत्तरं कल्याणी श्रीनिवासाचार्याः ॥ तमोयोग्याः स्वयोग्यमोक्षस्य रूपं दुःखरूपमित्यजानतएव मोक्षे यतंते सुखरूपमिति भ्रांत्या मोक्षप्रति यतंते ॥

तुळसी रंगेशाचार्याः ॥ ॐ अपिस्मर्यतइति सत्रे ॥ असुरा असुरेणैव स्वभावेनच कर्मणा ॥ ज्ञानेन विपरीतेन तमोयांति विनिश्चयात् इति तात्पर्यनिर्णये ॥ पूर्णदुःखात्मको द्वेषः सोनंतोयत्र तिष्ठते ॥ पतितानां तमस्यंधे निःशेषसुखवर्जितेति यथा भक्तिर्विवर्धिता मुक्तिं प्रापयति एवं विष्णौ द्वेषो विवर्धितः अंते कल्याणमाने दैत्यानंधे तमसि पातयतीति ॥ तत्र मुख्यकारणं तत्र विष्णुद्वेषः ॥ जीवाभेदो निर्गुणत्वमित्यादि ॥ तादृशद्वेषकरणे यतंतएव ॥ यदि साधने यतंते ॥ तत्स्वरूपयोग्यतैव तत्र कारणं ॥

पांडुरंगी व्यासाचार्याः ॥ अनंतदुःखानुभवएव तमोयोग्यानां मोक्षः सच तमोयोग्यानां स्वरूपमेव । अस्मत्सिद्धांतरीत्या मोक्षशब्दार्थनिर्वचनं सामान्यतः मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिरित्यत्र सूत्रभाष्ये स्पष्टं ॥ अतोन्यथारूपं हित्वा स्वस्वरूपमर्थयमानाः तत्प्राप्तये यत्नं कुर्वंत्येव नच दुःखे प्रवृत्तिः कथंस्यादिति वाच्यं ॥ यथा लोके शुक्तौ रजतत्वभ्रांत्या पुरुषः प्रवर्तते तथा तमोयोग्यानां दुःखरूपे मोक्षे सुखत्वभ्रांत्या प्रवृत्तिसंभवात् दुःखेच सुखमानिनइत्युक्तत्वाच्च ॥ एवं मध्वराचार्याः ॥

कालेज् रंगाचार्याः ॥ उत्तरावस्था समानाधिकरणे, तरावस्था भिन्नपू र्वावस्थाश्रयत्वमुपादानत्वमाविशिष्टस्य ब्रह्मणो नसंभवति ॥ अविकारित्वात् ॥

शठगोपाचार्याः ॥ प्रपचं प्रति ब्रह्मउपादानं भवति ॥ यथा घटप्रति मृत् प्रपचोहिनाम स्थूलचिदचिद्विशिष्टं ब्रह्मैव तथाच स्थूल चिदचिद्विशिष्टब्रह्मरूपप्रपचप्रति सूक्ष्मचिदचिद्विशिष्टब्रह्म उपादानं इति तदर्थः ॥ उपादानत्वच कार्यावस्था समानाधिकरणप्रागवस्थानत्वं प्रकृते स्थूलविशिष्टब्रह्मरूपप्रपचत्वावस्थासामानाधिकरणसूक्ष्मविशिष्टत्वरूपप्रागवस्थावत्वस्य ब्रह्मणि सत्वात् समन्वयः । एवं मृदि उपादाने घटत्वरूपकार्यावस्थासमानाधिकरणत्वरूपप्रागस्थावत्वस्य सत्वात्समन्वय. । अत्र केचिद्वदति विषममिद दृष्टांतं सूक्ष्मचिदचिद्विशिष्टब्रह्मण्युपादाने विशेषणीभूता चिदंशमात्रे विकार. ॥ विशेष्ये ब्रह्मणितु नविकार· ॥ तस्यापि विकारित्वंतु नकस्यचिद्वामत मृद्युपादानेतु साकल्येन विकारः इति वैषम्यात् ॥ इति अत्रेद वक्तव्य ॥ सर्वत्रैवोपादाने साकल्येन विकारेण भाव्यं ॥ इति नानियमः ॥ किंतु विशिष्टे उपादाने कचिदशे विकारित्वं कचिदविकारित्वच दृश्यते ॥ यथा शिलया दारुणावा प्रतिमायां क्रियमाणाया शिलायां दारुणिच उपादाने कचिद्विकारित्वं कचिदविकारित्वच भवति अस्ति हि तत्र स्थपत्याद्यस्पृष्टः अविकार्यंशः ॥ नच तदंशप्रहाणेन उपादानत्वमिति शंकयं विशिष्टस्यैव उपादानत्वस्य सर्वसमतत्वात् ॥ अविकार्यध्वसे उपादेयध्वंसस्य अनुभवसिद्धत्वात् ॥ किंबहुना ॥ घटोपादाने मृद्यपि घटरूपविकारानाश्रयद्व्यणुकत्र्यणुकादिस्सूक्ष्मांशः अस्त्येवेति सर्वमनवद्य ॥

गोरखी शामण्णाचार्याः ॥ ब्रह्मणः सूक्ष्मचिदचिद्विशिष्टत्वेनो-
पादानत्वेपि नविकारित्वं ॥ निर्विकारश्रुतिविरोधात् ॥ न
चोपादानं सर्वं विकार्येव दृश्यते यथा घटोपादानं मृदिति-
वाच्यं ॥ वैषम्यात् । मृदः स्वरूपेणोपादानत्वात्तत्स्वरूपे
विकारो युक्तः ॥ ब्रह्मणस्तु स्वरूपेणोपादानत्वाभावात् तत्स्व-
रूपेण विकारः किंतु चिदचिदोर्विकारः यथा निर्विकारस्य
जीवस्य शरीरे बाल्ययौवनादि विकारः तथेति नोक्तदोषः ॥
यथोक्तं यतींद्रमतदीपिकायां तदीयग्रंथे बाल्ययौवनावस्थाद-
योदोषाः यथा शरीरगताः ननु शरीरिणि जीवे एवं चिद-
चिच्छरीरिणः परमात्मनोपीति नर्निर्विकारश्रुति विरोधइति.

यादवेंद्राचार्याः ॥ विशिष्टाद्वैतिमते भगवान् अविकारी. अतः
तस्य उपादानत्वं भिन्नमेव ॥

प्रश्नः. ५. यज्ञाः अयूपाः क्रतवस्सयूपा इति कुत्र उक्तं.

तुलसी रंगशाचार्याः — यज्ञा अयूपाः क्रतवस्सयूपाः इत्या-
नुपूर्वीतु पठ्यमान वेदादिषु नदृश्यते किंतु गीतायां ९ अ०
१६ श्लो० अहंक्रतुरहं यज्ञ इति श्लोकविवृतौ श्रीराघवेंद्र
स्वामिभिः क्रतु दीक्षाद्यवभृथांतकर्म कलापः यज्ञस्तु देवतो-
द्देशेन द्रव्यत्यागरूप प्रधानं कर्म इति ॥ गीताभाष्येपि ॥
उद्दिश्य देवान्द्रव्याणां त्यागो यज्ञ इतीरितइतिच सूत्रभाष्ये
३-३-३७ अ० ॐ सूत्रः क्रतुवज्ज्यायस्त्वं तथाच दर्शयति
इत्यस्मिन्सूत्रे दीक्षा प्रायणीयोदयनीय सवनत्रयावभृथात्मकः
क्रतुरिति च ॥ तत्र तत्र तादृशार्थ प्रतिपादकानि वाक्या-
नि दृश्यंते ॥

पांडु० व्यासाचार्याः — सूत्रः क्रतुवज्ज्यायस्त्वादिति सूत्रभा-

ध्ये यज्ञलक्षणं क्रतुलक्षणं चोक्तं. नत्वेतद्वाक्यं दृश्यते ॥

कौ० माधवाचार्याः — यज्ञाः, अयूपाः, इत्यादि भागवत पंचमस्कन्धे, श्रीधरीयव्याख्याने अस्ति ॥

यज्ञाअयूपाः क्रतवस्सयूपाइति कुत्रापि मया नावालोकि— प्रत्युत तस्मादग्निहोत्रस्ययज्ञक्रतोः । एकऋत्विक् ॥ तस्मा-दर्शपूर्णमासयोर्यज्ञक्रतोः । चत्वारऋत्विजः ॥ तस्माच्चातु-र्मास्यानांयज्ञक्रतोः । पञ्चर्त्विजः ॥ तस्मात्पशुबन्धस्ययज्ञ-क्रतोः । षडृत्विजः । तस्मात्सौम्यस्याध्वरस्ययज्ञक्रतोः । सप्तहोत्राःप्राचीर्वषट्कुर्वन्ति ॥ इति तैत्तिरीय ब्राह्मणस्य द्वैतीयीकस्याष्टकस्य तार्तीयीक प्रपाठकसंबन्धिनि, षष्ठेनुवा-के अयूपेषु अग्निहोत्र दर्श पूर्णमास चातुर्मास्यरूपेषु, सयूपेषु पशुबन्धसौम्याध्वरेषु च विशेषेण यज्ञक्रतुशब्दोदृश्यते, त-स्मान्नासौ नामव्यवस्था समीचीना, किन्तु, तत्रैव तृतीयस्या-ष्टकस्य द्वादशेप्रपाठके लोकैः काठकत्वेन व्यवह्रियते चरम-प्रपाठकस्य षष्ठेनुवाके, तंयज्ञक्रतुभिरन्वैच्छत् । तंयज्ञक्रतु-भिर्नान्वविन्दत् । तामिष्टिभिरन्वैच्छत् । तमिष्टिभिरन्वविद-दिति दर्शनात्सायनभाष्यानुरोधाच्च दर्शमहंपूर्णमासंयज्ञंयथा-यजै इति प्रथमेष्टके दर्शनाच्च सयूपा अयूपाश्च यज्ञाः क्रतव-श्च ॥ अयूपा इष्टय इति युक्तमिव भाति.

यादवेन्द्राचार्याः — श्रीभागवतव्याख्याने श्रीधराचार्यैः उक्तं. यज्ञास्तु चतुर्विधाः— श्रुतिचोदिताः, स्मृतिचोदिताः, पुराणादि चोदिता वेदांते चोदिता श्चेति.

श्रीतम्नु, कपर्दिभाष्य — यज्ञशब्देन सांगोपांगोभिधीयते, सतु यज्ञो देवतोद्देशेन द्रव्यत्यागात्मको याग इति, क्रियाविशेषः. यज्ञ इत्येकविंशति संस्थोयज्ञो जात्यभिमानेन व्यपदिश्यते. सप्तसोमसंस्थाः ॥ तथाहि— अग्निष्टोमः १. अत्यग्निष्टोम २. उक्थ्यः ३. षोडशी ४. वाजपेयः ५. अतिरात्र. ६. आप्तोर्यामः ७. इति. सप्तहविर्यज्ञसंस्थाः॥ तथाहि— अग्निहोत्रं १. दर्शः २. पूर्णमासः ३. आग्रयण ४. पिंडपितृयज्ञ चातुर्मास्यानि ५. निरूढपशुबंध ६. सौत्रामणीनि ७. सप्तपाकयज्ञाः ॥ औपासनहोमः १. वैश्वदेवं २. पार्वणं ३. अष्टकाः ४ मासिश्राद्धं ५. सर्पबलिः ६. ईशानबलिः ७. इति हरदत्तभाष्ये आपस्तंबपरिभाषा भाष्ये च.

एता. अदृष्टकर्मणां अनुष्ठानसमर्थानां सपत्नीकानां कामिनां प्रत्येक उपदिश्यन्ते. यावतो मंत्राः आधानादिषु पत्नीभिः उच्चार्या ते सर्वे ताभिरध्येतव्याः —

श्रीमद्भगवद्गीताभाष्ये नवमेध्याये षोडश-श्लोक व्याख्यान समये श्रीमच्छंकराचार्यैः यज्ञाः द्विधा विभक्ताः । अहं, श्रौतकर्मभेदो अहमेव ॥ अहं यज्ञः, स्मार्तः.

स्मार्तशब्दे तृतीय चतुर्थ भेदा यज्ञा अंतर्भूता इति भाति. मुरलीधरदास कृत गीताव्याख्याने नवमेऽध्याये षोडशश्लोके — मयूपः क्रतुः अहं. अयूपो यज्ञोहं इति.

स्मार्त पुराणचोदिताः पंचमहा यज्ञाः हिंसारहिताः अयूपाः, वेदांतचोदितास्तु ब्रह्मपूजात्मकाः हिंसारहिताः ज्ञानसहिताः मुख्यतः मानासिकाः.

प्रश्नः. ६. क्रतुः नित्यकर्मणां मध्ये एको वा उत अनित्योवा ?

उत्तरं. कौ० मुरार्याचार्याः ॥ सप्तसंस्थांतर्भूताग्निष्टोमात्यग्निष्टोमोक्थ्यातिरात्रादिक्रतूनां नित्यकर्मांतर्भूतत्वसप्तसंस्थाबहिर्भूतपौंडरीकादिक्रतूनां नित्यकर्मबहिर्भूतत्वमिति ॥

तुलसीरंगेशाचा० ॥ यजदेवपूजेतिधातोः यज्ञशब्दस्य विष्णुपूजापरत्वं यदा तदा तस्य नित्यत्वं । क्रियापरत्वे - वसंते वसंतेज्योतिषायजेतेति - अनित्यत्वं ॥ विवक्षाभेदेन वक्तुंशक्यते ॥

पेरि० मध्वराचा० ॥ आथर्वणखंडार्थेयज्ञाश्चसर्वेक्रतवस्सदक्षिणा इत्यस्यव्याख्यावसरेसोमयागाः पश्वादिसंबद्धाः क्रतव इत्यर्थकरणेन क्रतुर्नित्यकर्मणांमध्ये अनित्य एवेतिभाति ॥

मन्ना० कृष्णाचा० ॥ अनित्यः ॥

तोरवीशामण्णाचा० ॥ क्रतुर्नित्यकर्मणांमध्येएकएव तदुक्तं तैत्तिरीयसंहितायां ६ कांडे ३ प्रश्न १० वर्गे जायमानोवैब्राह्मणस्त्रिभिर्ऋणवान्जायते " ब्रह्मचर्येणऋषिभ्यो यज्ञेनदेवेभ्यः प्रजयापितृभ्य इति ॥ याज्ञवल्क्यस्मृतौ प्रतिसंवत्सर सोमः पशुः प्रत्ययनंतथा ॥ कर्तव्याग्रायणेष्टिश्च चातुर्मास्यानि -चैवहीति ॥ मनुस्मृतौ ॥ अध्यापनं अध्ययनं यजनं याजन तथा ॥ दानंप्रतिग्रहंचैव ब्राह्मणानामकल्पयदिति ॥

कू० शामाचा० ॥ क्रतुर्नित्यकर्मांतर्गतएव, अकरणे, यस्यवेदश्चवेदीच विच्छिद्येतेत्रिपूरुषं ॥ सवैदुर्ब्राह्मणोज्ञेयः सर्वकर्मसुगर्हितइत्यादिनाप्रत्यवायश्रवणात् ॥

कुत्तालवासुदेवाचा० ॥ उभयविधोस्ति ॥

कौ० माधवाचार्याः ॥ क्रतुविशेषो अनित्यः क्रतुविशेषः नित्य इति गौतमसूत्रे आपस्तंबसूत्रभाष्येचस्पष्टं.

कालेजरंगाचार्याः ॥ असोमपं आश्विनन्धूम्रललाममालभेतेति दौर्ब्राह्मण्यस्य तत्परिहारस्य च तैत्तिरीयसंहितायाद्वैतीयीक-काण्डीय प्रथमप्रश्ने श्रवणाद्यज्ञक्रत्वनुष्ठानं नित्यमेव ॥

यादवेन्द्राचार्याः — वेदान्तचोदितः अथवा ब्रह्मयज्ञस्तु नित्य एव. पञ्चमहायज्ञाः केषांचित् आश्रमिणां नित्याः ॥ नान्ये, अपि गृहस्थानां क्रतुः पशुबंधात्मकः सः उरुवित्त-भारेणैव कर्तव्य., अन्यैः कृते पापजनकोभवति इति मनु प्रभृतयः हिंसात्मककर्मणैवसाध्यत्वात् सः क्रतुः अनित्य एव ॥ भागवते ४ स्कंधे पुरंजनोपाख्यानं द्रष्टव्यं

किंच —

मनुस्मृतौ ११ अध्याये

यस्यत्रैवार्षिकं भक्तं पर्याप्तं भृत्यवृत्तये । अधिकंवापि विद्येत स सोमं पातुमर्हति ॥ ७ ॥

अतः स्वल्पीयसि द्रव्ये यः सोमं पिबति द्विजः । सपीतसो-मपूर्वोऽपि न तस्याप्नोति तत्फलं ॥ ८ ॥

पुण्यान्यन्यानि कुर्वीत श्रद्दधानो जितेंद्रियः । नत्वल्पदक्षि-णैर्यज्ञैर्यजेतेह कथचन ॥ ३९ ॥

इन्द्रियाणि यशः स्वर्गं आयुः कीर्तिं प्रजाः पशून् । हंत्यल्पदक्षिणो यज्ञः तस्मान्नाल्पधनो यजेत् ॥ ४० ॥

विष्णुस्मृतौ ९८ अध्याये

त्रैवार्षिकाभ्यधिकान्नः प्रत्यब्दं सोमेन ॥

प्रश्नः. ७. वेदशाखाप्रणयनविवरणे व्यस्तानां वेदानां मध्ये वाजसनेयिशाखा एका नासीदिति भागवते उक्तं, तत् सत्यं वा न वा?

उत्तरं. कौ० मुरार्याचार्याः ॥ वाजसनेयिशाखा व्यासविभक्ता अस्त्येव तस्यावैशंपायनोपदिष्टवेदानंतर्भूतत्वेपि सूर्योपदिष्टांतर्भावस्य संभावितत्वात् वैशंपायनमेवैकं द्वितीयं सूर्यमेव चेत्युक्तत्वाच्चेति ॥

मन्ना० रामाचार्याः ॥ वाजसनेयिशाखा व्यासविभक्त शाखास्वंतर्गतैव तात्पर्यनिर्णये सूर्यस्यापि, वैशंपायनमेवैकं द्वितीयं सूर्यमेव चेति. व्यासेन स्वविभक्तशाखाप्रवर्तकीकरणोक्तेः ॥ तस्याश्च सूर्यप्रोक्तत्वात् ॥ अयमेवाभिप्रायः. मन्ना० कृष्णाचार्य. गोपालाचार्य. तारवीशामण्णाचार्य. कू० शामाचार्य. कुत्तालवासुदेवाचार्य. कौलगीमाधवाचार्याणां.

मन्ना० रामचंद्राचार्याः ॥ भागवतेवेदशाखाप्रणयन प्रकरणे वाजसनेयिशाखा व्यासविभक्तशाखा बाहिर्भूतेत्यापाततःप्रतीयते । तथान ॥ तथासतियजुस्संहितायाः एकोत्तरशतशाखात्वेन परिगणनविरोधस्स्यात् ॥ नचतथापरिगणनमसिद्धमितिवाच्यं ॥ उत्सन्नान्भगवान्वेदानुज्जहार हरिस्स्वयं ॥ चतुर्धाव्यभजत्तांश्च चतुर्विंशतिधापुनः । शतधाचैकधाचैवतथैवचसहस्रधेत्यादिभाष्योदाहृतस्कांदोक्तेः ॥ अतः आचार्यैर्महाभारततात्पर्यनिर्णयोक्तप्रकारेण काचिच्छाखा वैशंपायनाय नोपदिष्टा सूर्यायोपदिष्टा याज्ञवल्क्यस्तस्माज्जग्राहेति अभिप्रायवर्णनं युक्तमितिभाति ॥ अयमेवाभिप्रायः **पेरि० मध्वरायाचार्याणां** ॥

यादवेंद्राचार्याः भागवत रीत्या वाजसनेयिशाखा वेदव्यासेन व्यस्तानां मध्ये एका शाखा न भवति.

प्रश्नः. ८. किं नाम उपनयनम् ?

उत्तरं. **कल्याणीश्रीनिवा०** ॥ उपनयनंनाम गायत्री मन्त्रोपदेशार्थं प्रथमतः गुरुसमीपगमनांगभूतयज्ञोपवीतधारणादिरूपः. अथवा योगेन गुरुसमीपगमनं रूढ्या ब्रह्मोपदेशः उपनयनशब्दार्थः. अयमेवाभिप्रायः **कौलगी मुरार्याचार्य, पाण्डु० व्यासाचार्य, मन्ना० रामाचार्य, कृष्णाचार्य, गोपालाचार्य, पेरिय० मध्वरायाचार्य, तोरवी शामण्णाचार्य, कूटा० शामाचार्याणां.**

तुलसीरंगेशाचा० ॥ प्र० ८. आश्वलायनगृह्यसूत्रे— अष्टवर्षंब्राह्मणमुपनयेदित्युक्तं ॥ तत्र किंनाम उपनयनं. गोभिलगृह्यसूत्रव्याख्याने वाचस्पत्येऽपि । वेदाध्ययनार्थं उपसमीपं गुरोः नीयते येनकर्मणेति ॥ गृह्योक्तकर्मणा येन समीपं नीयते गुरोः ॥ बालो वेदाय तद्योगात् बालस्य उपनयनं विदुरिति. आपस्तंबगृह्यसूत्रे चतु. प. १-१० ख १ सू० उपनयनंव्याख्यास्यामः ॥ उपनयनमिति कर्म नामधेयं ॥ कुमारस्यआचार्यसमीपनयनं अस्मिन्कर्मणीति. पंकजादिवत् योगरूढइति च ॥ धर्मसिंधौ ॥ प० ३ उपनयनंनाम. आचार्यसमीपनयनांगको गायत्र्युपदेशप्रधानकः-कर्मविशेषः इति ॥

कुत्तालवासुदेवाचा० ॥ वेदाधिकार संपत्ति प्रयोजककर्म विशेषः ॥ आचार्यसमीपानयनांगक गायत्र्युपदेशप्रधानकं-

कर्म. एव मेव **कौलगी माधवाचा०** ॥

टोणपे शार्ङ्गपाण्याचा० ॥ गायत्र्युपदेशएव अतऊर्ध्वपति-
तसावित्रीका इति गृह्यसूत्रात्—

कालेज् रंगाचा० देवस्यत्वासवितुः प्रसवउपनयेसौ. इति मंत्रेण
ब्रह्मोपदेशार्थमाणवकः स्वसमीपमाचार्येणानीयते । अस्यमंत्र-
स्यार्थः ॥ देवस्य - सवितुः प्रसवे - आस्यां सत्यां - असौ.
हेमाणवक - त्वा त्वां उप (आत्मनः) समीपे नयेप्रापयामि.
एवं च उपनयनशब्दः समीपनयन वाचकोप्यत्र ब्रह्मोपदेश-
वति क्षौरादिनि चतुर्थेहनि अन्यस्य वाससः परिधानांते
कर्मणिरूढः ॥

यादवेंद्राचार्यः—विद्योपदेशस्य पूर्वकालीन— किंच, तद्यो-
ग्यतासिद्धये द्विजपुत्रेण शिष्येण कृतस्य कर्मणः उत्तरका-
लीनः गुरुणा क्रियमाण कर्मकलापः छांदोग्योपनिषदि
५–११–७.
तान् होवाच प्रातर्वः प्रतिवक्तास्मीति तेहसमित्पाणयः पूर्वाण्हे
प्रतिचक्रमिरेतान् हानुपनीयैवैतदुवाच ॥

शंकरभाष्ये. यत एवं महाशाला महाश्रोत्रिया ब्राह्मणाःसंत
महाशालत्वाद्यभिमानं हित्वा समिद्भारहस्ताः जातितोहीनं
राजानं विद्यार्थिनो विनयेनोपजग्मुः तथान्यैर्विद्योपादित्सुभि-
र्भवितव्यं । तेभ्यश्चादाद्विद्यां विवक्षुरनुपनीयैवोपनयनमकृ-
त्वैवतान् यथायोग्येभ्यो विद्यामदात्.
उपनयनं पादयोर्निपतनं छांदोग्यवेदेशीय टीकायां ५–११.
तान्हानुपनीय शिष्यतयोपगमनंप्रकारयित्वैव एतद्वक्ष्यमाण-
मुवाच ॥

आपस्तंबगृह्यसूत्रे १०–१.

उपनयनंव्याख्यास्यामः.

भाष्यं–– उपनयनमिति कर्म नामधेयं । कुमारस्याचार्य समीपनयनमास्मिन् कर्मणीति ॥

शतपथब्राह्मणेपि ११–५–४.

प्रश्नः. ९. किं नाम उपाकर्म ?

उत्तरं. **कल्याणी श्रीनिवासा०** ॥ अधीत वेद अध्येतव्य वेदानां ग्रहणाधिकार प्रापक उच्चारणरूप वेदस्वीकारः ॥ प्रथमतः वेदारंभणमिति. एवमेव **पाण्डु० व्यासाचार्याः** ॥ **मध्वरायाचार्याः, मज्ञा० गोपालाचार्याः** ॥

कों० मुरार्याचार्याः ॥ संस्कारपूर्व ग्रहणस्यादुपाकरणं श्रुतेरितिकोशात् सम्कारपूर्वकवेदग्रहणं–

तुलसीरंगेशाचार्याः ॥ **प्र०** आपस्तंबगृह्यसूत्रे. तृ. प ८ खं १ सू० उपाकरणं समापनंच ऋषियःप्रज्ञायते ॥ श्रावण्यां पौर्णमास्यां विहितहोमपूर्वकमध्यायानामारंभ इति ॥ अधीयंत इति अध्यायाः वेदाः. तेषां संस्कारककर्म उपाकृत्यं मदनपारिजातेपि ॥

उपाकर्म इति. उपक्रमपर्यायः तस्यैवस्वीकार इत्यर्थांतरंच ॥ स्वीकृतांवेवेदाः इति प्रयोगदर्शनादिति.

मज्ञा० रामाचार्याः उपाकर्मशब्दः ऋषिपूजाद्यंगकेवेदारंभप्रधाने कर्मविशेषे योगरूढः अयमेवाभिप्रायः **मज्ञा० कृष्णाचार्याणां शामण्णाचार्याणां.**

कूटा० शामाचार्याः मण्डल देवता होमपूर्वक वेदोपक्रमः

टोणपे० शार्ङ्गपाण्याचार्याः ॥ उत्सृष्टवेदानां पुनर्ग्रहण नूतनवेदारंभणं च.

कुत्ताल० वासुदेवाचार्याः ॥ अधीतानां उत्सृष्टानां अध्येष्यमाणानां वेदानां पुनर्ग्रहणवीर्यवत्तासंपादककर्म विशेषः ॥ नूतनवटोः वेदाध्ययन संपादकश्चायं ॥

कौलगी० माधवाचार्याः ॥ संस्कारविशेष विशिष्टवेदारंभे उपाकर्मशब्दः रूढः । अथ अध्यायोपाकर्मेत्यादिआश्वलायनसूत्रं तद्भाष्यंचात्रप्रमाणं । तत्र तावदध्यायोपाकरणस्य श्रावण्यां पौर्णमास्यां आचार्यः शिष्यैस्सहकृत प्राणायामो अध्यायमुपाकरिष्ये इति संकल्प्य महानद्यां विधिवत्स्नात्वा-पवित्रपाणिः नवऋषीस्तर्पयेत् ततोग्नेरुपसमाधानाद्याग्निमुखांते अन्वारब्धेष्वंतेवासिषु नवाज्याहुतीर्जुहोति ॥ तत आचार्य प्रमुखाः दर्भेष्वासीना दर्भान्धारयमाणाः वेदस्यादितश्चतुरो-वराध्यो ननुवाकानधीयीरन्. अथ जयादिपरिषेचनांते. ब्राह्मणतर्पणं. एवमेवोत्सर्गेपि इत्यापस्तंब सूत्रभाष्ये ॥ ८—१३ ॥

कालेज् रंगाचार्याः ॥ उपाकर्म उपक्रमः ॥ वेदाध्ययनारंभ इत्यर्थः ॥ इति सार्वभौमैरुपाकर्मशब्दार्थो विवृतः ततश्चोपनयनशब्दवदुपाकर्म शब्दोपिस्वस्वगृह्योक्त श्रावण्यादि-कालिकेवेदोपक्रमवातियथार्ह क्षौरयज्ञोपवीतधारणादिमातिक्रिया समुदाये रूढः ॥

यादवेंद्राचार्याः— आश्व०गृ०सू० ३—५—१.

अथातोध्यायोपकरणं ॥

भाष्यं :— अध्ययनं अध्यायः तस्योपाकरणं प्रारंभोयेन-
कर्मणा तदध्यायोपाकरणं ॥ इत्यादि. १३ तथो-
त्सर्गे ॥ १४ षण्मासानधीयीत ॥

भाष्यं :— इदंवचनमुपाकृत्य नियमेनषण्मासानधीयीत ॥
आपस्तंब गृ० सू० उपाकरणे समापनेच ऋषिर्यः
प्रज्ञायते ॥

भाष्यं :— तत्र अध्यायस्योपाकरणं, श्रावण्यां पौर्णमा-
स्यां विहितहोमपूर्वकमध्यायानामारभः ॥
समापनं च तस्य तैष्या पौर्णमास्यामित्यादिषु होमपूर्वकमे-
वाध्ययनोपसर्ग ॥

प्रश्नः. १०. ब्रह्मवैवर्तपुराणे "वर्जनीया प्रयत्नेन सप्तमीसहि-
ताष्टमी" इति गोकुलाष्टमीप्रकरणे उक्तंभवति, अनुष्टानं तु
तथा न. अस्य किं कारणम्.

उत्तरं **कल्याणीश्रीनिवासाचार्याः** ॥ वर्जनीया प्रयत्नेन
सप्तमीसहिताष्टमीतिवचनस्यायमर्थः ॥ यदिपरेद्युः अष्टमीनि-
शीथगा भवति तदा पूर्वेद्यु न कार्या ॥ यदापूर्वेद्युरेवाष्टमी
निशीथगा भवति तदा पूर्वेद्युरेवकार्येत्यर्थः ॥ अनुष्ठानमप्येत-
नैवप्रकारेण. अस्मिन्विषयेप्रमाणं मयूखकारवाक्यं ॥
अयमेवाशयः **कौलगी मुरार्याचार्याणां कूटा०
शास्त्राचार्याणां** ॥

पाट० **रंगाचार्याः** वर्जनीया प्रयत्नेनसप्तमीसंयुताष्टमीति सप्तमी
विद्धाष्टम्याः त्याज्यत्वेप्रतीयमानेपि विद्धाष्टमीद्विजग्राह्या
सप्तम्यारोहिणीयदि ॥ नचेत्परास्मिन्दिवसेनिशानाथोदयेद्विज
'इति वचनेनपरदिने' चंद्रोदयकाले रोहिण्यभावे सप्तमी-

विद्धापि पूर्वदिनाष्टमीग्राह्या परदिने चंद्रोदयेरोहिणीसत्त्वे परदिनमेवग्राह्यं ॥ सएवब्रह्मवैवर्तवचनस्यपरादिने रोहिणी- सत्वे सप्तमीविद्धपूर्वाष्टमीविषयत्वान्नदोषः ॥

पांडु० व्यासाचार्याः श्रीमच्छलारीय ग्रंथस्थाष्टमीतिथिनिर्ण- यपर्यालोचनया, वर्जनीया प्रयत्नेन सप्तमीसहिताष्टमीति- वचनं जयंतीपरंनतुजन्माष्टमी परमितिभाति.

मन्ना० रामाचार्याः ॥ विद्धायानिशीथव्यापित्वे विद्धैवाष्टमी- ग्राह्या ॥ तस्याः निशीथव्यात्प्य भावेअविद्धायाः निशी- थव्याप्तिसत्त्वेबुधसोमान्यतर रोहिणीयुतत्वेचाविद्धैव ॥ तथा वाराहोक्तेः ॥ ब्रह्मवैवर्तवचनंतुविद्धायानिशीथव्याप्त्यभावविषय एवमेव **कृष्णाचार्य गोपालाचार्यौ** ॥

यादवेंद्राचार्याः. अनुष्टानस्य कारणं न पश्यामः. शास्त्र- रहितस्य, अथवा शास्त्रविरुद्धस्य आचारस्य किंमूलं इति विचारयन्. वैदिकसार्वभौमः एवं आह. "एतादृशाचारस्य किंमूलं इति चेत् भ्रांतिः". अंधपरंपरावा". "इति वैष्णवत्वप्राप्तेः पूर्वं, इदानींतनाः वैष्णवाः स्मार्ताः अभूवन् तेषां विद्धाष्टमीआचाररीत्या न त्याज्या. वैष्णवत्व प्राप्त्य नंतरमपि सएवआचारः अथपरंपरया प्रवृत्तः इति भातिः.

प्रश्नः. ११. एधमानद्विट्. इति वेदवाक्यस्य, कोवा अर्थः

उत्तरं. तुलसी० रंगेशाचार्याः ॥ एधमान द्विडित्युक्तं विवृणोति ॥ परापूर्वेषां सख्यावृणक्ति. इति तात्पर्यनिर्णये ॥ इंद्रः पूर्वेषां उग्रशब्दोक्तानां वमोयोभ्यानां सख्यानि विहिता चरणानि परावृणक्ति न स्वीकरोति. इत्यर्थ इति. एधमान-

द्विडित्येव विष्णोर्नामहिवैदिकमिति ॥ सूत्रभाष्ये-१-४-१. उपपूर्वमपीत्येकेमाकशमनवत्तदुक्तं ॥ उपदेवावदं पनापेक्ष्यमित्येके इति ॥ "स्वरूपयोग्यतापेक्षया अधिकाकांक्षिणां अधःपातायितृत्वमेव एधमानद्विट्त्व ॥ अयमेवाशयः **मज्ञा० गोपालाचार्याणां**.

पांडु० व्यासाचार्याः ॥ एधमानद्वेष्टीति एधमानद्विट्-यस्त्वयोग्यतानिक्रमेण साधनानुष्ठानं करोतितद्विघटनकारीत्यर्थः एवमेव **कौलगी० माधवाचार्याः कूटा० श्यामाचार्याः** ॥ असुरान्दमयन्विष्णुःसुरांश्चस्वपदंनयन् ॥ पुनः पुनर्मानुषांस्तु सृतावावर्तयत्यसाविति भविष्यत्पर्ववचनं समाख्यारूपं.

यादवेंद्राचार्याः— सायनाचार्याः एवं वदंति. तथाहि— अयमिन्द्रो वीरो वीर्यवानिति शृण्वे श्रूयते. किं कुर्वन् उग्रमुग्रं उद्गूर्णमुद्गूर्णं बालिन शत्रुं, प्रतिदमायन् दमः दमनं बाधनमिच्छन् अन्यमन्यं प्रथमं नेतव्यमन्यं पश्चान्नेतव्यं चान्यंपूर्वमपरं परस्परव्यातिहारेण स्तोतॄनतिमेनीयमानो अत्यन्तं पुनःपुनर्नयन् अपिच एधमानद्विट् एधमानानां वर्धमानानां अमुन्वतां द्वेष्टोभयस्य दिव्यस्य पार्थिवस्य च राजेश्वरोयमिंद्रो विशोनिवेशयितॄन्. स्वस्य परिचारकान् मनुजान् चोष्कूयते रक्षणार्थं पुन पुनराह्वयति इति.

प्रश्न. १२. स्त्रियः कतमे वर्षे कन्यासंज्ञां स्मृत्यनुसारेण लभंते: कासुस्मृतिषु एवमुक्तं ?

उत्तरं. **तु० रंगेशाचार्याः** ॥ स्त्रियः अनुकवर्ष एव कन्या संज्ञांलभंते इति वक्तुं नशक्यते. कुत इत्युक्तौ वसुवर्षामने

त्कन्येतिमनुस्मृतौ. संवर्तस्मृतावपि ॥ अक्षता स्त्रीकन्येति "वाचस्पत्ये" अनूढा इति केचित् ॥ अहल्या द्रौपदी- त्यारभ्य पंचकन्याःस्मरेन्नित्यमिति ॥ त्रिंशद्वर्षोवहेत्कन्या हृद्यां द्वादशवार्षिकीं ॥ ऋतुत्रयमुपास्यैव कन्यान्यंवरयेद्वरं ॥ विवाहस्त्वष्टवर्षायाः कन्यायाः प्रशस्यत इति अनेकमतभेदस्य विद्यमानत्वात् ॥

टोणप० शार्ङ्गपाण्याचार्याः— अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी दशवर्षा भवेत्कन्या अतऊर्ध्वं रजस्वलेति संवर्त- स्मृतौ प्रथमखण्डे, स्त्रियाः दशवर्षपर्यन्तं कन्येति संज्ञा उक्ता.

कूट० शामाचार्याः— कन्याशब्दपर्यायत्वेन क्वचित्प्रयुज्यते. क्वचिदनूढापर्यायत्वेन. कन्या कुमारीति. कोशेतु कौमारा- वस्था विशिष्टपर्यायत्वेनोक्तं. अष्टवर्षा भवेत्कन्या दशवर्षा भवेत्कन्येत्यादि स्मृतिवचनं चास्ति.

कौलगी० माधवाचार्याः— स्त्रियः दशमेवर्षे कन्यासंज्ञां लभंते. पराशरस्मृतौ चतुर्थाध्याये ॥ दशवर्षा भवत्कन्ये- त्युक्तं ॥ तथैव संवर्तकृष्णाचार्यहेमाद्रिप्रभृतयः ॥

कालेज्० रंगाचार्याः ॥ त्रिंशद्वर्षो वहेत्कन्यांहृद्यां द्वादश- वार्षिकीं ॥ त्र्यष्टवर्षोष्टवर्षांवाधर्मेसीदति सत्वरः ॥ इति मानन्या अष्टवर्षा द्वादशवर्षा च ॥ आजन्मनस्तु चौलान्तं कन्यायत्रविपद्यते ॥ सद्यश्शौचं भवेत्तत्र सर्ववर्णेषु नित्यशः" इति ब्राह्मपुराणे नैकवर्षा द्विवर्षा त्रिवर्षा च ॥ अष्टवर्षाभवे- द्गौरी नववर्षातुरोहिणी ॥ दशवर्षाभवेत्कन्या अतऊर्ध्वं रजस्वला ॥ इति बहुषुवयस्सुकन्यात्वंदर्शितं ॥

यादवेंद्राचार्याः ॥ एकादशवर्षे कन्यासंज्ञां स्त्रीप्रजा लभेत.

पराशरस्मृ. अ० ४. अष्टवर्षाभवेद् गौरी नववर्षातु रोहिणी. दशवर्षाभवेत्कन्या अतऊर्ध्वंरजस्वला. संवर्तस्मृ० एवमेव. स्मृत्यनुसारेण धर्मं वक्ष्यामः इति संकल्प्य, स्वाभिप्रायरीत्या, धर्मंवदन्तः निबंधनकर्तारः अपि एवमेव वदन्ति. तथाहि.

कृष्णाचार्यस्मृतौ.
संस्कारभास्करे.
बोधायनेवकटेशीये.
मदनपारिजाते
संस्कारमयूखे
निर्णयसिंधौ
हेमाद्रौ दानखंडे
वैद्यनाथदीक्षितीये
निर्णयरत्ने इति दिक्

प्रश्न. १३. कतमे कतमे वर्षे स्त्रीणां विवाहः श्रुतिस्मृतीतिहास पुराणकाव्यनाटकादिषु वर्णितो भवति.

उत्तरं. १३. मन्ना० रामचंद्राचार्याः भविष्योत्तरपुराणे अनन्तव्रतकथायां ॥ "पित्राहष्टासुमंतेनस्त्रीचिन्हायौवनेस्थिता ॥ कस्मैदेयामयाकन्या इति चिन्ताकुलोभवत् ॥ एतस्मिन्नेव समये कौंडिण्यो ब्राह्मणोत्तमः ॥ इत्यादिनायौवने विवाहकरणदर्शनात्, यौवनेपि स्त्रीणां विवाहः ॥

कौलगी. माधवाचार्याः ॥ इतिहासपुराणकाव्यनाटकादिषु विवाहः पुरुषसंप्रयोगयोग्येवर्षेवर्णित इति ज्ञायते ॥ अत्र प्रमाणं सावित्री, वृद्धकन्या, दमयंन्ती, सीता, शकुन्तला, देवयानी त्याद्युपाख्यानं ॥

तुळशी रंगेशाचार्याः ॥ निर्णयसिंधौ पराशर माधवी
इति. जन्मतोगर्भाधानाद्वापंचमाब्दात्परंशुभं ॥ कुमारीवर
दानंमेखलाबंधनं तथा ॥ भारते ॥ त्रिंशद्वर्षः षोडशाब्द
भार्या विंदेतनग्निकां ॥ दशवर्षाष्टवर्षावा धर्मेसीदतिसत्वर
अतोप्रवृत्ते रजसिकन्यां दद्यात्पितासकृत् ॥ सप्तसंवत्सरादूर्ध्वं
विवाहः सार्ववर्णिकः ॥ कन्यायाः शस्यतेराजन्नन्यथ
धर्मगर्हितः ॥ विवाहोष्टमवर्षायाः कन्यायाश्शस्यतेबुधैः ॥

यादवेंद्राचार्याः— ऋग्वेदे-मं०४, सू० ५८ ऋ०.

कन्याइव वहतुमे तवाउ अंज्यंजाना अभिचा कशीमि ।
यत्रसोमः सूयते यत्रयज्ञो घृतस्यधारा अभितत्पवंते ॥ ९ ॥

सायनः— कन्याइव अनूढा बालिकाइव ता यथा वहतुं उद्वाहं
प्राप्तुं एतवाउ एतुं पतिं, गतुं अंज्यंजकं आभरणं तेजोवा
अंजना व्यंजयंत्यः एवं कुर्वंत्यः कन्याइव ॥ ९ ॥

वाजसनेयि संहितायां सप्तदशोध्याये ऋ०

कन्याइव वहतुमतवाउ अंज्यं जाना अभिचा कशीमि ।
यत्रसोमः सूयते यत्र यज्ञो घृतस्य धारा अभितत्पवंते ॥ ९७ ॥

महीधर कृत वेददीपे.

कन्या वहतुमिव वहति परिणयति वहतुर्भर्ता यथा वहतुं पतिं
एतवैप्राप्तुं कन्या अभिप्रवंते * कीदृश्यः कन्याः अंजि
भर्ग अंजनाः व्यक्तं योग्यं कुर्वाणाः अज्यते व्यक्तीक्रियते
स्त्रीपुंव्यक्तिर्येनतत् तदंजनाः कन्या यथा पतिंगच्छन्ति ॥ ७ ॥
यौवनदशा प्राप्त्यनंतरमेव स्त्रीणां विवाहः सर्वग्रंथेषु वर्णितो-
ऽस्ति.

ऋग्वेदे० मं १०-४९. पत्येशांसंती.

सायनः — पतिकामयमानां पर्याप्त यौवनाभिलर्षः

भविष्योत्तर पुराणे अनंतव्रत कथायां :—पिता दृष्ट्वा सुमंतोपि स्त्री
चिन्हां यौवने स्थितां ॥

वाल्मीकि रामायणे अयोध्या कां० ११८ अ०
पति संयोग सुलभं वयोदृष्ट्वातुमे पिता ॥

मार्कण्डेयपुराणेपि—९२ अध्याये

देवीभागवते—पंचमस्कंधे—अ० १७.

"मंदोदरीति नामास्याः पिताचक्रे मुदान्वितः ।
दशवर्षा यदाजाता कन्याचातिमनोहरा" ॥

महाभारते अ० १०४. तरुणीं रूपसंपन्नां प्रद्वेषी नाम ब्राह्मणी ॥

स्कांदे ब्रह्मोत्तरखंड अ० ३.

आसीदियं पूर्वभवेशानै ब्राह्मण कन्यका ॥
साशानैर्यौवनं भेनेस्मरस्येव महाधनुः ॥
पित्रा दत्ताचकस्मै चिद्विधिना द्विजसूनवे ॥

मार्कंडेयपुराणेपि.

तां यौवनवतीं दृष्ट्वा कन्यकां रूपशालिनीं ॥
समुनिश्चिंतयामासकोस्याः भर्ताभवेदिति ॥

पद्मपुराणे.

तत्रभार्गवकन्यांतुरूपेणाप्रतिमां भुवि ॥
सुनासां चारुसर्वांगींपीनोन्नतपयोधरां ।
अभिगम्यमुविश्रांतां कन्यां वचनमब्रवीत् ॥

श्रीमहाभारते वनपर्वणि अ० २९३.

यौवनस्थांतु तां दृष्ट्वा स्वांसुतां देवरूपिणीं ॥
अयाच्य मानांवरैः नृपतिर्दुःखितोऽभवत् ॥ ३१ ॥

श्रीमहाभारते उद्योगपर्वणि अ० १७२.

भीष्मउवाच ॥

तथाश्रौषं महाबाहो तिस्रः कन्याः स्वयंवराः ॥
रूपेणाप्रतिमाः सर्वाः काशिराजसुतास्तदा ॥ ९ ॥

अ० १७९. भीष्मः ॥

समनुज्ञासिषं कन्यामंबां ज्येष्ठांनराधिप ॥
अनुज्ञाता ययौ सा तु कन्या साल्वपतेःपुरं ॥ २ ॥
एवं बहुविधैर्वाक्यैर्याच्यमानस्तया नृपः ॥
नाश्रद्दधच्छाल्वपतिः कन्यायां भरतर्षभ ॥ २ ॥

प्रश्नः. १४. के ते कन्यादोषाः ?

उत्तरं. **तुलसी० रंगे०** वृद्धपराशरसंहितायां ४ अध्याये
वर्जयेदतिरिक्तांगींकन्यां इत्यादि. **यादवेंद्राचार्याः** ॥
एवमेव **टोणपे शार्ङ्गपाण्याचार्याः** ॥

मनु अ० ३. ८. !

नोद्वहेत्कपिलां कन्यां नाधिकांगीं न रोगिणीं ॥ नालोमिकां
नातिलोमां न वाचाटां न पिंगळां ॥

नारदः दीर्घकुत्सितरोगार्ता व्यंगासंस्पृष्टमैथुना ॥ दृष्टान्यगतभावा
च कन्या दोषाः प्रकीर्तिताः ॥

कौलगीमाधवाचा० ॥ अनन्यपूर्विकात्वादयः कन्यादोषा.
मनुयाज्ञवल्क्योक्ताः ॥

किंच नारदः

दीर्घकुत्सितरोगार्ताव्यंगासंस्पृष्टमैथुना ॥ दृष्टान्यगतभावा च
कन्यादोषाः प्रकीर्तिताः ॥

कालेज्. रंगाचार्याः ॥ कन्यादोषाबहुभिर्बहुधोक्ता आपस्तं

बमभूतिभिः दत्तां गुप्तामित्यादिना ॥

प्रश्नः. १८. विवाहानर्हता स्त्रीणां भवति वा न वा, यदि भवति तर्हि काम्ववस्थासु ?

उत्तरं. मन्नार० रामचंद्राचा० स्त्रीणां विवाहस्य उपनयनप्रतिनिधित्वेन उपनयनम्य आषोडशाद्ब्राह्मणस्य सावित्रीनातिवर्तत इत्यनेन सप्तदशादौ मनुना निषिद्धत्वात्स्त्रीविवाहोपि निषिद्धप्राय एव.

टोणपे शार्ङ्गपाण्याचार्याः ॥ स्त्रीणा द्वादशवर्षमारम्य विवाहानर्हता. अत्र प्रमाणं ॥ पराशरसंहितायां सप्तमाध्याये ॥ प्राप्ते तु द्वादशेवर्षे यः कन्यां न प्रयच्छति ॥ मासि मासि रज.तस्याः पिबंति पितरःस्वयं ॥ यस्तां समुद्वहेत्कन्यां ब्राह्मणोऽज्ञानमोहित. ॥ असंभाष्यो ह्यपाङ्क्तेयः सविप्रोवृषलीपतिरिति ॥ किंच मवर्तस्मृतौ प्रथमखण्डे, रोमदर्शनसंप्राप्तेसोमोभुङ्क्तेथकन्यका ॥ रजोदृष्ट्वातुगंधर्वः कुचौदृष्ट्वातु पावक इति ॥

कूटाकोळ शामाचार्याः ॥ विवाहानंतरावस्थास्वनर्हता ॥

कोलगी माधवाचार्याः ॥ सदृशवरालाभे इच्छाभावे च स्वस्य क्षतयोनित्वादिदोषे च स्त्रीणां विवाहानर्हता भवति ॥ शांडिलीअंबामुलभाप्रभृतयो अविवाहिता इति भारत आदि – उद्योग – शांतिपर्वसुस्पष्टं ॥

यादवेन्द्राचार्याः ॥ यदि अकामा, कन्यादोषसहिता सा विवाहानर्हा. अकामास्तु.

भागवते चतुर्थस्कंधे अ० १.

तेभ्यो दधार कन्ये द्वे वयुनां धारिणीं स्वधा ॥ ते उभे

ब्रह्मवादिन्यौ ज्ञानविज्ञानपरगे ॥ १२ ॥

श्रीधरः — तयोस्तु संततिर्नाभवत्.

वीरराघवः — सनकादिवत् ऊर्ध्वरेतस्के ते इति भावः ॥

भारते शल्यपर्वणि अ० ५२.

सा पित्रा दीयमानापि तत्र नैच्छदनिंदिता ॥ आत्मनः सदृशं सा तु भर्तारं नान्वपश्यत ॥

सुलभामैत्रेयी, गार्गीवाचक्नवी, वडवाप्राचीथेयी, इत्यादयः निष्कामत्वात् अविवाहिताः बभूवुः ॥

प्रश्नः १६. के ते दश दोषाः ये विवाहप्रयोगे " दशदोषविवर्जिते " इति वाक्येन सूचिताः ?

उत्तरं— कूटाकोळ शामाचार्याः ॥ व्यंगत्वादयः कोशेष्वन्वेषणीयाः ॥

कौलगी माधवाचार्याः ॥ व्यंगत्वं १, पतितत्वं २, हीनक्रियत्वं ३, वेदोज्झितत्वं ४, क्लीबत्वं ५, रोमशत्वं ६, कुष्ठित्वं ७, अर्शत्वं ८, असदृशत्वं ९ अकामुकत्वं १० च, एते दशदोषा इतिभाति

मदनपारिजातोक्तास्तु — उन्मत्तः पतितः षण्ढः कुष्ठी सगोत्रजः सपिंडः — सप्रवरः अंधः बधिरः अपस्मारी ॥

मनुः — हीनक्रियं निष्पुरुषं निश्छन्दोरोमशार्शसं ॥ क्षय्यामयाव्यस्मारिश्वित्रिकुष्ठि कुलानि च ॥ अ० ३. श्लोक ७.

प्रश्नः १७. विवाहप्रयोगे "वरार्थिनीं" इति वाक्यं वर्तते वा नवा ?

उत्तरं ॥ तुलसीरंगेशाचार्याः ॥ परिदृश्यमानेषु पुस्तकेषु न दृश्यते ॥

टोणपे शार्ङ्गपाण्याचार्याः ॥ संस्कारकौस्तुभे वाग्दानप्रकरणे अस्ति.

कूटा० शामाचा० बहुपुस्तकेष्वभावान्नास्तीत्येव भाति ॥

कालगी माधवाचा० ॥ विवाहप्रयोगे वरार्थिनीमिति वाक्यं लिखितप्राचीननारायणभट्टीयपुस्तकेषु अस्ति ॥

यादवेन्द्राचा० ॥ विवाहप्रयोगे (वरार्थिनी) इति वाक्यं वर्तते. नारायणभट्टीयप्रयोगपुस्तकस्य मुद्रितकालात्पूर्वस्थितानां बहूनां पुस्तकानांमध्ये दृश्यते ॥

प्रश्नः. १८. विवाहार्थं दत्तां कन्यां, अन्यस्मै दातुं, प्रतिगृहीतुः अधिकारोऽस्तिवा नवा ?

उत्तरं. मन्नारगुडी रामचंद्राचार्याः— अनेन वरेणास्यां कन्यायामित्यादिना स्वेन पुत्रोत्पत्त्यर्थमेव प्रतिगृहीतत्वेन अन्यस्मै न दातव्या ॥

तुलसीरंगेशा०— नियोगादिष्वधिकारोस्तीति भाति ॥

कूटाको० शामा०— स्वार्थं गृहीतकन्यां अन्यत्रदातुं नाधिकारः ॥

कालेज् रंगाचार्याः— कस्मैचिद्विवाहार्थं दत्तायाः प्रतिग्रहीत्रा अन्यस्मै दानं शास्त्रप्रतिषिद्धं याज्ञवल्क्येन व्यवहारकाण्डे स्वं कुटुंबाविरोधेन देयं दारसुतादृत इति पंचसप्त तेन श्लोकेन तन्निषेधात् ! ॥ त न च प्रतिगृहीतायाः प्राग्विवाहाद्दारत्वंनोत्पद्यत इति दंयेति वाच्यं तत्रैवा पुत्रे परक्षेत्रे इति सप्तविंशस्य शतस्य श्लोकस्य व्याख्यायां 'यस्या म्रियेत कन्यायाः वाचा सत्ये कृते पतिरिति मानववचनमनुसृत्य वाग्दत्ताया दारत्वस्थापनेन अद्भिर्दत्ताया दारत्वस्य कैमुतिकन्यायसिद्धत्वात् ॥ किंच प्रजासहत्वकर्मभ्यः प्रतिपादयामीत्येव दानात्तथैव प्रतिग्रहाच्चान्यस्मै स्वीकृतायाः कन्याया दानमयुक्तमेव ॥

कौ० माधवाचा०— कालविशेषे अधिकारोस्तीति भाति ।
महाभारततात्पर्यनिर्णये एकविंशातितमेध्याये "सुतोययां-
शरणं तात्रमेशभीमार्जनान्सहदेवोस्य धीमान् । रथंस्वसारंच
ददांसमारुतेर्नेनाम कृष्ण परयैव भक्त्या ॥ भीमः कन्या
सहदेवस्य हेतोस्समग्रहीद्नुजस्यात्मनस्सः ॥ १७० ॥

यादवेंद्राचार्याः

श्रीमहाभारते विराटपर्वणि अ० ७१, ७२.

विराटः–उत्तरां प्रतिगृह्णातु सव्यसाची धनंजयः ।
अयं ह्यौपयिकोभर्ता तस्याः पुरुषसत्तमः ॥ ३४ ॥

अर्जुनः–प्रतिगृह्णाम्यहं राजन्स्नुषां दुहितरंतव ।

विराटः–किमर्थं पांडवश्रेष्ठ भार्यां दुहितरं मम ।
प्रतिग्रहीतुं नेमां त्वं मयादत्तामिहेच्छसि ॥ १ ॥

अर्जुनः ॥ स्नुषार्थमुत्तरां राजन् प्रतिगृह्णामि ते सुतां ॥ ७ ॥

महाभारते उद्योगपर्वणि अ० १०९, ११९.

ययातिः–सुता मे प्रतिगृह्यतां ॥ १२ ॥

गालवः–इयं कन्या नरश्रेष्ठ हर्यश्व प्रतिगृह्यतां (पुनः दिवोदा-
साय) प्रादात्कन्यां महीपतेः ॥ विधिपूर्वंच तां राजा कन्या
प्रतिगृहीतवान् ॥ ७ ॥ उशीनरं प्रतिग्राह्य गालवः प्रययौ वनं ॥

विश्वामित्रः–प्रतिगृण्हामि ते कन्यां एकपुत्रफलाय वै ॥ १७ ॥

भारते अ० १७२.

मयाभिषिक्तो राजेंद्र यवीयानपि धर्मतः ।
विचित्रवीर्यो धर्मात्मा मामेव समुदैक्षत ॥ ७ ॥
तस्य दारक्रियां तात चिकीर्षुरहमच्युत ।
अनुरूपादिव कुलादित्येव च मनो दधे ॥ ८ ॥

तथाश्रौषं महाबाहो तिस्त्र कन्याः स्वयंवराः ।
रूपेणाप्रतिमाः सर्वाः काशिराजसुतास्तदा ॥ ९ ॥
अंबा ज्येष्ठाभवत्तासां अंबिका त्वथ मध्यमा ।
अंबालिका च राजेंद्र राजकन्या यवीयसी ॥ ११ ॥
रथमारोपयां चक्रे कन्यास्ता भरतर्षभ ।
वीर्यशुल्काश्चताः ज्ञात्वा समारोप्य रथं तदा ॥ १३ ॥
ततोहं ताश्च कन्या वै भ्रातुरर्थाय भारत ।
तच्च कर्म महाबाहो मन्युवत्ये न्यवेदयं ॥ १४ ॥

अ० १७३.

इमाः काशिपतेः कन्या मया निर्जित्य पार्थिवान् ।
विचित्रवीर्यस्य कृते वीर्यशुल्काहृता इति ॥ २ ॥

प्रश्नः १९. मीमांसकानां मते इन्द्रादयः देवाः हर्वीषि लब्ध्वा तद्दातृभ्य स्वर्गादिफलानि दास्यंते वा नवा?

उत्तरं **मीमांसकतत्स्माचार्याः** ॥ देवताया अनंगीकर्तृणां केषाचिन्मीमांसकानां मते हविस्त्यागकालीनविहितोच्चारण कर्मत्वं देवतात्वं न तु त्यागकालीनोच्चारणकर्मीभूतशब्दप्रतिपाद्यत्वं गौरवात् ।

किंतुशब्दमात्रं देवतेतिजैमिनिमतनिष्कर्षः ममत्वेवंवदतःवाणी दुष्यतीति हरिस्मरणमेव शरणमिति नवमाध्यायेप्रतिपादितं ॥

कृटाकां० शामाचार्याः ॥ शब्दमयीदेवतेतिमतेमंत्राणांफलदातृत्वं शब्दभिन्नादेवतेतिमतेदेवतानामेव फलदातृत्वं हविर्ग्रहणं च ॥

प्रश्नः २०. भगवतःसर्वभूतसुहृत्त्वं किंनाम?

उत्तरं. मन्नारगुडी रामचं० ॥ भगवतस्सर्वभूतसुहृत्त्वंसंकुचितं दैत्यारि रितितस्यारित्वप्रतिपादनात् ॥

तुलशीरंगेशाचार्याः ॥ दुष्टनिग्रहपूर्वकं शिष्टपरिपालन कर्तृत्वं ॥

कूटा० शामा० ॥ भगवतस्सर्वभूतसुहृत्त्वंचास्त्येव । यथापितुःसर्व पुत्रसौहार्द फलोत्पादस्तुयोग्येष्वेवनायोग्येषु अयोग्यानां स्व स्वदोषेणफलानुत्पादेपिनेश्वरस्य सर्वसुहृत्वंनष्टं तस्मात्सर्वशब्द संकोचोनकर्तव्य एव-लोकेपितुः अयोग्येष्वपि पुत्रेषु सौ-हार्दसत्वेन फलानुत्पादेनदुःखसंभवेनिरभिमानस्य भगवतः दुःखप्रसक्तेरेवाभावेन निर्दोषत्वं सर्वभूतसुहृत्त्वाख्यमहागुणव-त्वंच संभवतीति सर्वशब्दसंकोचेनगुणसंकोचापत्त्यामहान्प्रत्य-वायःस्यात् अतः असंकोचेन सर्वभूतसुहृत्त्वं सिद्धं ॥

कालेज् रंगाचार्याः ॥ निग्रहानुग्रहैःकर्मपाशंप्रमोच्य निरतिशयसुखप्रदातृत्वमेव मातुरिवपुत्राणां सर्वभूतसुहृत्त्वं ॥

कौलगीमाधवा० ॥ सर्वभूतस्ययोग्यतानुसारेणहितकर्तृत्वं

यादवेंद्राचार्याः ॥ सर्वचेतनानांमोक्षदातृत्वं भगवतस्सर्वभूतसुहृ-त्त्वं भवति तेषां साधनानां योग्यतामनादृत्य कृपयारक्षणमिति दिक् ॥

प्रश्नः २१. भूः गोळाकारा वा? यदि गोळाकारा सा क-स्मिन्प्रतिष्ठिता?

उत्तरं मन्ना० रामचंद्राचार्याः ॥ इयंभूः शेषस्य शिरसि तिष्ठति तथाचोक्तं महाभारततात्पर्यनिर्णये— सहस्रमूर्ध्नोस्य वतैकमूर्ध्निसससपातालगिरींद्रसागरा ॥ धरासिकेयं ननु

सर्षपायति प्रसह्यको नाम हरेत्तमेनमिति ॥ एतत्प्रमाणे सर्षपायतीत्यनेनैव गोळाकारत्वमपि गम्यते ॥

कृटा० शामा० ॥ भूः गोलाकारैव । बिभर्त्यंडहरिः कूर्मो अंडेचाप्युदकंमहत् ॥ उदके कूर्मरूपस्य वायुः पुच्छे समाश्रितः ॥ वायोः पुछं समाश्रित्य शेषस्तु पृथिवीमिमामित्यादि प्रमाणानुसारेण कूर्ममारभ्य शेषपर्यंताधारे प्रतिष्ठितावर्तते ॥

काल्लेज् रंगाचार्याः ॥ भूमेरनन्याधारत्वं गोलाकारत्वं गोलांतरैराकृष्टत्वं च भास्कराचार्यः श्लोकत्रयेणाह ॥ ॥ भूमेःपिण्डशशांकज्ञ कवि रवि कुजेज्यार्कि नक्षत्रकक्षावृत्तै वृत्तोवृत्तस्सन् मृदनिल सलिल व्योम तेजोमयोयं ॥ नान्याधारस्स्वशक्त्यैव वियति नियत तिष्ठतीहास्यपृष्ठे निष्टं विश्वं च शश्वत्सदनुजमनुजादित्यदैत्य समंतात् ॥ ॥ मूर्तो धर्ता चेद्धरित्र्या स्ततोन्यस्तस्याप्यन्योम्त्येवमत्रानवस्था ॥ अन्त्येकल्प्या चेत्स्वशक्तिः किमाद्ये किन्नरोभूमिस्साष्टमूर्तेश्च मूर्तिः ॥ ॥ आकृष्टशक्तिश्च मही तया यत्स्वस्थं गुरुस्वाभिमुखं स्वशक्त्या ॥ आकृष्यते तत्पततीव भाति समे समंतात्क पतत्वियं खे ॥

कॉल० माधवाचार्याः ॥ गोळाकारा भूः आकाशेप्रतिष्ठिता— भागवतसूर्यसिद्धांतादय. अत्रप्रमाणं ।

यादवेंद्राचार्याः ॥ भूःगोळाकारा सा आकाशे प्रतिष्ठिता—भागवते ५ स्कंधे १ स्कंधे । सूर्यसिद्धांते च । विष्णुपुराणे । भास्करीये गोळाध्याये च द्रष्टव्यं ।

प्रश्नः ५२. शास्त्ररीत्या, आततायी हंतव्यो वा न वा ?

उत्तरं. **मल्लार० रामचन्द्रा०** ॥ आततायिनमायांतं हन्यादेवाविचारयन्निति यद्यप्यस्ति । तथापि । आततायिद्विजाग्र्याणां

वर्षंयुद्धेन हिंसनं ॥ दत्ताक्षतायाः कन्यायाः पुनर्दानं परस्यच ॥ एतान्धर्मान्कलियुगेवर्ज्यानाहुर्मनीषिण इति निषेधादाततायी ब्राह्मणो न हंतव्यः ॥

तुलसी रंगेशाचार्याः ॥ नाततायिवधे दोषो हंतुर्भवति कश्चन ॥ प्रकाशंवाप्रकाशं वा मन्युस्तन्मन्युमृच्छति ॥ आततायी वधार्ह एव । बंधनं द्रविणादानं स्थानान्निर्यापणं तथा । एष हि ब्रह्मबंधूनां वधो नान्योस्ति दैहिक इति एतेषामपि वधरूपत्वोक्त्या वधार्ह एव

कूटा० शामाचार्याः ॥ आततायिनमायांतं हन्यादेवाविचारयन्नित्यादिप्रमाणानुसारेण हंतव्य एवेति भाति ॥ एवमेव **कौल० माधवाचार्याः** ॥

टोणपे शार्ङ्गपाण्याचार्याः ॥ आततायी हंतव्य एव अत्र प्रमाणं ॥ गुरुं वा बालवृद्धौवा ब्राह्मणं वा बहुश्रुतं ॥ आततायिनमायांतं हन्यादेवाविचारयन् ॥ नाततायिवधे दोषो हंतुर्भवति कश्चन ॥ प्रकाशंवा प्रकाशंवा मन्युस्तन्मन्युमृच्छति ॥ इति विष्णुस्मृतौ पंचमाध्याये उक्तं ॥ किंतु तद्वधे विशेषमाह ॥ वधोद्विविधः ॥ शारीरदंडः ॥ स्वदेशात् बहिःप्रापणकृत्तांगादिरूपश्चेति ॥ तत्र शारीरदंडः ब्राह्मणगोव्यतिरिक्तानां ॥ गोब्राह्मणानांतु ॥ कृत्तांगादि रूप एव ॥ अत्र प्रमाणं ॥ विष्णुस्मृतौ पंचमाध्याये ॥ महापातकिनो ब्राह्मणवर्जं सर्वे वध्याः ॥ न शारीरो ब्राह्मणस्य दंडः ॥ अपि तु स्वदेशात् ब्राह्मणं कृत्तांगं विवासयेत् ॥ तस्य च ब्रह्महत्यायां अशिरस्कं पुरुषं ललाटे कुर्यादित्युक्तं ॥

यादवेन्द्राचा० ॥ हन्तव्य एव.

मनुस्मृतौ ८. अ० ३५०, ३५१.

गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतं ॥
आततायिनमायांतं हन्यादेवाविचारयन् ॥
नाततायिवधे दोषो हन्तुर्भवति कश्चन ॥
प्रकाशं वा प्रकाशं वा मन्युस्तन्मन्युमृच्छति

श्रीभागवते अ० १-७-५

आततायी वधार्हणः. [illegible] हंतव्य इति आदिपुराणे उक्तमिति केचित् वदन्ति. तत् असत्. कुतः ? कलौ उद्धृतं अष्टादश-महापुराणानां मध्ये एकं अग्निपुराणं "कलौपाराशरःस्मृतः" इति प्रसिद्धा स्मृतिश्च. वेदतुल्या इति प्रसिद्धा मनुस्मृतिश्च, आततायी हन्तव्य इति वदति. एतानि प्रमाणानि अशास्त्रीकर्तुं कस्यापि प्रमाणस्य तथापि आदिपुराणस्य सामर्थ्यं नैव, प्रमाणविदो हेतिनः एवमुदाहरन्ति.

वेदाश्च पञ्चरात्राणि प्रमाणं मुख्यमीरितं ॥
अविरुद्धानि यान्य[redacted] ॥
भारतादीनिचान्यानि प्रमाणानीति वै विदुः ॥
श्रुतिस्मृती तु तस्याऽऽज्ञे तन्त्रोक्तं [redacted] इति.

प्रश्नः २१. दोषानकथयित्वा, छलेन विवाहे कृते स विवाहः वितथो वा न वा ? अत्र मनोरभिप्रायो वर्णनीयः.

उत्तर पादचंद्राचार्याः मनु० अ० ९ श्लो० ७३.

यस्तु दोषवतीं कन्यामनाख्यायोपपादयेत् ।
तस्य तद्वितथं कुर्यात्कन्यादातुः दुरात्मनः ॥

अन्याः स्मृतयश्च, अयमेवाशयः तुलसी रंगाचार्याणां, कोकणी [redacted]

॥ श्रीः ॥

श्रीवासुदेवो विजयते ।

श्रीकुंभघोणे द्वादशाक्षरपुरवीथिकायां

श्रीवासुदेवस्य ६० तमे आविर्भावो-

त्सवे प्रातस्सायंच मिलितैर्विद्व-

ज्जनैः चर्चितनिर्णीत-

विषयकग्रन्थः ।

अयं

कुंभघोण

"गोपालविलास" मुद्राक्षरशालायां

मुद्रितः ।

कल्यब्दे ४९९७.

शालिवाहनशकाब्दे १८१८.

प-मथमंव-मर

१८९७.

—*—

॥ श्रीः ॥

श्रीकुम्भघोणे द्वादशाक्षरपुरवीथिकायां श्रीवासुदेवस्य आविर्भावारम्भ्य ६० तमः आविर्भावोत्सवः दुर्मुखफाल्गुन शुक्लचतुर्दशी बुधवासर हृण १८९७ मार्च १७ सौरमीनषष्ठ दिनमारभ्य प्रतिपच्छुक्रवासरपर्यन्तं त्रिदिनं प्रातस्सायं च प्रवृत्तायां सभायां मिळिता विद्वज्जनाः ॥

मन्नारगुडी रामचन्द्राचार्याः.
मन्ना० कृष्णाचार्याः.
मन्ना० मन्त्रराजाचार्याः
संगमेश्वर रामाचार्याः.
कु० राघवेन्द्राचार्याः.
इंवल वेंकटाचार्याः.
कोलगी चक्रराजाचार्याः
को० भुगर्याचार्याः.
उम्रजी श्रीनिवासाचार्याः
वरखेडी श्रीनिवासाचार्याः
शठकोपाचार्याः.
कालेज रङ्गाचार्याः
तोरवी श्यामण्णाचार्याः
कट्टाकोल श्यामाचार्याः.
टोणपे सारंगाचार्याः.
कौल० माधवाचार्याः.
धर्मशास्त्री रामाचार्याः.
धर्म० दादाचार्याः.

तिरुकाटपल्ली अनन्ताचार्याः
टोणपे कृष्णाचार्याः.
चतुर्वेदी हर्याचार्याः.
चतुर्वेदी रंगनाथाचार्याः.
देवळे संजीवाचार्याः.
भुञ्या माधवाचार्याः.
अवधानी नारायणाचार्याः.
श्रीपुष्प भूवराहाचार्याः.
चक्रपाणि आचार्याः.
तिरु० श्रीनिवासाचार्याः.
तिरु० चक्राचार्याः.
चतु० गोपालाचार्याः.
कुण्डली वेदव्यासाचार्याः.
कौ० सेतुमाधवाचार्याः.
बुरडे सेतुमाधवाचार्याः.
बुरडे राममूर्त्याचार्याः.
रोहणीकर श्रीनिवासाचार्याः.

धर्म० प्रयागाचार्याः.	लौकिकाः ॥
कूटाकोल श्यामाचार्याः.	के. रङ्गराव.
खापे श्रीनिवासाचार्याः.	रामचन्द्रराव.
खापे वासुदेवाचार्याः.	रामराव
खापे रामचन्द्राचार्याः.	ताशीलदार अय्यामामिशास्त्री.
अध्वर्यु कृष्णाचार्याः.	टोमरे नारायणसामिराव.
पाटराचार्य अब्बुआचार्याः.	-----

॥ विचार्या विषयास्त्विमे ॥

१. प्रश्नः— ऋग्वेदस्य प्रथममण्डलस्य अष्टादशानुवाकस्य १२३ सूक्तस्य ९, १०, ११. ऋचः किं प्रतिपादयंति ?

उत्तरं——१. मन्नारगुडी रामचन्द्राचार्याः ॥ उदीरता इत्यादिमन्त्र. ९॥ तदर्थस्तु। यस्मात्कारणादुषःकालाभिमानिदेवताः तमसा अपगूढानि स्पार्हा स्पृहणीयानि वस्तूनि यज्ञसाधनभूतानि हविरादीनि प्रकाशयंति तस्माद्दान्विजः यूयमुत्कृष्टं स्तोत्रं प्रवर्तयध्वं प्रज्ञोपलक्षितानि कर्माणि प्रवर्तन्ता। अग्नयः देदीप्यमानाः उत्तिष्ठन्तु तथाच रात्रौ अन्धकारेण सर्वाणि कर्माणि प्रतिबद्धानि अभवन् उषोदेवताभि तमोरूपे प्रतिबन्धे नष्टे सति सर्वाणि कार्याणि प्रवर्तन्तामित्यर्थः। १० ऋक् कन्येव। यथाकन्या अप्रगल्भेव सदा सचराति अनंतर प्रगल्भासती पतिं प्राप्नोति अनन्तरं स्वस्य तारुण्य प्रकाशयति। तथा उषःकालाभिमानिदेवतापि अवस्थात्रयवती पतिं प्राप्नोतीत्यर्थः ॥ १, मण्डले. १८, अनुवाके. १२३, सूक्त. ऋक् ११. सुसंकाशा ० अस्याः अर्थः। यथा मात्रा अलंकृता सती योषा स्वलावण्यं सर्वेषां दर्शयाति तथा त्वमपि

प्रकाशमाना स्वस्वरूपं सर्वेभ्यो दर्शयसि भद्रा कल्याणशीला च वर्तसे । अतः त्वं अस्माकं ज्ञानप्रतिबन्धकं तमो निवर्तय । पुनः यथा तमो निवर्तेत अन्येषां कर्तव्यावशेषो न भवेत्तथा निवर्तयेति । अत्र प्रदर्शितः अर्थः विद्यारण्यभाष्यानुसारेण । ऋग्भाष्ये "उष- प्रकाशनाद्रूपम् तद्विदुस्त उषसं" इत्युक्तरीत्या प्रकाशरूपत्वेन उष- शब्दवाच्यत्वमस्यास्त्व च ज्ञातव्यम् ॥

२. एवमेव मन्नारगुडी कृष्णाचार्याः ॥

३. एवमेव कः शामाचार्याः ॥

४. एवमेव पाण्डुरंगी मध्वरायाचार्याः ॥

५. टोणपे शार्ङ्गपाणि आचार्याः ॥ ६. ऋक् । यजमानेन ऋत्विजो नियुज्यन्ते । यस्मात् उषो देवता अन्धकारावृतसमस्त- णि यजमानस्य पदार्थान् प्रकटीकुर्वन्ति । तस्मात् स्तोत्रं प्रवर्तयध्वं । यज्ञोपयुक्तानि कर्माणि कुरुध्वं अग्नीन् प्रज्वलयध्वमिति ॥ १०ऋक् । शरी- रेण स्पष्टता प्राप्नुवती कन्येव क्रीडाशीले हे उषः त्वं स्पष्टशरीरा अभिमतं दातुमिच्छन्तं सूर्यं प्रयासि । ततः यौवनोपेता पत्युः सूर्यस्य पुरतः ईषद्धास्यं कुर्वती । वक्षसा उपलक्षितान् अवयवान् प्रकटी- करोषीति उषो देवी स्तूयते ॥

११. ऋक् । यथा मात्रालंकृता शोभना स्त्री स्वकीयशरीरं दर्श- नायाविष्करोति । तथा त्वं सर्वशरीरमाविष्करोषि । अतः त्वं स्तुत्या प्रसन्ना पदार्थनिकरं अन्धकारं विनाशय इति उषोदेवी स्तूयते ॥

६. तोरवी शामण्णाचार्याः ॥ १. म० १८. अ० १२३. सू० ६. ऋक् । सायनभाष्यरीत्या लिख्यते ॥ ऋत्विजः प्रति य- जमानोक्तिरूपेयं श्रुतिः १. स्तुतिकर्तव्यत्वं २. प्रकृतोपयुक्तकर्म- प्रवृत्तिं ३. प्रकृतोपयुक्ताग्निप्रज्वलनं ४. स्तुतिफलं प्रतिपादयति ॥

१.मं० १८.अ० १२३.सू० १०.ऋ० अर्थः। यथा स्त्री कन्यात्वावस्थायां स्वाभरणाद्यलंकृतशरीरेण शोभमानासती स्वस्वामिकर्तृकदानार्हं वरं प्रति गच्छति ॥ यथा च मन्दहासयुक्ता सती वक्षःप्रभृत्यवयवानि आविष्कृणुते तथेति शेषं स्फुटं ॥

१.मं० १८. अ० १२३.सू० ११.ऋ० यथा लोके मात्रादिना स्वलंकृता शोभना सती स्वकीय लावण्योपेतं सर्वशरीरं दर्शनायाविष्करोति तद्वत्स्वमपीत्यर्थः ॥

७. **अवधानी नारायणाचार्याः** ॥ यज्ञसाधनपदार्थप्रकटनं कुर्वन्तो उषोदेवान् स्तुध्व । यज्ञीयानि अग्निप्रज्वलनादीनि कर्माणि कुरुतेति यष्ट्रा विज्ञाप्यन्ते ऋत्विजः। कन्ये अभिमत दातुमिच्छन्तं सूर्यं प्रत्येषीति एव उषोदेवी स्तूयते। स्तुत्या प्रसन्ना पदार्थावरणं विवासयेति ॥

८. **यादवेन्द्राचार्याः**॥ ऋग्वेदे १. १८. १२३. ६. एतस्या ऋच अर्थं **सायनाचार्याः** एवं वदन्ति । सूनृता प्रियसत्यात्मिका वाच उदीरता उद्गच्छन्तु ॥ तथा पुरन्धी. पुरंधय पुरं शरीरं यासु धीयते याभिर्वा ता पुरन्धयः प्रज्ञा प्रयोगविषया ता अभ्युत्तिष्ठन्तु प्रज्ञापरिक्षितानि कर्माणि प्रवर्तन्तामित्यर्थः। तथाग्नय आहवनीया शुशुचाना सो अत्यन्त उदस्थु. उत्तिष्ठन्तु प्रज्वलयन्त्वित्यर्थ । विभातीर्विविधं भासमाना उषस उषोदेवतास्तमसापगूळ्हान्यन्धकारेणावृतं गोपितानि स्पार्हा स्पृहणीयाने वसूनि वासयोग्यानि यज्ञसाधनभूतहविरादीन्याविष्कृण्वन्ति यथा वस्तु प्रकटीकुर्वंति तस्मात् स्तोत्रादिकं कुर्वीन्नित्यर्थ. । अयं भावः ॥ सूर्योदयकाल आगत तत सूनृताः प्रियसत्यात्मिका वाचः उदीरतां. प्रज्ञया क्रियमाणानि कर्माणि प्रवर्तन्तां. अग्नय प्रज्वलयन्तु ॥ ऋक् १०. सायनाचार्याः ॥ तन्वा शरी-

रेण शाशदाना शाशाद्यमाना स्पष्टता प्राप्नुवती कन्येव । तथा हे उषः त्वं दृश्यसे । हे देवि देवनशीले यियक्षमाणं यष्टुमिच्छन्तं पतिं युवतिरिति त्मुप्रापमा । यथा लोके प्रगल्भा योषित् पुरस्तात्प्रियतमस्य पुरतः सस्मयमाना दन्तप्रदर्शनायेषद्धसनं कुर्वती वक्षांसि वक्षसोपलक्षितानि आविष्करोति । तथा त्वमपीत्यर्थः । अयं भावः । हे देवि तन्वा शाशदाना कन्येव एषि । तस्मात् पुरस्तात् संस्मयमाना युवतिरिव विभासि । वक्षांसि आविः कृणुषे ॥

ऋक् ११. हे उषो देवि मातृमृष्टा मातृभिः जननीभिः शुद्धीकृता योषेव सुसंकाशा प्रकाशमाना त्वं तन्वं स्वकीयां तनुं दृशे आविष्कृणुषे प्रकटयसि । यथा लोके मात्रादिना स्वलंकृतात्यन्तं शोभमाना सती स्वकीयं लावण्योपेतं सर्वशरीरं दर्शनायाविष्करोति तद्वत्त्वमपीत्यर्थः । हे उषः यत एवं करोष्यतो भद्रा कल्याणशीला सती त्वं वितरं व्युच्छ आवरकमन्धकारं विप्रकृष्टं यथाभवति तथा विवासय ॥

२. प्रश्नः— ऋग्वेद १, १०, १३१, ३ ऋक् किं प्रतिपादयति ?

उत्तरं— १. मन्नारगुडी रामचन्द्राचार्याः ॥ सूक्त १३१. ऋक् ३ विश्वा ततस्रे इति अस्यार्थः । इन्द्र स्वभजनकर्तृणा गोत्रवृद्धिं करोति अमुष्मिन्स्वर्गादिकं प्रापयति इति हेतोः दम्पती यथाव्रतादिनानिष्यन्तौ फलप्रतिबन्धकं च परिहरन्तौ सन्तौ इन्द्रं प्रीणयितुं यज्ञं कुर्वाते तेषां भजकानां मिथुनानां अनिष्टपरिहारार्थं स्वायुधं च प्रकाशयतीति ॥

२. एवमेव मन्नारगुडी कृष्णाचार्याः ॥

३. कृ० शामाचार्याः ॥ १. १९. १३१. ३.. हे इन्द्र त्वा त्वामुद्दिश्य मिथुना: पत्नीसहिता: यजमाना: वितत्नं यज्ञं वितन्वते यद्वा यज्ञं पयोव्रतादिना ॥

४. टोणपे शार्ङ्गपाणिआचार्याः ॥ हे इन्द्र पत्नीसहिता यजमाना: त्वामुद्दिश्य श वितन्वते । गोसमूहलाभार्थं इन्द्रतृप्तिमिच्छव: विशेषेण हविस्यक्ष्यन्त. यत. स्वर्ग गन्तुमुद्यतौ द्वौ जायापतीसयुक्ताविवाभिमतफलयुक्तौ करोषि इति इन्द्रः स्तूयते ॥३॥

५. तोरवी शामण्णाचार्याः॥ पत्न्यासह यज्ञकरण देवतामुद्दिश्य देहशोषण वा पत्न्या सह यज्ञकरणादेव सफलत्व। गृहस्थाश्रमिण पुरुषस्य पत्न्या सहैव स्वर्गप्राप्ति पत्न्याः पतिसाहित्येनैव स्वर्गप्राप्ति. स्त्रीणा पतिसाहित्येनैव विहितकर्माधिकार । पुरुषस्य पत्न्या सहैव विहितकर्मानुष्ठान इन्द्रमहिमा इयेतान् विषया प्रतिपादयति इत्यलं विस्तरेण ॥

६. अवधानी नारायणाचार्याः॥ हविर्दानकर्मणि दपती अभिमतफलयुक्तौ करोषीति ॥

७. यादवेन्द्राचार्याः॥ १. १९. १३१. ३ सायनाचार्याः एवं वदन्ति। हे इन्द्र त्वा त्वामुद्दिश्य मिथुना पत्नीसहिता यजमाना विततत्नं यज्ञं वितन्वते यद्वा यज्ञं पयोव्रतादिनात्मानमुपक्षयन्ति। किमथ गव्यस्य व्रजस्य माता गवा संबन्धिनो यूथस्य लाभ निमित्तभूते सति नत्वसर्वत्राग्निहोत्रादिनित्यवाक्येषु कारीरिचित्रादिकाम्यवाक्येषु यस्योदयं यस्य गृहानित्यादि नैमित्तिकवाक्येषु पुरुषस्यैवार्थित्वादि सद्भावात्तस्यैवाधिकारः स्त्रियास्तु मन्यप्यर्थित्वेऽध्ययनाभावेन विद्वत्ताया अभावात्। अत एव सामर्थ्याभावाच्च । नास्त्यधिकार इति वाच्यम् । यद्यपि स्त्रिया नास्ति पृथगधिकार । तथापि

पूर्वमीमांसाया षष्ठे अधिकाराध्याये । तृतीयचतुर्थाभ्यामधिकरणाभ्या अस्त्येव स्त्रिया अधिकार स च पत्न्या सहेति प्रपंचितत्वात् । जायापती अग्निमादधीयातामित्याधानविधानात । स्मृतिषु च ' नास्ति स्त्रीणा पृथग्यज्ञो न व्रत म० ५. १५५. इति पृथगाधिकारस्यैव निवारितत्वादस्त्येव पत्या सह स्त्रिया अधिकार' अध्ययनाभावेऽपि॥ वेद पत्न्यै प्रदाय वाचयेत् । आ० २. ११. इति सूत्रकारवचनात 'पत्न्यन्वास्त' इत्यादिविधिषु 'सुप्रजसस्त्वा वय'मित्यादि मन्त्रवचनस्यानिभार इति न्यायात तस्मात मिथुना यज्ञ ततस्त इन्द्र-नवुक्त । कीदृशाः अवश्यव इद्राया मने तन्निमिच्छन्त नि-मज्ज निश्शेषेण हविः यजन्त सन्तन्त सक्षानिर्गत्यर्थ. स्वा सम्भजमाना' पुनस्तत्र विशेष्यन्ते । नि मज. फलप्रतिबन्धक पाप निर्गमयन्त' कस्तत्र विशेष इति तदुच्यते यत् यस्मात कारणात गव्य - गामामन इच्छन्तौ स्वर्गन्ता स्वर्ग यन्तौ गन्तुमद्युक्तौ दाजना हे जायापतीत्स्वर्पौ जनौ ममहसि । सयुक्तयोरेव अभिमतं स्वर्गादिकं प्रयच्छसि । यद्वा सम्यगनुष्ठितत्वात्तावि महसि निश्चिनोषि अत. पत्नासहिता अनुतिष्ठन्तीत्यर्थ । किंच हे इन्द्र त्व वृषण वर्षक कामाना सत्वाभुव शत्रुवधादिव्यापारसामर्थ्येन सहवोत्पन्न वज्रमाविष्कृत्य आविष्कुर्वन प्रकटयन वर्तस इति शेष ॥ २ ॥

३. प्रश्नः-- ऋग्वेदे १, २१, १५४, १६. ऋक् किं प्रतिपादयति ?

उत्तरं- १. **मन्त्रा० रामचन्द्राचार्याः** ॥ तृतीयप्रश्ने १.६.नास्ति ॥

२. एवमेव **मन्त्रा० कृष्णाचार्याः** ॥

३. **अवधा० नारायणाचार्याः** ॥ इन्द्रः स्तूयते ॥

४. **कुट्टा० शामाचार्याः** ॥ १, २१, १५४, ६. हेपत्नी यजमानौ वा युष्मदर्थं तानि गन्तव्यत्वेन प्रसिद्धानि वस्तूनि

मुखनिवासयोग्यानि स्थानानि गमध्यै युवयोर्गमनाय उश्मसि का-
मयामहे तदर्थं विष्णुं प्रार्थयाम इत्यर्थः ॥ तानीन्युक्त कानीत्याह।
यत्र येषु वास्तुषु गावो रश्मयो भूरिशृङ्गाः अत्यन्तोन्नत्युपेताः
बहुभिराश्रयणीया वा। अयासः अयनागन्तारः अतिविस्तृताः।
यद्वा अयासः गन्तारः अतादृशाः अत्यन्तप्रकाशयुक्ता इत्यर्थः ॥
अत्राह। अत्रखलु वस्वाधारभूते द्युलोके उरुगायस्य बहुभिर्म-
हात्मभिः गातव्यस्य स्तुत्यस्य वृष्णः कामाना वर्षितुः विष्णोः तत्
तादृशं सर्वत्र पुराणादिषु गन्तव्यत्वेन प्रसिद्धं परमं निरतिशय पदं
स्थान भूरि अतिप्रभूतं अवभाति स्वमहिम्ना स्फुरति ॥ तानि वा
वास्तूनि कामयामहे। गमनाय यत्र गावो भूरिशृङ्गा बहुशृङ्गा भू-
रीति बहुनो नामधेयं प्रभवतीति सत शृङ्गं श्रयतेर्वा शृणातेर्वा श-
म्नातेर्वा शरणायोद्गतमिति वा शिरसो निर्गतमिति वा अयासो अ-
यनास्तत्र तदुरुगायस्य विष्णोर्महागतेः परमं पद पदार्थ्यस्थमवभाति
भूरिपादः पद्यतेरिति ॥ ६ ॥

४. प्रश्नः— स्मृतिषु कृत्रिमादय ये पुत्रा उक्ताः ता-
न्वदत? कया स्मृत्या निवर्तिता. सा स्मृति किं वदति? तस्या
व्याख्यान वर्तते वा। यदि वर्तते तर्हि केन कथ वा व्याख्यातं?

उत्तर— १. प्रभा० रामचन्द्राचार्याः ॥ नवमे मनुः।

औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च।
गूढोत्पन्नोपविद्धश्च दायादा बान्धवाश्च षट् ॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा।
स्वयं दत्तश्च शौद्रश्च षडदायादबान्धवाः ॥ तदाह। बृहस्पतिः।
उक्ता नियोगा मनुना निषिद्धाः स्वयमेवतु।
युगक्रमादशक्योऽयं कर्तुमन्यैर्विधानतः ॥

तपोज्ञानसमायुक्ताः कृतत्रेतायुगे जनाः ।
द्वापरे च कलौ नृणां शक्तिहानिर्हि निर्मिता ॥
अनेकधा कृता: पुत्रा ऋषिभिश्च पुरातनैः ।
न शक्यन्तेऽधुना कर्तुं शक्तिहानैरिदंतनैरिति ॥

२. एवमेव मम्रा० कृष्णाचार्याः ॥ किंच ।
औरसो दत्तकश्चैतौ पुत्रौ कलियुगे स्मृतौ ॥
अन्यान्दशविधान पुत्रान् कौनाद्यान्वर्जयेत्कलौ । इत्युक्ते
औरसदत्तकव्यतिरिक्ता पुत्रा निषिद्धा ॥

३. एवमेव कृ० शामाचार्याः ॥

४. एवमेव तोरवी शामण्णाचार्याः ॥

५. एवमेव पाण्डुरंगी मध्वराआचार्याः ॥

६. यादवेन्द्राचार्याः ॥ द्वादशविधपुत्राः स्मृत्यादिषु उक्ता तथा मध्य केऽपि कदापि न निवर्तिता । केचित दत्तौरसौ विना अन्ये पराशरेण निवर्तिता इति वदन्ति । पराशरमाधवीये एवं नेति व्याख्यानं भवति । तथाहि । पराशरस्मृतौ ॥ अ० ४.

औरस क्षेत्रजश्चैव दत्त कृत्रिमक: सुत ।

माधवः ॥ एतच्च द्वादशविधानां पुत्राणामुपलक्षणं । तच्च मनुना दर्शिता । * * अत्र द्वादशविधाना पुत्राणा यानि लक्षणानि मनुना दर्शितानि तानि सर्वाण्युपलक्षयितुं दत्तस्य लक्षणमाह ॥

स्मृतय. । मनुः ॥ ९. १५८. पुत्रान् द्वादशयानाहवि त्रिभिः । १६६ औरसेति । * * * * *

विष्णुः ॥ अ० १५. अथ द्वादशपुत्राः भवन्ति ।

वशिष्ठः ॥ अ० १७. बह्वीनां द्वादशैव पुत्रा इति । * *

याज्ञवल्क्यः ॥ अ० २. श्लो० औरसेति पंचभिः ।

बृहत्पराशरस्मृतौ ॥ अ० ६.

और्साद्याः स्मृता पुत्रा मुनिभि द्वादशैव तु ।

* * * *

श्राद्धप्रदा क्रमेणस्यु पूर्वाभावे परं परं ॥

५ प्रश्नः-- स्मृतिषु अमरादिप्रसिद्धकोशेषु च क्षतयोनित्वं किमिति वर्णितं? ते स्मृतिकोशा के?

उत्तरं— १. तारखी शामण्णाचार्याः ॥ स्त्रीणां क्षतयोनित्वं नाम पुरुषसंयोगानन्तरमान्यनराधिष्ठानयोनित्वमितिज्ञायते । स्मृतिपर्यालोचनया ॥ स्मृतिस्तु ।

ऋष्यशृङ्गः ॥ स्त्रीणामात्मस्य वैभर्तु यद्गोत्रं तेन निर्वपेत् ।

यदि त्वक्षतयोनिस्स्यात् पतिमन्यं समाश्रिता ॥

तद्गोत्रेण तया देयं पिण्डं श्राद्धं तथोदकं ।

अमरे, क्षतयोनित्वशब्दो नदृश्यतेऽस्माभिः ॥

२. टांण० शार्ङ्गपाण्याचार्याः ॥ **याज्ञवल्क्यस्मृतौ** ।

अक्षता च क्षता चैव पुनर्भूस्संस्कृता पुनः ।

मिताक्षरायां ॥ "अन्यपूर्वा द्विविधा । पुनर्भूः स्वैरिणी चेति । पुनर्भूरपि द्विविधा । क्षताचाक्षताच । तत्र क्षता । संस्कारात्प्रागेव पुरुषसंबन्धदूषिता ॥" एतेन संस्कारात्प्रागेव पुरुषसंबन्धवत्त्वं क्षतयोनित्वमिति ॥

३.यादवेन्द्राचार्याः॥पुरुषसयोगानन्तरं स्त्री क्षतयोनिरिति उच्यते. **प्रसिद्धकोशेषु अपि । एवमेव उक्तं. शब्दकल्पद्रुमे** ॥ अक्षतयोनि. **पुरुषसंयोगेन अदूषिता" इति । कन्या अक्षतयोनि अमैथुनी। इति च पुरुषसंयोगात्पूर्वं स्त्रियः उक्ताः । अकन्या क्षतयोनिः स्पृष्टपूर्वा इति पुरुषसंयोगानन्तरमेव स्त्रियः व्यवह्रियन्ते** ॥

मनुः ॥ अत्र मनौ ९. ६. **श्रीनन्दनः** अक्षतयोनि ॥

वैद्यनाथदीक्षितीये वर्णाश्रमकाण्डे कन्यालक्षणप्रकरणे प० ९३.

सवर्णोद्वाह नियममाह– **मनुः** ॥

असपिण्डा च या मातुरसगोत्रा च या पितुः ।

सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ॥

अत्र मनौ अक्षतयोनि ॥

अकन्येति तु यः कन्यां ब्रूयाद्द्वेषेण मानवः । ८. २५. २६.

साचेत् अक्षतयोनिः स्यात् ९. १७६.

श्रीनन्दनः ॥ कन्या अक्षतयोनि । ७६. मन्त्रसंस्कार अक्षतयोनीनामेव ॥ ७६

वासिष्ठः ॥ यावच्च कन्या ऋतवः स्पृशन्ति तुल्यैस्सकामा अभियाच्यमाना ॥ अ० १७. मन्त्रसंस्कृता । अ० ८.

पाणिग्राहे । सा चेदक्षतयोनिः स्यात् पुनस्संस्कारमर्हति ॥ अ० ७.

नारदः ॥ कन्यास्वक्षतयोनिषु पाणिग्रहणदूषिता ॥ इति

६ **प्रश्नः** - कन्यानां भार्यात्वं कदा सिध्यति ? भर्तृसंयोगानन्तरं वा न तत्र वा ? गृह्यसूत्राणि तेषां भाष्याणि च अत्र किं वदन्ति ? तद्विषये ब्रुवन्तु ?

उत्तरं–– १. **दोणप शार्ङ्गपाणि आचार्याः** ॥ **मनुस्मृतिः** ।

अ० ८. पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम् ।

तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे ॥

कुल्लूकः ॥ वैवाहिकमन्त्राः नियतं निश्चितं भार्यात्वे निमित्तं मन्त्रे यथाशास्त्रप्रयुक्ते भार्यात्वेन निष्पत्तेः । तेषान्तु मन्त्राणां "सखा सप्तपदी भवेति" मन्त्रेण कल्पनया सप्तमे दत्ते पदे भार्यात्वनिष्पत्ते शास्त्रज्ञैः निष्ठा विज्ञेया । एवं च

सप्तपदीदानात्प्राग्भार्यात्वानिष्पत्तेः सत्यनुशये जह्यात्सोर्ध्वं"॥ कन्याया भर्तृसंयोगात्प्राग्भार्यात्वं सिद्ध्यति ॥

२. **तोरवी शामण्णाचार्याः** ॥ भर्तृसंयोगात्पूर्वं सप्तपद्युत्तरक्षण एव भार्यात्वं स्त्रियो लभन्ते ॥

अत्राह—**यमः** ॥ विवाहे चैव सवृत्ते चतुर्थेऽहानि रात्रिषु ।
एकत्वं सा व्रजेद्भर्तुः पिण्डे गोत्रे च सूतके ॥
स्वगोत्राद्भ्रश्यते नारी उद्वाहात्सप्तमे पदे ।
भर्तृगोत्रेण कर्तव्यं दान पिण्डोदकक्रिया ॥

बृहस्पतिराह— पाणिग्रहणिका मन्त्राः पितृगोत्रापहारकाः ।
भर्तृगोत्रेण नारीणां देयं पिण्डादिकं ततः ॥
चतुर्थीहोममन्त्रेण त्वङ्मांसहृदयेन्द्रियैः ।
भर्त्रा संयुज्यते पत्नी तद्गोत्रा तेन सा भवेत् ॥

यमः ॥ नोदकेन न वा वाचा कन्यायाः पतिरुच्यते ।
पाणिग्रहणसंस्कारात्पतित्वं सप्तमे पदे ॥

कन्यायाः भार्यात्वं विना पतित्वानुपपत्तेर्वरस्येति भावः ॥

मनुः ॥ पाणिग्रहणिका मन्त्रा नियतं दारलक्षणं ।
तेषां निष्ठा तु विज्ञेया विद्वद्भिस्सप्तमे पदे ॥

३. **यादवेन्द्राचार्याः** ॥ मनोदानात्परतः भार्यात्वसिद्धिर्भवति ।

श्रीमहाभारते वनपर्वणि अ० २९३. सावित्र्युवाच—
सकृदंशो निपतति सकृत्कन्या प्रदीयते ।
सकृदाह ददानीति त्रीण्येतानि सकृत्सकृत् ॥२६॥
दीर्घायुरथवाल्पायुः सगुणो निर्गुणोऽपि वा ।
सकृद्वृतो मया भर्ता न द्वितीयं वृणोम्यहं ॥२७॥
मनसा निश्चयं कृत्वा ततो वाचाभिधीयते ।
क्रियते कर्मणा पश्चात्प्रमाणं मे मनस्ततः ॥२८॥

७. प्रश्नः— सूत्रस्मृत्यनुसारेण, कदा भर्तुः पिण्डे गोत्रे सूतके च कन्या एकत्व लभते ?

उत्तरं— १. मन्नार० रामचन्द्राचार्याः ॥ वृद्धमनुः ॥

एकत्वं सङ्गता भर्तुः पिण्डे गोत्रे च सूतके ।
स्वगोत्राद्भ्रश्यते नारी विवाहात्सप्तमे पदे ॥

२. मन्नार० कृष्णाचार्याः ॥ विवाहहोमे सप्तपद्यन्तं संपूर्णे जाते भार्याया भर्तृगोत्रत्वादिकं सिद्ध्यति ॥ अत्र प्रमाण । " स इमां देवो अर्यमा प्रेतो मुञ्चातु नामुत । स इमां देवः पूषा प्रेतो मुञ्चातु नामुत । स इमां देवो वरुण प्रेतो मुञ्चातु नामुत. ॥ " इति मन्त्रत्रय ॥ " स अर्यमा देव इमां इतः पितृगोत्रात् मुंचातु मोचयतु इति ॥ स पूषा देव स वरुण देव इमां इतः पितृगोत्रात्प्रमुंचतु प्रमोचयतु । " इति विवाहहोममन्त्रत्रय आश्वलायनसूत्रोक्तं ॥

३. एवमेव पाण्डुरङ्गी मन्त्रराजाचार्याः ॥

४. कृ० शामाचार्याः ॥ मनुः ॥- यमः ॥

विवाहे चैव निर्वृत्ते चतुर्थेऽहनि रात्रिषु ।
एकत्वमागता भर्तुः पिण्डे गोत्रे च सूतके ।

सव सर नेकऋषिजायन इति सूत्रस्य अन्वेत्वाहुरिति व्याख्यया गेव सरान्ते ॥

५. टोणपे शार्ङ्गपाणि आचार्याः ॥ गोभिलसूत्रभाष्ये बृहस्पतिः ॥ पाणिग्रहणिकामन्त्राः पितृगोत्रापहारकाः ।
भर्तृगोत्रेण नारीणां देयं पिण्डादिकं ततः ॥

पाणिग्रहणमंत्राणां पितृगोत्रापहारकत्वमाह ॥ न तेषामेव केषां तर्हि तेषां चतुर्थीहोममन्त्राणाच कस्मात् यस्मादनन्तरमेवाह—

बृहस्पतिः ॥ चतुर्थीहोममन्त्रेण त्वङ्मांसहृदयेन्द्रियैः ।
भर्त्रा संयुज्यते पत्नी तद्गोत्रा तेन सा भवेत् ॥

अथवा पाणिग्रहणिकामन्त्रा इति वचनं सप्तमे पदे गतायां वध्वामवगन्तव्यं ॥ हारीतस्मरणात् । तथा च मनुः ॥

पाणिग्रहणिका मन्त्रा नियतं दारलक्षणं ।
तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे ॥

पराशरमाधवीये। प. ४६९. एकत्वं सगता भर्तुःपिण्डे गोत्रेच सूतके।
स्वगोत्राद्भ्रश्यते नारी विवाहात्सप्तमे पदे ॥

मार्कण्डेयपुराणे ॥ ब्राह्मादिषु विवाहेषु यातूढा कन्यका भवेत्।
भर्तृगोत्रेण कर्तव्या तस्या. पिण्डोदकक्रियेति ॥

"एतेन चतुर्थीहोमानन्तर । भर्तृसंयोगानन्तरमेव भर्तु पिण्डे गोत्रे सूतकेच कन्या एकत्व लभते"॥

६. तोरवी शामण्णाचार्याः ॥ १. यमस्मृति. ॥ भवदेवभट्टादाहृतामिति गोभिलभाष्योध्दृतमनुस्मृतिरपि ॥

विवाहे चैव निर्वृत्ते चतुर्थेऽहनि रात्रिषु ।
एकत्वमागता भर्तु पिण्डे गोत्रे च सूतके ॥
विवाहे चैव निर्वृत्ते चतुर्थेऽहनि रात्रिषु ।
सन्ध्योद्भवैस्तथा मन्त्रैः अस्थिमांसत्वचैस्सह ॥
एकत्वं सहते भर्तु पिण्डे गोत्रे च सूतके ॥

आपस्तम्बधर्मसूत्रे पत्र ७४.

७. यादवेन्द्राचार्याः ॥ सूत्रस्मृत्यनुसारेण भर्तु पिण्डे गोत्रे सूतकेच भर्त्रासह एकत्वं तेन कन्यात्वभगानन्तर स्त्री लभते ।

आश्वलायनसूत्रे ॥ १, ८, १२. संवत्सर चैकऋषिर्जायत इति सूत्रस्य भाष्ये व्रतान्ते एक ऋषिस्संपद्यते पितृगोत्र विहाय पतिगोत्रं भजत इत्यर्थः ॥ इति

आपस्तम्बधर्मसूत्रे २, ६, १५, १०.

विवाहे चैव निर्वृत्ते चतुर्थेऽहनि रात्रिषु ।

संख्योद्भवे तथा मन्त्रे अस्थिमांसत्वचैः सह ॥
एकत्वं सहते भर्तुः पिण्डे गोत्रे च सूतके ।
तस्मादुदकपिण्डे च भर्तृगोत्रेण दीयतां ॥

सुधीविलोचने कृष्णमृद्धः ॥ अनेकभर्तृकायाः प्रथमभर्तृ-गोत्रेण तेन व्यवाये सति ।

स्त्रीणां आद्यस्यवैभर्तुः यद्गोत्रं तेन निर्वपेत् ।
यदि त्वक्षतयोनिस्स्यात पतिमन्य समाश्रिता ॥
तद्गोत्रेण तथा देयं पिण्डं श्राद्धं तथोदकं ॥

गो० गृ० सू० २, ३, १३. अनुमन्त्रिता गुरुं गोत्रेणा-भिवादयते ॥ भाष्यं ॥ अनुमन्त्रितैव वधूरभिवादयते * * पितृगोत्रेण - * सप्तमे पदे गताया वध्वा पाणिग्रह-णमन्त्र... [illegible] समाप्तौ * * वृत्ताया खलु चतुर्थ्यां तथैव गोत्रादित्वगतिं स्मृतिरेव निष्पन्न ॥

गो० गृ० सू० २, ५, १. अथातश्चतुर्थी कर्म ॥
भाष्यं ॥ विवाहे चैव निर्वृत्ते चतुर्थेऽहनि रात्रिषु ।
एकत्वमागता भर्तुः पिण्डे गोत्रे च सूतके ॥
चतुर्थीहोममन्त्रेण त्वङ्मांसहृदयेन्द्रियैः ।
भर्त्रा संयुज्यते पत्नी तद्गोत्रा तेन सा भवेत् ॥

लिखितसंहितायां ३७७ पत्रे यमस्मृतौ च २९. पत्रे मुंबई-मुद्रिते एवमेव ।

भवदेवभट्टमाधवाभ्यां उद्धृतो मनुः ॥
विवाहे चैव निर्वृत्ते चतुर्थेऽहनि रात्रिषु ।
एकत्वमागता भर्तुः पिण्डे गोत्रे च सूतके ॥ इति ।
एकत्वमागता भर्तुः पिण्डे गोत्रे च सूतके ।
स्वगोत्राद्भ्रश्यते नारी विवाहात्सप्तमे पदे ॥

एतेन स्त्री भर्त्रा सह व्यवायानन्तरमेव तस्य सपिण्डा सगोत्रा समूनका भवति। न तु संयोगात्पूर्वं ॥

---

८. प्रश्नः— किं तत् विवाहाख्यं कर्म. एतत् कल्कत्ता रायल् येसियाटिक् सोसैटि इति प्रसिद्धसभया प्रसिद्धीकृत अग्नि-पुराणे स्मृतिषु च कथं वर्णित तद्वदत ?

उत्तरं— १. मन्नार० कृष्णाचार्याः ॥

कन्यादानं शचीयागः कन्याप्राप्तिश्चतुर्थिका ।

इत्येतत्कर्मचतुष्टय विवाहाख्य कर्म । अत्र प्रमाणं ॥

कन्यादान शचीयागः विवाहोथ चतुर्थिका ।

विवाहमेतत्कथित नाम कर्म चतुष्टय ॥ इति ॥

२. म० रामचन्द्राचार्याः ॥

कन्यादानं शचीयागः विवाहोथ चतुर्थिका ।

विवाहमेतत्कथितं नाम कर्म चतुष्टयमिति ॥

३. कु० श्यामाचार्याः ॥ अग्निपुराणरीत्या कन्यादान शचीयागः चतुर्थीकर्म विवाह इति कर्मचतुष्टयरूप ॥

स्मृतिसूत्रव्याख्यया च मन्त्रपुरस्सरकन्यास्वीकार. विवाहाख्य कर्म।

४. टोणपे शार्ङ्गपाणिआचार्याः ॥ अग्निपुराणे ॥

कन्यादानं शचीयागः विवाहोथ चतुर्थिका ।

विवाहमेतत्कथितं नाम कर्म चतुष्टय ॥

एतेन कर्म चतुष्टयात्मकं विवाहमित्युच्यते ॥ ९

कन्यायाः दक्षिणकुक्ष्यभिमर्शनं उदकाभिषेचनं कंकणमांगल्यबन्धनं अक्षतारोपणं होमः पाणिग्रहणं लाजहोमः सप्तपद्यन्तं विवाहशब्दार्थ इति ॥

एतेन चतुर्थीहोमानन्तरमेव कन्याया शाखाभेदेन भर्तृसंयोग उक्तवान् भर्तुः पिण्डे गोत्रे सूतके च कन्या एकत्वं लभते ॥

५. गोरखी शामण्णाचार्याः ॥ पुंल्लिंगविवाहशब्दार्थः अग्निपुराणे न दृश्यते ॥ नपुंसकविवाहशब्दार्थः वक्ष्यमाणकर्मसमुदायरूपो दृश्यते ॥

कन्यादानं शचीयागः विवाहोऽथ चतुर्थिका ।

विवाहमेतत्कथितं नाम कर्म चतुष्टयमित्यग्निपुराणवचनं ॥

अत्र मम किंचिद्भाति ॥ पुंल्लिंगविवाहशब्दार्थः वरसम्बन्धिविवाहसंस्कारः । कन्यादानं तु स्त्रीसंस्कारः । एतेन कन्यादानमिश्रनेनैव विवाहलाभे पुनः विवाहोक्तिरसंगतेति निरस्तं ॥ तादृशसंस्कारस्तु वरकर्तृकपाणिग्रहणं ॥

अत्र वसिष्ठः— स्त्रीपुंसयोस्तु संबन्धे वरणं प्राग्विधीयते ।

वरणाद्ग्रहणं पाणेः संस्कारो हि विलक्षणः ॥

६. यादवेन्द्राचार्याः ॥ विवाह इति पदं यदा नपुंसकलिंगं भवति । तदा प्रथमांतोपि भवति । अस्य पदस्य अर्थस्तु । नाम कर्म चतुष्टयात्मकं कर्म । तथाहि— अग्निपुराणे अ० १५४.

कन्यादानं शचीयागः विवाहोऽथ चतुर्थिका ।

विवाहमेतत्कथितं नाम कर्म चतुष्टयं ॥

---

७. प्रश्नः— विवाहमिति प्रथमांतशब्दो वर्तते वा न वा । यदि वर्तते स कुत्र उपयुक्तः । विवाहः विवाहं इति शब्दयोः अर्थभेदो वर्तते वा न वा । वर्तते चेत् कोऽयं भेदः ?

उत्तरं— १. मक्का० कृष्णाचार्याः ॥ विवाहमिति प्रथमांतशब्दो वर्तते । सः कन्यादानादिकर्मचतुष्टयसमुदायपरः ॥ विवाहः

विवाहमिति शब्दौ भिन्नार्थकौ। पुल्लिंगः एकदेशपरः अन्यः समुदायपरः ॥

२. नारवी शामण्णाचार्याः ॥

कन्यादान शचीयागो विवाहोऽथ चतुर्थिका ।
विवाहमेतत्कथितं नाम कर्म चतुष्टयं ॥

इति वचनेन विवाहमिति प्रथमातशब्दो वर्तत इति ज्ञायते ॥ सः कुत्र प्रयुक्त इति प्रश्नाशयो भासते ॥ तस्योत्तरं । विवाहमिति नपुंसकान्तशब्दः उक्तकर्मचतुष्टये प्रयुक्त इति ॥ कुत्रोपयुक्त इति प्रश्नाशयेतु शब्दस्योपयोगंतु नवयं जानीमः। अतोऽयंग्रंथः सम्यग्विचार्यः नोपेक्षणीयः ॥

विवाह. विवाहमिति पुन्नपुंसकशब्दयोरर्थभेदो वर्तते ॥ पुल्लिंगविवाहशब्दः क्रियाविशेषणवाचक ॥ नपुंसकान्तस्तु निरुक्तकर्मचतुष्टयात्मकसमुदायवाचकइति ॥

३. कृ० शामाचार्याः ॥

कन्यादान शचीयागः विवाहोऽथ चतुर्थिका ।
विवाहमेतत्कथित नाम कर्म चतुष्टयमित्यनेन प्रथमांतो वर्तते विवाहमिति ॥ अर्थभेदोपि वर्तते । पुल्लिंगविवाहशब्दः कन्यादानशचीयागरूपकर्मद्वयवाचकः ॥ नपुंसकविवाहशब्दस्तु कर्मचतुष्टयवाचकः ॥

---

१०. प्रश्नः— स्त्रीणां द्वितीयादि विवाहे वेदमन्त्र संस्कारो वर्ततेवा नवा यदि वर्तते कस्मिन् प्रकरणे?

उत्तरं— १. मन्ना० कृष्णाचार्याः ॥ मनुस्मृतौ पौनर्भवलक्षणप्रतिपादनावसरे उक्तं ।

साचेदक्षतयोनिस्स्याद्गतप्रत्यागतापि वा ।
पौनर्भवेन भर्त्रा सा पुनस्संस्कारमर्हति ॥

मन्वर्थमुक्तावलिः– सेति । सा स्त्री यद्यक्षतयोनि अन्यमाश्रयेत् । तदा तेन पौनर्भवेन भर्त्रा पुनर्विवाहाख्यं संस्कार अर्हति । इत्युक्तेः स्त्रीणां द्वितीयादिविवाहे वेदमंत्रसंस्कारो वर्तते ॥

२. एवमेव **पाण्डु० मध्वराजाचार्याः** ॥

३. **कृ० शामाचार्याः** ॥ साचेदक्षतयोनिस्स्याद्गतप्रत्यागतापि वा॥ पौनर्भवेन भर्त्रा सा पुनस्संस्कारमर्हती युक्त्या वेदमन्त्रसंस्कारोऽस्तीति मन्यते ॥

४. **टोणपं शार्ङ्गपाणि आचार्याः** ॥

चतुर्थीमध्ये ज्ञायन्ते दोषा यदि वरस्य चेत् ।
दत्तामपि पुनर्दद्यात् पिताऽन्यस्मै विदुर्बुधा ।
प्रवरैक्यादिदोषास्स्युः पतिसंगादधोऽपि च ॥
दत्तामपि हरेद्दद्यादन्यस्मै इति केचन ।

एतेन स्त्रीणा द्वितीयादिविवाहे वेदमन्त्रसंस्कारो **मनुः** अस्त्येवेति भाति ॥

साचेदक्षतयोनिस्स्याद्गतप्रत्यागतापि वा ।
पौनर्भवेन भर्त्रा सा पुनस्संस्कारमर्हति ॥

५ **तोरवी शामण्णाचार्याः** ॥ **स्त्रीणा द्वितीयादि विवाहेषु वेदमन्त्रसंस्कारो वर्तते इति ज्ञायते** ॥ मनुः ९. अ० १७६. श्लोकव्याख्यायां देवलेन तु ॥

गान्धर्वेषु विवाहेषु पुनर्वैवाहिको विधिः ।
कर्तव्यश्च त्रिभिर्वर्णैः समयेनाग्निसाक्षिकः ॥

क्षत्रियविषयमेतत् । ब्राह्मविषयेतु द्वितीयविवाहनिषेधदर्शनात्तस्य वेदमन्त्रसंस्कारो नास्तीति ज्ञायते ॥ संस्कारकौस्तुभे पत्र २७२ * * अग्निं परिगता सप्तपदं नीता * * एता. न विवाह्या ॥

बौधायनसूत्रे— अग्निं परिगता सप्तपदं नीता तां गृहीत्वा न प्रजां न धर्मं विन्देतेति । अत्रेद भाति । पुनर्विवाहमनङ्गीकुर्वतां मते पुनर्विवाहनिषेधकशास्त्रप्रामाण्यात् स्त्रीणां द्वितीयादिविवाहः वेदमन्त्र. तत्संस्कारश्च नास्ति । तदङ्गीकुर्वतां मते पुनर्विवाहविधायकशास्त्रप्रामाण्यात्तासां द्वितीयादिविवाहे वेदमन्त्रसंस्कारो वर्तते ॥ पुनरुद्वाहविधायकप्रमाणानितु त्रयोविंशतिप्रश्नोत्तरपत्रिकायां लेशतो लिखितानि ॥

६. यादवेन्द्राचार्याः ॥ मनु. अ० ९ श्लो १७६.

साचेदक्षतयोनि स्यात * * पुनस्संस्कारमर्हति ॥

अ० ८ श्लो० २२६. पाणिग्रहणिकामन्त्रा. कन्यास्वेव प्रतिष्ठिताः ॥ नाकन्यासु ॥

वसिष्ठः— अ० १७. पाणिग्रहे मृते बाला केवलं मन्त्रसंस्कृता

साच त्वक्षतयोनि स्यात्पुनस्संस्कारमर्हति ॥

नारदः— उद्वाहितापि सा कन्या नचेत्सम्प्राप्तमैथुना ।

पुनस्संस्कारमर्हेत यथा कन्या तथैव सा ॥

बौधायनः— साचेदक्षतयोनि स्यात * * पुनस्संस्कारमर्हति ॥

विष्णुः ॥ ऋतुत्रयमुपास्यैव कन्या कुर्यात्स्वयंवरं । अ० २४.

याज्ञवल्क्यः— एवमेव अ० १ -- ६४

अक्षताच क्षताचैव पुनर्भू. संस्कृतापुन । अ०२.

- -

११. प्रश्नः— वेदान्तिनः अपूर्वविधि कथं वर्णयन्ति ?

उत्तर— १. म० कृष्णाचार्याः ॥ अत्यन्ताप्राप्ते विधिः अपूर्वविधिः । तदुक्तं **न्यायामृते**— तृतीयपरिच्छेदे । विचारादि-विधिस्त्वपूर्वविधिः ब्रह्मज्ञाने वेदान्तविचारहेतुतायाः अत्यन्ताप्राप्तत्वादिति। निदिध्यासनस्य अव्यक्तस्वभावब्रह्मसाक्षात्कारहेतुता नान्यतः प्राप्तेति स तावदपूर्वविधिरिति ॥ **२.** एवमेव **कृ० शामाचार्याः ॥**

३. एवमेव **पां० मध्वराजाचार्याः ॥**

४. द्रोणपे शार्ङ्गपाणि आचार्याः ॥ प्रमाणान्तरादप्राप्तप्रापको यो विधिः सोऽपूर्वविधिः ॥ अहरहस्सन्ध्यामुपासीतेति ॥

५. तोरवी शामण्णाचार्याः ॥ प्रमाणान्तरादप्राप्तो यो विधिः स अपूर्वविधिः अहरहस्सन्ध्यामुपासीतेत्यादिविधिः प्रत्यक्षादिप्रमाणान्तरादप्राप्त इति तस्यापूर्वत्व ॥

६. यादवेन्द्राचार्याः ॥ द्वैतभाष्यकारा वा तथा टीकाकाराश्च विधित्रयलक्षणविषये किमपि नालोचन्त इति भाति । यादवेन्द्रो व्रतशास्त्रमार्गेतु अपूर्वं नियमं परिसंख्येति, अपूर्वस्तु यच्छा-स्त्रकवेद्यं यत्सदाकर्तुमशक्यमिति मत्वा कस्मिंश्चित्काले किंचित् अवश्यं कर्तव्यमेवेति विधीयते । यस्य अकरणे प्रत्यवायो वर्तते तस्य विधिः अपूर्वविधिः अथवा विधिरित्युच्यते । यथाऽहरह-स्सन्ध्यामुपासीतेति ॥

१०. प्रश्नः— वेदान्तिनः परिसंख्याविधिं कथं वर्णयन्ति ॥

उत्तरं— १. म० रामचन्द्राचार्याः ॥ अन्यनिवृत्तिफलको विधिः परिसंख्या तदुक्तं **न्यायामृते**— इतरेतु श्रुत्यादिविचारस्य आपातप्रतीतब्रह्मज्ञानद्वन्यज्ञानसाधनत्वे प्राप्तेयस्याभिधानो मात्रप इति-

यदेकस्य शेषस्य शेषिद्वयसम्बन्धप्राप्तौ शेष्यंतरानिवृत्तिफलकपरिसंख्येत्याहुः ॥

२. मन्त्रा० कृष्णाचार्याः ॥ श्रुत्यादिविचारस्याऽऽपातप्रतीतब्रह्मतदन्यज्ञानसाधनत्वे प्राप्ते इति अश्वाभिधानी मादत्त इतिवत् एकस्य शेषस्य शेषिद्वयसम्बन्धप्राप्तौ शेष्यन्तरानिवृत्तिफलकपरिसंख्येति न्यायामृतोक्तेः । एकस्य शेषस्य शेषिद्वयसम्बन्धप्राप्तौ शेष्यन्तरनिवृत्तिफलको विधिः परिसंख्याविधिः । तत्रचान्यत्रच प्राप्तौ परिसंख्या विधीयते इत्यन्यत्रच ॥ ३. एवमेव पां० मध्वराजाचार्याः ॥

४. तोरवी शामण्णाचार्याः ॥ प्रकृतोद्देश्यभिन्ने प्रकृतविधेयसंसर्गव्यवच्छेदः परिसंख्या ॥ पंच पचनखा भक्ष्या इति विधिः । प्रकृतोद्देश्यभूतपंचनखभिन्नपञ्चाद्यधिकसंख्याकपंचनखेषु प्रकृतविधेयभूतभक्ष्यत्वनिषेधबोधकपंचपदघटित इति तस्य परिसंख्यात्वं ॥

५. कृ० शामाचार्याः ॥ निषेधैकतात्पर्यको विधिः । परिसंख्या यथा । पंच पंचनखा भक्ष्याः ॥

६. यादवेन्द्राचार्याः ॥ यत्सदा त्याज्यं यद्रागतः प्राप्तं यस्य अनाचरणे प्रत्यवायो नविद्यते प्रत्युत उत्तमफलमप्यास्ति । तस्य सदा त्यागं अशक्यमिति मत्वा कदाचित् किंचित् तस्य कर्तव्यता विधानं परिसंख्येति भण्यते । यथा पच पंचनखा भक्ष्या इति ॥

---

१२. प्रश्नः— स्मृतिषु अकन्याशब्दस्य कोवा अर्थः ?

उत्तरं— १. मन्त्रा० रामचन्द्राचार्याः ॥ अकन्याशब्दो भयाहितस्त्रीपरः "कन्यायाः कनीनच" इति सूत्रव्याख्यानावसरे अनूढाया अवस्थाविशेषं इति कौमुद्युक्तेः ॥

२. टोणपे शार्ङ्गपाणिआचार्याः ॥

अकन्येति तु यः कन्या ब्रूयाद्द्वेषेण मानवः ।
स शतं प्राप्नुयाद्दण्डं तस्या दोषमदर्शयन् ॥

अकन्येति– नेयं कन्या क्षतयोनिरियमिति यो मनुष्योद्वेषेण ब्रूयात् तस्या उक्तदोषमविभावयन् पणशतं राजा दंडं प्रकल्पयेत् ॥ एतेन अकन्याशब्दस्य क्षतयोनिरित्यर्थः ॥

३. तोरवी शामण्णाचार्याः ॥ कुत्र नेतव्यमिति चिन्ता ऽविषयत्वं अकन्यात्वं ॥ वस्तुतस्तु लुप्तधर्मक्रियावत्वेसति स्त्रीत्वं ॥ विवाह्यकन्यायाः अकन्यात्ववारणाय विशेषणदलं ॥ पतितादिपुरुषेऽकन्यात्ववारणाय विशेष्य ॥ स्मृत्युक्ता कन्याशब्दे स्त्रीत्वस्यापि विवक्षितत्वान्न कश्चित्क्षुद्रोपद्रवः ॥ अथवा मनुस्मृतौ १८. अष्टादशाध्याये२२५. श्लोक अकन्येतितु यः कन्यां ब्रूयाद्द्वेषेण मानवः। इति व्याख्याने नेयं कन्या क्षतयोनिरिय इति अकन्याशब्दार्थदर्शनादकन्याशब्दस्य क्षतयोनिः पुरुषभुक्तस्त्रीति अर्थो ज्ञायते ॥

४. यादवेन्द्राचार्याः ॥ भर्तुः अन्यस्य संगदोषात् क्षतयोनित्वं प्राप्ता स्त्री अकन्येति बोध्यते ॥

मनुः– ८. अकन्येति तु यः कन्यां ब्रूयाद्द्वेषेण मानवः ।
स शतं प्राप्नुयाद्दण्डं तस्या दोषं अदर्शयन् ॥ २२५.

कुल्लूकः– नेयं कन्या क्षतयोनिः इयं इति यो ब्रूयात् ॥

श्रीनन्दनः– अकन्या क्षतयोनिः ॥

भारते आदिपर्वणि अ० १११.

"प्रदाय तस्यै कन्यात्वं पुनः स परमद्युतिः" ॥

भागवते– नवमस्कन्धे अ० २४.

"योनिर्यथा न दुष्येत कर्ताहं ते सुमध्यमे" ॥

श्रीधरः— कन्याहमितिचेत्तत्राह—यथा योनिः न दुष्येत तथाहं कर्ता करिष्यामि ॥

---

१५. प्रश्नः— विवाहात् पूर्वं वरस्य पुंस्त्वपरिक्षा स्मृत्यनुसारेण कर्तव्या वा नवा । यदि कर्तव्या सा कासु स्मृतिषु वर्तते ?

उत्तरं— १. म० रामचन्द्राचार्याः ॥

यस्याप्सु प्लवते बीजं ह्लादिमूत्रंच फेनिलं ।
पुमान्स्याल्लक्षणैरेतैः विपरीतस्तु षण्डकः ॥

२. म० कृष्णाचार्याः ॥ बन्धुशीललक्षणसंपन्नः श्रुतवानरोग इति आपस्तंब गृह्यसूत्रात् वरपरीक्षा कर्तव्या ॥

यस्याप्सु प्लवते बीजं ह्लादिमूत्रं च फेनिलं ।
पुमान्स्याल्लक्षणैरेतैः विपरीतस्तु षण्डकः ॥
चतुर्दशविधः शास्त्रे षण्डो दृष्टो मनीषिभिः ।
इति नारदवचनं ॥

३. टोणपे शार्ङ्गपाणिआचार्याः ॥ याज्ञवल्क्यस्मृतौ आचारकाण्डे। एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियो वरः ।

यत्नात्परीक्षितः पुंस्त्वे युवा धीमान्जनप्रियः ॥

परीक्षोपायस्तु नारदेनोक्तः—

यस्याप्सु प्लवते बीजं ह्लादिमूत्रं च फेनिलं ।
पुमान्स्याल्लक्षणैरेतैः विपरीतैस्तु षण्डकः ॥

एतेन वरस्य पुंस्त्वपरीक्षाकर्तव्येति ॥

४. खोरवी वामनाचार्याः ॥ पराशरमाधवीये यमस्मृतिः—

कुलंच शीलंच वपुर्वयश्च विद्याश्च वित्तंच सनाथतां च ।
एतान्गुणान्सप्तपरीक्ष्य देया कन्या बुधैःशेषमचिन्तनीयं ॥

याज्ञवल्क्यः– यत्नात्परीक्षितः पुंस्त्वे युवा धीमान्जनप्रियः॥ पत्रं ४७९
बृहत्पराशरसंहितायां अ० ४ पत्रं ११७.

जात्यादिगुणयुक्ताय पुंस्त्वे माने वराय च ।
कन्यामलंकृत्य दद्यात विवाहो वेधसस्तु ॥

एतेन वरस्य पुंस्त्वादिपरीक्षा कर्त्तव्यैवेतिज्ञापने ॥

५. कृ० शामाचार्याः॥ बन्धुशीललक्षणसंपन्नः श्रुतवानरोग इति आपस्तम्बसूत्रात् । यत्नात्परीक्षितः पुंस्त्वे युवा धीमान् जनप्रिय इति स्मृत्या च पुंस्त्वपरीक्षावश्यकी ॥

६. एवमेव पां० मध्वराजाचार्याः ॥

७. यादवेन्द्राचार्याः ॥
याज्ञवल्क्यः– अ० १. एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियो वरः ।
यत्नात्परीक्षितः पुंस्त्वे युवा धीमान् जनप्रियः ॥
नारदः—यस्याप्सु प्लवते बीजं ह्लादिमूत्रंच फेनिलं ।
पुमान्स्याल्लक्षणैरेतैः विपरीतैस्तु षण्डकः ॥

---

१५. प्रश्नः— आश्वलायनगृह्यसूत्ररीत्या कन्यायाः पितृगृहे प्रथमदिनकर्तव्यविवाहानन्तरं दंपती निवस्तुं योग्यौवा नवा ?

उत्तरं— १. म० कृष्णाचार्याः॥ दंपती पितृगृहे निवस्तुं योग्यौ न भवतः प्रमाणं उपपद्यमानं सूत्रात्वेतां नयतु इत्यग्नीति यानमारोहयेदित्यादिना पतिगृहगमने प्रयाणकथनात् गृहप्रवेशनीयहोमार्थं आश्वलायनसूत्रे

२. एवमेव पां० मध्वराजाचार्याः ॥

३. म० रामचन्द्राचार्याः ॥ नेतुं कन्यकामपि [illegible]–

४. टोळपे शास्त्राणिआचार्याः ॥ आश्वलायनस्मृतौ--विवाहप्रकरणे श्लोके १३. दंपतीनियमेनैव ब्रह्मचर्यव्रतेनतु ।

वैवाहिकगृहे चैव न वसेतां चतुर्दिनं ॥

भोजनं शयनं स्नानं तथैकत्रोपवेशनं ।

गृहप्रवेशपर्यन्तं दंपती मुनयो विदु. ॥

गृह्यसूत्रमन्त्रे-- इह प्रियं प्रजयाते समृध्यतामिति गृहं प्रवेशयेत् अनया वधू गृहं प्रवेशयेत् ॥ इदमाद्यो विधयः स्वग्रामेऽपि विवाहे भवन्ति ॥

आपस्तंबसूत्रे- द्वितीयपटले ८९ पत्रे. ६ सूत्रे. गृहानुत्तरयासंकाशयति वरः स्वगृहान् ज्ञाति धनसंयुक्तान् वधूं दर्शयति पूर्वोक्तस्मृतिसूत्रसद्भावात पितृगृहे दंपती निवस्तुं न योग्यावितिभाति ॥

५. तांरवी शामण्णाचार्याः ॥ सू० ब्राह्मण्याश्च वृद्धायाः जीवपत्न्याः अगार एतां रात्रिं वसेत् ॥

भाष्यं ॥ ग्रामान्तरगमने यद्यन्तरावसतिः स्यात् तदा एवगुणयुक्तायाः ब्राह्मण्याः गृहे अनन्तरां रात्रिं वसेत् । वसतिं कुर्यादित्यर्थ. । स्वग्रामे विवाहश्चेत् नायं विधिः । एतेन ज्ञायते । दंपती एकस्मिन् गृहे निवस्तुं योग्याविति ॥

६. कू० शामाचार्याः ॥ ब्राह्मण्याश्च वृद्धायाः जीवपत्न्या जीवप्रजायाः अगार एतां रात्रिं वसेत इति सूत्रेण प्रथमदिनकर्तव्यविवाहोत्तरं कन्यापितृगृहे दंपती निवस्तुं न योग्यौ ॥

७. वादवेन्द्राचार्याः। न योग्यौ । तथाहि–ऋग्वेदे १०.८५.२६.

सायणः— विवाहानन्तरभाविनि प्रयाणे पूषात्वेतो नयत्वित्यनया यानमारोहयेत् । सूत्रितं च– आश्व० गृ० सू० १. ८. १.

पूषात्वेतो नयतु हस्तगृह्याश्विनात्वाप्रवहतां रथेन । गृहान्गच्छ गृहपत्नी यथासो वशिनीत्वं विदथमावदासि ॥

सायनः— गृहान् भर्तृसम्बन्धिनो गच्छत्वं । गृहपत्नी यथासो यथासि स्वगृहस्वामिनी भवसि । वशिनी सर्वेषां गृहागतानां वशे प्रापयित्री पत्युर्वंशे वर्तमानाया विदथं पतिग्रहमाचारं आवदसि गृहस्थेन भर्त्रादिजनं आवद ॥

आश्व० गृ० सू० १. ८. १.

प्रयाण उपपद्यमाने पूषात्वेतो नयतु हस्तगृह्येति यानमारोहयेत् ।

भाष्यं— विवाहहोमानन्तरं स्वगृहं गन्तव्यं ॥

१६. प्रश्नः— अर्जुन विधवापाणिग्रहणं कृतवान्वा नवा । यदि अकरोत् तर्हि कुत्र कस्मिन्प्रकरणे एतदुक्तं ?

उत्तरं— १. महा० रामचन्द्राचार्याः ॥

अर्जुनस्यात्मजः श्रीमानिरावान्नाम वीर्यवान् ।

सुतायां नागराजस्य जातः पार्थेन धीमता ॥

ऐरावतेन सा दत्ता ह्यनपत्या महात्मना ।

पत्यौ हते सुपर्णेन कृपणा दीनचेतना ॥

भार्यार्थं तां च जग्राह पार्थः कामवशानुगामिति भारतभीष्मपर्ववचनादर्जुन विधवापाणिग्रहणमकरोत् ॥

२. महा० कृष्णाचार्याः ॥ * * *

किंच तस्याः पिता गरुडेनाक्रान्ताः पुत्रार्थं चोदयामास पार्थं ।

पुनः पुनर्याच्यमानस्तु पार्थः पुत्रार्थमस्या भुजगेन तस्यां ॥

उत्पादयामास सुतं कुमारं नाम्नेरावन्तं वरुणावेशयुक्तमिति

नान्यर्थविर्णयं ॥ एवं च अर्जुनपरिगृहीतत्वे विधवात्वं नास्ति । कालान्तरेण तस्याः विधवात्वं वर्तते । अतः न कृतवानिति ।

३, तोरवी शामण्णाचार्याः ॥ अर्जुनः विधवापाणिग्रहणं न कृतवान् ॥ किंतु कामपूर्तिं पुत्रोत्पत्तिं च कृतवानिति ज्ञायते। तदुक्तं श्रीमन्महाभारततात्पर्यनिर्णये— २० अध्याये. १५६ पत्रे. १५७ श्लोकयोः।

तस्याः पिता गरुडेनात्तपन्याः पुत्राकांक्षी चोदयामास पार्थं।
पुनःपुनः याचमानस्स पार्थः पुत्रार्थमस्याः भुजगेन तासां ॥
उत्पादयामास सुत कुजांशं नाम्नेरावंतं वरुणावेशयुक्तं ॥

भारते— आदिपर्वण्यपि २१५ अध्याये एवमेवोक्तं न तु पाणिग्रहणविषये निरवकाशप्रमाणमुक्तं ॥

४. कू० शामाचार्याः ॥ अर्जुनः विधवापाणिग्रहणं न कृतवान् किंतु नागवधू पित्रा नागवध्वाः पुत्रार्थं याचितत्वात्पुत्रोत्पादनं कृतवान् न तु पाणिग्रहणरूपविवाह। अत्र प्रमाणं तात्पर्यनिर्णये—
तस्याः पिता गरुडेनात्तपत्या इत्यादि०

५. टोणपे शार्ङ्गपाणि आचार्याः ॥ भारते आदिपर्व० अध्याये २१४. साह शरणमभ्येमि रौरवींमच दुःखिता।
याचे त्वां चाभिकामाहं तस्मात्कुरु मम प्रियं ॥
सत्वमात्मप्रदानेन सकामा कर्तुमर्हसि।
एवमुक्तस्तु कौंतेयः पन्नगेश्वरकन्यया ॥
कृतवान् तत्तथा सर्वं धर्ममुद्दिश्य कारणं।
सनागभवने रात्रिं तामुषित्वा प्रतापवान् ॥
उदितेऽभ्युत्थितः सूर्ये कौरव्यस्य निवेशनात्।
आगतस्तु पुनस्तत्र गंगाद्वारं तया सह ॥
परित्यज्य गता साध्वी उलूपी निजमन्दिरं।
उलूप्या प्रार्थितः अर्जुनः तया सह एकां रात्रिं उषित्वा ययौ।

एतेन अर्जुनः पाणिग्रहणं न कृतवानिति भाति । अत्र अन्यत्प्रमाणं तात्पर्यनिर्णये–

तस्याः पिता गरुडेनात्तपत्न्याः पुत्राकांक्षी चोदयामास पार्थं ।
संवत्सरं ब्रह्मचर्ये तु पार्थः कृष्णाहेतोस्समये साधुकर्त्रे ॥

६. पां० मध्वराजाचार्याः ॥

अर्जुनस्यात्मज. श्रीमानिरावान्नाम नामतः ।
सुतायां नागराजस्य जातः पार्थेन धीमता ॥
ऐरावतेन दत्ता सा ह्यनपत्या महात्मना ।
पत्या हते सुपर्णेन कृपणा दीनचेतना ॥
भार्यार्थं तांच जग्राह पार्थः कामवशानुगां । भारत भीष्मपर्व ९०

७. यादवेन्द्राचार्याः ॥ अर्जुनः एकां विधवां पत्नीत्वेन स्वीचकार तयोः पुत्रः बभ्रुवाहनः अर्जुनस्य औरसपुत्रत्वेन व्यासेन वर्णितः ॥ भारते भीष्मपर्वणि अ० ९०.

अर्जुनस्यात्मजः श्रीमानिरावान्नाम नामतः ।
सुतायां नागराजस्य जातः पार्थेन धीमता ॥ ७ ॥
ऐरावतेन सा दत्ता ह्यनपत्या महात्मना ।
पत्यौ हते सुपर्णेन कृपणा दीनचेतना ॥ ८ ॥
भार्यार्थं तांच जग्राह पार्थः कामवशानुगां ॥ ९ ॥
प्रययौ सिंहनादेन यत्रार्जुनसुतो युवा ॥ ९२ ॥
अर्जुनस्य सुतं वीरमिरावन्तं यशस्विनं ॥ ७० ॥
तस्मिंस्तु निहते वीरे राक्षसेनार्जुनात्मजे ॥ ७८ ॥
अज्ञानन्नर्जुनश्चापि निहतं पुत्रमौरसं ॥ ८२ ॥

भारततात्पर्यनिर्णये अ० २०– १९९.

कुर्वन् स्नानं मायया नागकन्या हृतो लोके सुन्दरनाम्नी अनेन ॥
तस्याः पितेत्यादि ॥

१७. प्रश्नः— स्त्री पुनर्भूः भवतीति ज्योतिश्शास्त्ररीत्या जातकपरीक्षया ज्ञातुं शक्यात्वा नवा । अस्य शास्त्रस्य पङ्क्तिं भाष्येण सह वदत ?

उत्तरं— १. म० कृष्णाचार्याः ॥

दुष्टा पुनर्भूः सुगुणा कलाज्ञा ख्याता गुणैश्चासुरपूजितर्क्षे ।
स्यात्कापटी क्लीबसमा सती च बौधे गुणाढ्या प्रविकीर्णकामा ॥ १

अथ बुधशुक्रक्षेत्रयोः अन्यतमे लग्नगे चन्द्रगेवा कुजादित्रिंशांशकजातायाः स्वरूपं इन्द्रवज्रया आह दुष्टेति ॥ अंशकेषु वक्रार्किजीवेन्दुजभार्गवानामिति सर्वत्र अनुवर्तते । असुरपूजितः शुक्रः तस्यर्क्षे वृषतुलयोरन्यतमे लग्नगे चन्द्रगेवा कुजादित्रिंशांशके जाता दुष्टा दुःशीला भवति ॥ शनित्रिंशांशके जाता पुनर्भूः पाणिग्रहणानन्तरं पुनरन्यस्य भार्या भवति जीवत्रिंशांशके जाता सुगुणा गुणवती भवति । बुधत्रिंशांशके जाता कलाज्ञा गीतवाद्यनृत्तचित्रादिषु कुशला भवति ॥ शुक्रत्रिंशांशके जाता गुणैःशीलादिभिः ख्याताभवति स्यात्कापटीत्यादि ॥ १ ॥

भौमेर्किभवाऽस्तराशिसहितैर्मिश्रैः पुनर्भू र्भवेत्
क्रूरे हीनबलेऽस्तगे स्वपतिना सौम्ये क्षिते प्रोज्झिता ।
अन्योन्यांशगयोः सितावनिजयोः अन्यप्रसक्ताङ्गना
द्यूनेवा यदि शीतरश्मिसहितौ भर्तुस्तदानुज्ञया ॥

२. लोरची रामकृष्णाचार्याः ॥ पुनर्भूर्ज्योतिश्शास्त्रेण ज्ञातुं शक्या शनित्रिंशांशके जाता पुनर्भूः पाणिग्रहणानन्तरमन्यस्य भार्याभवति ॥

३. श्रेयपे वासुदेवशास्त्र्याचार्याः॥ बृहज्जातके स्त्रीजातकाध्याये
३ दुष्टा पुनर्भूस्सगुणा कलाज्ञा ख्याता गुणैश्चासुरपूजितर्क्षे ।
स्यात्कापटी क्लीबसमा सतीच बौधे गुणाढ्या प्रविकीर्णकामा ॥

दृष्टेति शनिर्त्रिंशांशके जाता पुनर्भूः पाणिग्रहणानंतरं अ-न्यस्य भार्या भवति । एतेन स्त्री पुनर्भूः भवतीति ज्ञातुं श-क्यते ॥

४. कृ० शामाचार्याः ॥ दुष्टा पुनर्भूरिति श्लोकव्याख्यायां शनित्रिंशांशके जाता पुनर्भूः पाणिग्रहणानन्तरं पुनरन्यस्य भार्या भवतीत्युक्त्या ज्ञातुं शक्यैव ।

५. पां० माधवराजाचार्याः ॥ दुष्टा पुनर्भूः सगुणा कलाढ्येति श्लोकव्याख्यायां शनित्रिंशांशके जाता पुनर्भूः भवति । पाणिग्रहणा-नन्तरं अन्यस्य भार्या भवति ॥

६. यादवेन्द्राचार्याः । ज्योतिषशास्त्रे कालविशेषे जाता स्त्री पुनर्भूर्भवतीत्युक्तं ॥ बृहज्जातके स्त्रीजातके श्लो० ४. दुष्टा पुनर्भूरित्यादि । विवृतौ शनित्रिंशांशके जाता पुनर्भूः ।

---

१८. प्रश्नः— श्रीवाल्मीकिरामायणस्य युद्धकाण्डस्य ४८ स-र्गस्य सप्तमश्लोकस्य व्याख्यानावसरे गोविन्दराजेन यथा व्याख्यातं । यत् उदाहृतं च तद्वदत ?

उत्तरं— १. प० कृष्णाचार्याः ॥

वैधव्यं यान्ति यैर्नार्यः अलक्षणैर्भाग्यदुर्लभाः ।

नात्मनस्तानि पश्यामि पश्यन्ती हतलक्षणा ॥ १ ॥

व्याख्यानं ॥ वैधव्यमिति भाग्यदुर्लभाः दुर्लभभाग्याः नार्यः यैरलक्षणैर्वैधव्यं यान्ति तानि लक्षणानि पश्यन्ती निरूपयन्ती नात्मनः पश्यामि ॥ कुत्रापि वैधव्यहेतुदुर्लक्षणं नपश्यामीत्यर्थः ॥ किंतु केवलं हतलक्षणा निष्फलसल्लक्षणास्मीत्यर्थः ॥ [illegible] सामुद्रिको-क्तानि ॥ तत्सर्वं उदाहृताः [illegible] ।

हत्वा बहूनपि पतीन् परप्रेष्या तथा भवेत् ॥
यस्याः कनिष्ठिका भूमिं नगच्छन्त्याः परिस्पृशेत् ।
पतिद्वयं निहंत्याद्या द्वितीया च पतित्रयं ॥
एकरोमा राजपत्नी द्विरोमातिसुखान्विता ।
त्रिरोमा रोमकूपेषु भवेद्वैधव्यदुःखभाक् ॥ इत्यादिना ॥

२. एवमेव म० रामचन्द्राचार्याः ॥

३. एवमेव टोणपे शार्ङ्गपाणिआचार्याः ॥

४. एवमेव तोरवी शामण्णाचार्याः ॥

५. एवमेव पां० मध्वराजाचार्याः ॥

६. एवमेव कू० शामाचार्याः ॥

७. यादवेन्द्राचार्याः ॥ वाल्मीकिरामायणे युद्धकाण्डे ४८ सर्गे ७ श्लो० गोविन्दराजीयव्याख्या०

परस्परं समारूढाः पादाङ्गुल्यो भवन्ति चेत् ।
हत्वा बहूनपि पतीन् परप्रेष्या तथा भवेत् ॥
यस्याः कनिष्ठिका भूमिं नगच्छन्त्याः परिस्पृशेत् ।
पतिद्वयं निहंत्याद्या द्वितीया च पतित्रयं ॥

---

१९. प्रश्नः— बौंबायि पत्तने मुद्रितस्य महाभारतस्य आदिपर्वणः १९६ अध्यायस्य २७–२९ श्लोकव्याख्याने नीलकण्ठेन किमुक्तं तद्वदत ?

उत्तरं— १. म० रामचन्द्राचार्याः ॥

२७. श्लो० एकस्य बह्व्यो विहिता महिष्यः कुरुनन्दन ।
नैकस्या बहवः पुंसः श्रूयन्ते पतयः क्वचित् ॥

नीलकण्ठः— पुंसः [illegible]

काशान्न श्रूयन्ते । तस्मान्नैका द्वौ पती विन्दत इति वेदविरुद्धं च । अविहितं निषिद्धं चैवेत्यर्थः ॥

२९. श्लो० युधिष्ठिरः— सूक्ष्मो धर्मो महाराजनास्य विद्मो वयं गतिं ॥
पूर्वेषामानुपूर्व्येण यातं वर्त्मानुयामहे ॥

व्याख्या० ॥ सूक्ष्म नैकस्यै बहवस्सहपतय इति श्रुत्या सहेति युगपद्बहुपतित्वनिषेधो विहितः नतु समयभेदेन ततश्चाप्यनिषिद्धं ॥ मात्रा समेत्य भुङ्क्तेत्याज्ञप्त च नलंघनीयं पित्रोराज्ञया निषिद्धमपि कर्तव्यं परशुरामकृतमातृवधवत् किमुता निषिद्धमिति भावः ॥ पूर्वेषां प्रचेतःप्रभृतीनां तेषांनं वर्त्म बहूनामेकपतित्वं अनुयामहे । तच्चानुपूर्व्येण नत्वक्रमेण ॥ २. एवमेव म० कृष्णाचार्याः ॥

३. एवमेव टीकापं शाङ्गपाणिआचार्याः ॥

४. एवमेव पां० मल्लराजाचार्याः ॥

५. एवमेव कृ० शामाचार्याः ॥

६. तोरवी शामण्णाचार्याः ॥ सूक्ष्मः नैकस्यै बहवः सहपतय इति श्रुत्या सहेति युगपद्बहुपतित्वनिषेधो विहितः नतु समयभेदेन ॥ ततश्चापि निषिद्धं * * * * पूर्वेषां प्रचेतः प्रभृतीनां तेषांतं वर्त्म बहूनामेकपतित्वमनुयामहे ॥ तच्चानुपूर्व्येण ॥ नत्वक्रमेण भारतभावप्रदीपे अध्याय १९५. श्लो० २९. पत्र २११ मुंबयी मुद्रितनवीनपुस्तके ।

२७. श्लोकव्याख्या वेदकर्तुः परमात्मनः सकाशान्न श्रूयन्ते ॥ तस्मान्नैका द्वौ दंपती विन्दन्तेति वेदविरुद्ध अविहितं निषिद्धं चेत्यर्थः ॥

७. यादवेन्द्राचार्याः ॥ बॊंबायिपत्तने मुद्रितस्य आदिपर्वणः १९५ अध्यायस्य २७.२९. श्लोकव्याख्याने नीलकण्ठेन उक्तं। तथाहि- "वेदकर्तुः परमात्मनस्सकाशान्न श्रूयन्ते । तस्मान्नैका द्वौ पती विन्दते इति वेदविरुद्धं च ॥ २७ ॥ नैकस्यै बहवस्सहपतय इति श्रुत्या सहेति युगपद्बहुपतित्वनिषेधो विहितः नतु समयभेदेन ॥" २९

स्त्रीणां कालभेदेन बहुपतित्वं अस्त्येव, श्रुतिस्मृतीतिहासपुराणादिभिः समयभेदेन बहुपतित्वानुज्ञानात्। ऐतरेयब्राह्मणं मानववैष्णवपराशरादिस्मृतयः भारतं भागवतादिपुराणानि अत्र प्रमाण।

८. अव० नारायणाचार्याः॥ १९६ अध्याये २३ श्लोकाः दरी दृश्यंते। तत्र २७. २९ श्लोकाविव न दृश्यंते।

---

२०. प्रश्नः— आश्वलायनगृह्यस्य १. ७. २. सूत्रस्य भाष्यं उत्धृत्य वदत ?

उत्तरं— १. टोणपे शार्ङ्गपाणिआचार्याः॥ आश्वलायनसूत्रे १. ७. २. यत्तु समानं तद्वक्ष्यामः। किमर्थमिदं।

यथा अन्यानुपदेशादेव सर्वत्र भवन्ति। पार्वणादीनि तथेदमपि स्यात्। नियमार्थं। तर्हि जनपदधर्माणां वक्ष्यमाणधर्माणांच विरोधेसति वक्ष्यमाणधर्म कुर्यात्। न जनपदादिधर्ममिति यद्वक्ष्यामः तत् सर्वत्र समानमेवेत्यर्थः। वैदेहेषु सद्य एव व्यवायो दृष्टः। गृह्येतु ब्रह्मचारिणौ त्रिरात्रमिति ब्रह्मचर्यं विहितं॥ तत्र गृह्योक्तमेव कुर्यात् न देशधर्ममिति सिद्धं॥ २. एवमेव म० कृष्णाचार्याः॥

३. एवमेव तारवी शामण्णाचार्याः॥

४. एवमेव कृ० शामाचार्याः॥

५. एवमेव पांडु० मध्वराजाचार्याः॥

६. एवमेव यादवेन्द्राचार्याः॥

---

२१. प्रश्नः— के ते शिष्टाः। वोंबाय्यां मुद्रितमत्स्यपुराणे कलकत्तामुद्रितवायुपुराणे (संपूर्णपुस्तके) अस्मिन्विषये किमुक्तं ?

उत्तरं— १. मजा० कृष्णाचार्याः॥ मत्स्यपुराणे—

मनुःसप्तर्षयश्चैव लोकसन्तानकारिण।
तिष्ठन्तीह च धर्मार्थं तान् शिष्टान् संप्रचक्षते॥

२. एवमेव कृ० शामाचार्याः॥

३. अव० नारायणाचार्याः ॥ मन्वादिस्मृत्युक्तानुष्ठातारः ।

४. टोणपे शार्ङ्गपाणिआचार्याः ॥ मत्स्यपुराणे--

मन्वंतरेषु ये शिष्टाः इह तिष्ठन्ति धार्मिकाः ।

मनुः सप्तऋषयश्चैव लोकसन्तानकारिणः ॥

तिष्ठन्तीह च धर्मार्थं तान् शिष्टान् संप्रचक्षते ।

तैः शिष्टैः चरितो धर्मः स्थाप्यते वै युगेयुगे ॥

वायुपुराणे-- मन्वादयश्च ये शिष्टाः ये मया प्रागुदीरिताः ।

तैः शिष्टैः चलितो धर्मः सम्यगेव युगेयुगे ॥

त्रयी वार्ता दण्डनीतिः इज्या वर्णाश्रमस्तथा ।

शिष्टैराचर्यते यस्मान्मनुना च पुनः पुनः ॥

५. तोरवी शामण्णाचार्याः ॥ मत्स्यपुराणे- १४४.अध्याये पत्र

५९७. एवं वै द्विविधो धर्मः शिष्टाचारः स उच्यते ।

शिषेर्धातोश्च निष्ठान्ताच्छिष्टशब्द प्रचक्षते ॥

मनुः सप्तर्षयश्चैव लोकसन्तानकारिणः ।

तिष्ठन्तीह च धर्मार्थं तान्छिष्टान्संप्रचक्षते ॥

तैः शिष्टैश्चरितो धर्मः स्थाप्यते वै युगेयुगे ।

त्रयीवार्ता दण्डनीतिः इज्यावर्णाश्रमस्तथा ।

शिष्टैराचर्यते यस्मात्पुनश्चैवमनुक्षये ॥

पूर्वैः पूर्वमतत्वाच्च शिष्टाचारस्य शाश्वतः ।

दानं सत्यं तपोऽलोभो विद्येज्या पूजनं दमः ॥

अष्टौ तानि चरित्राणि शिष्टाचारस्य लक्षणं ।

शिष्टाः यस्माच्चरंत्येनं मनुः सप्तर्षयश्चह ॥

६. यादवेन्द्राचार्याः ॥ मत्स्यपुराणे अ० १४४.

मनुःसप्तर्षयश्चैव लोकसन्तानकारिणः ।

तिष्ठन्तीहच धर्मार्थं तान्शिष्टान् संप्रचक्षते ॥

एवमेव वायुपुराणे ५९. अ० उक्तं ॥

२२. प्रश्नः— कोयं सदाचारः विष्णुपुराणरीत्या ?

उत्तरं— १. म० रामचन्द्राचार्याः ॥ विष्णुपुराणतृतीयांशे एकादशाध्याये ॥ और्वः— श्रूयतां पृथिवीपाल सदाचारस्य लक्षणं ।

सदाचारवतां पुंसां जितौ लोकावुभावपि ॥

साधवः क्षीणदोषाः स्युः सच्छब्दस्साधुवाचकः ।

तेषामाचरणं यत्तु सदाचारस्स उच्यते ॥

सप्तर्षयोऽथ मनवः प्रजानां पतयस्तथा ।

सदाचारस्य वक्तारः कर्त्तारश्च महीपते ॥

२. एवमेव म० कृष्णाचार्याः ॥

३. एवमेव टोणपे शार्ङ्गपाणिआचार्याः ॥

४. एवमेव कृ० शामाचार्याः ॥

५. एवमेव पाण्डु० मध्वराजाचार्याः ॥

६. अवधानी नारायणाचार्याः सद्भिराचरित आचारः ।

७. तोरवी शामण्णाचार्याः ॥ स्वस्ववर्णोचितधर्मेण देवताराधनं सदाचारः विष्णुपुराणे उक्त इति ज्ञायते । विष्णुपुराणे ३. अंशे ८, अध्याये । तस्मात्सदाचारवता पुरुषेण जनार्दनः ।

आराध्यते स्ववर्णोक्तधर्मानुष्ठानकारिणा ॥

८. यादवेन्द्राचार्याः ॥ विष्णुपुराणे ३. अं० ११अ० ३श्लो०

सप्तर्षयोऽथमनवः प्रजानांपतयस्तथा ।

सदाचारस्य वक्तारः कर्तारश्च महीपते ॥

---

२३. प्रश्नः— प्रमाणसमष्ट्यां स्त्रीपुनर्विवाहविषये उद्धृतानि ऋषिवाक्यानि वदत ?

उत्तरं— १. मन्नार० रामचन्द्राचार्याः ॥

भारतं— आस्थास्यति पुनर्भैमी दमयन्तीस्स्वयंवरं ।

तत्र गच्छन्ति राजानः राजपुत्राश्च सर्वशः ॥

ब्राह्मपुराणं— मृते भर्तरि या नारी त्यक्तवत्यथवा स्वयं ।
सवर्णाज्जनयेद्गर्भं भर्तुः पौनर्भवं सुतं ॥
यदि सा बालविधवा बलात्त्यक्ताथवा क्वचित् ।
यथा भूयस्तु संस्कार्या गृहीत्वा येन केनचित् ॥
नारदः— उद्वाहितापि या कन्या नचेत्संप्राप्तमैथुना ।
पुनस्संस्कारमर्हेत यथा कन्या तथैव सा ॥
वरश्चेत्कुलशीलाभ्यां न युज्येत कदाचन ।
न मंत्राः कारणं तत्र नच कन्यानृतं भवेत् ॥
कन्यैवाक्षतयोनिर्या पाणिग्रहणपूर्विका ।
पुनर्भूः प्रथमा ज्ञेया पुनस्संस्कारकर्मणि ॥
वसिष्ठः— पाणिग्रहे मृते बाला केवलं मन्त्रसंस्कृता ।
साचेदक्षतयोनिस्स्यात्पुनस्संस्कारमर्हति ॥
कुलशीलविहीनस्य षण्ढादिपतितस्य च ।
अपस्मारिविधर्मस्य रोगिणां वेषधारिणां ॥
दत्तामपि हरेत्कन्यां सगोत्रोढां तथैव च ।
कात्यायनः— सतु यद्यन्यजातीयः पतितः क्लीब एव वा ।
विकर्मस्थस्सगोत्रो वा दासो दीर्घामयोपि वा ॥
ऊढापि देया सान्यस्मै सप्रावरणभूषणा ॥
पराशरः— नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ।
पंचस्वापत्सु नारीणां पतिरन्यो विधीयते ॥
मनुः— साचेदक्षतयोनिस्स्याद्गतप्रत्यागतापि वा ।
पौनर्भवेन भर्त्रा सा पुनस्संस्कारमर्हति ॥ २. एकमेव म० [illegible]ः ॥
३. द्रौणपे धार्मपाणिभाषायाः ॥ अग्निपुराणे— नष्टे मृते प्रव्र-
जिते क्लीबे च पतिते पतौ । पंचस्वापत्सु नारीणां पतिरन्यो विधीयते ॥
वसिष्ठः— अद्भिश्च वाचा दत्तायां म्रियेताथो वरो यदि ।
नच तौ दंपती स्यातां कुमारी पितुरेव सेति ॥

अस्मिन्विषये पराशरमाधवमनुप्रभृतिस्मृतिकर्तृभिः लिखितपुनर्विवाहवाक्यानि विस्तरभिया नलिखितानि ॥

४. तोरवी शामण्णाचार्याः ॥ शातातपस्मृतिः—
वरश्चेत्कुलशीलाभ्यां न युज्येत कथंचन ।
न मन्त्राः कारणं तत्र नच कन्यानृतं भवेत् ॥
समाच्छिद्यतु तां कन्यां बलादक्षतयोनिकां ।
पुनर्गुणवते दद्यादिति शातातपो ब्रवीत् ॥

यमस्मृतिः— हीनस्य कुलशीलाभ्यां हरन्कन्यां नदोषभाक् ।
न मन्त्राः कारणं तत्र नच कन्या नृतं भवेत् ॥

कात्यायनस्मृतिः— सतु यद्यन्यजातीयः पतितः क्लीब एव वा ।
विकर्मस्थस्सगोत्रोवा दासो दीर्घामयोपिवा ॥
ऊढापि देया सान्यस्मै सप्रावरणभूषणं ॥

मनुस्मृतिः— नष्टे मृते प्रव्राजिते क्लीबे च पतिते पतौ ।
पंचस्वापत्सु नारीणां पतिरन्यो विधीयते ॥

पराशरोपि एवमेवाह— पराशरमाधवीये पत्र ४९१.

वसिष्ठः— पाणिग्रहे कृते कन्या केवलं मन्त्रसंस्कृता ।
साचेदक्षतयोनिःस्यात्पुनस्संस्कारमर्हति ॥

नारदः— उद्वाहितापि या कन्या नचेत्संप्राप्तमैथुना ।
पुनस्संस्कारमर्हेत यथा कन्या तथैव सा ॥

५. कू० श्यामाचार्याः ॥ पराशरस्मृतिमाधवव्याख्यासमुद्धृतवचनानि । शातातपस्मृतिः— वरश्चेत्कुलशीलाभ्यां न युज्येत कथंचन ।
न मन्त्राः कारणं तत्र नच कन्यानृतं भवेत् ॥
समाच्छिद्यतु तां कन्यांबलादक्षतयोनिकां ।
पुनर्गुणवते दद्यादिति शातातपोऽब्रवीत् ॥

यमः— हीनस्य कुलशीलाभ्यां हरन्कन्यां नदोषभाक् ।
न मन्त्राः कारणं तत्र नच कन्यानृतं भवेत् ॥

कात्यायनः— स तु यद्यन्यजातीयः पतितः क्लीब एव वा ।
विकर्मस्थः सगोत्रो वा दासो दीर्घामयोऽपि वा ॥
ऊढापि देया सान्यस्मै सप्रावरणभूषणा ॥

मनुः— नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ।
पंचस्वापत्सु नारीणां पतिरन्यो विधीयते ॥ **पराशरः**— एवमेव ।

६. **पां० मल्वरराजाचार्याः** ॥ **भारते**— आस्थास्यति पुनर्भैमी दमयन्तीस्वयंवरं । तत्र गच्छन्ति राजानः राजपुत्राश्च सर्वशः ॥

ब्राह्मपुराणवचनंच— मतेभर्तरि या नारी त्यक्तवत्यथवा स्वयं ।
सवर्णाज्जनयेद्धर्मे भर्तुः पौनर्भवं सुतं ॥
यदि सा चाक्षतयोनिः स्यात् बलात्त्यक्ताथवा क्वचित् ।
यथा भूयस्तु संस्कार्या गृहीत्वा येन केनचित ॥

नारदः— उद्वाहितापि या कन्या न चेत्संप्राप्तमैथुना ।
पुनः संस्कारमर्हति यथा कन्या तथैव सा ॥
कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता ।
पुनर्भूः प्रथमा प्रोक्ता पुनःसंस्कारकर्मणि ॥

७. **अवधानी नारायणाचार्याः** ॥ नष्टे मृतेत्यादिवाक्यानि ॥

८. **यादवेन्द्राचार्याः** ॥ प्रमाणममुष्मिग्रन्थं स्वतः प्रमाणत्वेन न गृह्णीमः । तथापि अस्मिन् ग्रन्थे उद्धृतानि ऋषिवाक्यानि वक्ष्यमाणानि ।

अत्रिः । नष्टेमृते प्रव्रज्यासमापन्ने व्याधिग्रस्ते च भर्तरि ।
पुनः स्त्रीणां विवाहस्स्यात् कलावपि न संशयः ॥

विश्वामित्रः । अस्पृष्टलिङ्गयोनीनां आविंशतिवयः स्त्रियाः ।
पुनर्विवाहः कर्तव्यः चतुर्षु च युगेष्वपि ॥

व्याघ्रपात् । पत्निनाशे यथा पुंसां भर्तृनाशे तथा स्त्रियः ।
पुनर्विवाहः कर्तव्यः कलावपि युगे तथा ॥ इत्यादयः ॥

२४. **प्रश्नः**— अष्टादशोपपुराणानां नामानि कस्मिन् ग्रन्थे उक्तानि । तानि वदत ?

उत्तर— १. म० कृष्णाचार्याः ॥ उपपुराणनामानि गरुडपुराणे **ब्रह्मकाण्डे** प्रथमाध्याये उक्तानि ॥ तेषां श्रवणाद्गारुडात्पादतुल्यमन्यान्याहुः उपपुराणानि विप्राः। अष्टादशान्येव नचाधिकानि।

विष्णुधर्मोत्तरंचैव तन्त्रभागवतं तथा ।
तत्वसारं नारसिंव्हं वायुप्रोक्तं तथैवच ॥
तथा हंसपुराणं च षडेतानि मुनीश्वराः ।
सात्विकान्येव मानीध्वं प्रायशो नात्रसंशयः ॥
एतेषां श्रवणादेव गारुडार्धफलं स्मृत ।
भविष्योत्तरपुराणं च बृहन्नारदमेव च ॥
यमनारदसंवादं लघुनारदमेव ।
विनायकपुराणं च बृहद्ब्रह्माण्डमेव च ॥
एतानि राजसान्याहुः श्रवणान्मुनिसत्तम ।
गरुडात्पादतुल्यं च फलं चाहुर्मनीषिणः ॥
पुराणं भागवतं शैवं नन्दिप्रोक्तं तथैवच ।
पाशुपतं रैणुकं च भैरवं च तथैवच ॥
एतानि तामसान्याहुः हरितत्वार्थवेदिनः ॥ इति ॥

२. टोणपे शार्ङ्गपाणिआचार्याः ॥ **सौरसंहितायां ४१२ पत्रे स्कान्दे च २पत्रे** । अन्यान्युपपुराणानि कथितानि महर्षिभिः ।

अष्टादशपुराणानि श्रुत्वा संक्षेपरूपतः ॥
तेषामनुक्रमं वक्ष्ये सर्वपापविशोधनं ।
आद्यं सनत्कुमारोक्तं नारसिंव्हं ततःपरं ॥
नन्दिसंज्ञं कुमारेण कथितं तदनन्तर ।
चतुर्थं शिवधर्माख्यं पुराणं नन्दिनोदितं ॥
ततो दूर्वाससा प्रोक्तं नारदीयं ततःपरं ।
कापिलं मानवं चैव तथैवोशनसेरितं ॥
ब्रह्माण्डंच तथा पुण्यं वारुणाख्यं ततःपरं ।

ततः कालीपुराणाख्यं कालकण्ठं च नामतः ॥ ततो वासिष्ठलैंगाख्यं मुमूक्षमिति चोरितं । ततः सांम्बपुराणाख्यं सावित्रमिति चेरितं ॥ पाराशर्यं च शारीर भार्गवं मुनिपुङ्गवाः । सर्वाण्युपपुराणानि शिवज्ञानपराणि वै ॥ स्कान्दमद्यापि वक्ष्यामि लक्षग्रन्थविनिर्मितं ॥

३. तारवी शामण्णाचार्याः ॥ अष्टादशोपपुराणानां नामानि वाचस्पत्ये उक्तानि ॥

४. कु० शामाचार्याः ॥ गरुडपुराणब्रह्मकाण्डे १ अ० उक्तं विष्णुधर्मोत्तरं तन्त्रभागवतं नवसारं नारसिंहं वायुप्रोक्तं हंसं भविष्योत्तरं बृहन्नारदं लघुनारदं विनायकं कालिका देवीभागवतं शैवं नन्दी पाशुपतं रेणुका भैरवमिति ॥ मत्स्यपुराणेपि ॥

५. गुवमव पां० मध्वराजाचार्याः ॥

६. अवधानी नारायणाचार्याः ॥ वैष्णवं नारदीयं चेत्यादीनि ॥

७. यादवेन्द्राचार्याः ॥ श्रीभाग० १२ स्कं ०७ अ० २२ — २४ श्लो० एवं लक्षणलक्ष्याणि पुराणानि पुराविदः । मुनयोऽष्टादशप्राहुः क्षुल्लकानि महान्ति च ॥ ब्राह्मं पाद्मं वैष्णवं च शैवं लैंगं सगारुडं । नारदीयं भागवतमाग्नेयं स्कान्दसंज्ञितं ॥ भविष्यं ब्रह्मवैवर्तं मार्कण्डेयं च वामनं । वाराहं मात्स्यं कौर्मं च ब्रह्माण्डाख्यमिति त्रिषट् ॥ मत्स्यपुराणे ५३ अ० नारसिंहं नंदिपुराणं साम्बं आदित्यं इत्यादि उपपुराणानीति उक्तानि ॥

—

४५. प्रश्नः— कस्मिन् ग्रन्थे पुराणानां सात्विकादित्वमुक्तं तेन ग्रन्थेन सम्पूर्णमाहात्म्यकेन भवितव्यं। मात्स्यस्थल माहात्म्यादिनानभाव्यं ?

उत्तरं— १. म० रामचन्द्राचार्याः ॥ शास्त्राण्यपि च सर्वाणि त्रिविधानि महामते । यानि सत्वपदं विष्णु वदंति पुरुषोत्तमं ॥ तानि शास्त्राणि सर्वाणि सात्विकानि प्रचक्षते । प्रजापतिं कश्यपं च तथा देवीं सरस्वतीं ॥ परत्वेन वदच्छास्त्रं राजसं परिचक्षते । यच्छास्त्रं

लिंगपारभ्यं वामदेवमुमापतिं ॥नम.प्रवर्त्तकं वक्ति तत्तामसमुदाहृत मिति गारुडवचनोक्तलक्षणानुसारेण पुराणानां सात्त्विकादित्वमवमेय ॥

२. म० कृष्णाचार्याः ॥ मात्स्यं कौर्मं तथा लैगं शैवं स्कान्दं तथैवच। आग्नेयं च षडेतानि तामसानि निबोधमे ॥१॥ वैष्णवं नारदीयंच तथा भागवतं शुभं । गारुडं च तथा पाद्मं वाराहं शुभदर्शने॥ सात्विकानि पुराणानि विज्ञेयानि वरानने । ब्रह्माण्ड ब्रह्मवैवर्तं मार्कण्डेयं तथैवच ॥ भविष्यद्वामनं ब्राह्मं राजसानि निबोधमे ॥३॥ इति पुराणानां सात्विकादित्व पद्मपुराणे उत्तरखण्डे उमामहेश्वरसंवादे द्विचत्वारिंशोध्याये उक्तं ॥ गरुडपुराणे ब्रह्मकाण्डे च कथितमिदं विस्तरेण ॥ ग्रन्थबाहुल्यादत्र न लिखितं ॥ सत्वाधम मत्स्यकूर्म वायु चाहुः सात्विकं मध्यमं च । विष्णोः पुराण भागवतं पुराण सत्वोत्तम गारुडं चा चार्याः इत्यादिना कथितं ॥

३. टोणपं शार्ङ्गपाणिआचार्याः ॥ पद्मपुराणे उत्तरखण्डे अ०४२. उमामहेश्वरसंवादे– वैष्णवं नारदीयंच तथा भागवतं शुभं । गारुडंच तथा पाद्मं वाराहं शुभदर्शने ॥ सात्विकानि पुराणानि विज्ञेयानि ततःपरं । ब्रह्माण्डं ब्रह्मवैवर्तं मार्कण्डेयं तथैवच॥ भविष्यद्वामनं ब्राह्मं राजसानि निबोधमे। मात्स्यं कौर्मं तथालैगं शैवं स्कान्दं तथैवच॥ आग्नेयं च षडेतानि तामसानि निबोधमे। सात्विका मोक्षदाः प्रोक्ताः राजसाः स्वर्गदाः शुभा ॥तथैव तामसादेवि निरय प्राप्तिहेतवइति॥

४. एवमेव तोरवी शामण्णाचार्याः ॥

५. कू० शामाचार्याः ॥ पाद्मोत्तरखण्डे ४२ अध्याये मात्स्यं कौर्ममित्यारभ्य सार्धश्लोकत्रयेणोक्त ॥

६. अवधानी नारायणाचार्याः ॥ पद्मपुराणादौ ॥

७. वादेन्द्राचार्याः ॥ मत्स्यपु०५३अ० सात्विकेषु पुराणेषु माहात्म्यमधिकं हरेः। राजसेषुच माहात्म्यं अधिकं ब्रह्मणो विदुः।६७।

तद्वद्भस्म माहात्म्य नामकेषु शिवस्य च । सर्वार्णेषु सरस्वत्याः पितृणां च निगद्यते ॥ ६८ ॥

२६. **प्रश्नः—** पञ्चरात्रं शैवागमः तन्त्राणिच एते श्रुतिस्मृतीतिहासपुराणानां मध्ये क अन्तर्भूतं किं प्रमाणं ?

१. **मण्डा० रामचन्द्राचार्याः** ॥ पञ्चरात्रशैवागमादीनां स्मृतावन्तर्भावः । स्मृत्यनवकाश दोष प्रसङ्ग इति सूत्र भाष्य तत्त्वप्रकाशिकयोः पञ्चरात्रस्मृतीनामिति व्यवहार प्रमाणं ॥

२. **मण्डा० कृष्णाचार्याः** ॥ पञ्चरात्रादिकं स्मृतावन्तर्भवति । तदुक्तं ब्रह्मसूत्रे । स्मृत्यनवकाश दोष प्रसङ्ग इतिचेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गादिति । पञ्चरात्रं भारतञ्च मूलरामायणं तथा । इतिहास इति प्रोक्तं । इति क्रमभाष्ये दर्शितवचनेन पञ्चरात्रस्य इतिहासत्वमपि वर्तते ।

३. **टोणपे शार्ङ्गपाणिआचार्याः** ॥ **श्रुतप्रकाशिकायां** उदाहृतश्रीकालोत्तरसंहितायां । ऋग्वेदः पूर्वदिग्भागे यजुर्वेदस्तु दक्षिणे । पश्चिमे सामवेदः स्यादाथर्वं चोत्तरे भवेत् ॥ एकायनीयशाखोत्पन्नत्वात् तत्राप्य दिक्षु च । पाठयेत् पावनात्पश्चाद्विमलस्कारमागमेन ॥

शैवागमादिकं स्मृतावन्तर्भवति ॥ अत्र प्रमाण ॥ स्मृत्यनवकाशदोषप्रसङ्ग इतिचेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गादिति ॥ सूत्रगतेच स्मृतिपदे शैवपञ्चरात्रादिस्मृतिपरतया भाष्यटीकायां व्याख्यात ॥ एवंच पञ्चरात्रस्य एकायनीयशाखा मूलकत्वात् सूत्रमूलकत्वाच्च स्मृतित्वमिति ।

४. **गोरवी शामण्णाचार्याः** ॥ पाञ्चरात्रं शैवागमः तन्त्राणिच अस्मन्मते स्मृतावेवान्तर्भवन्तीति ज्ञायते ॥ अन्यस्मृत्यनवकाशदोषप्रसङ्गादिति मध्वभाष्यं प्रमाणं ॥

५. **भवषानी नारायणाचार्याः** ॥ स्मृतिरूपाणि श्रुतिरूपाणि

२७. प्रश्नः— सात्विकादीनां मध्ये श्रीभागवतविष्णुपुराणे के अत्र किं प्रमाणं ?

उत्तरं— १. म० रामचन्द्राचार्याः ॥ पूर्वोक्तवचनेनैव भागवताविष्णुपुराणयोः सात्विकत्वं सिद्ध ।

२. म० कृष्णाचार्याः॥ कलौयुगे सर्वपुराणमध्ये त्रीण्येव मुख्यानि हरिप्रियाणि । मुख्यं पुराणं हि कलौ नृणां हि श्रेयस्करं भागवतं पुराणं ॥ पूर्वं हि सृष्टिः प्रतिपाद्यते हि यतस्ततो भागवतं परं स्मृतं ।

यस्मिन्पुराणे कथयन्ति सृष्टिं ह्यादौच विष्ण्वादिकदेवतानां ॥
ज्ञानार्थमेवं कथयन्ति विप्राः नीचोच्चरूपं ज्ञानमाहुर्महान्तः ।
तेनैव सिद्धिं प्रवदन्ति सर्वे ह्यतःपर भागवतं पुराण ॥
ततःपरं विष्णुपुराणमाहुः ततःपर गारुडसात्विकं च ।
त्रीण्येव मुख्यानि कलौ नृणां हि इति गरुडपुराणे ब्रह्मकाण्डे प्रथमाध्याये उक्तेः ॥ भागवतविष्णुपुराणे सात्विकं ।

३. तोरवी शामण्णाचार्याः ॥ भागवतविष्णुपुराणे सात्विके प्रकाशसंहितायां १परिच्छेदे ३ अध्याये । वाराहं वैष्णवं पाद्म वायुप्रोक्तं च गारुड । श्रीमद्भागवत चैव सात्विकानि विदोविदु.॥मत्स्यपुराणेपि।

४. कृ० शामाचार्याः ॥ वैष्णव नारदीयं च तथा भागवतं शुभं। गारुडंच तथा पाद्मं वाराहं शुभदर्शने । सात्विकानि पुराणानीति पाद्मो-त्तर ४२अध्या०गतश्लोकेन भागवतविष्णुपुराणे सात्विके एवेति सिद्धं।

५. एवमेव टोणपे शार्ङ्गपाणिआचार्याः ॥

६. पां० मध्वराजाचार्याः ॥ भागवतविष्णुपुराणेसात्विके एव पाद्मोत्तरखण्डे ४२ अध्याये उक्तं ॥

७. अवधानी नारायणाचार्याः ॥ भागवतविष्णुपुराणे पा-द्माद्युक्त्या सात्विके ॥

---

२८. प्रश्नः—अस्य जगतः जन्मादि यतः भवति यत् चतुर्मुख-ब्रह्माणं अजनयत् यत् तं वेदं पाठयामास तत् ब्रह्म इति कुत्र उक्तं। तत् केन नाम्ना निर्दिष्टं ?

उत्तरं— १. म० रामचन्द्राचार्याः॥ जन्माद्यस्य यत इति भागवताद्यपद्ये उक्तं सत्यं परमितिनिर्दिष्टं यथास्मिन् श्लोके चतुर्मुखब्रह्मागमजनयदितिनन्तव्यत इतिवाच्य यः ब्रह्म चतुर्मुखाख्यकार्यब्रह्माणं अजनयदिति व्याख्यानस्याप्यभिप्रेतत्वात् नच तन्निर्मूलमिति वाच्यं। यो ब्रह्माणं विदधातिपूर्वं योवै वेदांश्च प्रहिणोति तस्मा इति भागवततात्पर्योदाहृतश्रुते.॥

२. मथा० कृष्णाचार्याः॥ जन्माद्यस्य यत इति भागवते प्रथमश्लोके जगत्कारणत्वं। आद्यस्य चतुर्मुखब्रह्मणः जन्म यतो भवतीति अन्वयेन चतुर्मुखस्रष्टृत्व आदिकवये ब्रह्म तेने इति तस्य ब्रह्मोपदेष्टृत्व उक्तं। तथा जन्माद्यस्य यत इति सूत्रे च। "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मा" इति याजुषश्रुतौ—

उक्त पद्मपुराणेच कपिलो भगवानजः। प्रोवाच ब्रह्मणे विद्यां हरिस्थो बादरायणः। इति ऋग्भाष्ये। तत्सत्यनाम्नानिर्दिष्टं। सत्यं ज्ञानमनन्तं ब्रह्मेत्युक्त तदेव ब्रह्मेत्यपि सिद्ध्यति।

३. कृ० शामाचार्याः॥ भागवताद्ये श्लोके जन्माद्यस्य यत इति सूत्रे यो ब्रह्माणं विदधाति पूर्वं योवै वेदान्प्रहिणोति तस्मै इति श्रुतौ चोक्तं। ४. एवमेव अवधानी नारायणाचार्याः॥

५. पां० मध्वरामाचार्याः॥ भागवताद्यपद्ये जगत्कारणत्वं आद्यस्य ब्रह्मण. जन्म यतो भवतीत्यन्वयेनच ब्रह्मस्रष्टृत्वं आदिकवये ब्रह्म तेन इति उपदेष्टृत्व चोक्तं। जन्माद्यस्येति सूत्रेपि यो ब्रह्माणं मित्यादिश्रुतौ चोक्तं। तत् ब्रह्म सत्यं ज्ञानमित्यादिश्रुत्या ब्रह्मेति निर्दिष्टं।

६. यादवेन्द्राचार्याः॥ ऋग्वेदे १०. मं० ८२. सू० ६ ऋक् अजस्य नाभावध्येकमर्पितं यस्मिन्विश्वानि भुवनानि तस्थुः॥

श्वेताश्वतरोपनिषदि— ६ अ० यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै।तंहदेवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये।

२९. प्रश्नः—पुराणेषु व्यासवाक्यानि कानि कानि तेन उद्धृतानि?

उत्तरं— १. म० रामचन्द्राचार्याः ॥ जन्माद्यस्येत्यारभ्य श्लोकत्रयं व्यासेनोद्धृतं ॥ नैमिष इत्यादिना आख्यायिका कथनन्तु-उक्तार्थे तात्पर्यद्योतनाय । तदुक्तं भागवततात्पर्ये ॥ प्रकारान्तरेण पुरुषार्थशंका निवृत्यर्थमाख्यायिका ॥ पाद्मे च ॥ आख्यायिकाः प्रदृश्यन्ते सर्ववेदेषु सर्वशः । द्योतयन्तस्तु महता तात्पर्यं तत्रतत्र ह ॥ अलाभ. पुरुषार्थस्य प्रोक्तमर्थमृतेत्विति । गारुडे च— पुराणानां सारभूतः साक्षाद्भागवतोदितः ॥ द्वादशस्कन्धसंयुक्तः शतविच्छेदसंयुतः । ग्रन्थोऽष्टादशसाहस्रः श्रीमद्भागवताभिधः इति ॥ एवंभूत सर्वपुराणस्थितिरुक्ता ॥

२. म० कृष्णाचार्याः ॥ पुराणेषु सर्वाण्यपि व्यासवाक्यान्येव अन्यसंवादरूपेण तेनैव सर्वमप्युक्तं ॥

३. एवमेव पां० मध्वराजाचार्याः ॥

४. टोणपे शार्ङ्गपाणिआचार्याः ॥ भागवते ॥ नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः । सत्रं स्वर्गाय लोकाय सहस्रसममासत॥ भारते आदिपर्वणि अ० १९७. पुरा वै नैमिषारण्ये देवाःसत्रमुपासते ॥ १ ॥

तत्र वैवस्वतो राजन् शामित्रमकरोत्तदा ॥ प्रथमश्लोकमारभ्य चतुश्श्लोकपर्यन्तानि एवमादीनि व्यासवाक्यानि बहूनि सन्ति ॥

५. अब० नारायणाचार्याः ॥ लोमहर्षणपुत्र उग्रश्रवा इत्यादीनि निगमकल्पतरोर्गलितमित्यादीनि ॥

६. यादवेन्द्राचार्याः ॥ कस्यचित् वाक्यानीति न प्रोक्तानि यानि तानि व्यासवाक्यानि । अन्यानि तेन उद्धृतानि ।

---

३० प्रश्नः— भगवत्पूजायां किमंगि कान्यंगानि अत्र किं प्रमाणं?

उत्तरं — १. प० रामचन्द्राचार्याः ॥ कलशपीठावरणपूजा-दिकमन अभिदं चननैवेद्यादिकमगि तदुक्त तन्त्रसारव्याख्यायां कार्ये यो मोहादथवालस्यादकृत्वा देवतार्चनं । भुङ्क्ते स याति नरकं सूकरत्वञ्च गच्छति ॥ यदि विस्तरेन पूजा कर्तुं नैवाहि शक्यते । जलं दलं तुलस्याबाऽऽपि विष्णोः समर्पयेदिति आवश्यकत्वोक्त ॥

२. महा० कृष्णाचार्याः ॥ भगवत्पूजा षोडशोपचारात्मिका अंगि । पीठावरणकलशादिदेवतापूजा सर्वोनिमन्त्रस्नानजपध्यानादिक अग तदुक्तं तन्त्रसारे ॥ नत्वावाह्य हरिं चार्घ्यं पाद्यमाचमनीयकं । मधुपर्कं पुनश्चाचः स्नानं वासोविभूषण ॥ उपवीताचमनं दत्वा गन्धपुष्पं तथैव च । धूपदीपौ ततो दत्वा नैवेद्य मूलमन्त्रेन ॥ धूपदीपौ पुनर्दत्वा पुनर्नीराजनं पुनरेत् । अर्चयित्वा हरिं ध्यात्वा वंति ॥ तथा ॥ सर्वोत्तम हरिं ज्ञात्वा य एव भक्तिपूर्वकं । जपध्यानादिभिर्नित्य पूजयेत्तस्य दुर्लभानि ॥ जप दानपूजार्चादीनि य कुरुते सदा । धर्मार्थकामन्यादि । यदि विस्तरेण पूजा कर्तुं नैवाहि शक्यते । जलं दलं तुलस्याबा भक्त्या विष्णोः समर्पयेत । इति योगदीपिकावचनात् ॥ उपचारैः षोडशभिः तत्तन्मन्त्रसमर्पणं । अर्चयेत् प्रतिमा विष्णो. त्रिकालं नियमाद्व्रतः ॥ इति विष्णुरहस्ये पञ्चायतने दशमाध्याये एकादशश्लोकश्च प्रमाण ॥

३. त्र्यंबक शार्ङ्गपाणि आचार्याः ॥ भयाख्यसंहितायां नारदः श्रुतो मयाखिलं पर्व भगवद्याग उत्तमः । तस्याङ्गानि विभागेन ज्ञातुमिच्छाम्यह पुन. ॥ भगवानुवाच ॥ अन्तःकरणयागादियावदा-त्मनिवेदन । तदाद्यमंगं यागस्य तथाभिगमन भवेत् ॥ पूजनं बा-ह्यपुष्पाद्यैर्भोगैर्दद्वाविन्द्र मुने । बाह्योपचारस्ताह्याद्धि भोगसंज्ञं तु नारद । मध्वाद्येन द्ध्यात्र पूजाच पशुनासह । तत्तृतीयं हि यागाङ्गं तुर्यमन्येन पूजनं ॥ निवेदितस्य यद्दान पूर्वोक्तविधिना मुने । संप्रदानन्तु तद्दानं यागाङ्गं पंचमं स्मृत ॥ पंचाङ्गयुक्ता पूजा अङ्गी पूर्वोक्तान्यङ्गानि ॥

४. **तोरवी शामण्णाचार्याः** ॥ षोडशोपचारपूजासु एकैकः उपचारः अंगं ॥ तेषां समुदायः अंगि ॥

५. **अवधानी नारायणाचार्याः** ॥ कलशपूजनाद्यंगानि कृष्णार्पणाद्यंगीनि ॥

६. **पादवेन्द्राचार्याः** ॥ अनन्या भक्तिः अंगी । अन्यत् सर्वं अंगं । सा द्विविधा । अवतारकाले कृता परिचर्यादिः अन्यकाले भगवत्प्रतिनिधिषु कृता पूजार्चेति । प्रतिनिधयस्तु चेतनाचेतनात्मकाः तयोर्मध्ये चेतनप्रतिनिधयः उत्तमाः । तेषु कृता पूजा उत्तमा। साच सर्वभूतसुहृत्त्वरूपा । तेषु प्रियहितेहारूपा । निर्वैरत्वरूपा अनवज्ञारूपाच । तथाहि---

भागवते ३स्कं०२५अ० नयुज्यमानया भक्त्या भगवत्यखिलात्मनि।
सदृशोऽस्ति शिवः पन्था योगिनां ब्रह्मसिद्धये ॥ १९ ॥
नैकात्मतां मे स्पृहयंति केचिन्मत्पादसेवाभिरतामदीहाः ।
येऽन्योन्यतो भागवताः प्रसज्य सभाजयंते मम पौरुषाणि।३४॥
विसृज्य सर्वानन्यांश्च मामेवं विश्वतोमुखं ।
भजंत्यनन्यया भक्त्या तान्मृत्योरतिपारये ॥४०॥
२७ अ० मद्भक्तः प्रतिबुद्धार्थो मत्प्रसादेन भूयसा ।
निःश्रेयसं स्वसंस्थानं कैवल्याख्यं मदाश्रयं ॥२८॥
२९ अ० लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतं ।
अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ॥ १२ ॥
अहं सर्वेषु भूतेषु भूतात्मावस्थितस्सदा ।
तमवज्ञाय मां मर्त्यः कुरुतेर्चाविडम्बनं ॥२१॥
यो मां सर्वेषु भूतेषु सन्तमात्मानमीश्वरं ।
हित्वार्चां भजते मौढ्यात् भस्मन्येव जुहोति सः ॥ २२ ॥
द्विषतः परकाये मां मानिनो भिन्नदर्शनः ।
भूतेषु बद्धवैरस्य नमनश्शान्तिमृच्छति ॥ ॥ २३ ॥

अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयानघे ।
नैव तुष्येऽर्चितोऽर्चायां भूतग्रामावमानिनः ॥ २४ ॥

४ स्कं०, २२ अ०, शास्त्रेष्वियानेव सुनिश्चितो नृणां क्षेमस्य सम्य-
ग्विमृशेषु हेतुः। असङ्ग आत्मव्यतिरिक्त आत्मनि दृढा मतिर्ब्रह्मणि
निर्गुणे च या ॥२१॥

,, ३० अ०, अथ भव्यनपादेन्या भक्त्या पक्वगुणाशया ।
उपयास्यत मद्धाम निर्विद्यानिरयादतः ॥१८॥

,, ३१ अ०, दयया सर्वभूतेषु सन्तुष्ट्या येन केनवा ।
सर्वेन्द्रियोपशान्त्याच तुष्यत्याशु जनार्दनः ॥ १९ ॥

६ स्कं०, ३ अ०, एतावानेवलोकेऽस्मिन्पुंसां धर्मः परः स्मृतः ।
भक्तियोगो भगवति तन्नामग्रहणादिभिः ॥ २२ ॥
एतावतालमघनिर्हरणाय पुंसां संकीर्तनं भगवतो गुणकर्मनाम्नां।
विक्रुश्य पुत्रमघवान्यदजामिलोऽपि नारायणेति म्रियमाण इयाय मुक्तिं २४
एवं विमृश्य सुधियो भगवत्यनन्ते सर्वात्मना विदधते खलु भावयोगं।
ते मे न दण्डमर्हं यथ यद्यमीषां स्यात्पातकं तदपि हन्त्युरुगाय वादः २६
शृण्वतां गृणतां वीर्याण्युद्दामानि हरेर्मुहुः ।
यथा सुजातया भक्त्या शुद्धयेन्नात्मा व्रतादिभिः ॥ १२ ॥

,, १२ अ०, यस्य भक्तिर्भगवति हरौ निःश्रेयसेश्वरे ।
विक्रीडतोऽमृताम्भोधौ किंक्षुद्रैः खातकोदकैः ॥ २२ ॥

७ स्कं०, ६ अ०, तस्मात्सर्वेषु भूतेषु दयां कुरुत सौहृदं ।
आसुरं भावमुन्मुच्य यया तुष्यत्यधोक्षजः ॥ २४ ॥

,, ७ अ०, हरिस्सर्वेषुभूतेषु भगवानास्त ईश्वरः ।
इति भूतानि मनसा कामैस्तैस्साधुमानयेत् ॥३२॥
एवं हि लोकाः क्रतुभिः कृता अमी क्षयिष्णवः सातिशयानिर्मलाः।
तस्माददृष्टश्रुतदूषणं परं भक्त्यैकयेशं भजतात्मलब्धये ॥ ४० ॥
न दानं न तपो नेज्या न शौचं न व्रतानि च ।

प्रीयते मलया भक्त्या हारिरन्यद्विडंबनं ॥ ५२ ॥
ततो हरौ भगवति भक्तिं कुरुत दानवाः ।
आत्मौपम्येन सर्वत्र सर्वभूतात्मनीश्वरे ॥ ५३ ॥
एतावानेव लोकेस्मिन्पुंसः स्वर्थः परः स्मृतः ।
एकान्तभक्तिर्गोविन्दे यत्सर्वत्र तदीक्षणं ॥ ५५ ॥

,, ९ अ० मन्येधनाभिजनरूपतपःश्रुतौजस्तेजःप्रभावबलपौरुषबुद्धियोगाः।
नाराधनाय हि भवंति परस्य पुंसो भक्त्या तुतोष भगवान्गजयूथपाय ॥९॥
प्रीणंति ह्यथमां धीराः सर्वभावेन साधवः ।
श्रेयस्कामा महाभागाः सर्वासामाशिषां पतिं ॥ ५४ ॥

,, १० अ०, यत्र यत्र च मद्भक्ताः प्रशांताःसमदर्शिनः ।
साधवस्समुदाचारास्ते पूयंत्यपि कीकटाः ॥ १९ ॥
सर्वात्मना न हिंसंति भूतग्रामेषु केचन ।
उच्चावचेषु दैत्येन्द्र मद्भावेन गतस्पृहाः ॥ २० ॥

,, १४ अ०, त्रिवर्गं नातिकृच्छ्रेण भजेत गृहमेध्यपि ।
यथा देशं यथा कालं यावद्दैवोपपादितं ॥ १० ॥
ततोर्चायां हरिं केचित्संश्रद्धाय सपर्यया ।
उपासत उपास्तापि नार्थदा पुरुषद्विषा ॥ ४० ॥

,, १५ अ०, नैतादृशः परो धर्मो नृणां सद्धर्ममिच्छतां ।
न्यासो दण्डस्य भूतेषु मनोवाक्कायजस्य यः ॥ ८ ॥
प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकं ।
आवर्तेत प्रवृत्तेन निवृत्तेनाश्नुते मृतं ॥ ४७ ॥
हिंस्रं द्रव्यमयं काम्यमग्निहोत्राद्यशान्तिदं ।
दर्शश्च पौर्णमासश्च चातुर्मास्यं पशुस्सुतः ॥ ४८ ॥

९ स्कं०, ४ अ०—
यमि निर्वैरदयासाधवस्समदर्शिनः ।

वशीकुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथा ॥ ६६ ॥
मत्सेवया प्रतीतं च सालोक्यादिचतुष्टयं ।
नेच्छन्ति सेवया पूर्णाः कुतोऽन्यत्कालविद्रुतं ॥ ६७ ॥
साधवो हृदयं मह्यं साधूनां हृदयं त्वहं ।
मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपि ॥ ६८ ॥

१० स्कं०, २ अ०—
शृण्वन् गृणन् संस्मरयंश्च चिन्तयन्नामानि रूपाणि च मंगलानि ते।
क्रियासु यस्त्वच्चरणारविन्दयो राविष्टचेता न भवाय कल्पते ॥ ३७

,, ९ अ०, एवं संदर्शिताह्यंगहारिणा भृत्यवश्यता ।
स्ववशेनापि कृष्णेन यस्येदं सेश्वरं वशे ॥ १९ ॥
नायं सुखापो भगवान् देहिनां गोपिकासुतः ।
ज्ञानिनां चात्मभूतानां यथा भक्तिमतामिह ॥ २१ ॥

,, १४ अ०, समाश्रिता ये पदपल्लवप्लवं महत्पदं पुण्ययशो मुरारेः।
भवाम्बुधिर्वत्सपदं परं पदं पदं पदं यद्विपदां न तेषां ॥५८॥

,, ५१ अ०, विचरस्व महीं कामं मय्यावेशितमानसः ।
अस्त्वेवं नित्यदा तुभ्यं भक्तिर्मय्यनपायिनी ॥ ६२ ॥
क्षात्रधर्मस्थितो जन्तून्न्यवधीर्मृगयादिभिः ।
समाहितस्तत्तपसा जह्यघं मदुपाश्रितः ॥ ६३ ॥
जन्मन्यनन्तरे राजन्सर्वभूतसुहृत्तमः ।
भूत्वा द्विजवरस्त्वं वै मामुपैष्यसि केवलं ॥ ६४ ॥

११ स्कं०, १२ अ०, नरोधयति मां योगो न सांख्यं धर्म एव च।
न स्वाध्यायस्तपस्त्यागो नेष्टापूर्तं नदक्षिणा ॥ १ ॥
निरपेक्षं मुनिं शान्तं निर्वैरं समदर्शनं ।
अनुव्रजाम्यहं नित्यं पूयेयेत्यंघ्रिरेणुभिः ॥ १६ ॥
निष्किंचनामय्यनुरक्तचेतसः शान्ता महान्तोऽखिलजीववत्सलाः ।
कामैरनालब्धधियो जुषन्ति यत्तन्नैरपेक्ष्यं न विदुः सुखं मम ॥ १७ ॥

बाध्यमानोपि मद्भक्तो विषयैरजितेन्द्रियः ।
प्रायः प्रगल्भया भक्त्या विषयैर्नाभिभूयते ॥ १८ ॥
न साधयति मां योगो न सांख्यं धर्म उद्धव ।
न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता ॥ २० ॥
भक्त्याहमेकया ग्राह्यः श्रद्धयात्मा प्रियस्सतां ।
भक्तिः पुनाति मन्निष्ठा श्वपाकानपि संभवात् ॥ २१ ॥
धर्मः सत्यदयोपेतो विद्या वा तपसान्विता ।
मद्भक्त्यापेतमात्मानं न सम्यक्प्रपुनाति हि ॥ २२ ॥

,, २१ अ०, तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः ।
न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ॥ ३१ ॥

,, २६ अ०, सन्तो नपेक्षा मच्चित्ताः प्रशान्तास्समदर्शिनः ।
निर्ममा निरहङ्काराः निर्द्वन्द्वानिष्परिग्रहाः ॥ २७ ॥
भक्तिलब्धवतस्साधोः किमन्यदवशिष्यते ।
मय्यनन्तगुणेनन्त आनन्दानुभवात्मनि ॥ ३० ॥

श्रीमद्भगवद्गीतायां—

श्रद्धावान् भजते यो मां सम्युक्ततमो मतः । ६ अ०, ४८॥
अनन्यचेताः सततं यो मां स्मरति नित्यशः ॥
तस्याहं सुलभः ७ अ०, १४.
भक्त्या लभ्यस्त्वनन्यया ८ अ०, २२.
महात्मानस्तु मां ॥ भजन्त्यनन्यमनसः ९ – १३ ॥
अनन्याश्चिन्तयंतोमां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यह ९ – २२ ॥
अपिचेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः ॥ ९ – ३० ॥
न मे भक्तः प्रणश्यति ९ – ३१ ॥
तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ।

ददामि बुद्धियोगं तं येन मां उपयान्ति ते १० – १० ॥
भक्त्यात्वनन्यया शक्य अहं ११ – ५४ ॥
मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः ।
निर्वैरः सर्वभूतेषु यः समामेति पाण्डव ११ – ५५ ॥
ते प्राप्नुवन्ति मामेव सर्वभूतहितेरताः १२ – ३ ॥
मां च यो व्यभिचारेण भक्तियोगेन सेवते ।
सगुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते १४ – २६ ॥

३१. प्रश्नः— वेदेषु कानि महावाक्यानि? किंनाम महावाक्यत्वं ?

उत्तरं – १ पां० मध्वराजाचार्याः ॥ यद्ज्ञातं सत् अभिप्रेतमहाप्रयोजनहेतुः यत्प्रतिपत्त्यर्थमवान्तरवाक्यार्थप्रतिपादकं वाक्यं महावाक्यं। सत्यं ज्ञानमित्यादि । द्वासुपर्णेत्यादि च । अत्र प्रमाणं तत्त्वनिर्णयः॥

२. कृ० शामाचार्याः ॥ सत्यज्ञानादिवाक्यानि महावाक्यानीति तत्त्वनिर्णयोक्तेः । मुख्यार्थतात्पर्यकत्वं महावाक्यत्वं ॥

३. प० कृष्णाचार्याः॥ यज्ज्ञातंसत् अभिप्रेतमहाप्रयोजनहेतुः यत्प्रतिपत्त्यर्थं अवान्तरवाक्यार्थप्रतिपादनं तत्प्रतिपादकं वाक्यं महावाक्यं ॥ सत्यं ज्ञानमनन्तं ब्रह्म । यः सर्वज्ञः सर्ववित् । द्वासुपर्णेत्यादिकं च ॥ तदुक्तं तत्त्वनिर्णये ॥ सर्वज्ञं सर्वकर्तारं नारायणमनामयं । सर्वोत्तमं ज्ञापयन्ति महातात्पर्यमत्रहि ॥ सर्वेषामपि वेदाना मितिहासपुराणयोः । प्रमाणानां च सर्वेषां तदर्थं चान्यदुच्यत इति । सर्वे वेदा यत्पदमामनन्ति ॥ सर्वोत्कर्षं देवदेवस्य विष्णोः ॥ सन्तिच भेदे सर्वागमाः तथाप्यतत्परा सीति नकल्पोऽप्यात इत्यादिना ॥

४. पण्डार० रामचन्द्राचार्याः ॥ मोक्षसाधनज्ञानविषयार्थप्रतिपादकवाक्यत्वं महावाक्यत्वं ॥ सर्वज्ञं सर्वकर्तारं नारायणमनामयं । सर्वोत्तमं ज्ञापयन्ति महातात्पर्यमत्रहीति नारदीयपुराणवचनं प्रमाणं ॥

॥ श्रीः ॥

॥ श्रीलक्ष्मीनारायणो विजयते ॥

श्रीकुम्भघोणे यागशालावीथिकायां

श्रीलक्ष्मीनारायणस्य ६१ तमे आविर्भावोत्सवे

प्रातस्सायं च मिलितैर्विद्वज्जनैर्वाचित-

निर्णीतविषयको ग्रन्थः ।

अयं

कुम्भघोणे

श्रीविद्यामुद्राक्षरशालायां

मुद्रितः ।

विजयसंवत्सरे

कल्यब्दे ४९९४.

शालीवाहनशकाब्दे १८१५.

१८९३.

॥ श्रीः ॥

श्रीकुम्भघोणे यागशालावीथिकायां श्रीलक्ष्मीनारायणस्य ६३ तमे आविर्भावोत्सवे विजयश्रावणकृष्ण २ भौमवासरमारभ्य ४ गुरुवासरपर्यन्तं प्रातस्सायं च प्रवृत्तायां सभायां मिलिता विद्वज्जनाः ॥

		लौकिकाः.
मटश्रीनिवासाचार्याः.	म.रा.रा.	अय्यासामिशास्त्रिणः.
पाण्डुरङ्गी आनन्दाचार्याः.	,,	के. रंगनाथरावः.
कौल्गी व्यासराजाचार्याः.	,,	वीयल्. रामचन्द्ररावः.
यङ्कत्तूर्भूवराहाचार्याः.	,,	हरीरावः.
यङ्कत्तूररामाचार्याः.	,,	कर्नूल जयरामरावः.
नदीतीरसाम्याचार्याः.	,,	रिकार्टकेपर रंगनाथरावः.
धर्मशास्त्री रामाचार्याः.	,,	खजानजी रामचन्द्ररावः.
तोरवी शामण्णाचार्याः.	,,	वकील स्वामिनाथशास्त्रिणः
कौल्गी भीमाचार्याः.	,,	यदुनाथरावः.
स्वापे श्रीनिवासाचार्याः.		—
स्वापे वासुदेवाचार्याः.		अन्ये वक्ष्यमाणाश्च.
राघवेन्द्राचार्याः.		—
मन्नारगुडी सामीअय्यंगाराः.		
पाटराचार्य नरसिंहाचार्याः.		
स्वापे कृष्णाचार्याः.		
पाण्डुरंगी श्रीनिवासाचार्याः.		

॥ विचारिता विषयास्त्विमे ॥

---

१. प्रश्नः. का नाम जिज्ञासा? का नाम उपासना? किं नाम ध्यानं?

उत्तरं. हरिहरशास्त्रिणः—वेदान्ततात्पर्यनिर्णयानुकूलन्यायविचारात्मकचेतो वृत्तिविशेषः। जिज्ञासापदार्थः. उपासना मानसव्यापारः. ध्यानोपासनाशब्दौ एकार्थकौ.

पाहूराचार्यरंगाचार्याः— साक्षान्मोक्षोपायत्वेन विहिता उपासना ध्यानं च एकं.

तुळसी रङ्गाचार्याः—उपासनानाम ब्रह्मजिज्ञासा। "सोपासना च द्विविधा शास्त्राभ्यासस्वरूपिणी। ध्यानरूपापराचैव तदंगं धारणादिकं॥" "आत्मेत्येवोपासीत" "कं ब्रह्म खं ब्रह्म" "सर्वैश्च वेदैः परमोहि देवः जिज्ञास्योसौ"। सूत्रे जिज्ञासापदं श्रूयते ॥ तच्च ज्ञानेच्छावाचकं ॥ तदुक्तं जिज्ञासाधिकरणसुधायां ॥ ज्ञानेच्छान्तर्नीतो विचारो जिज्ञासापदेन लक्ष्यते न च लाक्षणिकपदप्रयोगे प्रयोजनाभावः ॥ निरूढलाक्षणिकत्वेन प्रयोजनानपेक्षणात् ॥ अन्यथा अथातो ब्रह्मजिज्ञासा इत्यादिप्रयोगानुपपत्तिः। न हि धर्मज्ञानं तत्र विधीयते। किं तु धर्म एव। किञ्च ज्ञानेच्छाविचाराणां परस्परहेतुहेतुमद्भावसूचनाय लाक्षणिकपदप्रयोगः। यद्वा जिज्ञासितं सुसम्पन्नमिति भागवतप्रयोगात् ॥ जिज्ञासाशब्दः विचारे रूढः न्यायमुक्तावळ्यां ॥ न्यायानुसन्धानात्मकविचारः मननापरनामकजिज्ञासा इत्युक्तं ॥ जिज्ञासा च श्रवणमननरूपा ॥

पांडुरङ्गी व्यासाचार्याः— जिज्ञासा नाम श्रवणमनननिदिध्या-

सनात्मको विचार एव. जिज्ञासाशब्दो विचारे रूढः ॥ मीमांसाशब्द-वत् ॥ ज्ञानरूपश्रवणमनननिदिध्यासनरूपत्वाज्जिज्ञासाया अपि ज्ञानरूपत्वं ॥ श्रवणं नाम उपनिषद्भाष्याद्युपदेशजन्यवाक्यार्थज्ञानं । मननं श्रुतवाक्यार्थे युक्त्यनुसन्धानं । निदिध्यासनं तद्विषयचिन्तनं । अत्र प्रमाण "श्रवणं शब्दज ज्ञान"मित्यादि । एतच्च सर्वं विवृतं मन्त्रार्थप्रकाशिकाव्याख्यायां ॥ श्रवणादिरूपा जिज्ञासा कर्तव्येति टीकोक्तिश्च ॥ उपासनानाम जिज्ञासैव । उपासनापादे उपासनानाम ब्रह्म-जिज्ञासेति टीकोक्तेः ॥ सा द्विविधा ॥ सन्ततसच्छास्त्राभ्यासरूपा ध्यानरूपा चेति ॥ ध्यानं नाम इतरतिरस्कारपूर्वकभगवद्विषयकाखण्डस्मृतिरूपं ॥ अत्र प्रमाणमनुव्याख्यान "सोपासना च द्विविधा शास्त्राभ्यासस्वरूपिणी" इत्यादि । तन्त्रसारेऽपि ॥ "द्विविधा सा च सम्प्रोक्ता विष्णु-शास्त्रावमर्शनं । एक ध्यानं हरेरन्यच्चत्वार्थज्ञानि तत्र च" इति ॥

कालेज रङ्गाचार्याः— ब्रह्मणः तत्प्राप्त्युपायस्य तत्प्राप्तेश्च स्वरूपाणां हेतुभिर्विमर्शनं (अनुमितिः) विचारः जिज्ञासा शब्दार्थः. विधिवाक्यैः श्रुतस्यार्थस्य पुनः पुनः स्मरणं उपासना. उपासनैकदेशः ध्यानं. एते शब्दाः भिन्नार्थकाः. आसीनेनैवोपासितव्यं ब्रह्म.

मीमांसकतम्माचार्याः—जिज्ञासानाम विचारः श्रवणं, उपासना जिज्ञासाशब्दौ पर्यायौ उपासनाविशेषः ध्यानम्.

सर्वेश्वरवेदव्यासाचार्याः—उपासनाविशेषभूतध्यानस्यैव आसनापेक्षा.

कल्याणिश्रीनिवासाचार्याः— जिज्ञासानाम श्रवणमनननिदिध्यासनात्मको विचार एव । जिज्ञासाशब्दो विचारे रूढः । मीमांसाशब्दवत् । ज्ञानरूपश्रवणमनननिदिध्यासनरूपत्वाद्विचारस्यापि ज्ञानरूपत्वं ॥ श्रवणं नाम उपदेशजन्यवाक्यार्थज्ञानं । मननं श्रुतवाक्यार्थेषु युक्त्यनुसन्धानं । निदिध्यासनं तद्विषयचिन्तनं । अस्मिन् विषये प्रमाणं "श्रवणं शब्दजं ज्ञानं उपपत्त्यनुचिन्तनं । मतिर्निरन्तरा चिन्ता निदिध्या-

सनमुच्यते " इति ॥ " श्रवणादिरूपा जिज्ञासा कर्तव्येति" टीकोक्तिश्च॥ उपासनानाम। सन्ततशास्त्राभ्यासरूपा ॥ ध्यानं नाम इतरतिरस्कारपूर्वकभगवद्विषयकाखण्डस्मृतिरूपं ॥ " सोपासना च द्विविधा शास्त्राभ्यासस्वरूपिणी ॥ ध्यानरूपापराचैव " इत्यनुव्याख्यानात् ॥

मन्नारगुडीगोपालाचार्याः— जिज्ञासानाम तत्वप्रकाशिकारीत्या युक्त्यनुसन्धानात्मकविचारो वा । श्रवणमनननिदिध्यासनत्रितयरूपा वा ॥ श्रवणादिरूपा जिज्ञासा कर्तव्येति टीकावाक्यस्य उभयथापि तात्पर्यचन्द्रिकायां व्याख्यानात् ॥ सुधारीत्यातु युक्त्यनुसन्धानात्मको मननापरनामको विचारो जिज्ञासा ॥ उपासना नाम श्रवणमनननिदिध्यासनरूपा ॥ ध्यानं नाम दृष्टश्रुतानुभवजनितमानसवासनामयस्य वस्तुनो मनसावलोकनं तथैव सुधायामुक्तेः ॥

मावेल्लणरङ्गनाथाचार्याः— जिज्ञासा नाम रूढ्या विचारार्था॥ एवं च विचारत्वं जिज्ञासासामान्यलक्षणं ॥ सा च त्रिविधा ॥ श्रवण मनननिदिध्यासनभेदात् ॥ औपदेशिकवाक्यजन्यं ज्ञानं श्रवणं ॥ युक्त्यनुसन्धानं मननं ॥ निदिध्यासनं ध्यानं ॥ एवं च श्रवणमनननिदिध्यासनानि जिज्ञासाशब्दार्थाभिन्नानि ॥

पेरियकोलं मध्वराचाचार्याः— जिज्ञासाशब्दो विचारे रूढः विचारो नाम श्रवणमनननिदिध्यासनरूपा उपासना ॥

कृष्णकोलगाचार्याः— जिज्ञासानाम विचारः । विचारार्थकत्वेन भागवते ९ अध्याये ४ श्लोके " जिज्ञासितं सुसम्पन्न"मिति प्रयोगात् ॥ " परिचर्याप्युपासने"ति कोशात् उपासनाशब्दस्य परिचर्यार्थः ॥ ध्यानं चाविच्छिन्नस्मृतिः ॥

कोकमीपुरार्याचार्याः—सा च जिज्ञासा द्विविधादृश्यते ॥ इच्छारूपाविचाररूपाचेति ॥ तत्राद्यासन्नसवान्तज्ञाणात्पर्यकाज्ञातुमिच्छाजिज्ञासेति इच्छारूपा भवति ॥ अन्या तु सूत्रघटिता । इच्छाया अविधेयत्वात् । एतत्त्व च श्रुत्यनुसारित्वेन श्रुतौ "तद्विजिज्ञासस्वे"ति कर्तव्यत्व-

विधानात् ॥ कृत्या श्रवणमननादिरूपविचारपरत्वमेव तस्याः युक्तमिति भाति ॥ अस्मिन्नर्थे जिज्ञासितं सुसम्पन्नमिति भागवतवचनं प्रमाणं ॥ उपासना च द्विविधा ॥ सन्ततशास्त्राभ्यासरूपा ध्यानरूपा चेति । अत्रार्थे "सोपासना च द्विविधा शास्त्राभ्यासस्वरूपिणी ॥ ध्यानरूपापरा चैवतदङ्गं धारणादिकमिति" चित्तैकाग्र्येण भगवदखण्डास्मृतिर्ध्यानमित्युच्यते । अस्मिन्नर्थे "नैरन्तर्यं मनोवृत्तेर्ध्यानमित्युच्यते बुधैरिति" नारायणतंत्रवचनं "खण्डस्मृतिनिवारणाभ्यादखण्डाध्यानमुच्यते । अप्रयत्नात्समाधिश्च दर्शनं चिरयानयेति" ब्रह्माणमुद्दिश्य विष्णुना प्रोक्तं तन्त्रसारसङ्ग्रहवचनं प्रमाणं ॥

वीराजमङ्गलं भीमाचार्याः— जिज्ञासानाम विचारः ॥ विचारार्थकत्वेन भागवते १ अध्याये ४ श्लोके जिज्ञासित सुसम्पन्नमिति प्रयोगात् "सोपासना च द्विविधा शास्त्राभ्यासस्वरूपिणी । ध्यानरूपा परा चैव" "परिचर्याप्युपासनेति" कोशात् उपासनाशब्दस्य परिचर्यार्थ ॥ ध्यानं मनोवृत्तेर्नैरन्तर्यं ॥

धर्मशास्त्री दादाचार्याः— जिज्ञासा नाम विचारात्मिका ॥ सा च ब्रह्मज्ञानाय सर्ववेदवेदानुसारिग्रन्थार्थविषया ॥ श्रवणमनननिदिध्यासनरूपा वा । सुधारीत्या वेदाद्यर्थनिर्णायकन्यायानुसन्धानापरपर्यायमननमात्ररूपा वा वक्तव्या । तत्र श्रवणं नाम उपनिषद्भाष्यादिरूपोपदेशजन्यवाक्यार्थज्ञानं । मननं तु श्रुतवाक्यार्थे युक्तिभिरनुचिन्तनं । निदिध्यासनं नाम निरन्तरं श्रुतवाक्यार्थविषयकचिन्तनं ॥ अत्र प्रमाणं ॥ "श्रवणं शब्दजं ज्ञानं उपपत्त्यनुचिन्तनं । मतिर्निरन्तराचिन्ता निदिध्यासनमुच्यते" इति ॥ न चैवं सति पूर्वोक्तजिज्ञासाशब्दार्थयोर्विरोधः स्यादिति वाच्यं ॥ श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति वाक्योक्तश्रुत्यनुसारेण त्रितयस्यापि जिज्ञासात्वं सम्भवतीत्यभिप्रायात् ॥ मननमात्रस्यैव तथात्वात् ॥ सकलजिज्ञासाशब्दस्य विचारपरत्वं कथं सम्भवतीत्याशङ्कायां "जिज्ञासितं सुसम्पन्नमपि ते महदद्भुतं" इतिभाग-

सन्ध्ये विचारेऽपि प्रयोगदर्शनात् ॥ वचनार्थस्तु सुसम्पन्नं परिपूर्णं महत् उत्तमं अद्भुतं आश्चर्यतमं च ब्रह्म ते त्वया जिज्ञासितं विचारितमिति ॥ इत्थं च जिज्ञासापदस्य विचारे रूढिरुक्ता भवति ॥ मीमांसापदवत् । तर्हि सन्मात्रत्वविधायकशास्त्रस्य कुत्रोपयोग इतिचेत् । "यत्रार्थस्य विसंवादः प्रत्यक्षेणोपलभ्यते । स्वरसंस्कारमात्रार्था तत्र व्याकरणस्मृति"रिति वचनबलात् शब्दोत्पत्त्यर्थत्वमेव । न त्वर्थज्ञापकत्वं ॥ उपासनापि जिज्ञासारूपैव ॥ सा च द्विविधा ॥ समस्तशास्त्राभ्यासरूपा, ध्यानरूपा चेति ॥ तत्र प्रमाणं "सोपासना च द्विविधा शास्त्राभ्यासस्वरूपिणी । ध्यानरूपा परा चैव तदङ्गं धारणादिकं" इति वचनं॥ ध्यानस्वरूपमप्युक्तं भवति । "नैरन्तर्यं मनोवृत्तेर्ध्यानमित्यभिधीयते" इत्यभिवचनात् ॥ एवमेव वीराजमङ्गलं कृष्णाचार्याः—

---

२. प्रश्नः. एते शब्दाः भिन्नार्थकाः उताभिन्नार्थकाः ?

उत्तरं. कल्याणी श्रीनिवासाचार्याः— एते शब्दास्सामान्यरूपेण अभिन्नार्थकाः । जिज्ञासात्वव्याप्यं उपासनात्वं । उपासनात्वव्याप्यं ध्यानं । परतन्त्रप्रभेदयोर्भावाभावयोः परतन्त्राभेदवत् । विशेषरूपेण तेषां भेदोऽस्त्येव । भावाभावयोर्विशेषरूपेण भेदवत् । तथा च विशेषरूपेण एते शब्दाः भिन्नार्थकाः । एवमेव पाण्डुरङ्गी व्यासाचार्याः.

कूटाकोळ रामाचार्याः— एते शब्दाः भिन्नार्थका एव ।

पेरियकोळं मध्वराचार्याः— उपासना जिज्ञासा एकार्थवाचिका । अत एव टीकायां । श्रवणमनननिदिध्यासनरूपा जिज्ञासैवोपासनेति । ध्यानं नाम उपासनाविशेषः । प्रमाणं "सोपासना च द्विविधा शास्त्राभ्यासस्वरूपिणी । ध्यानरूपा परा चैव तदङ्गं धारणादिकमिति"

कणियालि दादाचार्याः—जिज्ञासोपासनाशब्दयोरभिन्नार्थकत्वं । ध्यानत्वं तु भिन्नार्थकत्वं ।

मन्नारगुडी गोपालाचार्याः— जिज्ञासोपासनाशब्दाभ्यां ध्यान-
शब्दस्याभिन्नार्थकत्वमेव ! यदि जिज्ञासाशब्दो विचारार्थकः । तर्हि
जिज्ञासोपासनाशब्दयोः परस्परं भिन्नार्थकत्वमेव । यदि च श्रवणादि-
त्रितयार्थकः तदा जिज्ञासोपासनाशब्दयोरभिन्नार्थकत्वमिति व्यवस्थितविभाषा।

कोल्लगी मुगर्याचार्याः— तत्र जिज्ञासोपासने अभिन्ने । ध्या-
नस्य जिज्ञासाशब्दवाच्यत्वेऽपि व्याप्यधर्मावच्छिन्नत्वेन किञ्चिद्विशेषोऽ
स्तीति भाति ॥

माचेरूण रङ्गनाथाचार्याः— उपासना च जिज्ञासापर्याया ।
सा च द्वेधा । शास्त्राभ्यासस्वरूपिणी श्रवणमननरूपा । ध्यानरूपा चेति
एवं च श्रवणमननध्यानेषु जिज्ञासात्वं उपासनात्वं च व्यापको धर्मः ।
श्रवणादीनि व्याप्यधर्माणि तथा च जिज्ञासोपासने अभिन्ने । ध्यानं
एकदेशमिति ॥

वीराजपक्कलं कृष्णाचार्याः— जिज्ञासोपासना ध्यानशब्दानां
अभिन्नार्थकत्वम् ।

तुळसीरङ्गाचार्याः— तथा च एते भिन्नार्थका एवेति द्योत्यते।
तत्र सच्छास्त्राभ्यासरूपायाः ध्यानाङ्गत्वं ध्यानत्वं च उपासना । जि-
ज्ञासा च अन्यत् ।

अवधानी नारायणाचार्याः— जिज्ञासोपासना ध्यानमेकार्थ-
कमितीरितं । जिज्ञासा हि विचारः स्यात्स एवोपासनात्मकः । सोपा-
सना च द्विविधा शास्त्राभ्यासस्वरूपिणी । ध्यानरूपा परा चैव तदंगं
धारणादिकं । तन्त्रसारे ध्येयमेवापान्तरो भेद ईरितः ॥ श्रीमद्भागवत-
स्याद्यपद्ये यच्छान्दसं पदं । धीमहीति प्रयुक्तं तज्जिज्ञासार्थकमीरितं ।
कुर्वीतेत्येतद्वाप्यत्र समानं स्कान्दगाकरं ॥ [illegible] च [illegible]
यत्र भागवतं विदुः । अर्थोऽयं ब्रह्मसूत्राणां भारतार्थविनिर्णयः ॥ गा-
यत्री [illegible] त्रिषु स्फुटं । ध्यानं [illegible] जिज्ञासा [illegible]
[illegible] ॥ एतत्त्रयाणां [illegible] श्री[illegible] ॥ [illegible]

बद्रीमहीत्येव प्रयुक्तं ते न तस्त्रिकम् । एकार्थकं भवेदेवेत्याशयो मम वर्णितः ॥

---

१. प्रश्नः— पञ्चमीविभक्तेः कोऽर्थः ?

उत्तरम्. हरिहरशास्त्रिणः. — अपादाने पञ्चमी अपादानं जायमानस्य प्रकृतिभूतं वस्तु.

पाट्टराचार्यरङ्गाचार्याः — यतो वा इमानि भूतानि जायन्त इत्यत्र पञ्चम्याः उपादानत्वमर्थः. उपादानत्वं नाम भाव्यवस्थावतः प्रागवस्थावत्वं. कार्यावस्थावतः कारणावस्थावत्वं.

कालेम्रङ्गाचार्याः.— "अपादाने पञ्चमी" ॥ जायमानस्य प्रकृतिभूतं वस्तु अपादानं.

मीमांसकतम्माचार्याः.— "जन्माद्यस्य यतः" इत्यत्र । पञ्चम्या अपादानत्वमर्थः. अपादानत्वञ्च क्रियाजन्यविभागाश्रयत्वं ॥ क्रियोत्पन्नविभागाधिकरणत्वमित्यर्थः.

छमेरङ्गनाथाचार्याः.— "जनि कर्तुः प्रकृतिः" जायमानस्य हेतुरपादानं स्यात् । "यतो वेत्यादिषु" श्रूयमाणपञ्चमी हेतौ हेतुत्वं निमित्तोपादानसाधारणम्.

कल्याणीश्रीनिवासाचार्याः— पञ्चमीविभक्तेः अवधित्वमर्थः । हेत्वर्थः । उदाहरणं वृक्षात्पर्णं पतति । पितुः पुत्रो जातः । एवमेव पाण्डुरङ्गी व्यासाचार्याः ॥ ल्यब्लोपे निमित्ते च । अकर्तृणे च । प्रासादात्प्रेक्षते । आसनात्प्रेक्षते । इत्यपि ।

अवधानीनाराय णाचार्याः— पञ्चम्यर्थो । निमित्तत्वं हेत्वर्थोऽप्य, भिधीयते ।

कृष्णकोळम्माचार्याः— पञ्चमीविभक्तेः अपादानत्वमर्थः । जायमानस्य हेतुरपादानसंज्ञः स्यादिति वृत्तिः । अपादानत्वं च हेतुरेव । सूत्र

कारणत्रयसाधारण: । ब्रह्मण: प्रजा: प्रजायन्त इत्यत्र ब्रह्मण: प्रजोत्पत्तौ निमित्तत्वात् ब्रह्मण: अपादानसंज्ञा । एवमेव वीराजमकुलमीमाचार्या:॥

मार्चगणरङ्गनाथाचार्या:—पञ्चम्या अपादानत्वमर्थ: । अपादानत्वं नाम विश्लेषावधित्वम् । विश्लेषो नाम विभाग: । तदवधित्वं तदाश्रयत्वे सति तज्जन्यक्रियानाश्रयत्वं । यथा वृक्षात्पर्णं पततीत्यादि ॥

पारेयकांळ मञ्चरायाचार्या:— अपादानत्वं च स्वनिष्ठभेदप्रतियोगितावच्छेदकीभूतक्रियाजन्यविभागाश्रयत्वं । विश्लेषावधित्वमिति धर्मशास्त्री दादाचार्या: ॥

कांलगीमुरार्याचार्या:—निमित्तत्वमपादानत्वं च पञ्चमीविभक्त्यर्थ: । ग्रामादागच्छतीति ल्यब्लोपनिमित्तत्वदृष्टान्त । वृक्षात्पर्णं पततीति अपादानत्वदृष्टान्त. ॥

वीराजमकुलंकृष्णाचार्या:—अपादानत्व विश्लेषावधित्वम् । विश्लेषावधित्वं नाम धात्वर्थानाश्रयत्वे सति धात्वर्थजन्यविभागाश्रयत्वम् । वृक्षात्पर्णं पततीत्यत्र धात्वर्थरूपपतनानाश्रयत्वे सति धात्वर्थजन्यविभागाश्रयत्वं वृक्षे वर्तत इति लक्षणसमन्वय: ।

मन्नारगुडीगोपालाचार्या:—यतो वा इमानि भूतानीत्यत्र विश्लेषावधित्वरूपापादानत्वमेवार्थ: । "जनिकर्तु: प्रकृति"रिति सूत्रस्यापि जनिकर्तु: जायमानस्य या प्रकृति: उपादानसंसृष्ट विश्लेषेऽवधिभूतं यद्वस्त्वान्तरं तदपादानसंज्ञं भवतीति सुधायां व्याख्यानात् । अन्यत्र तु यथायथं हेतुत्वादिरूपा: अनेके अर्थास्सन्ति ॥

गुळसीरङ्गाचार्या:—पञ्चमीविभक्त्यर्थ: ॥ "ध्रुवमपायेऽपादानम् ॥" "अपादाने पञ्चमी" । अपायो विश्लेष: । वृक्षात्पर्णं पतति । ग्रामादायाति । धावतोऽश्वात्पतति । "जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्" पापाज्जुगुप्सते । पापाद्विरमते । धर्मात्प्रमाद्यति । "भीत्रार्थानां भयहेतु:" चोराद्बिभेति । चोरात्त्रायते । "वारणार्थानामीप्सित:" यवेभ्यो गां वारयति । हेतौ "जनिकर्तु: प्रकृति:" । ब्रह्मण: प्रजा: प्रजायन्ते । "भुव: प्रभ

वः" हिमवतो गङ्गा प्रभवति । प्रकाशत इत्यर्थः ॥ "ल्यब्लोपे पञ्चम्यधिकरणे च" ॥ प्रासादात्प्रेक्षते । आसनात्प्रेक्षते । आसने उपविश्य । अधिकरणे । श्वशुराज्जिह्रेति । "विभाषा गुणवचने" गुणेहेतावस्त्रीलिङ्गे पञ्चमी । जाड्याद्बद्धः ॥ "करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य" करणे स्तोकान्मुक्तः । अगुणेस्त्रियां च । धूमादग्निमान् । निमित्तपञ्चमी । एते पञ्चम्यर्थाः ॥

---

४. प्रश्नः— किं नाम उपादानत्वम् ?

उत्तरम्. हरिहरशास्त्रिणः.— उपादानत्वं द्विविधं । परिणाम्युपादानत्वं विवर्तोपादानत्वं चेति, मृत् घटस्येव ब्रह्म जगतः उपादानं न । किन्तु शुक्तिः रजतस्येव विवर्तोपादानं ॥

पाहराचार्यरङ्गाचार्याः.— उपादानत्वं परिणामित्वं, ब्रह्मपरिणामो जगत् "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादिति" सूत्रभाष्यं प्रमाणं ॥ ब्रह्मणः परिणामित्वं अस्ति ॥ अतः विकारित्वमप्यस्ति । विकारे नाम विभक्तनामरूपत्वं । ब्रह्मणः स्वरूपेण नोपादानत्वं ॥ किं तु सूक्ष्मचिदचिद्विशिष्टत्वेन ॥

कल्याणी श्रीनिवासाचार्याः— यत्कारणं कार्यात्मना परिणमते तत्कारणमुपादानमित्युच्यते ॥

मन्नारगुडी गोपालाचार्याः— धर्मिसमसत्ताकरूपान्तरापत्तिरुपादानत्वं ॥ उपादानशब्दस्य ग्रहणार्थकत्वं च वर्तते "ध्रुवमपायेऽपादाने" इत्यादिस्थले तत्र प्रयोगात् ॥

[illegible]दाचार्याः— उपादानत्वं परिणामिकारणत्वं । तन्त्वादीनां । ब्रह्मणः नास्ति । ब्रह्मणः कार्यसामान्यं प्रति निमित्तकारणत्वम् ॥

[illegible]चार्याः— उपादानत्वं नाम परिणामिकार-

नत्वं । तत्र मृदो घटो जायत इत्यत्रैव द्रष्टव्यं । उपादानशब्दस्य प्रत्याहार उपादानमिति कोशात्प्रत्याहारोऽप्येकोऽर्थः ॥ एवमेव श्रीराजमङ्गलं श्रीमाचार्याः—

मार्चेङ्गण रङ्गनाथाचार्याः— परिणामिकारणं हि उपादानं । रूपान्तरापत्तिलक्षणः विकारापरपर्यायः परिणामः । तद्वत्वं परिणामित्वम् । तच्च प्रधानाद्यचेतनस्यैव । न तु चेतनस्य ब्रह्मादेः । "अविकारस्सदाशुद्धो नित्य आत्मा सदा हरिः ॥ सदैकरूपविज्ञानक आनन्दरूपक" इति श्रुतेः ॥

कौलगी मुरार्याचार्याः— उपादानत्वं परिणामिकारणत्वं । यथा घटं प्रति मृदः ॥ एवमेव श्रीरामसङ्गलं कृष्णाचार्याः—

तुलसीरङ्गेशाचार्याः ॥ "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुरोधात्" अत्र उपादानत्वं निमित्तत्वं ॥

पाण्डुरङ्गी व्यासाचार्याः— यत्कारणं कार्यात्मना परिणमते तदुपादानमित्युच्यते । परिणामो विकारः । स च रूपान्तरप्राप्तिः । उक्तं हि न्यायामृते । "विकारवत्कारणत्वमुपादानत्वमिष्यते ।" एवमेव अबचानी नारायणाचार्याः—

---

९. प्रश्नः—यद्युपादानशब्दस्यानेकेऽर्थास्सन्ति ते के. तेषु तेषु अर्थेषु प्रेक्षावतां प्रयोगो वक्तव्यः । ?

उत्तरम्. कल्याणी श्रीनिवासाचार्याः— उपादानत्वं च आरोपाधिष्ठानत्वं रजतारोपे शुक्तिकाया इव जगदारोपे ब्रह्मणः अधिष्ठानत्वं । भ्रमविषेयत्वमिति यावत् । परिणामित्वं । उपादानत्वं वा मृदः घटस्य समवायिकारणत्वं । उपादानत्वं वा । यथा तंतवः पटस्य तत्राद्यं अद्वैतवादिनः । द्वितीयं सिद्धान्तहैतिनः । तृतीयं सांख्यकाः सिद्धान्तोऽपि कारणस्य कार्यात्मना परिणाम एवोपादानत्वम् । तत्र

प्रमाणं । "खण्डितं रूपमेवात्र विकारोऽपि विकारिणः । कार्यका-रणयोश्चैव तथैव गुणतद्वतोरिति" तत्वविवेकटीकायां । कार्यं उपादेयं पटादि । कारणं तदुपादानं तन्त्वादि । अयमेवाभिप्रायः पाण्डुरङ्गी व्यासाचार्याणां—

धर्मशास्त्री दादाचार्याः— उपादानशब्दस्य बहवोऽर्थाः । ते च परिणामिकारणत्वं विवर्तोपादानत्वं । उपपूर्वकदाधानुविवक्षया ग्रहणं चेति ॥ एवमेव वीराजमङ्कलं कृष्णाचार्याः—

मार्चेगण रघुनाथाचार्याः— उपादानशब्दस्य चत्वारोऽर्थास्स-म्भवन्ति । अनिवर्त्यवृत्तिविशेषाश्रयत्वं १. निवर्त्यविशेषाप्तिमत्त्वं २. अनिवर्त्यविशेषपरिवार्तिमत्त्वं ३. निवर्त्यधर्मिपरिवार्तिमत्त्वमिति ४. दृष्टांताः श्यामकलस्य पीतत्वं १. कुण्डलाकारस्य सुवर्णस्य कटकादित्वं २ क्षी-रस्य दधिभावः ३. शुल्वस्य तारत्व ४. चतुर्विधमुपादानत्वमपि ब्रह्म-ण. न सम्भवति । "अविकारः" इति श्रुतेः ॥

कौलगी मुरार्याचार्याः— उपादानत्वं समवायिकारणत्वं । यथा तन्तवः पटस्य ॥

अवधानी नारायणाचार्याः— मतान्तरेष्वनेकं तन्नास्माक नैव निरूप्यते ॥

---

१. प्रश्नः— तृतीयाविभक्तेः कोऽर्थः ?

उत्तरम्. हरिहरशास्त्रिणः— कर्तृकरणयोस्तृतीया, कर्तृ-करणहेत्वादिस्तृतीयार्थः. "येन जातानि जीवन्ती"त्यत्र हेतौ तृतीया. त्रिमतस्थानामपि इष्टमिदम् ।

कल्याणी श्रीनिवासाचार्याः— तृतीयाविभक्तेः कर्ता करणं हेतुः सहार्थश्च । चैत्रेण दृष्टं । बाणेन हतः । दण्डेन घटः पुत्रेण सहा-गतः पिता ॥

कूटाकोळ श्रामाचार्याः— तृतीयाविभक्तिः करणार्थका ॥ एव-मेव वीराजमङ्गलं भीमाचार्याः —

माचेङ्गण रङ्गनाथाचार्याः—तृतीयाया करणत्वमर्थः । " येन जानाति जीवन्ति" इत्यत्र कर्तृत्व चार्थः । इत्थंभूतलक्षणत्वं चार्थः ॥

धर्मशास्त्रीदादाचार्याः—"कर्तृकरणयोः कृती"ति सूत्रात्कर्तृत्वं करणत्वं चार्थ । श्रीमदाचार्येण कृतो ग्रन्थ इत्यत्र कर्तृत्वम्। श्रीमदाचार्यैः प्रमाणैर्जितो वादीत्यत्र करणत्वम् । सेनया आगतो राजेत्यत्र सहार्थत्वम् । दण्डेनोत्पन्नो घट इत्यत्र हेतुत्वं ।

मन्नागुडीगोपालाचार्याः—कर्ता करण फलं हेतुः ज्ञाप्यज्ञापक-भावः अभेद इत्येते तृतीयाविभक्त्यर्थाः ॥

वीराजमङ्गलकृष्णाचार्याः—तृतीयाया कर्तृत्वं करणत्वं सहार्थ-त्व फलार्थत्व च । रामेण बाणेन हतो वाली इत्यत्र रामेणेति कर्तरि तृतीया बाणेनेति करणे तृतीया । रामेणागतो लक्ष्मण इत्यत्र सहार्थत्वं । अध्ययनेन वास इत्यत्र फलार्थत्व । तृतीयाया दंडेन घट इत्यत्र हेत्वर्थत्वमपि ॥

कोल्गीमुरायाचार्याः—कर्तृत्व करणत्व च तृतीयाविभक्त्यर्थः । यथा रामेण बाणेन हतो वालीति ॥

पाण्डुरङ्गीव्यासाचार्याः—तृतीयाविभक्ते कर्ता करणं हेतुः फलं सहार्थश्च । देवदत्तेन भुक्त । रामेण बाणेन हतः । अध्ययनेन वसति । द-ण्डेन घट । इत्थंभूतलक्षण च जटाभिस्तापस । पुत्रेण सहागतः पिता ॥ एव-मेव परियकोळ मध्वरायाचार्याः ॥

अवधानीनारायणाचार्याः—तृतीयायाश्च हेतुत्वं ॥

तुळशी रङ्गाचार्याः — तृतीयार्थः । "कर्तृकरणयोस्तृतीया" कर्त्रर्थे करणार्थे च । रामेण बाणेन हतो वाली । "अपवर्गे तृतीया" । फलप्राप्तिः । अत्यन्तसंयोगे । अह्नाक्रोशेन वा अनुवाकोऽधीतः । "अप्रधाने" पुत्रेण सहागतः पिता । विकारार्थे । अक्ष्णा काणः । "इत्थंभूतलक्षणे" जटाभिस्तापसः । जटाज्ञाप्य तापसत्वविशिष्टः । "कृ-

ह्योऽन्यतरस्यां कर्मणि । पित्रा संजानीते । हेतौ दंडेन घटः । पु-
ण्येन दृष्टो हरिः । फलमपीह हेतुः । अध्ययनेन वसति । "अशिष्ट-
व्यवहारेदाणः प्रयोगे चतुर्थ्यर्थे तृतीया" । दास्यासंयच्छते । निमित्त
तृतीया । प्रकृते हेतुतृतीया येन जातानीत्यत्र ॥

---

७. प्रश्नः— किं नामाष्टकर्तृत्वं ?

उत्तरं. कल्याणीश्रीनिवासाचार्याः—अष्टकर्तृत्वं च अष्टकारण-
त्वं । अष्टौ तु सृष्टिस्थितिसंहारनियमनज्ञानाज्ञानबन्धमोक्षा इति । तेषामर्थः
सृष्टिः पाञ्चभौतिकदेहसम्बन्धः । लक्ष्म्यास्तु पराधीनविशेषावाप्तिः । स्थि-
तिर्देहाधिष्ठानेन वर्तनं । संहारो विनाशः । नियमनं विधिनिषेधाभ्यां बन्ध
प्रकाशः ज्ञानोत्पादनं । अज्ञानं अविद्या । बंधः लिङ्गदेहादिना बन्धः ।
मोक्षः आत्यन्तिकदुःखनिवृत्तिपूर्वकपरमानन्दाविर्भावः ॥ एवमेव पाण्डुरङ्गी
व्यासाचार्याः ॥

कूटाकोळग्रामाचार्याः —अष्टकर्तृत्वं नाम सृष्टिस्थितिलयनियमन-
ज्ञानाज्ञानबन्धमोक्षकर्तृत्वं ॥

माचेङ्गणरङ्गनाथाचार्याः—सृष्टिस्थितिसंहारनियमनज्ञानाज्ञानब-
न्धमोक्षाः अष्टौ तत्कर्तृत्वं अष्टकर्तृत्वं "उत्पत्तिस्थितिसंहारानियतिर्ज्ञानमा-
वृतिः । बन्धमोक्षौ पुरुषाद्यस्मात्स हरिरेकराट् ॥" "य उ त्रिधातु" य-
तो वा इमानि" "चतुर्भिस्साकं" "परोमात्रया" "न ते विष्णो" "योनः पि-
ता" "य आत्मानमन्तरोयमयति" "त्वं मुक्तिदो बंधदोतोमतोनस्त्वं ज्ञानदो-
ऽज्ञानदश्चासि विष्णो" इत्यादिस्मृतिश्रुतिभ्यः ॥

वर्षेरात्तिहादाचार्याः—ते चाष्टौ "उत्पत्तिस्थितिसंहारा" इत्या
दिप्रमाणप्रमिताः । तत्कर्तृत्वं च "द्रव्यं कर्म च कालश्च स्वभावो जीव एव
च । यदनुग्रहतस्सन्ति न सन्ति यदुपेक्षया ॥" इति वचनात् । एतदुपल-
क्षणं । अनादिसर्वस्यापि ग्रहणम् । तेषु तेषु स्वातन्त्र्यमेव । एवमेव वीरा
धनञ्जयं कृष्णाचार्याः ॥

मन्नारगुडी गोपालाचार्याः—सृष्टिस्थितिलयनियमन ज्ञाना-ज्ञानबन्धकर्तृत्वं अष्टकर्तृत्वं । तत्रप्रमाणं । "सृष्टिस्थितीत्यादि" माध्योदाहृतस्कान्दवचनं । एवमेव श्रीराजमन्नार्गुडि भीमाचार्याः कौलगी मुरार्याचार्याश्च

मन्नारगुडी कृष्णाचार्याः—अष्टकर्तृत्वं नाम । सृष्टिस्थितिसंहारनियमनज्ञानाज्ञानबन्धमोक्षकर्तृत्वं । कर्तृत्वञ्च उपादानापरोक्षचिकीर्षाकृतिमत्वं स्वतन्त्रत्वं वा । तत्रतत्र अनेकविधोक्तावपि सूत्रकारेणैव तत्तत्परामर्शेन स्कान्दपुराणे "सृष्टिस्थितिश्च संहारो नियतिर्ज्ञानमावृतिः । बन्धमोक्षौ च पुरुषाद्यस्मात्सहरिरेकराट्" । इति अष्टकर्तृत्वस्यैव लक्षणत्वेनोक्तत्वात्तदज्ञानस्यमोक्षहेतुत्वाच्च तदेवलक्षणं । त्रिनयोक्तौ लक्षणसिद्धावपि नियमनादीनां धर्मिभूतजगत्सम्बन्धज्ञानार्थं अष्टकोक्तिः ॥

अवधानी नारायणाचार्याः—अष्टकर्तृत्वमुच्यते । "त्वं मुक्तिदो बन्धदोऽनो मनोनन्त्वं ज्ञानदः ज्ञानदश्चासि विष्णो" । इति श्रीमद्भागवतशास्त्रप्रतीतेऽत्यादिपुष्कलं । सृष्टिस्थितिश्च संहारो नियतिर्ज्ञानमावृतिः । बन्धश्च मोक्षस्त्वेतषा कर्तृत्व ह्यष्टकर्तृता ॥

---

८. प्रश्नः— को वा बन्धः ?

उत्तरं. पाडुराचार्य श्रीनिवासाचार्याः—बन्धः कर्मजन्यसुखदुःखभाक्त्वं । न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्तीति श्रुतिः प्रमाणं ।

[illegible]चार्याः—कर्मजन्यसुखदुःखभाक्त्वं बन्धः । [illegible]

हरिहरचार्याः—[illegible]

"[illegible] बन्ध [illegible]" इति [illegible]

सुरेश्वराचार्यवार्तिकं प्रमाणं । "[illegible]

योर्भिदा । अविद्यातच्चितोर्योगः षडस्माकमनादय" अविद्याशब्दोऽज्ञानार्थः तस्या अप्यनादित्वं नाम उत्पत्तिशून्यत्वं । यथा प्रागभावः । न्यायमते प्रागभावस्यानादित्वं सिद्धं ॥

आद्य द्वैपायनाचार्याः—भूतबन्धोहि बन्धः । "भूतबन्धस्तु-संसारः मुक्तिस्तेभ्यो विमोचनमिति वाराहवचनं प्रमाणं । पञ्चभूतसम्बन्धरूःपबन्धोऽनादिः । तस्य अनादित्वे "अनादिमायया सुप्त"इति मांडूकश्रुति-प्रमाणम् ॥

कल्याणी श्रीनिवासाचार्याः—बंधोनाम ईश्वरेच्छा-अविद्या काम्यकर्म-त्रिगुणात्मकं लिंगशरीरं । मनस्स्थूलमित्यादि तदुक्तंगीतातात्पर्ये ॥ "अशरीरस्य जीवस्यशरीरोत्पत्तिकारणं ॥ ईश्वरेच्छाप्राथमिकी तां विना न हि कश्चन ॥ द्वितीया प्रकृतिः प्रोक्ता तद्रूपाहि गुणास्त्रयः ॥तेषां-संपातजो भावो ममाहमिति यामतिरित्यादि ॥ माण्डूकभाष्ये अविद्याप्रकरणे अविद्यायाः आवरणत्वमुक्तम् ॥ गीतायामपि ॥ "अज्ञानेनावृतं-ज्ञानं तेन मुह्यन्ति जन्तव" इति ॥ समयपादीयानुव्याख्यानेऽपि ॥ "अनादिकर्मणा बद्धो जीवस्संसारमण्डले ॥ वासुदेवेच्छया नित्यं भ्रमतीहेति प्रमाणानि द्रष्टव्यानि ॥ एवमेव पाण्डुरङ्गी व्यासाचार्याः

कूटाकोळशामाचार्याः—बन्धोनाम लिङ्गदेहसम्बन्धः ॥ एवमेव वीराजमङ्गलं भीमाचार्याः

मार्चेङ्गण रङ्गनाथाचार्याः—भूतबन्ध एव बन्धः । "भूतबन्धस्तु संसारो मुक्तिस्तेभ्यो विमोचन"मित्युक्तेः ॥ एवमेव मन्नारगुडी रामचन्द्राचार्याः अपमङ्गर वासुदेवाचार्याः तिरुकाम्बूर शेषगिर्याचार्याश्च

धर्मपाली दादाचार्याः—कामकर्माविद्यासत्वगुणाच्छादिकापरमाच्छादिका-लिङ्गशरीररूपजडपरमसम्बन्धरूपबन्धः । अयञ्च प्रकृतिस्थात्मसंक्लिष्टामित्यादिषु स्पष्टः । भागवततात्पर्ये १ स्कन्धे १९ अध्याये ॥ एवमेव वीराजमङ्गलं कृष्णाचार्याः ॥

मन्नारगुडी गोपालाचार्याः—बाह्यमनस्संबन्धो वा भूतसंबन्धविशेषो वा बन्धः । "मन एव मनुष्याणां" । "भूतबन्धस्तु संसारः" इत्यादि च तत्रप्रमाणं ॥

मन्नारगुडी कृष्णाचार्याः—प्रकृतिप्राकृतैस्सम्बन्धः बन्धः । प्रमाणं । "भूतबन्धस्तु संसार इत्यादि" यस्यप्रसादात्परमार्तिरूपादस्मात्संसारान्मुच्यते" इति । अनादिमायया बद्धो यदाजीवः प्रबुध्यते" इति "बन्धको भवपाशेन" इति च । इद च साक्षादर्थाद्येममर्थं वदति । अविद्याकामकर्मस्वगुणाच्छादिकापरमाच्छादिकाल्पनुष्ठप्रकृतिगुणशिक्षशरीरैस्सम्बन्धः; बन्ध इति वा ॥

कौलगीपुगर्याचार्याः—बन्धोनाम संसारः । स च पञ्चमहाभूत संबन्धरूपः । यस्तु संसारी स बद्ध इत्युच्यते । यस्तु संसारान्मुच्यते स मुक्तः अत्र "भूतबन्ध" इत्यादि वाराहोक्तिः प्रमाणं ॥

अवधानी नारायणाचार्याः—भूतबन्धस्तु बन्धस्स्यात्स्वरूपाच्छादनात्मकः ॥

तुळसी रङ्गेशाचार्याः—बन्धः भूतबन्धः । भूतबन्धस्तुसंसारः मुक्तिस्तेभ्योविमोचनं ॥ भूतानां निनिवृत्तिस्तु मरणं समुदाहृतं । भूतानां संप्रयोगश्च जनिरित्येव पण्डितैः ॥ अन्ये सर्वे श्रियाबद्धाः श्रीर्बद्धा विष्णुनैवतु । बन्धश्च विष्णुतन्त्रत्वं मुक्तानां च श्रियस्तथा ॥ अमुक्तानां तु बद्धत्वं जन्ममृत्यादिदु खिना । द्वयो बन्धश्च सेवस्वाजवत्योबद्धा स्थिति" ॥ एतेन बन्धस्यानादिसान्तत्वं सिद्धं ॥

---

९. प्रश्नः किं शास्त्रं ?

उत्तरं—

पान्डुरङ्गी माधवाचार्याः—शास्तीति शास्त्रं । "ऋग्यजुस्सामाथर्वांश्च भारतं पञ्चरात्रकम् । मूलरामायणं चैव शास्त्रमित्यभिधीयते ॥ यच्च,

नुकूलमेतस्य तच्च शास्त्रं प्रकीर्तितम् ।'' इति स्कान्दे ॥

हरिहरशास्त्रिणः—अनधिगताबाधितप्रयोजनवदर्थबोधकशब्दसमुदायः शास्त्रं । अद्वैतसिद्धावुक्तं । शास्त्रं च श्रुतिस्मृतीतिहासपुराणानि अबाधितार्थप्रतिपादकत्वे उक्तग्रन्थबहिर्भूतशब्दस्यापि शास्त्रत्वम् । अतः सदाचारस्य न शास्त्रत्वं । कूटाकोळ व्यंकोबाचार्याणामयं पक्ष इष्टः ।

कालेज़ रङ्गाचार्याः—अज्ञातार्थबोधकशब्दसमुदायः शास्त्रं ॥

पाटराचार्यरङ्गाचार्याः—हरिहरशास्त्रिभिरुक्तश्रुत्यादिषु पंचरात्रमित्यपि ग्राह्यं । ब्रह्मसूत्रे पंचरात्राधिकरणे उत्पत्त्यसम्भवादिति सूत्रे उक्तं।

कल्याणि श्रीनिवासाचार्याः— शास्त्रं नाम वक्तृश्रोत्रोरभिमतं अनन्यसाध्यं फलमधिकृत्य तद्धेतुभूतं प्रमाणान्तराप्राप्तमर्थं प्रतिपादयतां वाक्यानां समूहो हि शास्त्रम् । अस्तिचेदं लक्षणमृगादिषु ॥ अत एवोक्तं सूत्रभाष्ये । ''ऋग्यजुस्सामाथर्वाश्च भारतं पञ्चरात्रकम् । मूल रामायणं चैव शास्त्रमित्यभिधीयते'' इति ॥ एवमेव पाण्डुरङ्गि व्यासाचार्याः— अयमेवाभिप्राय कूटाकोळ शामाचार्याणां— माचेङ्गण रङ्गनाथाचार्याणां— वीराजमङ्गलम् भीमाचार्याणां— अपशङ्कर वासुदेवाचार्याणां—

पेरियकोळम् मध्वरायाचार्याः— पूर्वोक्तमेव शास्त्रलक्षणं । 'ऋगाद्याभारतं चैव पञ्चरात्रमथाखिलम् । मूलरामायणं चैव पुराणं चैतदात्मकम् ॥ ये चानुयायिनस्त्वेषां सर्वे ते च सदागमाः'' इति तत्वनिर्णयोक्तेः ॥ मन्नारगुडि गोपालाचार्यैरिदं शास्त्रलक्षणमङ्गीकृतम् वीराजमङ्गलम् कृष्णाचार्यैश्च ॥

कौलमी मुरार्याचार्याः— शास्त्रं नाम ऋग्यजुस्सामाथर्ववेदभारतपञ्चरात्रमूलरामायणानि । अन्यानि पुराणादीनि च । एतदनुकूलानि च शास्त्रमित्युच्यन्ते । अस्मिन्नर्थे ऋग्यजुस्सामाथर्वाश्चेत्यादिस्कान्दोक्तिः प्रमाणम् ॥ एवमेव मन्नारगुडि रामचन्द्राचार्याः— तिरुक्कण्णूर शेषगिर्याचार्यैश्च ॥—

अवधानी नारायणाचार्याः— सन्ध्यामुपासीत सुरां न पिबेदे- वमादिना ॥ ऋगाद्या भारताद्याश्च पञ्चरात्रादिकास्तथा ॥ यत्करोषि य- दश्नासीत्येवंरूपाश्च सर्वशः । शासनादेव शास्त्रं स्यात् ॥

मन्नारगुडि कृष्णाचार्याः—शास्त्रत्वं नाम शिष्यते यथावस्थितं प्रतिपाद्यते तत्वमनेनेति व्युत्पत्त्या यथावस्थिततत्वप्रतिपादकत्वम् ॥ ऋ- ग्यजुस्सामाथर्वाश्च भारतं पञ्चरात्रकं इत्याद्युक्तवेदादि । वेदाद्यनुकूलञ्च ॥

तुळसी रङ्गाचार्याः—शास्त्रं । शास्तीति शास्त्रं ॥ "ऋग्यजु स्सामाथर्वाश्च भारतं पञ्चरात्रकं ॥ मूलरामायणं चैव शास्त्रमित्यभिधीयते ॥ यच्चानुकूलमेतस्य तच्च शास्त्रं प्रकीर्तितं" ॥ बृहद्ब्राह्मे । "ऋग्यजुस्सामाथ र्वाश्चेतिहासपुराणकैः । स्वागमा इति संप्रोक्ता मीमांसाधर्म एव चेति" पाद्मे । "पञ्चरात्रं भारतञ्च मूलरामायणं तथा ॥ इतिहास इति प्रोक्तो ब्रह्मांडञ्च पुराणकं" । इति प्रकाशसंहितायां ॥ वेदाश्चेतिहासाश्च पुरा णं भागवतं तथा ॥ मूलप्रमाणमुद्दिष्टं मीमांसा च तथोत्तरा ॥ एतेषामविरोधे तु मानमन्यदुदीरितं ॥ एतेषां तु विरुद्धं यदप्रमाणं विदो विदुरिति" । व्यास स्मृतौ ॥ "विष्णोस्सर्वोत्तमत्वस्य ज्ञानार्थं शास्त्रमिष्यते ॥ अतस्तत्साधकं शास्त्रं तु शास्त्रं तद्विरोधि यत्" ॥ इति ब्रह्माण्डे ॥

---

१०. प्रश्न प्रमाणानां मध्ये तारतम्यं वर्तते न वा । यदि वर्तते तर्हि वि वियतां ?

उत्तर—

मन्नारगुडीरामचन्द्राचार्याः—प्रत्यक्षमनुमानमागमश्चेति त्रिविधं प्रमाणं । तेषां मध्ये तारतम्यमपि वर्तते । दृष्टार्थविषये प्रत्यक्षस्य प्राबल्यम् । अदृष्टार्थविषये आगमस्य प्राबल्यम् । तदुभयसहकृतानुमानस्य दौर्बल्यम् । चतुर्णां वेदानामपौरुषेयत्वेन प्राबल्यं । भारतपञ्चरात्रपुराणस्मृतीनां वेदमूलकत्वात्ता न्यायतो दौर्बल्यम् । भारतपुराणपञ्चरात्रेषु तारतम्यं न वर्तते । स्मृतिषु मनु तादयस्तेषां प्रबलतराः । स्मृतयश्च मनुयाज्ञवल्क्यपराशरादिकृता [illegible]

शातातप काश्यप आत्रि गार्ग्य हारीत बाभ्रव्य गौतमेत्यादयः अष्टादश । स्मृतिषु परस्परं तारतम्यं नास्ति । पुराणेषु तारतम्यं वर्तते । पुराणानि ब्रह्माण्ड गारुड स्कांद पाद्म लिङ्ग शैव वैष्णव वायु वाराह आग्नेय कौर्म वामन नारसिंह मात्स्य भागवत मार्कण्डेय भविष्योत्तरेत्यादयः । प्रतिपुराणेषु सात्विकराजसतामसभागास्संति । गुणानुसारेण तारतम्यं । तत्र प्रमाण "अग्नेश्शिवस्य माहात्म्यं तामसेषु निगद्यते । राजसेषु तु कल्पेषु माहात्म्यं ब्रह्मणो विदुः ॥ सात्विकेषु तु कल्पेषु माहात्म्यमधिकं हरेः । तेष्वेव योगसंसिद्धाः गमिष्यंति परां गतिं ॥" इति मत्स्यपुराणवचनं ॥

हरिहरशास्त्रिणः –प्रमाणमूर्धन्या श्रुतिः । श्रुत्यनुमार्यनुमानं प्रमाणं । प्रामाण्यं द्विविधं । तात्विकं व्यावहारिकं चेति । प्रत्यक्षस्य व्यवहारविषये प्रामाण्यं । न तु पारमार्थिकविषये । श्रुतिषु तारतम्यं नास्ति । श्रुतीनां स्वतःप्रामाण्यं । स्मृत्यादीनां श्रुतिमूलकत्वेन प्रामाण्यं प्रत्यक्षश्रुतिविरुद्धस्मृतेः प्रामाण्यं नास्ति । अष्टादशस्मृतयः ग्रन्थोक्ताः । स्मृतिषु मनुस्मृतिः श्रेष्ठा । द्वितीया याज्ञवल्क्यस्मृतिः । पुराणानां ईश्वरप्रणीतत्वात्तारतम्यं नास्ति । पुराणानां परस्परं आंशिकं च तारतम्यं नास्ति । अत्र प्रमाणं महाभारते शान्तिपर्वणि राजधर्मे । "भूयस्स भगवान्ध्यात्वा चिरं शूलवरायुधः । असृजत्सर्वशास्त्राणि महादेवोमहेश्वरः ॥ विद्याश्चतस्त्रः कूटस्थास्तासां भेदविकल्पनाः । अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः । पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश । एकार्थानि पुराणानि वेदा ह्येकार्थनिश्चयाः । तस्मै वेदान्पुराणानि दत्तवानग्रजन्मने ॥ "

पाटराचार्यरङ्गाचार्याः—पंचरात्रस्य वेदतुल्यप्रामाण्यं । श्रुतिपंचरात्रापेक्षया स्मृतीनां दौर्बल्यम् । स्मृतयश्च अष्टादशभ्यो अधिका वा न वेति न ज्ञायते मया । वेदविरुद्धाः स्मृतयः त्याज्याः न प्रमाणं । स्मृतीनां मध्ये मनुस्मृतिः प्रबलतरा । इतरासु न तारतम्यं । इतिहासस्य पुराणापेक्षया प्राबल्यम् । इतिहासो नाम भारतं रामायणं च । पुराणानि इतिहासापेक्षया दुर्बलानि । पुराणानां चातुर्विध्यमस्ति । "संकीर्णाः सात्विकाश्चैव

गजसमास्तामसाः स्मृताः । संकीर्णेषु सरस्वत्याः पितृणां च निगद्यते ॥'' इत्यादिकं प्रमाणं । प्रतिपुराणेषु चातुर्विध्यं नास्ति ॥

कल्याणि श्रीनिवासाचार्यः—सिद्धान्ते प्रमाणं त्रिविधं ॥' प्रत्यक्षानुमानागमभेदात् ॥ स्वरूपेन्द्रियप्रमाणस्य तु प्रत्यक्षेन्तर्भावः ॥ अत्रप्रमाणं । अदृष्टामिन्द्रियं त्वक्षं तर्कोऽदृष्टस्तथ नुमा ॥ आगमोऽदुष्टवाक्य च स्वदृक्त्वानुभवस्मृतइति'' तत्वनिर्णयटीकायां ॥ तेषां प्रमाणानां तारतम्यं वर्तते । प्रत्यक्षप्रमाणस्यानुमनागमौ प्रति धर्मिग्राहकत्वेन उपजीव्यत्वं ॥ निरवकाशत्वे प्राबल्य ॥ अनुमानस्योपजीवकत्वं । व्याप्तिपक्षतावत्वञ्च । आगमस्याप्युपजीवकत्वम् । आगमो द्विविध । पौरुषेयो- ऽपौरुषेयश्चेति ॥ पौरुषेयस्याप्तोक्तत्वेन प्रामाण्यम् ॥ अपौरुषेयस्यागमस्य निर्दुष्टत्वेन प्रामाण्यम् ॥ एतच्च मतं तत्वनिर्णयटीकायां व्यासतर्कव्याख्यानावसरे द्रष्टव्यम् । प्रत्यक्षप्रमाण अपरोक्षप्रतीतिजनकम् । अनुमानागमौ तु परोक्षप्रतीतिजनकौ । एवं उपजीव्यत्वाद्यनेकविरुद्धधर्माधिकरणत्वात् । प्रमाणाना परस्परं तारतम्य वर्तते ॥ एवमेव पाण्डुरङ्गी व्यासाचार्याः

कृष्णाकोळ शामाचार्याः—प्राबल्यमागमस्यैव जात्यातच्छ्रुतिपूर्वकमिति तत्त्वनिर्णयवाक्यात्प्राबल्यदौर्बल्यादिना तारतम्यमस्त्येव ॥ एवमेव वीराजपल्लं भीमाचार्याः

पेरियकोळं मध्वरायाचार्याः—उपजीव्यत्वेन प्रत्यक्षं प्रबलम् । तदुपजीवनात् स्वप्रामाण्य विषये आगमस्य तदपेक्षया दौर्बल्यम् ॥ उभयोपजीवनात् व्याप्तिपक्षधर्मताविषये अनुमानस्य दौर्बल्यं ॥ एवमेव अपखङ्कर वासुदेवाचार्याः

मन्नारगुडी गोपालाचार्याः—प्रत्यक्षापेक्षया आगमः दुर्बलः ॥ तदपेक्षया अनुमानं दुर्बलं आगमस्य स्वप्रामाण्यविषये प्रत्यक्षोपजीवनात् ॥ अनुमानस्य तु व्याप्त्यवधारणविषये उभयोपजीवनात् ॥

मन्नारगुडि कृष्णाचार्याः—नियतवाक्याभ्यां साक्षिणः सर्व-

तः प्राबल्यं । दृष्टविषये प्रत्यक्षस्य प्राबल्यम् । उपजीव्यत्वात् ॥ अदृ-
ष्टविषये आगमस्य प्राबल्यम् ॥ "प्राबल्यमागमस्यैव जात्या तेषु त्रिषुस्मृ-
तं" इत्युक्तेः ॥ अनुमानस्य अनंतरम् । "प्रत्यक्षागममाहात्म्यादनुमा
नं प्रमाणतां" इत्युक्तेः ॥

कौलगी मुरार्याचार्याः—प्रमाणं त्रिविधम् । प्रत्यक्षानुमानागम-
भेदात् । तेषां मध्ये आगमस्य अदृष्टार्थविषयेऽपि स्वतःप्रामाण्येन प्रा-
बल्यं । प्रत्यक्षस्य दृष्टार्थप्रमाणभूतस्य ततोदौर्बल्यं ॥ आगमानु गृही-
तस्य अनुमानस्य प्राबल्येऽपि ततो दौर्बल्यमेव । आगमभिन्नानां इतरेषां भा-
रतपञ्चरात्रमूलरामायणेतिहासस्मृतिपुराणानां यथाक्रमं आगमाद्दौर्बल्यमेव ॥

मन्नारगुडी रामचन्द्राचार्याः—दृष्टविषये प्रत्यक्षस्य प्राबल्यम् ॥
अदृष्टविषये आगमस्य प्राबल्यम् ॥ एतदुभयापेक्षयानुमानस्य दौर्बल्यम् ॥
अतएव पूर्वतन्त्रे आदित्यो यूप इत्यत्र आदित्य शब्दस्य आदित्यदेवता-
कत्व विशिष्टे लक्षणा आश्रिता ॥ "प्राबल्यमागमस्यैव जात्या० स्मृतं"
इति ॥ प्रमाणमदृष्टार्थविषयमित्युक्तं न्यायामृते ॥ "प्रत्यक्षागम० प्र-
माणतां" इति तत्त्वनिर्णये प्रमाणमुदाहृतम् ॥

अवधानी नारायणाचार्याः—प्रमाणेष्वागमो वरः

तिरुकाम्बूर शेषगिर्याचार्याः—आगमानुसारि प्रत्यक्षस्य प्रा-
बल्यम् । आगमस्यस्वतएव प्राबल्यम् अनुमानस्य प्रत्यक्षोपजीवकत्वेन प्रा-
बल्यं "प्राबल्यमागमस्यैव जात्यातेषु त्रिषुस्मृतं" इति

---

११ प्रश्नः— मोक्षः कः?

उत्तरं. सोसलाम् रङ्गाचार्याः—"मुक्तिर्हित्वान्यथारूपं स्वरूपेण
व्यवस्थितिः" । मुमुक्षोः स्वरूपं चिदात्मकं अनाद्यविद्याकामकर्मादि-
निमित्तक [illegible] दुःखसम्बन्धः । संहिता स्वरूपेण अव-
स्थितिर्मुक्तिरित्यर्थः ॥

विजयराघवाचार्याः—परस्य ब्रह्मणः शरीरतया प्रकारभूतस्य जीवस्य अविद्यानिवृत्तिपूर्वकस्वाभाविकपरमात्मानुभव एव मोक्षः । शेषशेषितया अनुभव । भगवद्दासत्वेन कैङ्कर्यवृत्ति

हरिहरशास्त्रिणः—अविद्याकृतदोषरहितः पूर्णानन्दरूप आत्मा मोक्षः ॥

कल्याणी श्रीनिवासाचार्याः—मोक्षो नाम आत्यन्तिक दुःखनिवृत्तिसहित परमानन्दावाप्ति । "मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थिति" इति भाष्योक्तेः ॥ भवबन्धस्य समाप्तिः मुक्तिरस्य विमोचनमिति" भाष्योक्तेश्च ॥ स्वरूपाविर्भाव एव मुक्तिरिति भाव इति तत्त्वनिर्णयटीकायां च ॥ "यत स्वरूपानन्दाविर्भावमात्रं मुक्तिः । नागन्तुक कदाचिद्" इत्युक्तिस्तत्रैव ॥ एवमेव पाण्डुरङ्गो व्यासाचार्याः ॥

कृष्णकोल श्यामाचार्याः—मोक्षः मुक्तिः ॥ "मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः" इति भागवते ॥ एवमेव वीरराज मङ्गलं भीमाचार्याः तुलसी रङ्गाचार्याः

महागुरुडी गोपालाचार्याः—मुक्तिर्हित्वेत्यादिभागवतानुसारेणान्यथारूपं विहाय स्वरूपेणावस्थानमेव मोक्षः आत्यन्तिकदुःखनिवृत्तिसहित परमानन्दाविर्भावो वा

वीरराजमङ्गलं कृष्णाचार्याः—अविद्याकामकर्मस्वगुणाच्छादिका परमाच्छादिका लिङ्गशरीररूपपदावरणनिवृत्तिपूर्वकस्वरूपाविर्भावो मुक्तिरेव तत्र प्रमाणं मुक्तिर्हित्वेत्यादि भागवतवचनं ॥

महागुरुडी कृष्णाचार्याः—प्रकृतिप्राकृतबन्धननिवृत्तिः मोक्षः अनिरुद्धाविर्भावः स्वरूपानन्दाविर्भावश्च मोक्षः ॥ तदुक्तं । "कर्मक्षयस्तथोत्क्रान्तिर्मार्गोऽथागमनस्तथा" इति ॥ कर्मक्षयः उत्क्रान्तिश्च बन्धनिवृत्तावन्तर्भूतौ ॥ उत्क्रान्ति लिङ्गशरीरात् । सालोक्य सामीप्य सारूप्य सायुज्यमिति च प्रकारान्तरेण भेदः । तदुक्तं "सालोक्यं च समीपत्वं सारूप्यं योग एव चेति" । स्वरूपाविर्भावश्च मोक्षः । "परंज्योतिरु-

पसम्पद्यस्वेन रूपेणाभि निष्पद्यते" इति श्रुतेः ॥

कौकणी मुरार्याचार्याः—मोक्षश्च स्वरूपभूतदेहस्य अन्यथा-भावं विहाय स्वरूपेणैव व्यवस्थितिः मोक्ष इत्युच्यते । अस्मिन्नर्थे मु-क्तिर्हित्वेत्यादि भागवतोक्तिः प्रमाणम् ॥

मन्नारगुडी रामचन्द्राचार्याः—अन्यथारूप बन्ध निवृत्तिपुर-स्सरस्वरूपावस्थानं मोक्षः ॥ तदुक्तं भागवते "मुक्तिर्हित्वेत्यादिना-वाराहे च । "भूनबन्धस्तु संसारइत्यादिना ॥

अवधानी नारायणाचार्याः—भूनबन्धध्वंसपूर्वास्वरूपाविष्कृ-तिर्हि या, सैवमुक्तिर्मोक्षसंज्ञा-

---

१२. प्रश्न मुक्तबद्धदशयोः कि तारतम्य । कस्यां दुःख स्वल्पतरं'

उत्तरं—

मन्नारगुडी रामचन्द्राचार्याः—तमोयोग्यानां बद्धदशाया सामा रिकं दुःखं स्वल्प । मुक्तिदशायां दुः खमधिकं ॥

कल्याणी श्रीनिवासाचार्याः—मुक्तबद्धदशयोर्लिङ्गशरीरित्वाश-रीरित्वाभ्यां तारतम्यं वर्तते ॥ सुखरूपचेतनस्य बद्धावस्थायां दुःखरूपचे-तनस्यतदवस्थायां च दुःखं स्वल्पतर ॥

कूटाकोल शामाचार्याः—मुक्तत्वं नाम बन्धध्वंसाधिकरणत्वमिति-तत्त्वोद्योतटीकावाक्यात् बन्धध्वंसाधिकरणेमुक्ते दुःखाभावः। बद्धे जीवे एव दुःखमङ्गीकरणीयं ॥

पेरियकोळं मध्वरायाचार्याः—मुक्तबद्धदशयोः तारतम्यं तु भूत संबन्धतन्निवृत्तिभ्यां । अल्पतरं दुःखं जीवन्मुक्तानां ।

मन्नारगुडि गोपालाचार्याः— मुक्तबद्धदशयोः दुःखाभावतद्भा-वकृतमेव तारतम्यम् ।

मन्नारगुडि कृष्णाचार्याः— मुक्तिदशायां दुःखं नास्ति आप्त-

कामत्वं च भवति संसारदशायां तन्न सम्भवति । दुःखं बहुतरं आप्तकामत्वं नास्ति । किञ्चित्सुखं च भवति ॥ "इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च" तेषा महं समुद्धर्ता मृत्युसम्सारसागरात् ॥ भवामि न चिरात्पार्थमय्यावेशितचेतसा मिति च गीतायां

कौलगी मुरार्याचार्याः—मुक्तस्य मुक्तदशायां अतिबहुतमं सुखं प्राप्तमसोपि तद्दशाया अपि बहुतम दुःखं बद्धयोस्तु अल्पतरं सुखं दुःखं च अत्रार्थे नारायणतन्त्रोक्ति. प्रमाणं "नाप्रियं किञ्चिदपि तु मुक्तानां विद्यते क्वचित् ॥ कुत एव तु दुःखं स्यात्सुखमेवसदोदितं ॥ नान्धे तमसिमग्नानां सुखलेशोविधीयते" ॥ इत्यादिना मुक्तबद्धदशयोस्तारतम्य अल्पतरदुःखस्थानं च ज्ञायते

मन्नारगुडी रामचन्द्राचार्याः—समारदशायां सुखदुःखमिश्रता भवति । मुक्तौ तु सर्वदुःखविमुक्तताभवति । " इदं ज्ञान० प्रलये न व्यथन्तिच" । " तेषामहं समुद्धर्तामृत्यु० चेतसा मिति च गीतावचनात् ॥ "स्वयं ज्योतिरूपसम्पद्यस्वेन रूपेणाभिनिष्पद्यते" इति श्रुतेश्च । "स तत्रपर्येति जक्षन् क्रीडन्रममाण." इति च ॥

पाण्डुरङ्गी व्यासाचार्याः—मुक्तदशबद्धदशयोस्तारतम्यं उच्यते ॥ मुक्तत्वदशायां तद्भोगयोग्याश्चतुर्विधाः सालोक्यसामीप्यसारूप्यसायुज्यभोगवन्त इत्यधिकारिणः । तेषु मध्ये केचनभगवत्समीपे यथेष्टभोगवन्तः । केचन चतुर्भुजा शङ्खचक्राद्यायुधवन्तः । केचनभगवच्छरीरं प्रविश्य यथेष्टभोगवन्तः । केचन ऋगादिवेदोच्चारणेन भगवन्तं स्तुवन्ति ॥ केचन शुद्धसत्त्वानिर्मितर्लीलाशरीराण्युपादाय क्रीडन्ति । एवमनेकभोगप्राप्तिर्भवति । अत्रप्रमाणं बृहद्भाष्ये । "उपासनाबलान्मुक्तौ भोगान्भुङ्क्ते विष्णोस्समीपस्थास्सर्वे दोषविवर्जिता" इति । स तत्रपर्येति जक्षन्क्रीडन्रममाणः स्त्रीभिर्वायानैर्वा ज्ञातिभिर्वेति अनेकश्रुतयः । तथाचानेकस्वाभाविक सुखानुभवोस्ति मुक्तत्वदशायां ॥ बद्धत्वाव-

क्रतुं कुर्वीत " इत्यत्र क्रतुशब्देन असकृद्ध्यानं विवक्षितं । ब्रह्मयज्ञविषये गायत्र्याद्युच्चारणं यज्ञशब्दार्थः ।

पाटराचार्य अब्बाचार्याः—क्रतुशब्दस्य ज्ञानपरत्वं क्रियापरत्वं उभयमप्यस्ति यज्ञशब्दस्य तु क्रियामात्र परत्वं ।

कालेज् रङ्गाचार्याः—यज्ञ शब्दः महायज्ञपरः । अन्ययज्ञपरः क्रतुशब्द इति श्रीगीताभाष्ये । सोमसाध्यः क्रतुः । इतरे यज्ञा इति अध्वर्युक्रतुरनपुंसकमिति " सूत्रव्याख्या काशिकायां ।

हरिहर शास्त्रिणः—यज्ञक्रतुशब्दौ भिन्नार्थकौ "सक्रतुं कुर्वीते त्यादौ क्रतुशब्दः उपासनापर. । गीताभाष्ये तु क्रतुशब्दः श्रौतक्रियापरः । यज्ञशब्दः स्मार्तक्रियापरः ।

कोलगीं मुरार्याचार्याः—यज्ञशब्दः नित्यनैमित्तिककर्मपरः । क्रतुशब्दः नैमित्तिककर्मपरः । " पाठो होमश्चातिथीनां सपर्या तर्पणं बलिः । एते पञ्चमहायज्ञाः " इत्यमरकोशवचनात् । दीक्षाप्रायणीयोदयनीयसवनत्रयावभृथात्मकः क्रतुः " इत्याचार्यवचनात् ॥

पाण्डुरङ्गी रङ्गाचार्याः—यज्ञः देवतोद्देशेनद्रव्यत्यागः " उद्दिश्यदेवान्द्रव्याणां त्यागोयज्ञइतीरितः " इतिगीताभाष्यात् । अङ्गकलापविशिष्टः क्रतुः । दीक्षाप्रायणीयेति भाष्यवचनात् ॥

कूटाकोळ शामाचार्याः—यज्ञक्रत्वोः भेद वर्तते । अहं क्रतुरहं यज्ञ इति गीताविवरणसमये यज्ञा अयूपाः क्रतवः सयूपा इत्युक्तत्वात् । एवमेव बीराजमङ्गलं भीमाचार्याः ॥

धर्मशास्त्री दादाचार्याः—क्रतुर्नाम यूपदीक्षणीयप्रायणीयोदयनीयावभृतसवनत्रयात्मकः । "सप्तदशारात्निर्वाजपेयस्य यूपो भवति" इत्यादिप्रमाणात् । यज्ञो नाम पौर्णमासेष्ट्यादिः । तपआदिश्च भवति । गीतायां तथोक्तेः ।

मन्नारगुडी गोपालाचार्याः—यज्ञो देवतामुद्दिश्य द्रव्यत्यागः । क्रतवोऽग्निष्टोमादयः । उद्दिश्य देवान् द्रव्याणां त्यागो यज्ञ इतीरित इत्य-

भिधानात् । "अहं क्रतुरहं यज्ञ" इति श्लोकव्याख्यानावसरे गीताभाष्ये स्पष्टं ॥

मन्नारगुडी कृष्णाचार्याः—दीक्षाप्रायणीयोदयनीयसवनत्रयात्मभूतात्मकः क्रतुरिति टीका । ताद्विशिष्टत्वाज्ज्योतिष्टोमादयोऽपि क्रतुशब्दवाच्याः । यज्ञः देवतामुद्दिश्य द्रव्यत्याग इति भाष्यं । यज्ञक्रत्वोः सामान्यविशेषभाव एव भेदः ॥

कोलगी मुरार्याचार्याः—यज्ञक्रत्वोर्भेदस्तु सच्छास्त्रप्रवचनाग्निहोत्रोपासनादिनित्यहोमदेवब्राह्मणातिथ्यभ्यागतादिपूजनश्राद्धादिना पितृसंतोषणादयो यज्ञशब्दार्थाः । "पाठो होमश्चातिथीनां सपर्या तर्पणं बलिः । इति कोशात् । दीक्षाप्रायणीयोदयनीयसवनत्रयावभृतात्मकः क्रतुरिति भाति । तथा महतां रूढेः इयानेव यज्ञक्रत्वोर्भेद इति भाति ॥

पांडुरङ्गी व्यासाचार्याः यज्ञो नाम देवतोद्देशेन यो द्रव्यत्यागस्स याग इत्युच्यते । क्रतुर्नाम दीक्षाप्रायणीयोदयनीयसवनत्रयात्मभूतात्मकः । यज्ञक्रत्वोरयं भेदः । मन्त्रभाष्ये स्पष्टं । अयूपा यज्ञाः सयूपाः क्रतव इति वा । एवमेव **अपशङ्कर वासुदेवाचार्याः पेरियकोलं मध्वराया-चार्याश्च** ॥

अवधानी नारायणाचार्याः—देवतोद्देशतो द्रव्यत्यागो यज्ञः प्रकीर्तितः । अग्नीषोमीयसवनत्रयाद्यात्मा क्रतुर्भवेत् । इति गीताद्युक्तमेव ॥

१९ प्रश्नः किं नाम अशब्दं?

उत्तर **हरिहर शास्त्रिणः**—अशब्दं शब्दाप्रतिपाद्यं ।

पाटराचार्य अब्बाचार्याः—न विद्यते शब्द एव प्रमाणं यस्मिन्तत् प्रधानं ।

पाण्डुरङ्गी रङ्गाचार्याः—अशब्दं यौगिकं पदमिदं शब्दावाच्यमित्यर्थः ॥

कूटाकोळ शामाचार्याः—अशब्दं शब्दाख्यगुणशून्यं । अशब्दमित्यादेः शब्दादिगुणशून्यं तदविषयश्चेत्यर्थ इति तत्त्वप्रकाशिकायामुक्त-

त्वात् ॥ एवमेव वीराजमङ्गलं भीमाचार्याः ॥

पेरियकोळं मध्वरायाचार्याः—न विद्यते शब्दो वाचको यस्य तदशब्दं । शब्दावाच्यमित्यर्थः । एवमेव पाण्डुरङ्गी व्यासाचार्याः अप-शङ्कर वासुदेवाचार्याः

धर्मशास्त्री दादाचार्याः—अशब्दमित्यस्य सर्वेऽपि लौकिकवैदिकशब्दाः साकल्येन तत्स्वरूपवाचका न भवन्तीत्यर्थः । तर्हि अवाच्यत्वं सिद्धमिति न वाच्यम् । अप्रसिद्धत्वेन तस्योपपत्तेः । यथा "न तदीदृगिति ज्ञेयं न वाच्यं न च तर्क्यते । पश्यंतोऽपि न पश्यति मेरो रूपं विपश्चितः" इति । किं च अप्रसिद्धेरवाच्यं तद्वाच्यं सर्वागमोक्तितः । अतर्क्यं तर्क्यमज्ञेयं ज्ञेयमेवं परं स्मृत" इति वचनबलात् । एवमेव वीराजमङ्गलं कृष्णाचार्याः ॥

मन्नारगुडी गोपालाचार्याः—शब्दावाच्य शब्दानधिकरणं अशब्दशब्दार्थः ॥

मन्नारगुडी कृष्णाचार्याः—तत्पुरुषसमासपक्षे शब्दं वर्जयित्वा सर्वमप्यशब्दमेव । बहुव्रीहिपक्षे शब्दावाच्यत्वं तदर्थो भवति । शब्दावाच्यं अस्मन्मते नास्ति । सांख्यमते अशब्दशब्दः प्रधानवाचकः । एतच्च कारणत्वेन शास्त्रप्रतिपाद्यं अशब्दं प्रधानं न तस्य अशब्दत्वात् इत्यद्वैतिनां ईक्षतेर्नाशब्दमिति सूत्रव्याख्यानादवगम्यते ।

कौलगी मुरार्याचार्याः—लोके सर्वस्यापि वस्तुनः किञ्चिच्छब्दवाच्यत्वात् किं नाम अशब्दमिति प्रश्नार्थो नावगम्यते । तथापि सौत्राशब्दपदमुद्दिश्यायं प्रश्न इति भाति । तस्य न विद्यये वाचकश्शब्दो यस्य तत् अशब्दं शब्दावाच्यमित्यर्थः ॥

अवधानी नारायणाचार्याः—अवाच्यं नैवेह किं च न ॥ अतो ह्यशब्दं किमिति प्रश्नो न विवृतो मया ॥

१६ प्रश्नः ईक्षतेर्नाशब्दं अस्यसूत्रस्य कोऽर्थः

उत्तरं हरिहर शास्त्रिणः—प्रधानमिति पदमध्याहार्यं । सांख्यपरि-

कल्पितं प्रधानं जगत्कारणं न । अशब्दं अशब्दत्वात् ईक्षतेः ईक्षणकर्तृ-त्वाज्जगत्कारणस्य ॥

पाटराचार्य रङ्गाचार्याः—प्रधानपदं नाध्याहार्यं अशब्दं सा-ध्य ।

पाटराचार्य श्रीनिवासाचार्याः—ना शब्दं साध्यं ।

कल्याणी श्रीनिवासाचार्याः—ब्रह्मणः अवाच्यत्वनिरासार्थ-मिदं सूत्रं । तत् ब्रह्म अशब्दं शब्दावाच्यं न ईक्षतेः । ब्रह्मणः ज्ञानवि-षयत्वात् ॥

कृटाकोळ **शामाचार्याः**—ब्रह्म अशब्दं न । शब्दावाच्यं न । ईक्षतेः । प्रत्यक्षे तज्ज्ञानविषयत्वात् ॥

पेरियकोळं **मध्वरायाचार्याः**—तत् ब्रह्म । प्रत्यक्षाद्यवेद्यत्वे सति ईक्षणीयत्वात् । विषयतासम्बन्धेन ईक्षणवत्वात् । पुरिशय पुरु-षमीक्षत इत्यादिश्रुतिः प्रमाणं ॥

धर्मशास्त्री **दाढाचार्याः**—अशब्दमिति पूर्वपक्षे प्रापिते उत्तरं सकलशास्त्रप्रतिपाद्यं ब्रह्म अवाच्य न भवति । ईक्षतेः । ईक्षणीयत्वा-त् । यदीक्षणीयं तदवाच्यं न । किं तु वाच्यमेव यथा घटादिकं । एव मेव श्रीराजमङ्गलं **कृष्णाचार्याः**—

मन्नागुडि **कृष्णाचार्याः**—तत् ब्रह्म । अशब्दं शब्दावाच्यं न । ईक्षतेः । ईक्षणकर्मत्वव्यपदेशात् ईक्षतिरिति धातुनिर्देशः । तेन तदर्थः ईक्षणं लक्ष्यते । तस्यापि प्रकृते अनुपयोगात्तत्कर्मत्वं लक्ष्यते ॥ अतश्च लक्षितलक्षणया ईक्षणकर्मत्वमर्थः ।

कौलगी **गुरार्याचार्याः**—ईक्षतेर्नाशब्दमित्यत्र ईक्षतिधातोः स्वा-र्थभूतईक्षणक्रियायां लक्षणा । तथा च ईक्षतेः ईक्षणात् इतिभवति हे-तुभूतस्य तस्य असम्बद्धस्य अन्वयायोगात् सम्बद्धस्य च कर्तृत्वरूपस्य श्रुत्यननुसारित्वेन स एतस्मादिति श्रुतौ तावत् "पुरिशयं पुरुषमीक्षते' इति कर्मत्वस्यैव श्रवणात् कर्मत्वमेव अङ्गीकरणीयं । तच्चशब्दावाच्यत्वे

विभज्य शिष्यानुपदिश्य तान् तत्प्रवर्तकान् चकार । तत्र यजुर्वेदप्रवर्तकौ वैशम्पायनसूर्यौ इत्युक्तत्वात् सूर्यस्यैव वाजसनेयशाखाप्रवर्तकत्वात् ॥

अव० **नारायणाचार्याः** वेदव्यासेन व्यस्तामु तैत्तिरीया हि गण्यते । नैव वाजसनेयेति श्रीमद्भागवते स्थितं ॥

तुळशी रंगेशाचार्याः "भेदान्नेति चेन्नैकस्यामपि" ॥ "स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च" ॥ एतत्सूत्रद्वयेऽपि "वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मने"ति स्मृतेः । "सर्ववेदोक्तमार्गेण कर्म कुर्वीत नित्यशः ; आनन्दो हि फलं यस्माच्छाखाभेदो ह्यशक्तिजः । सर्वकर्मकृतौ यस्मादशक्ताः सर्वजन्तवः ॥ शाखाभेदं कर्मभेदं व्यासस्तस्मादचीक्लृपत्" ॥ इति भाष्ये उक्त्वा टीकायां । ध्यानार्थिना श्रवणमननाभ्यां सर्ववेदार्थनिर्णाय ज्ञातव्यमित्युक्त्वा कुतः एवं काण्वैः ज्ञातव्यं एवं माध्यन्दिनैरित्युक्त्वा न हि सर्वशाखोक्तं वस्त्वेक कस्यांचिच्छाखायां विज्ञानमानंदं वस्तूच्यते क्वचिच्च सत्यं ज्ञानानन्तं क्वचिदपहतपाप्मत्वादिरूपमिति उक्त्वा शाखाभेदात्कर्मभेदमप्यस्तीति तद्विवरणार्थ सामगो बहृचोऽध्वर्युः शिखीति दृष्टान्तीकृतं । एतेन श्रीवेदव्यासैः शाखाभेदः कृतः । तन्मध्ये इयमेकेति ज्ञायते ॥

१९ प्रश्नः अथर्वशाखा वर्तते न वा?

उत्तरं **मभारगुडा रामचन्द्राचार्याः**—अथर्वशाखा वर्तते ।शन्नोदेवीति तस्याः प्रथमो मन्त्रः त्रिमतस्थानामपिसम्मतोयमर्थः ॥

कृटाकोळ **श्यामाचार्याः**—अथर्वशाखा वर्तत एव । "ऋग्यजुस्सामाथर्वाख्ये"ति स्कान्दोक्तेः । एवमेव वीरा० **भीमाचार्याः**—भागवते विभागकथनादित्यपि मन्ना० **गोपालाचार्याः**— पाण्डु० **व्यासाचार्या** अपि ॥

धर्म० **मादाचार्याः**—अथर्वशाखा वर्तत इति श्रूयते । चतुर्वेदानामपि ब्रह्मयज्ञादापठनादिदर्शनात् । "चक्रेऽथ जैमिनिं साम्नामथर्वाङ्गिरसामपि । सुमंतुं" । इति सुमंतोः अथर्ववेदप्रवर्तकत्वोक्तेश्चेति

एवमेव मन्ना० कृष्णाचार्याः ॥

कोल० मुगार्याचार्याः—अथर्वशाखा एतद्देशे अपठ्यमाना-देशांतरे वर्तत इति श्रूयते । एतद्देशे तु शन्नोदेवीति ऋक् अथर्वशाखा आदिमत्वेन प्रेक्षावद्भिः पठ्यते ॥

अव० नारायणाचार्याः—वर्वत्यथर्वशाखापि तत्रवेदमपि स्फुटं ॥

प्रश्नः २० परिसंख्या विधिना प्राप्तानां कर्मणां नियम विधिना सङ्कोचितानां कर्मणां आचरणं मोक्षप्रतिबन्धक वा न वा'

उत्तरम् मन्ना० गोपालाचार्याः—परिसंख्याविधेर्निवृत्तिफलकत्वेन तेन प्राप्तिरेव नास्ति । यथाकथञ्चित्प्राप्तावपि तस्य नियमविधिना कुत्रापि सङ्कोचो न दृष्ट इति प्रश्न एवानुपपन्न इव भाति ॥

मन्ना० कृष्णाचार्याः—कर्मानुष्ठानं तु न मोक्षप्रतिबन्धकं । "उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्" इत्यत्र पूर्वोत्तरकर्मणां नाशस्योक्तेः । "आरब्धयोश्च नाशः स्यादल्पयो पुण्यपापयोरिति" प्रारब्धस्यापि नाशे इतरेषां मोक्षप्रतिबन्धकत्वं नास्तीति किमु वक्तव्यं ॥

मन्ना० रामचन्द्राचार्याः—परिसंख्यानियमविधिप्राप्तानां कर्मणां मोक्षप्रतिबन्धकत्व नास्ति । "तदधिगम उत्तरपूर्वाघयोरित्यादिब्रह्मसूत्र प्रमाणं ॥

पाटराचार्य रङ्गाचार्याः—विधित्रयप्राप्तानामपि कर्मणां फलाभिसंधि सहितानां मोक्षप्रतिबन्धकत्वं । फलाभिसंधिरहितानां मोक्ष प्रतिबन्धकत्वं नास्ति ॥

हरिहर शास्त्रिणः—कर्मणां मोक्षप्रतिबन्धकत्वं नास्ति । किंतु चित्तशुद्धिद्वारा तत्वज्ञानद्वारा मोक्षसाधकत्वं । करणे अकरणेच प्रत्यवायो नास्ति इति ॥

एतेषां मध्ये के श्रेष्ठा इति महान प्रश्नः ।

॥ ॐ तत्सत् ॥
